अनन्तगुणवार्धि (anantaguṇa-vārdhi) *m.* ocean of infinite noble qualities सः ...अनन्तगुणवार्धिश्च आदिदेवो महाद्युतिः DevīBhāP. viii. 20. 31.

अनन्तगुणविभूतिक (anantaguṇavibhūti-ka) *adj.* possessed of endless virtues or excellences and superhuman powers यदा त्वस्मदुक्तन्यायेन सकलकर्मसमाराध्यमनन्तगुणविभूतिकं ब्रह्म वेदान्तवेद्यं, तदा तु न विरोधगन्धोऽपि ŚatDū. 56. 1.

अनन्तगुणविभूतिमत् (anantaguṇavibhūti-ma(n)t) *adj.* possessed of endless virtues or excellences and superhuman powers अनन्तगुणविभूतिमत्त्वस्य स्पष्टतया च भगवद्गीतावचनानि पूर्वमुपन्यस्य पश्चात् पुराणवचनानि प्रदर्श्यन्ते ŚrutaPra. iA. 209. 27 (on i. 1. 1)

अनन्तगुणविभूतिविस्तार (anantaguṇavibhūti-vistāra) *m.* expansion of the innumerable noble qualities and superhuman powers भगवत्प्राप्तिकामस्याप्युपासनवेलायामनन्त° ... °[गुणविभूतिविस्तारस्यास्त्य]भोग्यता, तस्य फलकालमात्रानुभाव्यस्य विशेषतोऽज्ञानादभ्यर्थनं नोपपद्यते NyāyKu. 194. 12.

अनन्तगुणविशिष्ट (anantaguṇa-viśiṣṭa) *adj.* characterised by infinite noble qualities अतोऽनन्तगुणविशिष्टं ब्रह्मानुभवतीत्यर्थः ŚrutaPra. iA. 199.22 (on i. 1. 1)

अनन्तगुणशक्ति (ananta-guṇaśakti) *adj.* possessed of infinite noble qualities and powers नमः। आत्मने ब्रह्मणे तुभ्यमनन्तगुणशक्तये ŚivaP. i. 10. 30 (8B. 14)

अनन्तगुणशक्तिमत् (anantaguṇaśakti-ma(n)t) *adj.* possessed of infinite noble qualities and powers एतावानेव नैव त्वमनन्तगुणशक्तिमान्। नमस्तुभ्यम् BṛDharmaP. i. 46. 35.

अनन्तगुणसंयुक्त (anantaguṇa-saṁyukta) *adj.* possessed of infinite noble qualities अनन्तगुणसंयुक्तं गोलोकबीजमव्ययम्। गोलोकबीजसंस्पर्शात् कृष्णाद्याः पञ्चधा मता KālīViT. 35. 22.

अनन्तगुणसन्निधि (anantaguṇa-sannidhi) *m.* great treasure of infinite noble qualities अनन्तगुणसन्निधौ ...। जिनेश्वर सतीदृशे त्वयि मयि स्फुटं तादृशे YaśasCam. ii. 389.11.

अनन्तगुणसंपन्न (anantaguṇa-sampanna) *adj.* endowed with infinite noble qualities अनन्तगुणसंपन्नम् ... अनन्तरूपिणं वन्दे गुरुम् MīmāNyāPra. 193. 9.

अनन्तगुणात्मन् (anantaguṇātman) *adj.* possessed of infinite noble qualities अतोऽनन्तगुणात्मैको भगवानेक एव तु। उच्यते सर्ववेदैश्च AnuVyā. 46A. 1 (on 3. 2)

अनन्तगुणाप्रतिपादन (anantaguṇāpratipādana) *n.* non-reference to innumerable noble qualities अनन्तगुणपरिपूर्णत्वं हि प्रधानलक्षणम्। तत्र च शास्त्रं प्रमाणीक्रियमाणं वचनवृत्त्या सर्वमेव च युक्तम्। लक्षणादिना वृत्तौ वाच्यार्थगुणालाभात्। वाच्ये तद्गुणप्रसङ्गाच्च। एवं कतिपयवाक्यैरनन्तगुणाप्रतिपादनात् NyāySu. (Ja.) 113A. 7 (on i. 1. 4)

अनन्तगुणाभिराम (anantaguṇābhirāma) *adj.* charming on account of infinite noble qualities स्नानं सुतोयैः समुदाचर त्वं मृत्युंजयानन्तगुणाभिराम MṛtyuMāPāSt. 9.

अनन्तगुणार्णव (anantaguṇārṇava) *m.* ocean of infinite noble qualities स एव भगवाननन्तोऽनन्तगुणार्णव आदिदेवः ... लोकानां स्वस्तय आस्ते BhāgP. v. 25.6.

अनन्तगुणालय (anantaguṇālaya) *m.* abode of infinite noble qualities मय्यनन्तगुणालये। अविच्छिन्ना मनोवृत्तिः ...। तदेव भक्तियोगस्य लक्षणम् ... vii. 7. 64.

अनन्तगुणावास (anantaguṇāvāsa) *m.* abode of infinite noble qualities अस्त्यनन्तगुणावासः ··· । ध्यातः कैवल्यदः पुंसां महादेवः SaurP. 32. 12.

अनन्तगुणाश्रय (anantaguṇāśraya) *m.* locus of infinite noble qualities जय देव जगन्नाथ ··· । जय कोटयर्कसंकाश जयानन्तगुणाश्रय SkandP. iii(3). 7. 62.

अनन्तगुणित (ananta-guṇita) *adj.* multiplied infinite times जप-संख्यानम् ··· । कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् ŚivaP. vii(2). 14. 36 (560B. 9); सर्वेणातीतकालेन यच्च मुक्तं महर्द्धिकैः । ··· अनन्तगुणितं तस्मात् ··· । एकस्मिन् समये भुङ्क्ते तत्सौख्यं परमेश्वरः KnmāPraPra. 85. 10.

अनन्तगुणोपेत (anantaguṇopeta) *adj.* possessed of infinite noble qualities एको नारायणस्त्वासीत् ··· । नित्यानन्तगुणोपेतः BṛBrahmaS. iv. 6. 32.

अनन्तगुणौघ (anantaguṇaugha) *m.* abundance of infinite virtues or noble qualities सोऽयं हरिरिवानन्तगुणौघः कमलाकरः KathāSaSāg. xii. 4. 88.

अनन्तगुप्त (anantagupta) *m.* name of a former Buddha येषु भो धुतधर्मधरसम्यक्संबुद्धेषु भगवता शाक्यराजवंशप्रसूतेन कुशलमूलमुपचितं तेषाम् ··· नामानि शृणु । ··· लोकक्षत्रियः अनन्तगुप्तः ··· रतनचूडः MaVastuAva. i. 138.8 [DBHS.]

अनन्तगुह (ananta-guha) *adj.* possessed of infinite number of caves 'शो तनूकरणे' शातं कृशम् ··· उदरं यस्याः सा शातोदरी । शातोदरस्यानन्तगुहस्य हिमवतोऽपत्यं हैमवतीत्यर्थो वा LalitāSaBh. 61.6 (*on* 94)

अनन्तगोदानज (anantagodāna-ja) *adj.* arising from the gift of an unlimited number of cows गीते वाद्ये चानन्तगोदानजं फलं भवतीत्यर्थः TristhaSe. 127.18.

अनन्तघटध्वंस (anantaghaṭa-dhvaṃsa) *m.* (final) destruction of innumerable pots अनन्तघटध्वंसेऽपि घटान्तरस्थितिवदनन्तकल्पानां ध्वंसेऽपि कल्पान्तरवत् ··· यथोपलम्भमानन्त्यातिशयाद् व्यवस्थोपपत्तेः ŚatDū. 151. 16.

अनन्तघटव्यक्ति (ananta-ghaṭavyakti) *f.* innumerable individual pots अनन्तघटव्यक्तीनां तदितरानन्तव्यक्तीनां च प्रवेशेन गौरवापत्तेः MīmāKau. i. 141. 14 (*on* I. 3. 30)

अनन्तघोष (ananta-ghoṣa) *adj.* making everlasting sharp sound तदर्जुनास्त्रं ग्रसते स्म वीरान्वियत्तथाकाशमनन्तघोषम् MahāBhā. viii. 66. 2; *m.* name of a Bodhisattva यथा । च मैत्रेयस्य बोधिसत्त्वस्य ··· तथा ··· अनन्तघोषस्य ··· बोधिसत्त्वस्य GaṇḍVyū. 347. 11 [DBHS.]

अनन्तचक्षुरादिव्यक्ति (anantacakṣurādi-vyakti) *f.* individual visual organs etc. which are innumerable न तु चक्षुरादीन्द्रियम् ··· प्रतिसर्गमनन्तचक्षुरादिव्यक्तीनां भगवति कल्पने गौरवात् LaCandr. 744. 29.

अनन्तचक्षुस् (ananta-cakṣus) *m.* epithet of Śiva (*lit.* one who is of limitless vision) अप्रमेयशरीराय सर्वतोऽनन्तचक्षुषे । ··· नमः। ··· शूलिने ··· त्र्यम्बकाय MahāBhā. xii. 47. 50; शूलिने नमः । ··· चतुर्विधस्य सर्गस्य प्रभवेऽनन्तचक्षुषे VāyuP. i. 24.201(? 101); LiṅgaP. i. 21. 15; *adj.* of limitless vision ज्ञानावरणनिर्हासात्समस्तेऽनन्तचक्षुषे MahāP. 25. 81 (comm. अनन्तज्ञानाय)

अनन्तचतुर्दशी (ananta-caturdaśī) *f.* the fourteenth day of the bright half of the month *Bhādrapada* when lord Ananta is worshipped चतुर्दशीव्रतं प्रोक्तं ततोऽनन्तचतुर्दशी BhaviP. 902A. 8 (iv. 208. 22)

अनन्तचतुष्क (ananta-catuṣka) *n.* (Jain.) the four-Infinitudes (of cognition, right vision, happiness and energy), cf. **अनन्तचतुष्कसंपत्ति, अनन्तचतुष्की, अनन्तचतुष्टय.**

अनन्तचतुष्कसंपत्ति (anantacatuṣka-sampatti) *f.* perfection of the four Infinitudes यद्यपि श्रीवर्धमानस्य परमेश्वरस्यानन्तचतुष्कसंपत्तेरुत्पत्त्यनन्तरं सर्वकालं तुल्यत्वाचयापचयौ न स्तः SyādvāMañ. 1(110)

अनन्तचतुष्कसंपद् (anantacatuṣka-sampad) *f.* perfection of the four Infinitudes श्रिया कृत्स्नकर्मक्षयाविर्भूतानन्तचतुष्कसंपद्रूपया वर्धमानम् SyādvāMañ. 1(108)

अनन्तचतुष्कान्तर्भाविन्व (anantacatuṣkāntarbhāvi-tva) *n.* the state of being included in the four Infinitudes श्रीवर्धमानविशेषणेनानन्तचतुष्कान्तर्भावित्वेनानन्तविज्ञानत्वमपि सिद्धम् SyādvāMañ. 1(112)

अनन्तचतुष्की (ananta-catuṣkī) *f.* group of four Infinitudes सोऽप्यथानुजविपत्तिविरक्त्यात्तव्रतो मुनिसुगाङ्कुशपार्श्वे । प्राप्य केवलमनन्तचतुष्कीं स्वानमापदपुनर्भवरूपम् TriṣaŚaPuC. iv. 4. 308.

अनन्तचतुष्टय (ananta-catuṣṭaya) *n.* group of four Infinitudes अलङ्घ्यं त्रिजगत्सारं यस्यानन्तचतुष्टयम् । नमस्तस्मै जिनेन्द्राय GaṇiSāSam. 0. 1; मैत्रीप्रमोदकारुण्यमाध्यस्थ्याख्या महागुणाः । युक्तस्तैर्लभते मुक्तिं जीवोऽनन्तचतुष्टयम् PārśvC. 6. 382; यद्यप्यनन्तचतुष्टयावाप्तिर्मुक्त्योच्यते जिनेन । तथापि सा संप्रतिपन्नत्वान्नानुदिता नापि दूषिता NyāySu.(Ja.) 627A. 2 (*on* iv. 2. 1)

अनन्तचन्द्रप्रभा (anantacandra-prabhā) *f.* light of an infinite number of moons तदैव प्रभया तस्याः (विनायकमूर्तेः) ··· । कल्पानलार्चिर्विजितानन्तचन्द्रप्रभा हता GaneP. ii. 81. 12.

अनन्तचन्द्रार्क (ananta-candrārka) *adj.* having innumerable suns and moons यदीयदेवायतनोत्सवेषु स्वोल्लसद्राजतहैमकुम्भैः । अप्यावृतं देवगणैः समन्तादनन्तचन्द्रार्कमिवान्तरिक्षम् Raghunā. 1.62.

अनन्तचमूचक्रमहिमन् (anantacamūcakra-mahiman) *m.* glory of the troop of the huge army वैरागलानन्तचमूचक्रमहिम्नो धूलिव्रताद् बाह्लिकसारैर्निरसारि । ते दुग्धाब्धेर्निर्यति लोकस्य विवृद्धामालोकेच्छां चिच्छिदुरुच्चैःश्रवसि प्राक् Kapphiṇā. 7. 5.

अनन्तचरण (ananta-caraṇa) *adj.* having infinite number of feet यन्मे साक्षात्परं रूपं दृष्टवानसि भूधर । अनन्तशीर्षनयनमनन्तचरणं महत् । ··· तदेव पूर्वमेवेक्षितम् DevīBhāP. vii. 39. 7; योऽनन्तशीर्षानन्तश्रीरनन्तचरणः स्वराट् GaneP. ii. 79. 27; *m.* foot of Ananta (i. e. Viṣṇu), cf. **अनन्तचरणाम्भोज.**

अनन्तचरणाधार (anantacaraṇādhāra) *adj.* [*f.* -ā] having the innumerable students of the Veda as the basis अनन्तचरणाधारणामनेकलक्षाणां वेदशाखानां कात्स्न्येनोपलम्भासंभवात् ŚāstrDī. 25. 13 (*on* i. 3. 3); अनन्तचरणाधारे महीमण्डले कुत्रचित्प्रक्षयगमनाम्नानात् TantrRaha. 39. 22.

अनन्तचरणाम्भोज (ananta-caraṇāmbhoja) *n.* lotus-like foot of Ananta (i. e. of Viṣṇu) न ह्येतत्परमाश्चर्यं स्वधुन्या यदिहोदितम् । अनन्तचरणाम्भोजप्रसूताया भवच्छिदः BhāgP. ix. 9. 14.

अनन्तचरित (ananta-carita) *n.* endless exploits or adventures किमपूर्वं श्रुतं ब्रह्मन् ··· । अनन्तचरितं धन्यमनन्तस्याच्युतस्य च BrahmVaiP. iv. 56.1.

अनन्तचरित्रदायिन् (anantacaritradāy-in) *adj.* promoting innumerable (praiseworthy) conducts (through one's own model of behaviour) नमोऽनन्तचरित्रदायिने । नमः क्रमलीलात्मने । नमः श्रीराधाकृष्णरूपिणे SāmaraU. 277. 13.

अनन्तचर्चामुच् (anantacarcā-muc) *adj.* I who gives up endless discussion क्व सिध्यति समीहितं फलमनन्तचर्चामुचाम् RasiRañ. 39; II who abandons endless reflection on Ananta (i. e. on Viṣṇu) RasiRañ. 39.

अनन्तचान्द्र (ananta-cāndra) *adj.* emanating from an infinite number of moon-stones प्राचेतसं छत्रम् ··· रत्नैरुपेतं विविधैर्विराजितम् । धृतं तदा तच्च कुमारमूर्ध्नि वै ह्यनन्तचान्द्रैः किरणैर्महाप्रभैः ŚivaP. ii(4). 7. 17 (201A. 9)

अनन्तचारित्र (anantacāritra) *m.* name of a Bodhisattva अनन्तचारित्रश्च नाम बोधिसत्त्वो महासत्त्वः SaddhaPuṇ. 180. 29 [DBHS.]

अनन्तचितालोक (anantacitāloka) *m.* light or glow of long-lasting funeral pyres अथानन्तचितालोकस्पष्टभीमतरुद्रुमाम् । श्मशानप्रान्ततटिनीं पर्यटन्नासदाद सः RājTa.(Ka.) 3. 339.

अनन्तचित्रता (ananta-citratā) *f.* infinite variety किं कस्य भेदकम् — इति कथ्यमानं नास्मानाकुलयेत्, ये वयमेकां तावदनन्तचित्रतागर्भिणीं तां सविदात्मिकां गिरं संगिरामहे ParāTri. 149. 12.

अनन्तचित्रप्रतिमा (ananta-citrapratimā) *f.* innumerable images in painting अनन्तचित्रप्रतिमाभिरामैः ··· । अभावयद् गोपुरबैम्बैर्वा विश्वप्रपञ्चैरिव वैश्वरूप्यम् (द्वारका) Yādava. 11.62 (comm. असंख्याभिरालेख्यप्रतिमाभिरभिरामैः)

अनन्तचित्सागर (anantacit-sāgara) *m.* ocean in the form of infinite consciousness अनन्तचित्सागरकल्लोलजालशिखराकारं निलमञ्जुलमन्दिरम् ··· शिवालयम् SiddhāSāU. 388. 3(6)

अनन्तचिदाकृति (anantacid-ākṛti) *adj.* having the form of infinite consciousness परमार्थस्य किं रूपं तस्यानन्तचिदाकृतेः YogVā. iii. 10. 37.

अनन्तचिदादित्य (ananta-cidāditya) *m.* innumerable suns in the form of consciousness विज्ञानघनस्वरूपम् । तदन्तराले त्रिशतारचक्रं विभाति । तच्च ··· अनन्तचिदादित्यसमष्ट्याकारम् TripāMaNāU. 373. 25(7)

अनन्तचिद्रूप (anantacid-rūpa) *adj.* whose nature is of infinite consciousness अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः ĪśvaPraSū. i. 7. 1.

अनन्तचिद्विलास (anantacid-vilāsa) *m.* flash of infinite con-

sciousness अनन्तचिद्विलासविभूतिसमष्ट्याकारम् … । एवमाकारमद्वितीयाखण्डानन्दब्रह्मस्वरूपं निरूपितम् TripāMaNāU. 364. 27(4)

अनन्तचिन्मणि (anantacin-maṇi) *m.* jewel in the form of infinite consciousness तस्यानन्तप्रकाशात्मरूपस्यानन्तचिन्मणेः । सत्तामात्रात्मकं विश्वम् YogVā. iii. 12. 3.

अनन्तचिन्मय (anantacin-maya) *adj.* full of infinite consciousness अनन्तचिन्मयप्रासादजालसंकुलमनादिपादविभूतिवैकुण्ठमेवमाभाति TripāMaNāU. 370. 20(6); वाचामगोचरानन्तचिन्मयानन्दवने: परिवेष्टितम् … राशिमण्डलं ज्वलति SiddhāSāU. 385. 13(3); अनन्तचिन्मयप्रासादजालसंकुलम् … अनन्तचिन्मयासनं विराजते SiddhāSāU. 385. 17(3)

अनन्तचिन्मात्रविग्रह (anantacinmātra-vigraha) *adj.* whose body is full of only (i. e. pure) infinite consciousness (प्रमाणस्य) आत्मनि च स्वयंप्रकाशोऽनन्तचिन्मात्रविग्रहे संभवात् IṣṭaSi. 216. 21.

अनन्तचेतस् (ananta-cetas) *adj.* whose mind is (fixed) upon the Infinite (i. e. the Ultimate Reality) अधीत्य सर्वशास्त्राणि विधाय च तपः परम् । इदं(? मं) मन्त्रं स्मरन्त्यन्ते मुनयोऽनन्तचेतसः YaśasCam. ii. 398. 10.

अनन्तचेष्ट (ananta-ceṣṭa) *adj.* engaged in innumerable activities एष कार्तयुगो धर्मः …। अनन्तचेष्टादध्यक्षादनिरुद्धात् सनातनात् । ब्रह्मणो मानसं जन्म प्रथमम् PāraS. 1. 37.

अनन्तचोरमोष (anantacora-moṣa) *m.* robbery by many thieves हतो राजा हतो राजा प्रतिराजेन संयुगे । इति शब्दे समुद्भूते राष्ट्रमासीद् भयाकुलम् । … अनन्तचोरमोषार्थरुद्धमार्गगमागमम् YogVā. iii. 51. 13.

अनन्तच्छत्र (anantacchattra) *m.* name of a former Buddha येषु भो श्रुतधर्मधर सम्यक्संबुद्धेषु भगवता शाक्यराजवंशप्रसूतेन कुशलमूलमुपचितं तेषां विपुलबलवरकीर्तितं नामानि शृणु ।… अनन्तच्छत्रः योजनसहस्रदर्शी MaVastuAva. i. 138. 13 [DBHS.]

अनन्तज (ananta-ja) *adj.* [*f.*-ā] A born of (the person named) Ananta आनन्दोऽनन्तजस्तत्र ततो द्वाराधिपोऽभवत् RājTa.(Ka.) 8. 1005; B sprung from the Infinite अचलेयं सदा विश्वंभरा सृष्टिरनन्तजा SiddhāTaVi. 27. 13.

अनन्तजगज्जाल (anantajagaj-jāla) *n.* multitude of endless worlds यत्रानन्तजगज्जालं संस्थितं तेन तेजसा YogVā. v. 48. 56.

अनन्तजगदण्ड (anantajagad-aṇḍa) *m.*, *n.* (cosmic) egg in the form of innumerable worlds यः कारणार्णवजले भजति स्म योगनिद्रामनन्तजगदण्डसरोमकूपः BrahmS. 5. 56 (comm. अनन्तजगदण्डः सह रोमकूपाद् यस्य सः)

अनन्तजगदाधार (anantajagad-ādhāra) *m.* one of the epithets of Viṣṇu (*lit.* support of the innumerable worlds) अनन्तजगदाधार गदाधर नमस्तु ते BṛDharmaP. i. 23. 66.

अनन्तजगन्निर्माण (anantajagan-nirmāṇa) *n.* creation of innumerable worlds अनन्तजगन्निर्माणोक्त्यास्फुटीभूतं सार्वज्ञं तदेकदेशनिर्माणोक्त्या कथमाविर्भवेत् TattvPrakā. 11A. 5 (*on* i. 1. 3)

अनन्तजटारण्य (anantajaṭāraṇya) *n.* forest of the countless (i. e. thick) matted hair (देव्युवाच) त्वमनन्तजटारण्ये द्वारं देहि महेश्वर BṛDharmaP. i. 51. 67.

अनन्तजठर (ananta-jaṭhara) *m.* innumerable bellies दिवमनन्तशीर्षैर्दिशमनन्तकर्णैर्व्योमानन्तजठरैर्महीमनन्तपादैः स्वतेजसा बाह्यान्तरीयान् व्याप्य तिष्ठति Varadottaratāpanīyopaniṣad, BSS. XL (1916 Ed.), 3. 13 (141. 13)

अनन्तजन्तु (ananta-jantu) *m.* innumerable creatures (देव्यौ मन्त्री … ददृशुः … महापुरम्) अनन्तजन्तुभोज्यान्नवह्निमुक्तेन्धनस्पृहम् YogVā. iii.43. 27.

अनन्तजन्तुक्षतनिःसृत (anantajantukṣata-nissṛta) *adj.* discharged from the wounds of innumerable beings न कस्य भीत्यै नृपतिप्रसादतामृतरक्ता रसना खलानाम् । अनन्तजन्तुक्षतनिःसृतासृक्कणारुणा सौनिककर्तरीव Surath. 1. .59.

अनन्तजन्तुसंबाध (anantajantu-sambādha) *adj.* causing injury to innumerable creatures अनन्तजन्तुसंबन्धं[संबाधं] कृत्वान्ये भूमिकर्षणम् । कुटुम्बभरणं क्लेशात् कुर्वन्ति नृपपीडिताः PadmP.(Ra.) 2. 174.

अनन्तजन्मन् (ananta-janman) *n.* innumerable births अनन्तजन्मभिर्येन तपस्तप्तं भविष्यति । तस्यैव भक्तिर्भवति ŚivaP. ii(1). 4. 56 (41B. 12)

अनन्तजन्माभ्यस्त (anantajanmābhyasta) *adj.* repeatedly practised during innumerable births कुत्सितानन्तजन्माभ्यस्तात्यन्तोत्कृष्टविविधविचित्रानन्तदुष्कर्मवासनाजालविशेषैर्देहात्मविवेको न जायते TripāMaNāU. 366. 17(5)

अनन्तजाति (ananta-jāti) *adj.* belonging to innumerable species वृक्षादयो ह्यनन्तजातयो वटादिशब्दैर्नोच्यन्ते Śarka. 31. 16; *f.* innumerable births (पुरुषः) अनन्तजातिरूपसंबन्धेनाभिन्नोऽपि घटाकाशादिवद् भिन्नमानः सृज्यमानो दृश्यते BālaKrī. ii. 47. 3 (*on* 3. 119)

अनन्तजातिकल्पन (anantajāti-kalpana) *n.* assumption of innumerable generic properties अनन्तजातिकल्पने गौरवात्, उक्तरीत्या वृत्त्याश्रयत्वासंभवाच्च VaiyāSiMañ. 168. 3.

अनन्तजातिप्रापितवैचित्र्य (anantajātiprāpita-vaicitrya) *adj.* (*f.*) having the variety caused by innumerable births ज्ञानम् … सकलामपि सर्वार्थसंभूतिमनन्तजातिप्रापितवैचित्र्यां परिच्छन्दत् … सर्वगतमेव स्यात् TattvPradī. (A.) 67. 3 (*on* 1. 51)

अनन्तजातिसमन्वय (anantajāti-samanvaya) *m.* connection of many classes together तत्रैकस्मिन् भवेत् पिण्डेऽनन्तजातिसमन्वयः ŚlokaVār. 5(13). 59 (581. 4)

अनन्तजारसुरतप्रीता (anantajārasurata-prītā) *adj.* (*f.*) pleased by the intercourse with many paramours प्रातः प्रातरिति प्रवर्तितकथा निर्वेदमातन्वती । रण्डा नक्तमनन्तजारसुरतप्रीता सुखायास्तु वः ŚārṅgaPa. 4054.

अनन्तजित् (ananta-jit) *adj.* conqueror of numerous (enemies) स हि तेषां महेष्वासो गतिरासीदनीकजित् (v. l. अनन्तजित्) MahāBhā. iii. 79. 2; *m.* A one of the epithets of Viṣṇu सहस्रजिदनन्तजित् … इतीदम् … केशवस्य महात्मनः । नाम्नां सहस्रम् … प्रकीर्तितम् MahāBhā. xiii. 135. 46 (ViṣṇuSaBh. सर्वत्राचिन्त्यशक्तितया जयतीति अनन्तजित्); B name of the fourteenth Jaina Tīrthaṅkara (or Arhat) आद्यो जिनेन्द्रस्त्वजितो जिनश्च अनन्तजित् VarāṅgaC. 27. 81; MahāP. 2. 131; दिशत्त्वभिषेकजलप्लवाः । मतमनन्तजितः CaturJiStu. 53; अनन्तजिदनन्तां वः प्रयच्छतु सुखश्रियम् TriṣaŚaPuC. i. 1. 16; iv. 4. 47; चतुर्दशो जि(? जि)नपतिः सोऽनन्तजित् पातु वः KāvyKaVṛ. 147. 12 (4. 6); CaturJiSta. 14; Abhidhā-Cin. 29; ŚabdaKa. (Su.) 1. 5.

अनन्तजिह्व (ananta-jihva) *m.* one of the epithets of Śiva (*lit.* having innumerable tongues) (त्वं शंकरः) प्रपितामहश्च त्वं सप्तजिह्वस्त्वमनन्तजिह्वः SkandP. v(3). 16. 18.

अनन्तजीव (ananta-jīva) *m.* I infinite individual souls, cf. अनन्तजीवक्लृप्ति etc.; II a kind of plant, JainL., cf. अनन्तकाय, अनन्तकायिक.

अनन्तजीवक्लृप्ति (anantajīva-klpti) *f.* assumption of infinite individual souls किमेकैकजीवकल्पिकाविद्या जीवानां जीवान्तरदर्शने कारणम्, न वा। पूर्वत्र जीवान्तरदर्शनस्यापि भ्रमरूपत्वात् तथैवानन्तजीवक्लृप्तिरनिवार्या ŚatDū. 173. 7.

अनन्तजीवनिर्भास (anantajīva-nirbhāsa) *m.* appearance of innumerable individual souls ब्रह्मण एवैकस्य तत्तदनाद्यनन्ताविद्यावच्छेदेनानन्तजीवनिर्भासास्पदत्वाभ्युपगा(? गमा)त् TattvPradī.(Ci.)384. 17; SarvaDaKau. 141. 15.

अनन्तजीवप्रतिभान (anantajīva-pratibhāna) *n.* appearance of innumerable individual souls न च स्वप्नजाग्रद्बन्द्वैकम् अनेकम् अज्ञानम् अभीष्टं, तत्प्रकारभेदेऽपि तत्स्वरूपभेदाभावस्य उक्तत्वात् । अतो न तद्दृष्टान्तेन मुक्तामुक्तादिरूपेण अनन्तजीवप्रतिभानोपपत्तये तद्धेतुभूतानन्ताज्ञानाभ्युपगमोपपत्तिः Tark-Saṁ.(A.)139. 29.

अनन्तजीवबिम्बरूप (anantajīvabimba-rūpa) *adj.* of the nature of being the original form of the infinite individual souls स च परमेश्वरः स्वसामर्थ्येनानन्तजीवबिम्बरूपो ज्ञायते TattvPrakā. 124A. 11 (*on* ii. 3. 50)

अनन्तजीववध (anantajīva-vadha) *m.* killing of infinite living beings विषम् …। करकाः … [अनन्तम् अनन्तजीववधहेतुत्वात् … एतान्यभक्ष्याणि] KumāPraPra. 74. 29.

अनन्तजीवव्यवहार (anantajīva-vyavahāra) *m.* communication through term *anantajīva* (infinite individual souls) (मायायाः) तस्या एव परिच्छिन्नानिर्वाच्यानन्तप्रदेशेष्वज्ञानाभिधानेष्वावरणविक्षेपशक्तिमत्सु प्रतिबिम्बितं तदेव चैतन्यमनन्तजीवव्यवहारास्पदम् PrakaVi. 3. 25.

अनन्तजीविक (ananta-jīvika) *m.* name of a kind of plant of the genus Arum (त्रिविधाः तृणवनस्पतयः) अनन्तजीविकाः पनकादयः SthānT. 122B. 6.

अनन्तजीवितदशा (ananta-jīvitadaśā) *f.* long life-span ददर्श मुनिशार्दूलं द्वारभूमाववस्थितम् ।… अनन्तजीवितदशासखीमेकामनिन्दिताम् । धारयन्तं करे श्लक्ष्णां कुण्डीमम्लानमानसम् YogVā. i. 6. 21 (comm. अनन्तजीवितदशा चिरजीवितदशा)

अनन्तज्ञान (ananta-jñāna) *n.* infinite knowledge सर्वोत्तीर्णत्वेन सर्वोत्कर्षावस्थितेः भगवतो भैरवस्य तथा स्वातुमिच्छया विजिगीषात्मना इयदनन्तज्ञानस्मृतिसंशयनिश्चयादिव्यवहारकरणेन … देवत्वमिष्यते ParāTri. 7. 2; यथा अनन्तज्ञानसुखादिविशेषगुणेभ्यः … अभिन्नत्वाद्गुणात्मकं भवति सिद्धजीवद्रव्यम् TātpaVṛ. 101. 13 (*on* 2. 2); प्राणाः … पुद्गलद्रव्यविपरीतादनन्तज्ञानदर्शनसुखवीर्यानन्तगुण-

स्वभावात् परमात्मतत्त्वात् भिन्नाः भावयितव्याः TātpaVṛ. 209.16 (*on* 2.55); *m.* epithet of Jina (*lit.* possessing infinite knowledge) अनन्तज्ञानाय नमः MahāP. 40.25(2); *adj.* possessing infinite knowledge अनन्तज्ञान भगवन् देशनावचनं तव । दरिद्रैर्द्रविणमिव चिरादस्माभिराप्स्यते TriṣaŚaPuC. iii. 5.88.

अनन्तज्ञानकल्पन (anantajñāna-kalpana) *n.* assumption of infinite knowledge अनन्तज्ञानकल्पने गौरवात् सुखादिज्ञानं नित्यम् LaCandr. 783.32.

अनन्तज्ञानदेह (anantajñāna-deha) *m.* epithet of Meghanādeśvara Liṅga (*lit.* having the body in the form of infinite knowledge) अनन्तज्ञानदेहाय नम ईश्वरमूर्तये SkandP. v(2).23.26.

अनन्तज्ञानबल (anantajñāna-bala) *n.* force of infinite knowledge मानसवत् कायिकमप्यस्यानन्तं बलमिति भदन्तः । अन्यथा ह्यनन्तज्ञानबलसहिष्णुर्न स्यादिति AbhidhKoBh. 413.7 (*on* 7.31)

अनन्तज्ञानशक्ति (ananta-jñānaśakti) *f.* cognition and energy as the Infinitudes अथास्य जीवस्य सहजविजृम्भितानन्तज्ञानशक्तिहेतुके त्रिसमयावस्थायित्वलक्षणे वस्तुस्वरूपभूततया सर्वदानपायिनि निश्चयजीवत्वे सत्यपि संसारावस्थायाम् ··· प्राणचतुष्काभिसंबद्धत्वम् TattvPradī.(A.) 207.3 (*on* 2.53)

अनन्तज्ञानसुखस्थापन (anantajñānasukha-sthāpana) *n.* establishment of the Infinitudes of knowledge and happiness एवमनन्तज्ञानसुखस्थापने प्रथमगाथा TātpaVṛ. 29.25 (*on* 1.20)

अनन्तज्ञानसुखस्वभाव (anantajñānasukha-svabhāva) *adj.* having the nature of the Infinitudes of knowledge and happiness आत्मा तावन्निश्चयेनानन्तज्ञानसुखस्वभावः TātpaVṛ. 27.9 (*on* 1.19)

अनन्तज्ञानसौख्य (ananta-jñānasaukhya) *adj.* having the form of the Infinitudes of knowledge and happiness नमः श्रीवृषभेशाय जगद्न्याय तायिने । अनन्तज्ञानसौख्याय MalliC. 8.136.

अनन्तज्ञानादिगुण (anantajñānādi-guṇa) *m.* qualities such as the Infinitudes of knowledge etc. ततश्चानन्तज्ञानादिगुणस्मरणरूपेण भावनमस्कारेण ··· गुरुं नमस्करोति TātpaVṛ. 280.20 (*on* 3.7)

अनन्तज्ञानादिगुरुगुण (anantajñānādi-guruguṇa) *m.* qualities of a preceptor such as the Infinitudes of knowledge etc. (i.e. *jñāna*, *darśana*, *sukha* and *vīrya*) यतिवरवृषभम् ··· अनन्तज्ञानादिगुरुगुणैस्त्रैलोक्यस्यापि गुरुस्तं त्रिलोकगुरुम् ··· प्रणमन्ति TātpaVṛ. 100.24 (*on* 1.80)

अनन्तज्ञानादिचतुष्टय (anantajñānādi-catuṣṭaya) *n.* group of the four Infinitudes of knowledge etc. यथैव चानन्तज्ञानादिचतुष्टयरूपमात्मरूपमात्मरूपतया गृह्णाति तथा ज्ञेयरूपं न गृह्णाति TātpaVṛ. 68.12 (*on* 1.52); यः कर्ता जानाति । कान् । अनन्तज्ञानादिचतुष्टयसहितान् ··· जिनेन्द्रान् TātpaVṛ. 218.14 (*on* 2.65); 301.14 (*on* 3.24); cf. **अनन्तचतुष्क.**

अनन्तज्ञानादिसिद्धगुण (anantajñānādi-siddhaguṇa) *m.* qualities such as the Infinitudes of knowledge etc. of a Siddha or a liberated soul पञ्च परमेष्ठिनो नमस्करोमि । कया । करणभूतया ··· अनन्तज्ञानादिसिद्धगुणभावनारूपया सिद्धभक्त्या TātpaVṛ. 5.15 (*on* 1.3); अनन्तज्ञानादिसिद्धगुणस्मरणरूपो भावनमस्कारोऽस्तु TātpaVṛ. 266.15 (*on* 2.107)

अनन्तज्ञानानन्दादि (ananta-jñānānandādi) *adj.* infinite knowledge, bliss etc. वासुदेवो निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दाद्यपरिमितोदारगुणसागरः ··· भक्तानवलोक्य ··· पञ्चरात्रं शास्त्रं स्वयमेव निरमिमीत BrahmSūBh.(Rā.) 508.5 (*on* ii. 2.42)

अनन्तज्ञानानन्दैकतान (anantajñānānandaikatāna) *adj.* uniform in infinite knowledge and bliss प्रथमेऽध्याये ··· अनन्तज्ञानानन्दैकतानमपरिमितोदारगुणसागरम् ··· परं ब्रह्म वेदान्तवेद्यमित्युक्तम् BrahmSūBh.(Rā.) 397.7 (*on* ii. 1.1)

अनन्तज्ञानानन्दैकस्वरूप (anantajñānānandaika-svarūpa) *adj.* whose nature is only infinite knowledge and bliss अथ श्रियः पतिर्निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दैकस्वरूपः पुरुषोत्तमो नारायणः ··· भक्तियोगमवतारयामास GītāBh.(Rā.) 3.1 (*on* 1.0); अश्मकाष्ठलोष्टतृणादीनामत्यन्तहेयानां सततविकारास्पदानामचिद्विशेषाणां निरवद्यनिर्विकारनिखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपनानाविधानन्तमहाविभूतिब्रह्मस्वरूपैक्यं यथा नोपपद्यते BrahmSūBh.(Rā.) 454.14 (*on* ii. 1.23)

अनन्तज्ञानोत्तर (anantajñānottara) *m.* (pl.) name of a group of Buddhas [DBHS.]

अनन्तज्ञानोत्पत्ति (anantajñānotpatti) *f.* origination of infinite number of cognitions एकस्मिन् ज्ञानस्वरूपे तात्त्विके सर्वविषयाणां तादात्म्यस्वीकारेण निर्वाहेऽनन्तज्ञानोत्पत्तिकल्पने गौरवात् GuruCandr. i. 502.20.

अनन्तज्वाल (ananta-jvāla) *adj.* having innumerable flames ॐ भगवते ··· स्रुभुज परमसिद्धिशिरसि गतं गृह्ण तेजोग्ररूप अनन्तज्वाल BhavīP. 310B.15 (i. 215.6); एह्येहि भगवन् । नारसिंह । पुरु ··· सर्वतोऽनन्तज्वाल वज्रशतपञ्जरेण सप्त पातालान् परिवारय ĪśānŚiPa. i. 35.131 (5)

अनन्तज्वाला (ananta-jvālā) *f.* innumerable flames एह्येहि भगवन्नरसिंह । सर्वतोऽनन्तज्वालावज्राशनिचक्रेण सर्वपातालान् उत्सादय उत्सादय सर्वतोऽनन्तज्वालावज्रशरपञ्जरेण सर्वपातालान् परिवारय परिवारय AgniP. 63.2(12); सोऽग्निः प्रजज्वाल सहस्रशः । अनन्तज्वालाभिततो नानावर्णादिभिः श्रितः SkandP. v(1).4.56.

अनन्तज्वालाजाल (anantajvālā-jāla) *n.* net (i.e. multitude) of endless flames महाविष्णोः ··· अनन्तज्वालाजालैरलंकृतम् ··· सुदर्शनं महाचक्रं प्रज्वलति TripāMaNāU. 373.19(7); निरतिशयानन्ददिव्यतेजोराशिमण्डलम् ।··· अनन्तज्वालाजालैरलंकृतम् SiddhāSāU. 387.11(5)

अनन्ततच्चाक्षुषोत्पत्तिनाश (ananta-taccākṣuṣotpattināśa) *m.* innumerable originations and destructions of the visual perception of the same न च दोषग्राह्यत्वे नमोनैल्यस्य प्रातीतिकत्वेन अनन्तोत्पत्तिध्वंसकल्पनागौरवमिति वाच्यम्, तस्य व्यावहारिकत्वेऽपि अनन्ततच्चाक्षुषोत्पत्तिनाशकल्पनात् GuruCandr. i. 354.16.

अनन्ततडित्पर्वताकार (anantataḍitparvatākāra) *adj.* having the form of a mountain of incessant or innumerable flashes of lightning शाश्वतं परमं पदं निरतिशयानन्दानन्ततडित्पर्वताकारमद्वितीयं स्वयंप्रकाशमनिशं ज्वलति TripāMaNāU. 374.18(7)

अनन्ततत्तद्विषयकज्ञान (ananta-tattadviṣayakajñāna) *n.* innumerable cognitions pertaining to various objects अन्यथानन्ततत्तद्विषयकज्ञानैरनन्ततत्तद्विषयतोत्पत्तितन्नाशकल्पनाद्गौरवापत्तेः BhāṭṭCin. i. 13.20 (*on* i. 1.3)

अनन्ततत्तद्विषयतोत्पत्तितन्नाश (ananta-tattadviṣayatotpattitannāśa) *m.* innumerable originations and destructions of varied contentness विषयता सा च नित्या लाघवात् । अन्यथानन्ततत्तद्विषयकज्ञानैरनन्ततत्तद्विषयतोत्पत्तितन्नाशकल्पनाद् गौरवापत्तेः BhāṭṭCin. i. 13.20 (*on* i. 1.3)

अनन्ततत्त्व (ananta-tattva) *n.* eternal principle अनन्ततत्त्वं परिगृह्य धात्रा विनिर्मितोऽस्याः किल मध्यभागः । अणुः परं योगिदृशानुलक्ष्यः सुश्लिष्टकलास्थैर्यबलावनद्धः PadyaVe. 209.

अनन्ततदुपभोगसाधनकाय (ananta-tadupabhogasādhanakāya) *m.* innumerable bodies which are the means of the enjoyment of that (i.e. *karman*) न चानन्त्यात्कर्मणां भोगेन प्रक्षयानुपपत्तिः । योगप्रभावादनन्ततदुपभोगसाधनकायव्यूहनिर्माणेन तदुपपत्तेः TattvPradī.(Ci.) 360.1.

अनन्ततद्देश (ananta-taddeśa) *m.* endless or innumerable loci of those (parts) अनन्तावयवत्वे हि मूर्तैरवयवैरन्योऽन्यावकाशमप्रयच्छद्भिरनन्ततद्देशव्याप्तेरेकैनैव सर्षपेण सर्वं जगत् पूर्येत NyāyRa. 404.16 (*on* 5(4).185)

अनन्ततनय (ananta-tanaya) *m.* son of Anantadeva हरिराजानन्तदेवावास्तां तस्यात्मजौ ततः । कलशोऽनन्ततनयः क्रमात् RājTa.(Ka.) App. 8.35.

अनन्ततनु (ananta-tanu) *adj.* having innumerable bodies तनोति ते तात नुतौ नितान्तं नूनं नतानां तनुतां न नीतिः । नेनेन नो नूतनतां नु नीता तेनोन्नतानन्ततनो ततेतिः ĪśvaŚ. 22 (comm. उन्नता अनन्ताः पृथ्व्यादयस्तनवो मूर्तयो यस्य तत्संबोधनम्)

अनन्ततन्तुसंतान (anantatantu-santāna) *m.*, *n.* **A** stretch of innumerable threads अनन्ततन्तुसंतानवर्धविच्छित्तिसुन्दरः । बभौ कौशेयकाख्यातो देशो वेशश्च भूपतेः RājTa.(Śrī.) 1(6).31; **B** continued succession of many generations, RājTa.(Śrī.) 1(6).31.

अनन्ततन्त्रतर (an-antatantratara) *adj.* not having a special *tantra* in the concluding part (*tantra* is a single performance common to all similar ones) स यदेतदनन्ततन्त्रतर॰ स्तोमकारितः आवापः NidāSū. 145.2 (8.9)

अनन्ततपस् (ananta-tapas) *adj.* having infinite austerities त्वमनन्ततपा विप्रो वयं नियतिपालकाः YogVā. iv. 10.25.

अनन्ततम (ananta-tama) *adj.* **A** most endless (in space) देशेऽपि निदर्शयामः । आदित्यादूर्ध्वमपि गगनदेशोऽनन्तः भूमण्डलादनन्ततरः पातालादनन्ततमः NyāySiA. 235.11; **B** most minute तं च स्वभावं यद्यपि सर्वघाति केवलज्ञानावरणं कार्त्स्न्येनैवावरीतुं व्याप्रियते तथापि तस्यानन्ततमो भागो नित्यानावृत एवावतिष्ठते JñānBiPra. 1.11; **C** having no terminal point at all एकसिद्धमाश्रित्य कालः सादिरनन्तश्च पश्चात् प्रतिपाताभावात् । सिद्धानां नान्तरं संसं(?सां)सारिकजीवानामनन्ततमे भागे सिद्धाः KumāPraPra. 84.28.

अनन्ततमःसागर (anantatamas-sāgara) *m.* ocean of endless

darkness (उपासकः) अमितापरिच्छिन्नानन्ततमःसागरमुत्तीर्य ... महाविराट्पदं प्राप TripāMaNāU. 369. 27(6)

अनन्ततर (ananta-tara) *adj.* still more endless (in space) देशोऽपि निदर्शयामः। आदित्यादूर्ध्वमपि गगनदेशोऽनन्तः, भूमण्डलादनन्ततरः NyāySiA. 235. 11.

अनन्ततल्प (ananta-talpa) *adj.* whose bed is the serpent Ananta अनन्तमचलं (v. l. अनन्ततल्पं तम्) देवं हंसं नारायणं प्रभुम्।... तमाहुः परमव्ययम् MahāBhā. i. 57. 86.

अनन्ततस् (ananta-tas) *adv.* **A** endlessly आकाशगतमात्मानं संक्षिप्य त्वपरो बुधः। तदेवानन्ततः पश्यन् विशेषमधिगच्छति BuddhaC. 12. 62; मुक्तौ संयोज्य सर्वं तु महासुन्दर्यनन्ततः। एवं हि शतवर्षाणि महाप्रलयकारिणी ŚaktiSaṁT. i. 2. 39; **B** due to being endless न शक्यमस्य नाट्यस्य गन्तुमन्त कथंचन।... शिल्पानां वाप्यनन्ततः NāṭyaŚā. 6. 6; व्यतीतानेकजन्मोत्थवासनानामनन्ततः। तासां निरोधोऽसंभाव्यो जन्मन्येकत्र मानवैः BṛĀraUBhVā. (Sambandha.) 459; गुणप्रधानभावश्च पदार्थानामनन्ततः। क्षेपीयस्त्वाच्च कालस्य दुर्ज्ञेयो मतिविभ्रमात् BṛĀraUBhVā. i. 4. 1486; iii. 1. 55.

अनन्तता (anantá-tā) *f.* **1** the state of being limitless or boundless (in space) कानन्तता याज्ञवल्क्य दिश एव सम्राडिति होवाच ŚatBr. XIV. vi. 10. 12; BṛĀraU. iv. 1. 5; **2** the state of being endless (in time), the state of being everlasting or eternal स य एतदेवं वेदैतामेवानन्ततामेतामक्षितिमेतां पुनर्नवतां जयति JaimiBr. 2.212; स चतुर्षु चतुर्षु मासेषु केशान् परिवर्तयतेऽनन्ततायै JaimiBr. 2. 234; स य एवमेतदनन्तं साम वेदानन्ततामेव जयति JaimiUBr. i. 35. 8; सदनन्ततया स्थितम् MahāU. 2. 66; अनन्तता चादिमतो मोक्षस्य न भविष्यति GaṇḍKā. 4. 30; स चान्येन ग्रहीतव्यः ...। तद्गृहीतिर्हि लिङ्गेन स्यादन्येनेत्यनन्तता ŚlokaVār. 5(8). 48 (488. 4); आरम्भकानादितया ह्यारम्भस्यानादितैव स्यान्न त्वनन्ततयानन्ततापि BālaKrī. ii. 60. 6 (*on* 3. 166); यथा पूर्वेषां शरीराणामनादितेत्येवमुत्तरेषामप्यनन्तता TātpaṬ.(Vā.) 209. 25 (*on* i. 1. 9); ĀtmaTaVi. 780. 4; जीमूतकेतुस्तस्याभूद् विद्याधरपतिः पतिः। यस्याभूच्छेषयशसः प्रख्याता काप्यनन्तता BṛKathāMañ. ix. 2. 767; अनाद्यनन्तता तस्य पुरस्तादवधीरिता TarkSaṁ.(Ā.) 130. 17; प्रध्वंसस्यानन्ततया तन्नैरपेक्ष्याच्च ŚrutaPra. ii. 181.20 (*on* i. 4. 28); AdvaiSi. 659. 12; **3** the state of being uncountable, innumerability, endlessness (in number) प्रतिषेधोक्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा। अथास्य पुनराक्षेप्यभेदानन्त्यादनन्तता Kāvyāda. 2. 120; एवं तु कल्प्यमाने स्यात् सामान्यानामनन्तता ŚlokaVār. 5(12). 22 (551. 1); आवापोद्वापरचनाभेदाद्वाक्येष्वनन्तता ŚlokaVār. 7. 121 (880. 2); सद्भावोऽवयवानां च तथा तेषामनन्तता TantrVā. 379. 10 (*on* ii. 1. 5); एकैकोऽनन्ततां याति पुनरेकात्मतामतः BṛĀraUBhVā. i. 3. 268; देशकालाद्यनियमात्पुमिच्छानामनन्तता BṛĀraUBhVā. iii. 3. 111; सफलायां समाप्तायां क्रियायां समनन्तरम्। क्रियान्तरेच्छासंभूतौ तन्निमित्तमनन्तता। यतोऽस्ति शिवशक्तीनां ताश्च नित्यमवस्थिताः ŚivDṛ. 3. 93; प्रतियोगिनामनन्ततया अन्वयानामानन्त्यात्, तदानन्त्ये चान्वितानामप्यानन्त्यात्संबन्धग्रहणं दुष्करम् PrakaPañ. 381. 8; हरिः ... एकोऽप्यनन्ततां यातो रूपभेदैरनन्तकैः SkandP. iv. 20. 6; प्रत्यक्षं हि ज्ञानम् ... अनन्तशक्तिसद्भावतोऽनन्ततामुपगतम् TattvPradī.(A.) 72.4 (*on* 1. 54); पूरकः। ... भिन्नः षोढात्वमभ्येति पुनर्भेदैरनन्तताम् MālinīT. 17. 5; वेदा ह्यनन्ता इति हि श्रुतिराहाप्यनन्तताम् AnuVyā. 47A. 11 (*on* 3. 3); करणव्रातसंदर्भानन्त्यात्तेषाम् (अङ्गहाराणाम्)-अनन्तता SaṁgīRa. iv. 256. 13 (7. 800); विशेषाश्च अनन्ततया सामान्येन संगृह्य व्यवह्रियन्ते TarkSaṁ.(Ā.) 10. 25; माहेश्वराणामानन्त्यं विष्णुरूपेऽप्यनन्तता ŚaktiSaṁT. i. 1.24; स्तोत्रशस्त्रादिलक्षणानां धर्माणामनन्ततया MayūMāli. 525. 6 (*on* vii. 1. 1); उपमानानामनन्ततया तद्घटितकार्यकारणभावानामानन्त्येन तदपेक्षयोक्तरीतिरेव लाघवेनादरणीयत्वात् AlaṅkāKau.(Vi.) 63. 10; **4** the state of being infinite (exceeding the limits of space, time and number) अनन्तता ह्यनन्ताख्या कला कमलसंभव PauṣkS. 22. 34 = PāraS. 5. 50; द्युपतय एव ते न ययुरन्तमनन्ततया BhāgP. x. 87. 41; न हि सत्यता अनन्तता च ज्ञानकर्तृत्वे सत्युपपद्येते TaiUBh. 230. 20 (*on* 2. 1); अन्तः सीमा तथेयत्ता तन्निषेधस्त्वनन्तता TaiUBhāVā. 52. 25(2)

अनन्तताद्दशधर्म (ananta-tādṛśadharma) *m.* endless properties of that type शक्तिसिद्ध्यनन्तरं तेनैव हेतुना साध्ये शक्त्यतिरिक्तत्वप्रक्षेपेण शक्त्यतिरिक्तदाहानुकूलातीन्द्रियधर्मसिद्धिः। एवं तत्तदतिरिक्तप्रक्षेपात्तेनैव हेतुनानन्ततादृशधर्मसिद्धिप्रसङ्गः TattvCin. ii(2). 122. 11.

अनन्ततान (ananta-tāna) *adj.* of endless (i. e. vast) stretch यदेतदस्यानुतटं विभाति वनं ततानेकतमालतालम्। न पुष्पितात्र स्थगितार्करश्मावनन्ततानेन कतमा लतालम् ŚiśuVa. 4. 39.

अनन्ततापोपभोग (ananta-tāpopabhoga) *adj.* having endless misery or enjoyment नित्यस्तस्माद्भवति पुरुषः स्वप्रणीतानुगच्छद्धर्माधर्मक्रमपरिणतानन्ततापोपभोगः NyāyMañ. ii. 44.7.

अनन्तताल (ananta-tāla) *m.* name of a musical measure or rhythm ढक्रीसंज्ञितस्तालो ब्रह्मतालस्तथैव च। अनन्तताल इत्येते दश तालाः प्रकीर्तिताः PāraS. 16. 520.

अनन्ततीर्थ (ananta-tīrtha) *n.* name of a sacred bathing-place in Kashmir अनन्ततीर्थे स्नातस्य (v. l. स्तु) नागलोके महीयते NīlaP. 1350; *m.* name of an author [pw.; MW.]

अनन्ततीर्थकृत् (ananta-tīrthakṛt) *m.* **A** the Tīrthaṅkara Ananta (name of the fourteenth Jaina Arhat also known as Anantajit) श्रेयांसो वासुपूज्यश्च विमलोऽनन्ततीर्थकृत् AbhidhāCin. 27; **B** innumerable Tīrthaṅkaras अनन्ततीर्थकृतामत्र कल्याणकत्रयमभूत् KumāPraPra. 105. 24.

अनन्ततीर्था (ananta-tīrthā) *f.* one of the thousand epithets of Gaṅgā (*lit.* having innumerable sacred bathing-places) अक्षुण्णशक्तिरसुधानन्ततीर्थामृतोदका। ... इति नामसहस्रं हि गङ्गायाः कलशोद्भव SkandP. iv. 29. 21.

अनन्ततृण (ananta-tṛṇa) *n.* innumerable (varieties of) grass अनन्ततृणवृक्षपशुपक्षिमनुष्यादिमध्ये स्वल्पो मनुष्यदेवादिरेव सुखी भवतीत्यर्थः SāṁkhyaPraBh. 148. 31 (*on* 6. 7)

अनन्ततृतीया (ananta-tṛtīyā) *f.* name of a vow sacred to Devī (performed on the third lunar days of the months of Vaiśākha, Bhādra and Mārgaśīrṣa) उक्तानन्ततृतीयैषा सदानन्तफलप्रदा। ... गिरितनयाव्रतम् MatsyaP. 62. 33 = PadmP. v. 22. 98 = BhaviP. 651A. 9 (iv. 26.35); अधुना कथयिष्यामि व्रतानि तव सुव्रत। ... व्रतमनन्ततृतीयाख्यम् DevīBhāP. vii. 38. 37; [the third day of the month Bhādra (sacred to Viṣṇu) (PW., MW.)]

अनन्ततृप्ति (ananta-tṛpti) *f.* eternal satiation एतत् पठन्नाभ्युदये च कर्मण्यनन्ततृप्तिः पितृदेवतानाम् BhāgP. vi. 19. 27; यद्यद्धविः पितृभ्यो यथाविधि दत्तं चिरकालतृप्तयेऽनन्ततृप्तये च संपद्यते तन्निःशेषेणाभिधास्यामि ManvaMu. 138. 23 (*on* 3. 266)

अनन्ततेजःपर्वतराजि (anantatejaḥparvata-rāji) *f.* range of mountains of endless lustre उपासकस्तत उपर्युपरि गत्वा विमानपरंपरास्वनन्ततेजःपर्वतराजिष्वेवं क्रमेण प्राप्य विद्यानन्दमययोः संधिम् TripāMaNāU. 372. 7(6)

अनन्ततेजस् (ananta-tejas) *adj.* having limitless lustre or energy द्वीपोऽभवद्यत्र वृकोदरस्य युधिष्ठिरो धर्मभृतां वरिष्ठः। अमोक्षयद्यस्तमनन्ततेजा ग्राहेण संवेष्टितसर्वगात्रम् MahāBhā. iii. 174.19; य आत्मनापत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत। अनन्ततेजाः सुमनाः समाहितः स्वतेजसा सूर्य इवावभासते MahāBhā. v. 33. 102; vi. 21. 14; व्यक्ताव्यक्ताय देवाय वेधसेऽनन्ततेजसे। नमस्कृत्य BṛParāSm. 1. 1; नमस्तुभ्यं भगवते सुव्रते(?ता)नन्ततेजसे VāyuP. i. 24. 90; LiṅgaP. i. 21. 2; दयिताभिरनन्ततेजसा मुनिनासौ परिकल्प्य लम्भितः। अशितः प्रविभज्य भूपतेस्तिसृभिर्गर्भमदीभवच्चरुः JānaHa. 4. 5; तदित्थं दयानिधेरनन्ततेजसस्तेऽयं जनः कांचिदाज्ञां चिकीर्षति DaśKuC. 121. 7; सुरनिम्नगा। एवं बभ्राम शिरसि शिवस्यानन्ततेजसः BṛDharmaP. i. 51. 63; विधेहि शं विभो। नो चेद् वयं दावमहाग्निपीडिताः कं शान्तिकर्तारमनन्ततेजसम्। यामः DevīBhāP. v. 7. 33; अयाजयन्मां मुनिर्ऋश्यशृङ्गः स पुत्रकाम्यान्तमनन्ततेजाः Rāgh. 2. 12; *n.* infinite lustre or brilliance ध्यानिनां त्वं परं ध्यानम् ...। अनन्ततेजसाक्षोभ्यो ह्यचिन्त्याव्यक्तनिष्कलः (श्रीसूर्यः) BhaviP. 190A. 4 (i. 127. 22)

अनन्ततेजोज्वलित (anantatejo-jvalita) *adj.* blazing with limitless lustre or brilliance अनन्ततेजोज्वलितं यथानलं दुरासदं तीक्ष्णविषं यथोरगम् MahāBhā. iv. 180*(1)

अनन्ततोया (ananta-toyā) *adj.* (*f.*) having unlimited water ततस्तु कावेरिमनन्ततोयां दिव्याश्रमैर्नित्यमुपात्ततोयाम्। सहानुजः संप्रविगाह्य पुण्यां ननन्द MahāBhā. iii. 581*(1)

अनन्तत्रिगुण (ananta-triguṇa) *n.* triad of qualities which are endless अनन्तकोटिब्रह्माण्डे अनन्तत्रिगुणोच्छ्रये। तत्कलाकोटिकोट्यंशा ब्रह्मविष्णुमहेश्वराः PadmP. iv. 69. 111; *adj.* having triad of qualities which are endless आनन्त्यमात्रसाम्येऽप्यनन्तत्रिगुणादपीयमधिकतरा NyāySiA. 235. 9.

अनन्तत्रुटि (ananta-truṭi) *f.* innumerable *truṭis* (a measure of mass) न च त्रुटेः पूर्वसिद्धत्वेन न जन्यतेति वाच्यम्, अनन्तत्रुटितत्संयोगादीनां घटादौ पूर्वसिद्धताकल्पने गौरवात् GuruCandr. i. 90. 10.

अनन्तत्व (ananta-tva) *n.* **A i** the state of not being the concluding part **ii** the state of being Ananta **B i** the state of being endless (in time) **ii** the state of being limitless or boundless (in space) **iii** infinity, eternality **iv** innumerability,

abundance, the state of having no terminal point, the state of being numerous **v** the state of having no (grammatical) ending **Ai** the state of not being the concluding part अह्नानि आहीनिकतन्त्राण्यनन्तत्वात् NidāSū. 152.5 (9.1); **Aii** the state of being Ananta (i. e. the serpent-king) याते प्रविश्य पातालमनन्तत्वं हलायुधे । लुब्धकेन हरिः सुप्तः कृष्णसारधिया हतः DaśāvaC. 8.855; **Bi** the state of being endless (in time) अनादित्वादमध्यत्वादनन्तत्वाच्च सोऽव्ययः । अत्येति सर्वदुःखानि MahāBhā. xii. 199.13; अनादित्वादनन्तत्वात्तदनन्तमथाव्ययम् MahāBhā. xii. 199.19; श्रूयते हि श्रुतिस्मृतीतिहासपुराणेषु सर्गप्रतिसर्गपरंपराया अनादित्वमनन्तत्वं चेति TattvVai. 216.12 (*on* 4.33); एवं हि यागादिप्रध्वंसा एव स्वर्गादीनुत्पादयन्तु, क्लृप्तमपूर्वकल्पनया । तेषामनन्तत्वादनन्तफलप्रवाहः प्रसज्यत इति चेत् NyāyKuA. i. 34.2; न च चित्तसंतानेरनन्तत्वं प्रामाणिकम् Kiraṇā. 7.4: 31.22; न च कालस्यानन्तत्वात्तत्समाप्त्ययोगः TattvPrakā. 224A.6 (*on* iv. 4.23); SiddhāMu. 16.12 (*on* 37); अनन्तत्वं प्रलयव्यतिरिक्तान्तशून्यत्वम् ViraMi. 870.10 (*on* 3.125); **Bii** the state of being limitless or boundless (in space) अनन्तत्वान्महत्त्वाच्च विश्रुतो गगनोपमान् । ... वेलापुरेषु सर्वेषु समीपस्थेषु वारिधेः । रक्षा विधेया यत्नेन राज्ञा संपदमिच्छता Mānaso. ii. 3.370; **Biii** infinity, eternality इदानीं ब्रह्मणोऽनन्तत्वं कथयति SanatBh. 306.10 (*on* 4.22); अतोऽभेदात् ब्रह्मणोऽनन्तत्वैकत्वाद्वितीयत्वाज्जीवात्मत्वादिश्रुतिः ... घटते IṣṭaSi. 242.9; ब्रह्म...अनन्तत्वान्न परिच्छिन्नम् PañcPra. 40.7; ज्ञानानन्दामलत्वानन्तत्वरूपब्रह्मस्वरूपनिरूपकगुणाः VedāntDī. 172.25 (*on* iii. 3.11); अनन्तत्वं तथानन्दमयवाचाप्युदाहृतम् AnuVyā. 8B.1 (*on* 1.1); निरंशस्य हि जीवस्याणुत्वमनन्तत्वं वा स्यात् VedāntKa. 56.8 (*on* i. 1.2); किं च तदानीं किं मायाविलक्षणं ब्रह्म उताविलक्षणत्वेन मायात्मकम् । यदि विलक्षणं वस्तुतः परिच्छेदादनन्तत्वं ब्रह्मणो न स्यात् VedāntTaSā. 2.3; अनन्तत्वमपि ब्रह्मलक्षणम् NyāySu. (Ja.) 134B.1 (*on* i. 1.6); 137A.13 (*on* i. 1.6); नानन्तत्वं नामानल्पत्वम् । किं त्वन्यदेव परिच्छेदाभावरूपम् NyāySu. (Ja.) 345A.7 (*on* ii. 2.6); सत्यं ज्ञानमनन्तमित्यत्र सत्ताज्ञानयोरेव ब्रह्मस्वरूपप्रतीत्यनुसंबन्धित्वेन सर्वविद्यासूपसंहारः । न तु त्रिविधपरिच्छेदराहित्यरूपस्यानन्तत्वस्यापीति न विरोध इति सिद्धान्तः ŚivārkaMaDī. ii. 322.13 (*on* iii. 3.23); GuruCandr. i. 467.17; **Biv** innumerability, abundance, the state of having no terminal point, the state of being numerous विकल्पानामनन्तत्वादानन्त्याच्च कौशलविधेः ... छेद्यस्य प्रकारान्कोऽभिसमीक्षितुमर्हतीत्याचार्याः KāmSū. 122.4 (2.4); अनादौ संसारेऽनन्तत्वात् कर्मणामनियतविपाककालत्वाच्च BrahmSi. 21.18; विशेषाणामनन्तत्वेन च तदन्वयव्यतिरेकयोर्दुरवगमत्वात् सर्वत्र सामान्येनैव व्याप्तिग्रहणम् NyāyMañ. i. 121.20; विशेषाणामनन्तत्वात् समस्तं ब्रह्म सोऽवदत् BṛAraUBhVā. ii. 1.83; NaiṣkaSi. 47.6; अनन्तत्वाद् वेदशाखानाम् ManuBh. ii. 481.9 (*on* 12.94); तस्मादिदमनन्तत्वाद् धनमिच्छाम्यवक्षनम् । भूमेरन्यत्र सर्वत्र सत्पात्रादौ निधीयताम् BṛKathāŚloSaṁ. 18.590; TantrRā. 96.15; स हि ... विपक्षदेशानामनन्तत्वाद् दुर्लभो भवति Kāśi. iii. 174.12 (*on* 5(7).42); न च विपक्षव्यावृत्तिः शक्यतेऽवगन्तुम्, विपक्षाणामनन्तत्वात् PrakaPañ. 225.4; AbhinBhā. i. 263.10 (*on* 6.6); यदि चैषाम् (हेत्वाभासानाम्) सूक्ष्मो भेदोऽनन्तत्वान्न शक्यते वक्तुम् NyāySā. 7.16: NyāyVārPari. 81.6; प्रवक्तृणामनन्तत्वात् NyāyKuA. ii(2). 108.6; नन्वनन्तत्वादेव विशेषाणां जात्यापि संबन्धो न शक्यते ग्रहीतुम् NyāyRa. 555.17 (*on* 5(12).40) = YuktiSneha. 102.34 (*on* i. 1.5); एकैकस्मिन् कल्पे यद्येः(? ये)कैकोऽप्यपवृज्येत् तथाप्युच्छिन्नः संसारः स्यात् कल्पानामनन्तत्वात् Kiraṇā. 10.8; रसादीनामनन्तत्वाद्भेदे एको हि गण्यते KāvyPra. 148.2; 100.2; वेदानामनन्तत्वाद् दुरवगाहत्वाच्च VedāSaṁ. 168.12; तत्रापि लोकस्य ... अनन्तत्वाच्छास्त्राणां चेतानन्त्यमस्याः AlaṅkāRa. 43.7; चेष्टाविशेषाणामनन्तत्वात् PramāMī. 17.21 (*on* i. 1.21); प्रत्यवस्थानान्यनन्तत्वात् परिसंख्यातुं न शक्यन्ते PramāMī. 59.25 (*on* ii. 1.29); न च सहस्रं लक्षं वेति विशेषानवगमादनन्तत्वम् PrakaVi. 561.15; प्रसिद्धालंकारास्त्रिषष्टिरुदिता मया । अनन्तत्वात्तु ते शास्त्रे न सामस्त्येन कीर्तिताः SaṁgīRa. i. 168.9 (1(6).64); षट्पञ्चाशद्युतं प्रोक्तमित्येलानां शतत्रयम् । अनन्तत्वात्तु संकीर्णा न संख्याति हरप्रियः SaṁgīRa. ii. 251.2 (4.132); TattvPrakā. 23A.10 (*on* i. 1.22); तस्मादपीह वस्त्वन्यद्दिव्यमर्त्योभयात्मकम् । अनन्तत्वादथैतेषामूह्या लक्ष्यानुसारतः BhāvPra. (Śa.) 203.17(7); अनन्तत्वं चात्र संख्यानिरूपितावसानशून्यत्वम् । असंख्याकमिति यावत् VedāntRaMañ. 1.1 (20.1); न तु स्वरूपसंबन्धः तत्तत्स्वरूपाणामनन्तत्वात् TattvCin. i. 649.3; SarvaDaSaṁ. 10.79; अन्यथा युक्त्याभासानामनन्तत्वेनापर्यवसानं स्यात् NyāySu.(Ja.) 313B.8 (*on* ii. 2.1); विद्योत्पत्तिप्रतिबन्धकदुरितानामनन्तत्वात् SiddhāLeSaṁ. 372.3; शब्दानामनन्तत्वात् प्रतिपदपाठेनाभिधानमशक्यम् Prasā. ii. 794.15; कार्यभेदेन च गृहीतानां रूपाणामनन्तत्वात् LalitāSaBh. 20.18; **Bv** the state of having no (grammatical) ending (अणफुल्लिय फुल्ल म तोडहिं) प्राकृतस्यानन्तत्वात् अप्राप्तफलानि पुष्पाणि मा त्रोटय PrabaK. 18.6.

अनन्तत्वकीर्तन (anantatva-kīrtana) *n.* mention of infinity न चाकाशस्यानन्तत्वकीर्तनानन्तरं तद्विरुद्धावगमणमन्यस्ति वा न वा UpaParā. 52.15.

अनन्तत्वपर्यन्त (anantatva-paryanta) *adj.* extending up to infinity सर्वलोकगतित्वादीनामनन्तत्वपर्यन्तानां लिङ्गानां तदपेक्षया भूयस्त्वात् UpaParā. 53.14.

अनन्तत्वरूप (anantatva-rūpa) *adj.* which is of the nature of infinity ज्ञानानन्दामलत्वानन्तत्वरूपब्रह्मस्वरूपनिरूपकगुणाः सर्वासु परविद्यासु संग्रह्या उत नेति संशयः VedāntDī. 172.25 (*on* iii. 3.11); सत्यत्वानन्तत्वरूपलक्षणविशेषश्च नैकरूपज्ञानस्य परिच्छिन्नस्य नोपपद्यते ŚrutaPra. iB. 193.11 (*on* i. 1.13); माहात्म्यप्रतिपादनपराः — स्वतोऽनन्तत्वरूपमाहात्म्यप्रतिपादनपरा इत्यर्थः ŚrutaPra. ii. 484.14 (*on* iii. 3.23)

अनन्तत्वलिङ्ग (anantatva-liṅga) *n.* inferential mark such as infinity प्रधानक्षेत्रज्ञसूरेण सर्वकारणत्वसर्वलयस्थानत्व° ... °अनन्तत्वलिङ्गानामेव भूयसामप्यन्यथानयन्योचितत्वात् UpaParā. 50.27; 51.22; तद्वीनन्तत्वलिङ्गमेव पूर्वपक्षविरोध्याशङ्कनीयम् ŚivārkaMaDī. i. 265.33 (*on* i. 1.23-24); i. 268.22 (*on* i. 1.23-24); न च तथाभूताया अप्याकाशश्रुतेरनन्तत्वलिङ्गमिवैतदस्या बाधकमिति वक्तुं शक्यम् ŚivārkaMaDī. i. 277.24 (*on* i. 1.25)

अनन्तत्ववत् (anantatva-vat) *adv.* like infinity अनन्तत्ववदेवतात्वं न ब्रह्मैकान्तिकं लिङ्गम् ŚivārkaMaDī. i. 268.31 (*on* i. 1.23-24)

अनन्तत्वश्रुति (anantatva-śruti) *f.* scriptural statement of infinity न च तद्युक्तम् । अनन्तत्वश्रुतेः NyāySu.(Ja.) 141B.4 (*on* i. 1.6)

अनन्तत्वसंशयानिवृत्ति (anantatvasaṁśayānivṛtti) *f.* non-removal of the doubt of infinity एवमनन्तत्वसंशयानिवृत्तयापि विनाशित्वादिसंशयेन सा (मोक्षार्थप्रवृत्तिः) न स्यात् LaCandr. 510.35.

अनन्तत्वहानि (anantatva-hāni) *f.* loss of infinite nature सर्वं यदि स्याज्जगदेतदात्मनोऽनन्तत्वहानिर्निगमाप्रमाणता ViveCū. 235.

अनन्तत्वहेतु (anantatva-hetu) *m.* inferential cause, viz. innumerability न शक्यन्ते च संख्यातुमनन्तत्वान्मयापि हि । इति तु भागवतादिके जन्मादीनामानन्त्यात् कथनायोग्यत्वपरम्, अन्यथा अनन्तत्वपरीश्वरीयसमूहालम्बनधीसंभवेनानन्तत्वहेत्वसंगतेः LaCandr. 782.31.

अनन्तत्वादि (anantatvādi) *adj.* infinity or eternality etc. तद्भेदस्त्विह नास्ति अनन्तत्वादीनां शुद्धादन्यत्रासंभवात् Nyāyāmṛ. 435A.7.

अनन्तत्वादिपरत्व (anantatvādipara-tva) *n.* the state of being indicative of infinity etc. उपास्तिवाक्यस्यानन्तत्वादिपरत्वे वाक्यभेदापत्तेः LaCandr. 732.42.

अनन्तत्वादिलिङ्ग (anantatvādi-liṅga) *n.* reason (or inferential mark) such as infinity etc. उद्गीथोपासनाप्रकरणस्थस्य ... अनन्तत्वादिलिङ्गैः श्रेष्ठत्वोक्त्ययोगाच्च Nyāyāmṛ. 493B.11; 464B.10; यत्तु ... अनन्तत्वादिलिङ्गैः श्रेष्ठत्वोक्त्ययोग इति तत्र AdvaiSi. 732.8; आकाशादिश्रुतितोऽनन्तत्वादिलिङ्गप्राबल्यहेतोरपवादस्य सद्भावाद् ŚivārkaMaDī. ii. 2.31 (*on* ii.1.1)

अनन्तत्वापत्ति (anantatvāpatti) *f.* undesired contingency of infinity परिच्छेदानां त्रैविध्यव्यवहारात् प्रपञ्चस्यापि वस्तुगत्या परिच्छेदशून्यत्वेनानन्तत्वापत्त्या ... तच्छून्यमनन्तपदवोध्यम् GuruCandr. ii. 300.12.

अनन्तत्वाभ्युपगम (anantatvābhyupagama) *m.* **I** acceptance of eternality अनन्तत्वाभ्युपगमापाकरणायाह PrakaVi. 559.22; **II** acceptance of innumerability तद्व्यूहानामनन्तत्वाभ्युपगमात् NyāySu.(Ja.) 425A.7 (*on* ii. 2.12)

अनन्तत्वाविशेष (anantatvāviśeṣa) *m.* non-difference or sameness of limitlessness अनन्तत्वाविशेषेऽपि परापरगतीषु क्षणदिवसपक्षमाससंवत्सरचतुर्युगकल्पादिषु च आधिक्यन्यूनतयोर्मन्दिरप्यभ्युपगतत्वात् NyāySiA. 192.2.

अनन्तदक्षिण (ánanta-dakṣiṇa) *adj.* containing incalculable sacrificial fees स वा एष यज्ञः प्राग्दक्षिणोऽनन्तदक्षिणः समृद्धतरः TaiĀ. ii. 17.1 (268.2); ब्राह्मणस्वान्यपजिहीर्षमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिणः HirŚS. xxvii.5.197 (216.6) = ĀpaDS. ii(10).26.2; आत्मानं यूपमुच्छ्रित्य स यज्ञोऽनन्तदक्षिणः MahāBhā. xii. 98.10; xii. 99.26; ViṣṇuDhaP. iii. 237.50.

अनन्तदत्त (ananta-datta) *m.* **I** name of a sage अनन्तदन्त- (v.l. °दत्त)स्त्वष्टा च विश्वकर्मा च तुम्बुरुः ।... ईशानं सर्वलोकस्य वज्रिणं समुपासते MahāBhā. ii. 7.12; **II** name of a Brahmin अस्तु वो विदितम् ... भारकच्छकच्छन्दोगिसगोत्रच्छन्दोगसब्रह्मचारिब्राह्मणानन्तदत्त EI. x. 74.5.

अनन्तदन्त (ananta-danta) *m.* name of a sage अनन्तदन्तस्त्वष्टा च विश्वकर्मा च तुम्बुरुः ।... ईशानं सर्वलोकस्य वज्रिणं समुपासते MahāBhā. ii. 7.12.

अनन्तदर्शन (ananta-darśana) *n.* A seeing of Ananta (the serpent-

king Śeṣa) अहमनुपायोऽनन्तदर्शनकाङ्क्षया । पातालम् BrahmāṇḍP. ii. 36.4; B infinite vision अनन्तदर्शन° ··· °साक्षात्कृतसकलवस्तुसर्वस्वम् ··· परमात्मानम् YaśasCam. ii. 374.24; मुक्ताः ··· स्युः ···। अनन्तदर्शनज्ञानवीर्यानन्दमयाश्च ते TriṣaŚaPuC. iv. 4.225; iii. 5.90; iv. 1.860; अनन्तदर्शनज्ञानसुखवीर्य-चतुष्टयः । प्रभुः PārśvC. 8.374; अनन्तदर्शनस्य केवलज्ञानापरपर्यायस्य पाराध्र्यम् SyādvāMañ. 1(116); अनन्तदर्शनज्ञानसौख्यशक्तिमयः प्रभुः KumāPraPra. 85.11; *m.* epithet of Jina अनन्तदर्शनाय नमः ··· अनन्तवीर्याय नमः MahāP. 40.25(2); *adj.* possessed of infinite vision उज्ज्वलम् । वदन्ति सम्य-क्त्वमनन्तदर्शना जिनेशिनः SubhāRaSaṁ. 152; अनन्तदर्शनोऽपि त्वं दर्शनान्तर-बाधकः TriṣaŚaPuC. iv. 5.211.

अनन्तदल (ananta-dala) *adj.* possessed of uncountable petals कमलम् ··· । तदनन्तदलं विद्धि दिव्यम् PauṣkS. 22.16; अनन्तदलपद्मे (? दलपद्मे) तु अहंकारः समाश्रितः JayāS. 12.18 = PāraS. 5.16; 5.32.

अनन्तदान (ananta-dāna) *adj.* whose charity is unlimited नमस्तेऽनन्तदानाय नमस्तेऽनन्तलब्धये MahāP. 25.84.

अनन्तदानवश्री (anantadānava-śrī) *f.* i glory of innumerable demons अन्यैरपि सामान्यशब्दैः श्लेषः साध्यते ··· अनन्तदानवश्रीः — पक्षे दानश्रीः KāvyKaVr. 3.1 (50.33); ii glory of *dāna* (giving) (derived from *dānava*) with the deletion of its last syllable, KāvyKaVr. 3.1 (50.33)

अनन्तदास (ananta-dāsa) *m.* A servant of Ananta (i.e. devotee of Viṣṇu) अहो अनन्तदासानां महत्त्वं दृष्टमद्य मे BhāgP. ix. 5.14; PañcaRā. (Nā.) i. 9.17; B name of a commentator of SāhiDa. (the son of the author Viśvanātha) इति श्रीमत्° ··· °श्रीविश्वनाथकविराजात्मजश्रीमदनन्तदासकृतौ साहित्यदर्पणलोचने दशमः परिच्छेदः SāhiDa. (KAn's Ed.) colophon.

अनन्तदिगन्तभाज् (anantadiganta-bhāj) *adj.* resorting to the limitless ends of quarters (विद्या) अन्वेति संततमनन्तदिगन्तभाजम् (पुरुषम्) ŚaṅkaDigVi.(Mā.) 3.37.

अनन्तदिग्दन्तिसमव्रत (ananta-digdantisamavrata) *adj.* whose duties are equal to those of numerous quarter-elephants कथं परार्ध-प्रवणत्वमेषामनन्तदिग्दन्तिसमव्रतानाम् ।··· महीभुजां पङ्क्तिरियं क्षिणोतु Rāgh. 2.44.

अनन्तदिव्यतीर्थ (ananta-divyatīrtha) *n.* innumerable divine sacred places (शिवालयम्) पुरतःस्थितानन्तदिव्यतीर्थानां निजमन्दिरम् SiddhāSāU. 389.1(6); TripāMaNāU. 373.19(7)

अनन्तदिव्यतेजस् (ananta-divyatejas) *n.* endless divine lustre अनन्तदिव्यतेजोज्वालाजालैरलंकृताम् ··· मूलप्रकृतिजननीम् ··· ध्यात्वा TripāMaNāU. 370.1(6); (शिवालयम्) °अनन्तदिव्यतेजोराशिविशेषचैतन्यप्रासादैः परिवेष्टितम् SiddhāSāU. 388.12(6)

अनन्तदिव्यायुध (ananta-divyāyudha) *n.* many divine weapons अनन्तदिव्यायुधदिव्यशक्तिमस्थिरूपम् ··· सुदर्शनं महाचक्रं प्रज्वलति TripāMaNāU. 373.17(7); *adj.* possessed of many divine weapons दशमुखो रणे ··· अनन्तदिव्यायुधं रघूद्वहम् ··· संगतः KalkiP. iii. 3.45.

अनन्तदीप्ति (ananta-dīpti) *m.* epithet of Jaina Tīrthaṅkara (*lit.* having unlimited lustre) नाम्नामष्टसहस्रेण तोष्टुमः ··· तीर्थकृत् केवली ··· । अनन्तदीप्तिः MahāP. 25.113.

अनन्तदुःख (ananta-duḥkha) *adj.* having endless sorrow (दशरथम्) कैकेयी ··· वचनमब्रवीत् । अनन्तदुःखसंविग्नम् (v. l. मुद्विग्नम्) Rāma. ii. 220*(2); *n.* infinite sorrow (दशरथम्) कैकेयी ··· वचनमब्रवीत् । अनन्तदुःख-संविग्नम् Rāmā. ii. 220*(2); अनन्तदुःखं च न वेद मूढः BhāgP. v. 5.16; भोगाः ··· । अनन्तदुःखसंबन्धकारिणः PadmP.(Ra.) 76.13; अनन्तदुःखबीजानि न मनोऽन्तराण्यपि । तानि प्रणयवाक्यानि श्रुतानि YogVā. iii. 106.69; iii. 113.61; आध्यात्मिकाधिदैविकाधिभौतिकानन्तदुःखाकरं चेदं जगत् BrahmSūBh.(Rā.) 452.16 (*on* ii. 1.21); VedāntTaSā. 51.6; चेतनस्याप्यनन्तदुःखयोगाद्देस्य ··· °ब्रह्मभावानुपपत्तिः BrahmSūBh.(Rā.) 454.16 (*on* ii. 1.23); अनन्तदुःखमिश्रपरि-मितसुखलवभागित्वञ्चे···शारीर···प्रत्यगात्मन्यनुपपत्तेश्चायं न शारीरः VedāntDī. 30.9 (*on* i. 2.3); 91.16 (*on* ii. 1.23); अनन्तदुःखोदानुबोधविधुरा तु सुखस्य वृत्तिः RājTa.(Ka.) 8.1913; अनन्ताःदुःखरूपाणि फलान्यनुभवन्नपि । संसारविषवृक्षस्य जनो वैराग्यभाग् न हि TriṣaŚaPuC. ii. 1.95; अनन्तदुःखसंभारनिधानं खल्वयं भवः TriṣaŚaPuC. iii. 7.79; भोगपथो न पथ्यः ··· । अनेन जन्तुर्विचरन्ननन्तदुःखाटवी-पर्यटनं करोति NemiNir. 13.24; अनन्तदुःखसंभारं सोऽजयत्(? दू) दृष्टिमोहनम् MalliC. 3.190; अनन्तदुःखं संसारं ततः प्राप्नोति मूढधीः KumāPraPra. 72.19.

अनन्तदुःखित्व (anantaduḥkhi-tva) *n.* the state of being one with endless grief मुक्तस्य सर्वज्ञत्वे प्राक्तनभगवदलाभानुसन्धानेनानन्तदुःखित्व-मिति चेन्न, स्वसंसरणस्य भगवल्लीलात्वानुसंधानस्य सुखरूपत्वात् ŚrutaPra. ii. 573.6 (*on* iv. 1.2)

अनन्तदुर्ग (ananta-durga) *adj.* having many difficulties or dangers नारायणम् ··· । संसारसागरम् ··· अनन्तदुर्गमुत्ताराणार्थमखिलं शरणं प्रपद्ये PadmP. ii. 20.18.

अनन्तदुष्कृत (ananta-duṣkṛta) *n.* many misdeeds सद्योदयाच्चित्तरस-धीमतः सुसंवृतं चित्तमनन्तदुष्कृतात् । सुखेन दुःखेन च मोदते सदा MaYānaSū. 17.17 (4.22)

अनन्तदुष्प्रसरविलास (ananta-duṣprasaravilāsa) *m.* manifestation of many (*lit.* endless) wrong acts (मिथ्याभावना) अनन्तदुष्प्रसरविलास-कारिणी ··· । इयं प्रभो विगलति केन ··· °वासना YogVā. iii. 113.67 (comm. दुष्प्रसरविलासा दुश्चेष्टाविभ्रमाः)

अनन्तदुस्तरकर्मन् (ananta-dustarakarman) *n.* many deeds which are difficult to get over अनादिकालप्रवृत्तानन्तदुस्तरकर्मसंचयरूपाविद्यां विनिवर्त्य ··· पुनर्नावर्तयतीति BrahmSūBh.(Rā.) 775.19 (*on* iv. 4.22)

अनन्तदृश् (ananta-dṛś) *adj.* having infinite vision अनन्तदृक्प्रसृत-विकारकारिणी ··· । रणक्रिया ··· अभवत् YogVā. iv. 28.30 (comm. अनन्तदृशा-मिन्द्रादिदेवानाम्); *f.* limitless consciousness, YogVā. iv. 28.30 (comm. अनन्तायां त्रिविधपरिच्छेदशून्यायां दृशि आत्मचैतन्ये)

अनन्तदृष्टि (ananta-dṛṣṭi) *f.* one of the thousand epithets of Durgā (*lit.* of endless vision) (देवीं माहेश्वरीम्) अनन्तदृष्टिरक्षुद्रा धात्रीशा धनदप्रिया । ··· एवं नाम्नां सहस्रेण स्तुत्वासौ ··· प्रोवाच KūrmaP. 126.9 (1.12); *m.* i one of the thousand epithets of Śiva (*lit.* of endless vision) (शंकरः) अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः ।···एवं नाम्नां सहस्रेण तुष्टाव वृषभ-ध्वजम् LiṅgaP. i. 98.57; SaurP. 41.41; ŚivaP. iv. 35.31 (391B. 5); ii one of the thousand epithets of Gaṇeśa (*lit.* of endless vision) अनपायोऽनन्तदृष्टिः ··· इति वैनायकं नाम्नां सहस्रम् GaṇeP. i. 46.49.

अनन्तदेव (anantadeva) *m.* i name of a king (of Kashmir) आसीदवनिवनितावल्लभोऽनन्तदेवः VikraDeC. 18.33; कृतिनानन्तदेवेन मुनयोऽपि विनिर्जिताः RājTa.(Ka.) 7.201; 7.156; ii name of a Brahmin अनन्तदेवशर्मणः पुत्राय ··· सामवेदकौथुमशाखाचरणानुयायिने ··· पञ्चशतोत्पत्तियोग्य छे(क्षे)त्रपाटकं कोष्ठीकूलम् ··· दत्तमस्माभिः EI. xxi. 218.41; iii. 112.7; iii. 113.15; iii name of the teacher of the author of the *Bhojana-kutūhala* अनन्तदेवानमनसा विधायाप्यनन्तदेवस्य विधाय सेवाम् । योऽनन्तदेवः प्रथितः पृथिव्यामनन्तदेवः परितोषमेतु BhojanKu. 229.21; iv god Ananta (i.e. Viṣṇu), BhojanKu. 229.22; v name of the author of the *Siddhāntatattva* इत्यम् ··· । सिद्धान्ततत्त्वं गतवाग्विवादम् अनन्तदेवेन मुदा न्यरूपि SiddhāTa. 60.15; vi name of an author of a Dharmaśāstra text यत्तु सामान्यप्राप्तस्यापि पुनर्वसोर्युर्वादीन् प्रति पुनर्वचनं तत्सहपठितहस्तादिभान्तरवत् प्राशस्त्यातिशयाभिप्रायमिति सर्वमनवद्यमित्यनन्तदेवा आहुः BālamBha. i. 72.6 (*on* 1.14); इत्यनन्तदेवापदेवपुत्राणां लेखनम् BālamBha. i. 318.4 (*on* 1.97)

अनन्तदेवता (ananta-devatā) *f.* innumerable deities शारीरप्रमुखास्त-द्दृष्टौ ज्ञेया यथोदिताः । पुरुषाः सर्व एवामी पुनर्दिक्षुपसंहृताः । दिशश्च हृदये सर्वाः समाने हृदयादिकम् । एवं समाने संक्षेपो विकासोऽनन्तदेवताः BṛĀraUBhVā. iii. 9.110.

अनन्तदेवतासेव्य (anantadevatā-sevya) *m.* one of the thousand epithets of Gaṇeśa (*lit.* one to be attended upon by numerous gods or deities) त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः । अनन्तदेवतासेव्यो ह्यनन्तमुनि-संस्तुतः ··· इति वैनायकं नाम्नां सहस्रम् GaṇeP. i. 46.175.

अनन्तदेवधृत (anantadeva-dhṛta) *adj.* mentioned by Ananta-deva अतः स्नानाचमने तात्कालिके अग्निहोत्रस्य होमार्थं शुद्धिस्तात्कालिकी भवेदित्यनन्तदेवधृतगोभिलवचनात् BālamBha. iii. 55.9 (*on* 3.17)

अनन्तदेवपाददर्शन (anantadevapāda-darśana) *n.* seeing the feet of the Lord Ananta (i.e. of Viṣṇu) त्रिकालमनन्तदेवपाददर्शनं विना न किंचित् ŚaṅkaVi.(Ā.) 53.14.

अनन्तदेवात्मज (anantadevātmaja) *m.* son of Anantadeva (i.e. Koṇḍadeva) प्रयाणोद्दिकल्पेन केचिदाहुर्न चान्यथेत्यलमतिप्रसङ्गेनेत्यनन्तदेवात्मज-कोण्डदेवस्यायं परामर्शः BālamBha. i. 317.5 (*on* 1.97)

अनन्तदेशकालभेद (ananta-deśakālabheda) *m.* innumerable distinctions of places and (periods of) time अथ देशकालविशेषात् स्मर्यमाणं विविच्यते, तत्र देशकालभेदाग्रह इति, तत्र, अनन्तदेशकालभेदावगतं तद्देशावगतं च दुग्रहात् स्मर्यमाणं विविच्य गम्यते BrahmSi. 141.11.

अनन्तदेशकालवर्तिन् (anantadeśakālavart-in) *adj.* existing in innumerable places and (periods of) time अत्र भावाभावौ संबन्धिनौ तत्र परिमितदेशकालत्वाच्छक्यते ग्रहीतुम् । अभावस्त्वनन्तदेशकालवर्ती न कथंचिद् ग्रहीतुं शक्यते YuktiSneha. 79.31 (*on* i. 1.5)

अनन्तदेशवर्तित्व (anantadeśavarti-tva) *n.* the state of existing in innumerable places अग्निधूमयोः । व्यतिरेकस्य चादृष्टेर्गमकत्वं प्रकल्प्यते । इह साहित्यमेवेदमेकस्य सहभाविनः । अनन्तदेशवर्तित्वान्न तावदुपपद्यते ŚlokaVār. 5(7). 43 (461. 2)

अनन्तदेशवर्तिन् (anantadeśavart-in) *adj.* existing in innumerable places इह च भावाभावौ संबन्धिनौ, तत्र भावः परिमितदेशकालत्वाच्छक्यते ग्रहीतुम्, अभावस्त्वनन्तदेशवर्ती न कथंचिद् ग्रहीतुं शक्यते NyāyRa. 461. 13 (*on* 5(7). 43)

अनन्तदेशव्यापिता (anantadeśavyāpi-tā) *f.* the state of pervading (i. e. occupying) innumerable places न च साधनाभावे साध्याभावदर्शनमात्रेण साध्यान्वितस्वभावत्वं शक्यं निश्चेतुम्, अभावस्यानन्तदेशव्यापितया अनवयवेन ग्रहणस्यैव दुष्करत्वात् ĀtmaSi. 38. 3.

अनन्तदेशव्याप्ति (anantadeśa-vyāpti) *f.* pervasion over (i. e. occupation of) innumerable places अनन्तैरवयवैर्मूर्तैरन्योऽन्यस्यावकाशमप्रयच्छद्भिरनन्तदेशव्याप्तेः । तस्मान्निरवयवाः परमाणवः ŚāstrDī. 92. 14 (*on* i. 1. 5)

अनन्तदेशसंयोग (anantadeśa-saṁyoga) *m.* conjunction with innumerable places बुद्धिविषये चोद्याः परिहाराश्च … कथं च मुक्तबुद्धेर्युगपत् क्रमेण वानन्तदेशसंयोगः NyāySiA. 240. 9.

अनन्तदेशसंबन्धिन् (anantadeśa-sambandhin) *adj.* connected with innumerable places इह तु रोमशाव्यवस्थितस्यानन्तदेशसंबन्धी चैत्राभावः प्रमेयः TātpaṬ.(U.) 397. 22 (*on* 5(7). 43)

अनन्तदेह (ananta-deha) *m.* innumerable bodies अनेकजन्मोपात्तस्य पुण्यापुण्यस्य कर्मणः । अनन्तदेहहेतोश्च विप्रघातस्य संभवात् BṛĀraUBhVā. (Sambandha.) 94; मुक्तज्ञानस्य युगपदनन्तदेहसंयोगो नयनसूर्यादितेजोवत्संभवति YatīndraDī. 58. 8; *adj.* having innumerable bodies साक्षादनन्तदेहोऽयमिति ध्यायन् विमुच्यते BṛĀraUBhVā. iii. 1. 33.

अनन्तदैत्यभूपाल (ananta-daityabhūpāla) *m.* innumerable demon-kings (अहम्) अनन्तदैत्यभूपालबलभारभरार्दिता । अथमिबहुलं कालं न सेहे वोढुमक्षमा DaśāvaC. 8. 12.

अनन्तदोष (ananta-doṣa) *m.* innumerable defects अनन्तदोषदुष्टं च हेयं मायामतं शुभैः AnuVyā. 2B. 6 (*on* 1. 1); अतोऽनन्तदोषदुष्टत्वाद्ग्रन्थबहुत्वं स्यादिति ViṣṇuTaNi. 17A. 11; निर्विशेष इत्यादिनोक्तमुपसंहरति । अत इति । परमते अविद्यानुपपत्तेरित्यर्थः । योगो विषयप्रयोजनयोः परस्परं शास्त्रेण च संबन्धः । आदिग्रहणेन स्वपक्षसाधकं प्रमाणं गृह्यते । अनन्तदोषाः उक्ता वक्ष्यमाणाश्च NyāySu. (Ja.) 64B. 12 (*on* i. 1. 1); विनिगमनाविरहादनन्तदोषाभावकारणत्वमपेक्ष्य गुणस्य कारणताया न्याय्यत्वात् SiddhāMu. 67. 12 (*on* 131); न चान्यतमत्वेन दोषाणामनुगमः, अनन्तदोषघटिततया युगसहस्रेणापि दुर्ज्ञेयत्वापत्तेः GuruCandr. i. 200. 19; LaCandr. 331. 7; *adj.* having innumerable vices कलेरिवात्मानमनन्तदोषं यं कालपूर्वं यवनं प्रचख्युः Yādavā. 11. 6 (comm. अनवधिकावद्यम्)

अनन्तद्युति (ananta-dyuti) *adj.* 1 having infinite lustre उपैत्यनन्तद्युतिरप्यसंशयं विभिन्नमूलोऽनुदयाय संक्षयम् Kirātā. 16. 61; विभज्य भवति क्षोणीभारं मेरुगिराविव । सुखसंपत्तिमतुलामनन्तद्युतिराप्नुयात् RājTa.(Jo.) 571; ii having the glory of the serpent-king Ananta, RājTa.(Jo.) 571.

अनन्तद्रव्य (ananta-dravya) *n.* innumerable objects or individuals ते च ज्ञानविशेषा अनन्तद्रव्यपर्यायाणाम् … परिच्छेदकाः TātpaVṛ. 64. 15 (*on* 1. 49); तथा च सत्यनन्तद्रव्यारब्धत्वाविशेषेण सुमेरुसर्षपयोरपि तुल्यपरिमाणत्वप्रसङ्गात् TarkBhā.(Ke.) 64. 8; न चानन्तद्रव्येषु शक्तिग्रहासंभवः VaiyāBhū. 218. 1 (*on* 49)

अनन्तद्वादशी (ananta-dvādaśī) *f.* name of the twelfth lunar day in the bright half of the month of Bhādrapada (हरिम्) फाल्गुनस्य सितेऽभ्यर्च्य सुमतिद्वादशीव्रती । मासि भाद्रपदे शुक्लेऽनन्तद्वादशीव्रती AgniP. 188. 12.

अनन्तद्वादशीव्रतिन् (anantadvādaśī-vratin) *m.* one who observes the vow of *anantadvādaśī*; cf. **अनन्तद्वादशी.**

अनन्तधन (ananta-dhana) *n.* boundless wealth ययातिनहुषाद्यांश्च ज्ञात्वा निष्ठामुपागतान् । महाबलान् … अनन्तधनसंचयान् ।… न पुत्रदारादौ … ममत्वं कुरुते नरः ViṣṇuP. iv. 24. 142; *adj.* of great value (अपश्यत पुरुषम्) स्वलंकृतं मेखलया नितम्बे । हारेण चानन्तधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन BhāgP. iii. 8. 28.

अनन्तधर्म (ananta-dharma) *m.* 1 epithet of Śiva (*lit.* having infinite virtues) पादौ नमः शिवायेति …। पार्श्वौ चानन्तधर्माय … इत्यभिपूजयेत् MatsyaP. 95. 12; BhaviP. 744A. 16 (iv. 97. 6); 2 innumerable properties or attributes अनन्तधर्मराशिविश्रमभित्तिभूतायाः तस्याः (संविदः) स एव धर्मः चैतन्यम् PratyabhiVi. i. 246. 5 (*on* i. 5. 12); आ सामस्त्येनानन्तधर्मविशिष्टतया ज्ञायन्ते … जीवाजीवादयः पदार्था यया साज्ञा आगमः SyādvāMañ. 21(12)

अनन्तधर्मक (anantadharma-ka) *adj.* possessing innumerable attributes or properties अनन्तधर्मके धर्मिण्येकधर्मावधारणे । शब्दोऽप्युपायमात्रं स्यात् ŚlokaVār. 4. 178 (190. 2); अनन्तधर्मकं वस्तु प्रमाणविषयस्त्विह ṢaḍdarSa.(Ha.) 55.

अनन्तधर्मकत्व (anantadharmaka-tva) *n.* the state of having innumerable properties धर्माणामपि च पृथक्पदार्थान्तरत्वकल्पने एकस्मिन्नेव वस्तुनि पदार्थानन्त्यप्रसङ्गः । अनन्तधर्मकत्वाद्वस्तुनः SyādvāMañ. 4(27)

अनन्तधर्मत्व (anantadharma-tva) *n.* the state of having innumerable properties नयाश्चानन्ताः । अनन्तधर्मत्वाद्वस्तुनस्तदेकधर्मपर्यवसितानां वक्तुरभिप्रायाणां च नयत्वात् SyādvāMañ. 28(56)

अनन्तधर्मन् (ananta-dharman) *adj.* [P. v. 4. 124] having innumerable properties सतोऽसतो वक्तुमशक्यस्य चानन्तधर्मणो द्रव्यस्यैकैकं धर्ममाश्रित्य … विप्रतिपेधमोहमुदस्यति TattvPradī.(A.) 162. 5 (*on* 2. 23)

अनन्तधर्मवत्त्व (anantadharmavat-tva) *n.* the state of being one possessing innumerable attributes एतेनानन्तधर्मवत्त्वं ब्रह्मणि ज्ञापितम् AṇuBh. 211. 17 (*on* iii. 3. 3)

अनन्तधर्मात्मक (anantadharmātma-ka) *adj.* having the nature of innumerable attributes अनन्तधर्मात्मकमेव तत्त्वम् MahāVīSt.(H.) 1. 22; अनन्तधर्मात्मकस्य सर्वस्य वस्तुनः सर्वनयात्मकेन स्याद्वादेन विना यथावद्ग्रहीतुमशक्यत्वात् SyādvāMañ. 19(75); 5(89); 22(5); स्वपरपर्यायापेक्षया अनन्तधर्मात्मकं तत्त्वम् JñānBiPra. 13. 19; 24. 10.

अनन्तधर्मात्मकत्व (anantadharmātmaka-tva) *n.* the state of having innumerable attributes or properties यद्यपि हि कालकृतपर्यायैरुत्पद्यते नश्यति च वस्तु तथापि स्वपरपर्यायरूपानन्तधर्मात्मकत्वात् तस्य न सर्वथा नाशो युक्त इति SthānT. 12B. 6; सत्त्वं वस्तुतत्त्वम् … तत्त्वमिति धर्मि । अनन्तधर्मात्मकत्वं साध्यो धर्मः SyādvāMañ. 22(12)

अनन्तधर्माधिष्ठानत्व (anantadharmādhiṣṭhāna-tva) *n.* the state of being the substratum of innumerable attributes आत्मा त्वनन्तधर्माधिष्ठानत्वात् ज्ञानधर्मद्वारेण ज्ञानमन्यधर्मद्वारेणान्यदपि स्यात् TattvPradī.(A.) 37. 2 (*on* 1. 27)

अनन्तधर्माध्यासित (anantadharmādhyāsita) *adj.* possessed of innumerable properties अनन्तधर्माध्यासितं वस्तु स्वाभिप्रेतैकधर्मविशिष्टं नयति प्रापयति संवेदनकोटिमारोहयतीति नयः SyādvāMañ. 28(53)

अनन्तधातु (ananta-dhātu) *m.* 1 infinite primary element(s) पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् । अनन्तधातवो ह्येते व्यापकास्तु प्रकीर्तिताः VāyuP. i. 50. 1; 2 numerous verbal bases अनन्तधातुजन्यप्रकारादिविशिष्टतत्तत्स्वार्थोपस्थितीनां शाब्दधीजनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकाराद्युपस्थितीनां तज्जनकताकल्पने लाघवात् VyutpaVā. 102. 12; अथानन्तधातूनां नानार्थत्वमपेक्ष्य निपातानामेव वाचकत्वं युक्तमिति चेन्न VaiyāBhū. 211. 23 (*on* 45)

अनन्तधामन् (ananta-dhāman) *m.* epithet of the Moon God सोमाय शान्ताय नमोऽस्तु पादावनन्तधाम्नेति च जानुजङ्घे।… संपूजयेत् MatsyaP. 57. 8; PadmP. v. 24. 108; *adj.* possessing boundless glory or splendour स संयुगे शम्भुरनन्तधामा । समाययौ KūrmaP. 192. 4(1. 16); दास्ये तवात्मानमनन्तधाम्ने त्रिविक्रमायामितविक्रमाय KūrmaP. 210. 11 (1. 17)

अनन्तधामर्षि (anantadhāmarṣi) *m.* one of the thousand and eight epithets of Vṛṣabhadeva (*lit.* a sage of boundless glory or splendour) (त्वां गिरांपतिम् । नाम्नामष्टसहस्रेण तोष्टुमः) प्रशान्तोऽनन्तधामर्षिर्मङ्गलं मलहानघः MahāP. 25. 186.

अनन्तधार (ananta-dhāra) *m.* name of a deity (protecting the treasure) प्रासादाभिमुखान् न्यसेन्निधिनाधेश्वरान् क्रमात् । शङ्खपद्मौ …। अवलम्बितः संततश्चानन्तधार इति श्रुतः PārāS. 11. 267.

अनन्तधूप (ananta-dhūpa) *m.* long-lasting incense श्रीखण्डं ग्रन्थिसहितमगरुं सिह्लकं तथा । मुस्ता(? मुस्ताम्) तथेन्दुभूतेश शर्करां च दहेत् श्यामम् । इत्येषोऽनन्तधूपश्च कथितो देवसत्तम CaturCin. ii(1). 50. 13.

अनन्तध्वजा (anantadhvajā) *f.* name of a heavenly damsel, Ind. Stu. 15. 222, FN. 2.

अनन्तध्वना (anantadhvanā) *f.* name of a heavenly damsel (v. l. °ध्वजा), Ind. Stu. 15. 222. FN. 2; 15. 444 (column 2)

अनन्तनकार (ananta-nakāra) *m.* infinite individual instances of the sound *na* पर्यवसानाधिकरणोक्तरीत्यात्रापि नकारादिविषयकेषु नकारस्यैकत्वादिविशिष्टस्यैवान्वयोऽस्तु । युक्तं चैतत् । अन्यथानन्तनकारापत्तेर्दुर्वारत्वात् VaiyāBhū. 229. 18 (*on* 55)

अनन्तनत (ananta-nata) *adj.* saluted by Ananta (i. e. Śiva) नूतनोन्नतिनानन्तनतेनानीत्तनीतिना । निताननं तेन तातेन तत्तनूतनुता नुता Surath. 10. 20.

अनन्तनन्दथुनिधि (anantanandathu-nidhi) *m.* treasure of eternal bliss अनन्तनन्दथुनिधिः ·· आविर्भावयतु स्वयं स भगवानात्मानमात्मेश्वरः NyāyPari. 515. 3.

अनन्तनयन (ananta-nayana) *adj.* having innumerable eyes अनन्तानन एको योऽप्यनन्तनयनः स्वराट्···दृष्ट्वा तं (गणेशम्) तादृशं शेषो भीत्या भ्रान्त इवाभवत् GaṇeP. i. 90. 46; *n.* innumerable eyes जगद्धात्री सानन्तनयनोद्भवा(?वाः)। मोचयामास लोकेषु वारिधाराः सहस्रशः DevīBhāP. vii. 28. 37.

अनन्तनरकातप (ananta-narakātapa) *adj.* having the intense heat of hell तदेतदात्मबद्धमिह चित्तम् ··· अनन्तनरकातपम् YogVā. iv. 42. 42.

अनन्तनाग (ananta-nāga) *m.* A the serpent-king Ananta अनन्तनागाङ्कपर्यङ्कशायिनं भगवन्तं दक्षिणेन योऽयम् ··· सलिलस्कन्धः स प्रदेशो निर्विबन्धः सेतुबन्धस्य BālRā. 7. 43(3); वरादनन्तनागस्य सहस्रायुरभूद् द्विजः BṛKathāMañ. 15. 373; B image of the serpent-king Ananta वरुणं राजतोऽद्भवम् । ··· नागयष्टचन्तरे क्षिपेत् । तत्रैवानन्तनागं च BhaviP. 398B. 14 (ii(3). 4. 32); अनन्तनागमालिख्य पिष्टेनास्य फणोपरि ।··· लिखेद् भूमिं सपर्वताम् IśānŚiPa. ii. 27. 79.

अनन्तनाथ (ananta-nātha) *m.* 1 Lord Śiva (*lit.* lord of all living beings) निष्कृष्य पुद्गलगणान् भवबन्धसिन्धोः । दीक्षाविलुप्तनिबिरोत्सदुरन्तपाशचक्रान्नयत्यनिशमूर्ध्वमनन्तनाथः HarVi. 47. 122; 2 Lord Ananta (i. e. the Jaina Arhat Anantajit) श्रीमतोऽनन्तनाथस्य चरित्रमिदमुच्यते TriṣaŚaPuC. iv. 4. 2; iv. 4. 50; 3 name of Śeṣa [pw.]

अनन्तनाथकथा (anantanātha-kathā) *f.* name of a Jaina text [pw.]

अनन्तनामधेय (ananta-nāmadheya) *adj.* having innumerable names अनन्तनामधेयाय सर्वाकारविधायिने । समस्तमन्त्रवाच्याय विश्वैकपतये नमः Subhāṣi. 11.

अनन्तनामन् (ananta-nāman) *n.* 1 name Ananta (i. e. Viṣṇu) अनन्तनामस्मरणं कुर्वन्नुच्चारणं नरः ।··· प्राप्नोत्यनन्तानि फलानि विप्र ViṣṇuDhaP. iii. 219. 3; विष्णुरनन्तनाम्ना किलात्रैव वर्तते ŚaṅkaVi.(Ā.) 51. 12; Nārāy. x. 44. 4; 2 innumerable names तस्या(तासा)मप्यचतुष्कं भविष्यति ··· । सर्वेषामग्रजो रामः ···। तेषामनन्तनामानि PadmP. iv. 57. 35; 3 epithet of Vināyaka (*lit.* having innumerable names) अनन्तनामानन्तश्रीरनन्तानन्तसौख्यदः । ॐइति वैनायकं नाम्नां सहस्रमिदमीरितम् GaṇeP. i. 46. 176; *adj.* I named Ananta सोमाय शान्ताय नमोऽस्तु पादावनन्तनाम्ने इनुजानु जङ्घे ··· संपूजयेत् BhaviP. 899A. 21 (iv. 206. 8); तृष्णे देवि नमस्तुभ्यं कृतकृत्यासि सांप्रतम् । अनन्तनाम यद्रूपं तत्त्वया वामनीकृतम् SubhāRaK. 49. 38; II having innumerable names अनन्तश्रुतिनेत्रश्चानन्तनामा गुणातिगः ··· देवः GaṇeP. ii. 79. 28; i. 46. 176; कथमस्य नाम कुर्वे सहस्रनाम्नो ह्यनन्तनाम्नो वा Nārāy. x. 44. 4.

अनन्तनायक (ananta-nāyaka) *m.* name of a person अत्रार्थे साक्षि (sic.) वट्टारग्रामप्रमुखरिखितारा । ··· तथा साक्षि (Read साक्षी) अनंतनायक । (?:) EI. xxiii. 274. 16.

अनन्तनारायण (ananta-nārāyaṇa) *m.* name of a deity (Viṣṇu) अनन्तनारायणस्य सततमष्टपुष्पिकाव(ब)लिचरुसत्रप्रवृत्तये ··· भूखण्ड[:] ··· अ[ग्र]-हार[:] ··· प्रतिपा[दितः ?] EI. xv. 307. 24; xv. 309. 51.

अनन्तनाल (ananta-nāla) *m.* name of a *pīṭha*-deity अं अनन्तनालाय नमः इति च धर्मादिभिः सह षोडशमन्त्रैः पीठं अभ्यर्च्य ParaśuKS. 7. 16 (215. 22); अं अनन्तनालाय नमः इति पीठस्य मध्ये ··· अभ्यर्च्य NityoNi. 138. 5; *adj.* having Ananta (i.e. Śeṣa) as the stalk नमोऽधिष्ठितेऽनन्तनालं कमलविष्टरम् Subhāṣi. 13.

अनन्तनालसुषिर (anantanāla-suṣira) *n.* opening of the hollow of the stalk (of a lotus) in the form of the deity Ananta तदुपरि ब्रह्मशिलायामनन्तनालसुषिरे ··· आसनं परिकल्प्य ··· सदाशिवं भावयेत् LiṅgaP. ii. 24. 21.

अनन्तनितान्तोन्नततानतस् (anantanitāntonnatatāna-tas) *adv.* due to the very expansive ridges which are infinitely high नीतिनेत्रनतानन्तनितान्तोन्नततानतः । तातेतोऽननुतोऽनीतं न नुन्नैनोनुतान्ततः Yādavā. 6. 79 (comm. आनन्त्यमवसानराहित्यमतिविशालत्वं तानस्य विशेषणम्)

अनन्तनित्यसुखद (anantanityasukha-da) *adj.* giving infinite and permanent happiness मान्त्रं ज्ञानमनश्वरम् । अनन्तनित्यसुखदं वृद्धिं याति क्षणात् क्षणम् JayāS. 7. 125.

अनन्तनिमित्तवत् (anantanimitta-va(n)t) *adj.* having many causes जीवतोऽवश्यंभावि(? वी) हि कामक्रोधोद्भवो वेगः, अनन्तनिमित्तवान् हि सः GītāBh.(Śaṅ.) 172. 16 (*on* 5. 23)

अनन्तनियमकल्पना (anantaniyama-kalpanā) *f.* assumption of innumerable restrictive rules एतादृशनियमानभ्युपगमे चानन्तनियमकल्पनागौरवरूपो बाधकस्तर्कः AdvaiSi. 528. 8.

अनन्तनिर्देशप्रतिष्ठान (anantanirdeśapratiṣṭhāna) *n.* name of a *samādhi* भगवान् ··· महाधर्मासने पर्यङ्कमाभुज्य अनन्तनिर्देशप्रतिष्ठानं नाम समाधिं समापन्नः SaddhaPuṇ. 2. 28; 13. 1 [DBHS.]

अनन्तनिर्भररतप्रीता (anantanirbhararata-prītā) *adj.* (*f.*) pleased with long-lasting and intense sexual enjoyment रण्डा नक्तमनन्तनिर्भररतप्रीता सुखायास्तु वः SūktiMu. 89. 2.

अनन्तनिर्विकल्पककल्पना (anantanirvikalpaka-kalpanā) *f.* assumption of endless indeterminate (forms of) knowledge किं च उक्तप्रकारतासंबन्धेन प्रत्यक्षे न विशेषणधीहेतुत्वम्, अनन्तनिर्विकल्पककल्पनागौरवात् GuruCandr. i. 229. 19.

अनन्तनिर्विकल्पकवृत्ति (anantanirvikalpaka-vṛtti) *f.* innumerable indeterminate forms of knowledge तत्र चानन्तनिर्विकल्पकवृत्त्यपेक्षया लाघवेन नित्यमेकमेवात्मस्वरूपं ज्ञानं कल्प्यते SāṃkhyaPraBh. 66. 33 (*on* 1. 148)

अनन्तनृपाज्ञा (anantanṛpājñā) *f.* order of King Ananta तद्दि लक्ष्मणचन्द्राख्ये पुरा गोपरि डामरे । जनकद्वारपतिना हतेऽनन्तनृपाज्ञया । प्रायोपविष्टया द्वारे तत्पत्न्यापि समर्पितम् RājTa.(Ka.) 7. 1172.

अनन्तनेमि (anantanemi) *m.* name of a king राजा अनन्तनेमिः MahāVyu. 184. 4 [DBHS.] [name of a king of Mālava, a contemporary of Śākyamuni, PW.]

अनन्तपटलच्छिद्र (ananta-paṭalacchidra) *n.* innumerable holes of the roof दत्तः ··· । अगच्छत् कुटिकामेकाम्···। अनन्तपटलच्छिद्रप्रविष्टातपचन्द्रिकाम् BṛKathāŚloSam. 18. 156

अनन्तपत्त्र (ananta-pattra) *adj.* having innumerable petals मेरूपमानमधुपव्रजसेवितान्तं चेजायते वियति कञ्जमनन्तपत्त्रम् SubhāRaSam. 754.

अनन्तपत्नी (ananta-patnī) *f.* wife of (the serpent-king) Ananta अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता सदा BrahmVaiP. ii. 1. 106; DevīBhāP. ix. 1. 102

अनन्तपथ (ananta-patha) *adj.* having infinite ways व्यवहारोऽनन्तपथस्स वक्तुं नैव शक्यते ŚukraNī. 4(5). 331; *m.* i way or path (leading) to Viṣṇu प्राज्ञैरनन्तपथपान्थतयासितव्यम् RasiRañ. 122; ii infinite ways or paths, RasiRañ. 122.

अनन्तपथगा (anantapatha-gā) *adj.* (*f.*) flowing through the celestial region अनन्तपथगाप्येषा हन्त त्रिपथगामिनी । ·· शोभते । नदी YātrāPra. 7. 161.

अनन्तपद (ananta-pada) *n.* A the word *ananta* आहानन्तपदं ब्रह्म परिच्छेदविवर्जितम् BṛBrahmaS. iv. 9. 31; अनन्तपदस्य च प्रागुत्तरकालीनान्ताभावपरत्वात् TattvPradī. (Ci.) 36. 4; 51. 16; इतरवैलक्षण्यार्थानि सत्यज्ञानानन्तपदानीति स्वसिद्धान्तभङ्गप्रसङ्गात् ŚatDū. 213. 28; 214. 16; सत्यादिवाक्येऽपि अनन्तपदेनैव सर्वव्यवच्छेदसिद्धौ NyāySiA. 225. 5; Vādā. 92. 5; ŚaṅkaVi.(Ā.) 85. 16; अत्र सत्यपदमसत्यस्य ज्ञानपदमचिद्वर्गस्यानन्तपदं जीववर्गस्य च व्यावर्तकम् VedāntKau. 13. 14 (*on* i. 1. 2); अनन्तपदेन कालतो देशतो वस्तुतश्च परिच्छिन्नत्वं वार्यते SarvaDaKau. 118. 18; Bi foot of Viṣṇu अतिविशदानन्तपदप्रवृत्तदृष्टिर्न मधुरवीक्षणतः । तुष्यत्यच्युतकामः प्रातस्तनकमलमुकुलवीक्षणतः RasiRañ. 52; Bii the sky-region, RasiRañ. 52; C infinite (*sphoṭa*) words, Darpaṇa *on* VaiyāBhūSā. reads अनन्तपद for अनन्तपदार्थ; cf. अनन्तपदार्थ II.

अनन्तपदनिर्वचन (anantapada-nirvacana) *n.* derivative explanation of the word *ananta* नानन्दमयप्रकरणमनन्तपदनिर्वचनपरत्वादिना रूपेण तद्व्याख्यानम् NyāySu.(Ja.) 135B. 3 (*on* i. 1. 6)

अनन्तपदबोध्य (anantapada-bodhya) *adj.* (sense) to be conveyed by the word *ananta* प्रसिद्धानामन्तपदार्थतया तच्छून्यमनन्तपदबोध्यम् GuruCandr. ii. 300. 13.

अनन्तपदवत् (anantapada-vat) *adv.* like the word *ananta* अत्र हि अनन्तपदवद्द्वितीयपदेनापि सविशेषतैव ŚatDū. 217. 23.

अनन्तपदव्यवच्छेद्य (anantapada-vyavacchedya) *adj.* to be excluded by the word *ananta* अनन्तपदव्यवच्छेद्यमाह तेनेति ŚrutaPra iB. 116. 14 (*on* i. 1. 2)

अनन्तपदव्याख्यानदशा (anantapadavyākhyāna-daśā) *f.* occasion

of the explanation of the word *ananta* उक्तं हि श्रीवेदार्थसंग्रहव्याख्यानेऽनन्तपदव्याख्यानदशायां श्रीरामिश्रैः NyāySiA. 261.16.

अनन्तपदश्रुत्यसंकोच (anantapadaśruty–asaṅkoca) *m.* non-restriction of (the sense of) the scriptural statement of the word *ananta* अन्यथानन्तपदश्रुत्यसंकोचाय संख्यातोऽपि परिच्छेदाभावस्वीकारेण ब्रह्मबहुत्वप्रसङ्गात् ŚatDū. 214. 7.

अनन्तपदसामर्थ्य (anantapada–sāmarthya) *n.* significative force of the word *ananta* अनन्तपदसामर्थ्यादेव ब्रह्मव्यतिरिक्तानन्तवस्तुमिथ्यात्वं सिध्यति ŚatDū. 212. 11.

अनन्तपदा (ananta–padā) *adj.* (*f.*) **i** having innumerable levels or stages नन्वन्यापि दिङ्मोहालातचक्रादिविषयानन्तपदाविद्या । तत्किमुच्यते चतुष्पदेति TattvVai. 63. 8 (*on* 2. 5); **ii** having innumerable feet महाश्रीरस्य देवता । ··· अनन्तपदा LakṣmīT. 44. 46

अनन्तपदात्ममूर्ति (anantapadātma–mūrti) *adj.* whose form comprises of infinite regions त्रिमूर्तयेऽनन्तपदात्ममूर्ते ··· नमोऽस्तु तुभ्यम् KūrmaP. 196. 1 (1. 16)

अनन्तपदार्थ (ananta–padārtha) *m.* **i** infinite number of word-denotations भावनाया वाच्यतावच्छेदकत्वेऽनन्तपदार्थेषु शक्यतावच्छेदकत्वापत्तौ गौरवात् VaiyāBhū. 20. 8 (*on* 2); **ii** endless (*sphoṭa*) entities अनन्तपदार्थानां तेषां शक्तिं चापेक्ष्य वर्णस्वर्णेष्वेव शक्तिकल्पनस्य लघुत्वात् VaiyāBhū. 251. 8 (66)

अनन्तपदार्थगर्भता (anantapadārthagarbha–tā) *f.* the state of being comprised of endless objects न कार्यव्यापकत्वम् । व्याप्तेरनन्तपदार्थगर्भतया गौरवात् BhāṭṭCin. i. 34. 24 (*on* i. 1. 4)

अनन्तपदार्थपरिच्छित्ति (anantapadārtha–paricchitti) *f.* delimitation of infinite objects अथानन्तपदार्थपरिच्छित्तिपरिणमनेऽपि ज्ञानं बन्धकारणं न भवति TātpaVṛ. 56. 9 (*on* 1. 43); 30.20 (*on* 1. 21)

अनन्तपदार्थात्मक (anantapadārthātma–ka) *adj.* consisting of innumerable objects अनन्तपदार्थात्मकस्य प्रपञ्चस्य कर्तृत्वेन न स्फुटं तदेकदेशवेदकारणत्वेन स्फुटीभविष्यति सार्वज्ञम् NyāySu.(Ja.). 111B. 13 (*on* i. 1. 3)

अनन्तपद्मनिलय (anantapadma–nilaya) *n.* **1** abode of innumerable lotuses ददर्श ···। सरः ···। अनन्तपद्मनिलयं पातालमिव भूमिगम् KathāSaSāg. xii. 33.16; **2** abode of the serpents Ananta and Padma, KathāSaSāg. xii. 33. 16.

अनन्तपद्मान्वित (anantapadmānvita) *adj.* full of innumerable lotuses सः सरः ··· समुद्रोपममभ्यपश्यत् । अनन्तपद्मान्वितम् DaśāvaC. 7. 90.

अनन्तपयोनिधि (ananta–payonidhi) *m.* the boundless ocean अनन्तपयोनिधौ पयोबिन्दुसंनिपातवत् संसारिवर्गे पूर्वमुक्तेषु पश्चान्मुक्तानामनुप्रवेशः NyāySiA. 216. 5.

अनन्तपर (ananta–para) *adj.* signifying (the sense) innumerable 'सहस्रशीर्षा पुरुषः' ··· इति श्रुतौ सहस्रशब्दोऽनन्तपरः LalitāSaBh. 83.5(117); अयं जरापदार्थः सहस्रशब्दोऽनन्तपरः BālamBha. iii. 102. 20 (*on* 3. 63–64)

अनन्तपरमाणुघटित (anantaparamāṇu–ghaṭita) *adj.* made up of innumerable atoms अनन्तपरमाणुघटितयोरिक्षुक्षीरसमुद्रयोश्च तारतम्यम् ŚivārkaMaDī. ii. 68.17 (*on* ii. 2. 10)

अनन्तपरमाणुपरिणाम (anantaparamāṇu–pariṇāma) *m.* transformation of infinite atoms अनन्तपरमाणुपरिणामकल्पनापेक्षया च तस्यैकस्य (वाचकशब्दस्य) कल्पने लाघवम् VaiyāSiMañ. 209. 4.

अनन्तपरमाण्वभ्युपगम (anantaparamāṇv–abhyupagama) *m.* acceptance of infinite atoms यदि ··· त्र्यणुकाद्यारम्भार्थमनन्तपरमाण्वभ्युपगमः ŚivārkaMaDī. ii. 74. 30 (*on* ii. 2. 12)

अनन्तपराक्रम (ananta–parākrama) *adj.* possessed of unbounded strength or prowess अहो बतानन्तपराक्रमाणां दिवौकसो वीरवरायुधानाम् । ··· किं वः पद्मस्य दैन्यं दधते मुखानि KumāSaṁ. 12. 35; एष मे प्राणदो वीरः ··· । अथाप्यज्ञातवंशोऽयं मयानन्तपराक्रमः SkandP. iii(3). 13. 68; त्वमेव निर्गुणः सत्योऽनन्तोऽनन्तपराक्रमः ŚivaP. ii(5). 30. 33 (256B. 11)

अनन्तपरिकरसागरमेघव्यूहतेजोमण्डलछत्त्राकारराज (anantaparikarasāgarameghavyūhatejomaṇḍalachattrākārarāja) *m.* name of a Nāga king [DBHS.]

अनन्तपरिमाण (ananta–parimāṇa) *adj.* [*f.* -ā] of infinite or huge size महती अनन्तपरिमाणा विनष्टिः BṛĀraUBh. 634. 17 (*on* iv. 4. 14); कटिप्रदेशादनन्तपरिमाणादूर्ध्वमुद्गता यथोदितदिव्योदरादयः GītāBh.(Rā.) 547. 8 (*on* 11. 19); 11. 2 (*on* 1. 6)

अनन्तपरिमाणत्व (anantaparimāṇa–tva) *n.* the state of having immeasurable size ज्यायःपरिमाणाच्च ज्यायस्त्वं दर्शयन् अनन्तपरिमाणत्वं दर्शयति ChāndoUBh. 177. 9 (*on* iii. 14. 3)

अनन्तपरिवारा (ananta–parivārā) *adj.* (*f.*) having innumerable attendants एकैकस्या असंख्याताः शक्तयस्तदात्मिकाः । अनन्तपरिवारास्ता इति शक्तिमयं जगत् LakṣmīT. 45. 98.

अनन्तपर्यङ्क (ananta–paryaṅka) *m.* bed in the form of (the serpent-king) Ananta तस्मिन्ननन्तपर्यङ्के शेते [ऽसौ] विस्तृतोच्छ्रिते । दिव्यासनसमासीनः पद्मनाभोऽच्युतो हरिः BṛBrahmaS. iii. 2. 138.

अनन्तपर्यन्त (ananta–paryanta) *adj.* ending with or upto (the deity) Ananta तस्मान्मण्डलमध्ये तु प्रागदत्त्वा कमलासन । धर्मादनन्तपर्यन्तं पत्रकं नवकं तु वा । सत्त्वेनाच्छादितं पश्चात् केवलानम्बुजं? स्मरेत् PauṣkS. 20. 16.

अनन्तपर्यन्तम् (ananta–paryantam) *adv.* up to infinity स्निग्धत्वं रूक्षत्वं च कर्मतापन्नम् ··· कथितम् । किंपर्यन्तम् । ··· अनन्तपर्यन्तं यावदनुभवति TātpaVṛ. 225.15 (*on* 2. 72)

अनन्तपर्यय (ananta–paryaya) *adj.* consisting of endless modifications or manifestations अनन्तपर्ययं द्रव्यं सामान्यादिकमिष्यते VarāṅgaC. 26. 2

अनन्तपर्याय (ananta-paryāya) *m.* endless modifications or manifestations ज्ञेयं तु लोकालोकविभागविभक्तानन्तपर्यायमालिकालीढस्वरूपसूचिता विच्छेदोत्पादध्रौव्या षड्द्रव्यी सर्वम् TattvPradī (A.) 33. 1 (*on* 1. 23); सामान्यत एकोऽपि अनन्तपर्यायकिर्मीरितमूर्तिः मन्दप्रकाशनामधेयो नानुपपन्नः JñānBiPra. 3. 4.

अनन्तपल्लव (ananta-pallava) *adj.* having innumerable petals अच्युतम् । स्मरेद्दक्षिणहस्तास्यं पद्मे चानन्तपल्लवे JayāS. 18. 63.

अनन्तपाद (ananta–pāda) *adj.* having infinite feet अनन्तपादम् ··· नारायणं स्तोष्यमृतम् VarāP. 3.16; अनन्तपादम् ··· । त्वामद्भुतं दिव्यनृसिंहमूर्तिम् ··· शरणं प्रपद्ये SkandP. ii(2). 16. 43; अनन्तपादस्त्वमनन्तबाहुः ··· कथमीदृशं त्वां तोष्ये LiṅgaP. i. 72. 157; ŚivaP. ii(5). 48. 45 (279B. 5)

अनन्तपार (ananta–pāra) *adj.* [*f.* -ā] of boundless limit (in shape, time, result etc.) सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः । ··· बुबुधे CaraS. i. 1. 24 (1922 Ed.); BhāvPra.(Bhā.) 1. 53; संमृत्य संसारमनन्तपारं ज्ञानस्य पुण्यस्य च बोधिसत्त्व(? त्वः)। धर्मेषु चिन्तासु विनिश्चितः ··· गतिं परैति MaYānaSū. 23. 26 (6. 6) (comm. असंख्येयप्रभेदकाले पारमस्य परिपूरणमित्यनन्तपारम्); आर्तेषु विप्रेषु दयान्वितश्च यच्छ्रद्धया स्वल्पमुपैति दानम् । अनन्तपारं समुपैति CāṇaNīDa. 12. 2; तिर्यग्गतेर्दुःखमनन्तपारं वक्तुं न शक्यं चिरकालतोऽपि VarāṅgaC. 6. 32; विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखम् BhāgP. i. 5. 16; xi. 7. 18; यद्बान्धवः कुरुबलाब्धिमनन्तपारमेको रथेन ततरेऽहम् BhāgP. i. 15. 14; iv. 28. 27; xi. 21. 40; अनन्तपारा दुष्पूरा तृष्णा दुःखशतावहा SkandP. vi. 32.46; vii(1). 255. 30; PadmP. v. 19. 257; अनन्तपारस्य महोदधेस्तु तीरे वनं तत्र वसन्ति सर्पाः VarāP. 51. 10; मुञ्चाव दुःखं तदनन्तपारम PadmP. ii. 55. 6; उक्तं च । ··· अनन्तपारं किल शब्दशास्त्रम् Pañcā. 1. 20; अनन्तपारोऽहमहर्निशं बुधैर्विभावितोऽहं हृदि AdhyāRā. vii. 5. 44.

अनन्तपार्थिवपृथक्कार (anantapārthiva-pṛthakkāra) *m.* separation of the endless earth-substances अनन्तपार्थिवपृथक्कारेऽपि द्रव्यान्तरानन्त्यवदयोपलम्भमानन्त्यातिशयाद्यवस्थोपपत्तेः ŚatDū. 151. 17.

अनन्तपाल (ananta–pāla) *m.* **I** name of one of the three brothers of Udaya Siṁha of the Chauhan dynasty जावालिपुरे चाहमानकुलतिलकः ··· श्रीउदयसिंहो नाम राजकुलो राज्यं भुनक्ति । तस्य दायादालयः सहोदराः सामन्तपाल-अनन्तपाल-त्रिलोकसिंहनामानो दातारः शूराः PrabaK. 105. 4; 106. 1; **II** name of a prince (of Kashmir) गच्छन्ननन्तपालादिराजपुत्रधिया नृपम् । दण्डनायकवाक्येन न्यषिध्यत पदे पदे RājTa.(Ka.) 7. 1585; 7. 1618.

अनन्तपिङ्गल (anantapiṅgala) *m.* (pl.) proper name of a people or a clan [pw.]

अनन्तपीठ (ananta–pīṭha) *n.* **A** name of a place on the banks of the river Kāverī सोऽपि (विभीषणः) तच्छिरसा (विमानं) गृह्य ययौ ··· । रवौ मध्यंदिने प्राप्ते कवेरतनयातटे । चन्द्रपुष्करिणीमध्येऽनन्तपीठेऽवतारयत् PāraS. 10. 277; **B** name of the seat (in Tantric worship) with Ananta as the deity शेषं च पृथ्वीं च तदनन्तपीठम् (इष्ट्वा) ĪśānŚiPa. i. 16. 40.

अनन्तपीठिकारूढ (anantapīṭhikārūḍha) *adj.* seated on the couch in the form of (the serpent-king) Ananta (सात्यकिः) रङ्गम् ··· अनन्तपीठिकारूढमभ्यर्च्य मुदितो ययौ Yādavā. 22. 174.

अनन्तपीलु (anantapīlu) *m.* name of a piśāca [DBHS.]

अनन्तपुटतल्पग (anantapuṭatalpa-ga) *adj.* remaining in the bed of the countless leaf-folds अपारजलधौ तत्र कोटिशो वटपादपाः । कोटिशः पुरुषास्तत्र वटपत्रनिवासिनः । कोटीनां वटवृक्षाणामनन्तपुटतल्पगाः BṛBrahmaS.

ii. 1.51.

अनन्तपुण्य (ananta-puṇya) *adj.* [*f.* -ā] **i** very auspicious or sacred वैशाखमासस्य च या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे । नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पञ्चदशी च माघे । एता युगाद्याः कथिताः पुराणेष्वनन्तपुण्यास्तिथयश्चतस्रः VisṇuP. iii. 14. 13; **ii** leading to or causing endless merit मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे । कर्माण्यनन्तपुण्यानि BhāgP. viii. 4. 21; रामायणं काव्यमनन्तपुण्यम् AdhyāRā. vii. 9. 71; **iii** having infinite merit ये भक्तिमन्तो मधुसूदनस्य ··· गच्छन्ति ते नाकमनन्तपुण्याः PadmP. iv. 92. 27; अनन्तपुण्या पश्यामि कान्तवदनं जितपूर्णचन्द्रम् ŚṛṅgāMañ.(A.) 18. 26; *n.* limitless merit गुरुक्षमाभर्तृविनिर्गतानां सरस्वतीनां श्रुतिसिन्धुसङ्गे । विगाह्य संचेतुमनन्तपुण्यं परं मयाकारि निदिन्ध एषः VedāntKa. 559. 12 (*on* iv. 4. colophon.)

अनन्तपुण्यकृत् (anantapuṇya-kṛt) *adj.* bringing about or producing endless merits शृणुष्वावहिता देवि तथैवानन्तपुण्यकृत् । नराणामथ नारीणामाराधनमनुत्तमम् MatsyaP. 62. 4.

अनन्तपुण्यनिचय (anantapuṇya-nicaya) *m.* collection of endless merits तत्पुराणं वदाम्यहम् । अनन्तपुण्यनिचयैर्यस्य श्रवणगोचरा । मतिरुत्पद्यते GaṇeP. i. 9. 27.

अनन्तपुण्यनिलय (anantapuṇya-nilaya) *m.* abode of endless merits प्रतिबीजाधिकफलो ब्रह्मविष्णुशिवात्मकः । अनन्तपुण्यनिलयो योगिनामपि दुर्लभः ParamāKā. 127. 11.

अनन्तपुण्यप्रद (anantapuṇya-prada) *adj.* bestowing or yielding endless merits चरितमिदमपूर्वं वामवोचम् ··· श्रवणपठनमस्यानन्तपुण्यप्रदं स्यात् BṛDharmaP. i. 8. 55.

अनन्तपुण्यफलद (anantapuṇyaphala-da) *adj.* [*f.* -ā] bestowing the fruit in the form of endless merit हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे BhaviP. 816B. 16 (iv. 141. 60) = VasiS. 18. 161; अनन्तपुण्यफलदा गजच्छाया त्रयोदशी NāraS. 55. 19.

अनन्तपुण्यफलभुज् (anantapuṇyaphala-bhuj) *adj.* enjoying (i. e. experiencing) the reward of endless meritorious deeds ब्रह्माकारतया सदा स्थिततया ··· आस्ते कश्चिदनन्तपुण्यफलभुग्धन्यः स मान्यो भुवि ViveCū. 427.

अनन्तपुण्यभरार्थिन् (anantapuṇyabharārthin) *adj.* desiring great amount of endless merits तत्रा साधर्मिकास्तत्र ··· । इष्टे तीर्थसमुद्धारेऽनन्तपुण्यभरार्थिनः । वहिकां मण्डयामासुः PrabhāC. 204. 27.

अनन्तपुण्योपचय (anantapuṇyopacaya) *adj.* which causes the accumulation of endless merits अनन्तपुण्योपचयमनन्तं तु महाव्रतम् । यथाभिलषितावाप्तिं कुरु मे पुरुषोत्तम BhaviP. 757A. 33 (iv. 106. 19)

अनन्तपुर (ananta-pura) *n.* **i** name of the capital city of King Nānadeva अथ सपदि महेन्द्रराजधानीललितमनन्तपुरं समेत्य भूपः Rāṣṭrau. 4. 36; **ii** name of the city presently called Trivandrum (दक्षिणं तत्र कन्याल्यां दुर्गां देवीं ददर्श सः । ततः फाल्गुनमासाद्य पद्मास्सरसमुत्तमम् ।) फाल्गुनमनन्तपुरम् Vīrarāghava *on* BhāgP. x. 79. 18.

अनन्तपुरी (anantapurī) *m.* name of a teacher [pw.]

अनन्तपुरुषार्थसाधिका (anantapuruṣārtha-sādhikā) *adj.* (*f.*) which brings about the eternal human goal क्षेत्रज्ञैस्सर्वज्ञस्यापरिमितशक्तेर्ब्रह्मणोऽनन्तपुरुषार्थसाधिकायाः विश्वेन्द्रजालमिच्छिकाया अपहर्तुमशक्यत्वात् ŚatDū. 178. 17.

अनन्तपुरुषार्थाप्ति (anantapuruṣārthāpti) *f.* attainment of long-lasting human goal (i. e. heaven) अनन्तपुरुषार्थाप्तिरिष्यते कर्मकाण्डतः BṛĀraUBhVā. v. 1. 58.

अनन्तपुष्प (ananta-puṣpa) *adj.* having abundant (varieties of) flowers अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा KumāSam. 1. 27 = KāvyPra. 369. 6 = VyaktiVi. 60. 9; मधोरनन्तपुष्पस्य चूते हि भ्रमरावलिः । विशेषसङ्गा भवति सहकारे ŚivaP. ii(3). 7. 19 (131A. 6)

अनन्तपूज्य (ananta-pūjya) *m.* name of one of the Tāntric forms of Śiva (*lit.* to be respeceted by many) अधो वटतरोर्मूले मुनिभरेण टङ्कान्वितं सबोधजपमालिकं नमत दक्षिणामूर्तिकम् । गुरुं परमकं गुरुं च परमेष्ठिसंज्ञं गुरुं स्वपूज्यगुरुमन्त्रतो गुरुमनन्तपूज्याह्वयम् IśānŚiPa. i. 18. 26.

अनन्तपूर (ananta-pūra) *m.* endless flood वारिपूरैः । एकार्णवं भुवनकोषमिवाचिरेण कर्तुं समुद्यतमगाधमनन्तपूरैः YogVā. iii. 32. 28.

अनन्तपूरण (ananta-pūraṇa) *adj.* which completes (i. e. forms) an infinite (part) (i. e. infinitesimal) यच्च सुरा(? राः) सुखम् ।--सेवन्ते--। अनन्तपूरणस्यापि भागस्य तदकर्मणाम् । सुखस्य तुल्यतां नैति सिद्धानामीदृशं सुखम् PadmP.(Ra.) 105. 186.

अनन्तपूर्व (ananta-pūrva) *adj.* (the syllable *ha*) preceding Ananta (i. e. *kṣa*) (सूर्यो हकारः ···। अनन्तेशः क्षकारः) अनन्तपूर्वं यद्बीजं बिन्दुभूषितमुद्धरेत् JayāS. 6. 107.

अनन्तपूर्वक (anantapūrva-ka) *adj.* headed by (the serpent-king) Ananta (i. e. Ananta and others) अभिवन्द्य गुरुं तत्र नागांश्चानन्तपूर्वकान् IśānŚiPa. i. 39. 2.

अनन्तपूर्वकार्य (ananta-pūrvakārya) *n.* innumerable preceding or prior effects चरमे कार्ये अनन्तपूर्वकार्याणामनुगतिः प्रसज्येत VivaPraSaṁ. 218. 9.

अनन्तपैप्रभु (anantapaiprabhu) *m.* name of a minister of the King Mallikārjuna °श्रीमल्लिकार्जुनदेवराज्ये । ··· महाप्रधानश्रीअणत(नन्त)पैप्रभो द्वितीय[स्व]पाटि अमुक । सत्ये[तस्मिन्] काले प्रवर्तमाने सति EI. xxiii. 276. 7.

अनन्तपौरुष (ananta-pauruṣa) *adj.* possessing unlimited prowess उवाच भीष्मस्तमनन्तपौरुषं गोविन्दमाजावविमूढचेताः MahāBhā. vi. 202*(3)

अनन्तप्रकार (ananta-prakāra) *adj.* of endless types, various एवमाद्यनन्तप्रकारमर्थाभिधानमशक्यं सर्वमुपदेष्टुम् Nyās. i. 197. 23 (*on* i. 2. 56); यश्च ईश्वरः प्रमाता आत्मा शिव इत्यादिः अनन्तप्रकारः परामर्शः PratyabhiVi. i. 275. 2 (*on* i. 5. 17); इति काठुण्यमनन्तप्रकारम् PratyabhiVi. ii. 247. 10 (*on* iii. 2. 3); ii. 195. 8 (*on* ii. 4. 18); स चायमनन्तप्रकारः संभवति । प्रकृतिप्रलयपर्यायादीनां तद्विषयभावाभिमतानामानन्त्यात् VyaktiVi. 58. 9; योऽयं पृथिव्यादीनां द्रव्याणां परस्परभेदः यश्च घटपटादीनामेवानन्तप्रकारः स सर्वो भवतां न सिध्येत् NyāyKu. 146. 6; NyāyPari. 507. 20; संयोगरहितमद्रव्यम् । तत्र च त्रिगुणे सदृशविसदृशरूपोऽवस्थासंतानः···इत्यनन्तप्रकारो यथाप्रमाणमनुसंधेयः NyāySiA. 246. 26; तदेतदनन्तप्रकारं विहितनिषिद्धकर्मविशेषाणामानन्त्येन तदनाचरणाचरणयोरानन्त्याच्च DaṇḍaVi. 35. 6; वेद ऋग्यजुःसामाथर्वरूपेण चतुर्धावस्थितः । पुनरनन्तप्रकारश्च YatīndraDī. 27. 10; 76. 8; ये त्वनुलोमजाः षट् ··· तेषामुच्चनीचासवर्णस्त्रीपु तुल्यासु च ये जायन्ते तेषां तासु ··· जायमानाः संकीर्णप्रभेदा अनन्तप्रकाराः VīraMi. 169. 25 (*on* 1. 95); वाग्भङ्गीनां तु पर्यालोचने एकस्मिन्नेव विषयेऽनन्तप्रकारः संपद्यते (पर्यायोक्तः) RasGaṅ. 557. 4.

अनन्तप्रकारता (anantaprakāra-tā) *f.* the state of having infinite varieties (लयस्य) भागत्रयकलनायामपि साम्येन वैषम्येण चानन्तप्रकारता भवति AbhinBhā. ii. 397. 16 (*on* 17. 130)

अनन्तप्रकारत्व (anantaprakāra-tva) *n.* the state of having endless varieties अशक्यत्वं त्वनन्तप्रकारत्वात् Nyās. i. 197. 12 (*on* i. 2. 56); एवं सति स्वभावहेतोरेकस्य अनन्तप्रकारत्वात् त्रित्वमयुक्तम् NyāyBiṬ. 108. 2; तत्राप्यवान्तरभेदेन ··· (मलानाम्) अनन्तप्रकारत्वम् PratyabhiVi. ii. 256. 2 (*on* iii. 2. 10); अनन्तप्रकारत्वं शतशाखत्वम् VīraMi. (Vyavahāra.) 8. 5.

अनन्तप्रकारपरिहार (anantaprakāra-parihāra) *m.* avoidance of many ways or alternatives अन्यथा ' स्तीर्वे 'त्यादिसिद्धयेऽनन्तप्रकारपरिहाराश्रयणे प्रतिपत्तिगौरवानुषङ्गः PradI. vi. 115. 16 (*on* vii. 2. 14)

अनन्तप्रकाश (ananta-prakāśa) *adj.* possessed of eternal luminosity or light नमोऽनन्तप्रकाशाय शंकरक्षीरसिन्धवे KāvyMī. 58. 14 = AlaṅkāSa. 201. 5; *m.* endless light or luminosity तस्यानन्तप्रकाशात्मरूपस्यानन्तचिन्मणेः । सत्तामात्रात्मकं विश्वम् YogVā. iii. 12. 3; न चानन्तप्रकाशस्य तमस्त्वमुपपद्यते NyāySu.(Ja.) 299A. 1 (*on* ii. 1. 6)

अनन्तप्रकाशत्व (anantaprakāśa-tva) *n.* the state of having eternal light or luminosity यदनन्तप्रकाशत्वमनौपम्यं जगत्प्रभोः । तत्रेत्रम् PauṣkS. 33. 41.

अनन्तप्रकृति (ananta-prakṛti) *f.* the eternal Primordial Matter अनन्तप्रकृतौ लीनं देव्यास्तत्परमं पदम् KūrmaP. 105. 15 (1. 12)

अनन्तप्रतिकृति (ananta-pratikṛti) *f.* image of a snake ओं आः फुःकारं अनन्तप्रतिकृतिं कृत्वा पञ्चामृतेन स्नापयेत् HevajraT. i. 2. 20.

अनन्तप्रतिबन्धकत्व (ananta-pratibandhakatva) *n.* innumerable relations of opponency परमार्थतस्तु प्रतिबन्धकत्वपक्षेऽपि तत्तदवियोपादानकमनोऽवस्थाव्यक्तिप्रतियोगिकात्यन्ताभेदत्वेन प्रतिबन्धकत्वं वाच्यम् । तथा च विनिगमकाभावात् प्रत्येकव्यक्त्यन्तमविनानन्तप्रतिबन्धकत्वापत्त्या ··· आत्यन्तिकभेदत्वेन प्रतिबन्धकत्वं वाच्यम् LaCandr. 816. 35.

अनन्तप्रतिबिम्बकल्पन (anantapratibimba-kalpana) *n.* assumption of innumerable reflections घटादेर्जीवप्रतिबिम्बत्वे मानाभावः, रूपपरिमाणाद्यनन्तगुणादिष्वनन्तप्रतिबिम्बकल्पने गौरवं च GuruCandr. ii. 119. 12.

अनन्तप्रतिबिम्बभाव (anantapratibimba-bhāva) *m.* the state of having innumerable reflections न च निरंशस्यैकस्य कृत्स्नस्यानन्तप्रतिबिम्बभावो विरो(रु)ध्येत PrakaVi. 4. 3.

अनन्तप्रतिभान (anantapratibhāna) *m.* name of a *samādhi* अनन्त-

प्रतिभानो नाम समाधिः MahāVyu. 21. 80 [DBHS.]

अनन्तप्रतियोग्यन्वित (anantapratiyogy-anvita) *adj.* related with innumerable correlatives नन्वनन्तप्रतियोग्यन्वितस्वार्थबोधनविषया अनन्ता एव शब्दस्य शक्तयः कल्पयितव्याः स्युः PrakaPañ. 394. 9.

अनन्तप्रतियोग्यपेक्षत्व (anantapratiyogyapekṣa-tva) *n.* the state of being dependent on innumerable counter-positives भेदरूपं चानन्तम्, अनन्तप्रतियोग्यपेक्षत्वात् IṣṭaSi. 319. 9.

अनन्तप्रत्यक्षगम्य (anantapratyakṣa-gamya) *adj.* cognisable through innumerable perceptions अनन्तप्रत्यक्षगम्यो हि सर्वत्र सहभावः स जीवद्भिर्दुर्लभः NyāyRaMā. 67. 21=YuktiSneha. 62. 18 (*on* i. 1. 5)

अनन्तप्रदेश (ananta-pradeśa) *adj.* i having innumerable units of space आकाशोऽप्येकोऽनन्तप्रदेशश्च BrahmSūBh.(Rā.) 497. 9 (*on* ii. 2. 31); NyāySu.(Ja.) 411B. 3 (*on* ii. 2. 10); GoviBh. 134. 2 (*on* ii. 2. 33); ii having innumerable atoms (which occupy the units of space) आत्मा ··· अनन्तप्रदेशानां पुद्गलानाम् ··· उपश्लेषणं यत् करोति SarvaDaSaṁ. 3. 283.

अनन्तप्रदेशक्षेत्र (anantapradeśa-kṣetra) *n.* region consisting of innumerable units of space पुद्गलव्याख्यानेन प्रदेशशब्देन परमाणवो ग्राह्या न च क्षेत्रप्रदेशाः। कस्मात्पुद्गलानामनन्तप्रदेशक्षेत्रेऽवस्थानाभावात् TātpaVṛ. 191. 12 (*on* 2. 43)

अनन्तप्रदेशत्व (anantapradeśa-tva) *n.* the state of having innumerable atoms (which occupy the units of space) ततो यथैकाणुव्याप्येनांशेन गण्यमानस्याकाशस्यानन्तांशत्वादनन्तप्रदेशत्वम् TattvPradī.(A.) 193. 10 (*on* 2. 45); स्कन्धाकारपरिणतपुद्गलानां तु संख्येयासंख्येयानन्तप्रदेशत्वम् TātpaVṛ. 191. 10 (*on* 2. 43)

अनन्तप्रदेशभाज् (anantapradeśa-bhāj) *adj.* consisting of innumerable points of space आकाशम् ···। लोकालोकौ स्थितं व्याप्य तदनन्तप्रदेशभाक् TriṣaŚaPuC. iv. 4.273.

अनन्तप्रपञ्चा (ananta-prapañcā) *adj.* (*f.*) having innumerable details or forms एवमियं समासोक्तिरनन्तप्रपञ्चेत्यनया दिशा स्वयमुत्प्रेक्ष्या AlaṅkāSa. 94. 9.

अनन्तप्रभ (anantaprabha) *m.* i name of a Tathāgata एवमनन्तप्रभो नाम तथागतो यत्रार्चिष्मता तथागतेन प्रथमं बोधिचित्तमुत्पादितम् ŚikṣāSa. 9. 3; ii name of a *samādhi* अनन्तप्रभो नाम समाधिः MahāVyu. 21. 36 [DBHS.]

अनन्तप्रभाव (ananta-prabhāva) *adj.* having infinite power चित्तेऽनन्तप्रभावेऽस्मिन्प्रकृत्या रसवच्चले। तत्तेजसि स्थिरे सिद्धे न किं सिद्धि(?द्धं) जगत्त्रये YaśasCam. ii. 392. 1; *m.* infinite or limitless strength यस्यैतत्सकलं विश्वं मूर्धाग्रे सर्षपायते। इत्यनन्तप्रभावात्स ह्यनन्त इति कीर्त्यते SkandP. i(2).39. 27.

अनन्तप्रभेद (ananta-prabheda) *adj.* having infinite distinctions इत्येतत्सामासिकं बुद्धानां माहात्म्यम्। अनन्तप्रभेदं तु तद्भिद्यमानं जायते AbhidhKoBh. 416.5 (*on* 7. 34)

अनन्तप्रमुख (ananta-pramukha) *adj.* headed by (the serpent-king) Ananta योऽसावनन्तप्रमुखैरनन्तैर्निर्दिश्यते नित्यमनन्तभूमा Yādavā. 4. 73.

अनन्तप्रयोगविषय (anantaprayoga-viṣaya) *adj.* having innumerable occurrences as its domain एवं पचेरनन्तप्रयोगविषयस्य प्रयुज्यमानं लिडादिपरं रूपमवयव इति व्यपदिश्यते PradI. v. 3A.33 (*on* vi. 1. 1)

अनन्तप्रसर (ananta-prasara) *adj.* having endless manifestations यदच्छिन्नं जगद्योनेरनन्तप्रसरं स्थितम्। विच्छेदमकृतज्ञानामेति नानात्मना स्वयम् PauṣkS. 30. 22 = PāraS. 12. 115.

अनन्तप्रसरता (anantaprasara-tā) *f.* the state of having innumerable extensions कल्पनाकोपस्यानन्तप्रसरतया तत्त्वाव्यवस्थापकत्वादिति चेत्। न ĀtmaTaVi. 396. 11.

अनन्तप्रसरत्व (anantaprasara-tva) *n.* the state of having innumerable extensions प्रमाणादयः पदार्थाः ···कल्पनामात्रनिमित्ताः··· न च षोडशात्मानः, कल्पनाकोपस्यानन्तप्रसरत्वात् TātpaṬ.(Vā.) 7. 6 (*on* i. 1. 1)

अनन्तप्रागभाव (ananta-prāgabhāva) *m.* infinite number of antecedent absences न च नित्यत्वे वायुसंयोगादेः ककारादिप्रत्यक्षत्वं कार्यतावच्छेदकं वाच्यम्, मम तु कत्वमेवेति लाघवमिति वाच्यम्। अनन्तप्रागभावध्वंसादिकल्पनापेक्षया लघुत्वात् VaiyāSiMañ. 221. 3.

अनन्तप्राणिकर्मन् (ananta-prāṇikarman) *n.* innumerable acts of living beings नानाकालानुष्ठितानाम् ··· अनन्तप्राणिकर्मणां फलकालागमयौगपद्यं प्रतिबन्धकापाययौगपद्यं च कदापि न मिलति ŚivārkaMaDī. ii. 69. 18 (*on* ii. 2. 11)

अनन्तप्राणिगत (anantaprāṇi-gata) *adj.* pertaining to innumerable living beings न हीदृशम् ··· अनन्तप्राणिगतविचित्रसुखदुःखसाधनं भुवनादि कार्यमनतिशयेन पुंसा कर्तुं शक्यमिति NyāyMañ. i. 183.28; तत्पक्षे फलकालागमप्रतिबन्धककर्माभावसाहित्यस्य विपाकशब्दार्थत्वात् तस्य सर्गकाल इव प्रलयकालेऽपि अनन्तप्राणिगतानन्तकर्ममध्ये केषुचित्कर्मस्वपर्जनीयत्वात् ŚivārkaMaDī. ii. 70. 2 (*on* ii. 2.11); तद्व्यवस्थापनं चानन्तप्राणिगतपरस्परविरुद्धात्याश्चर्यतत्तत्पुरुषमात्रानुभाव्यतत्त्वात्कमात्रावसायित्वाप्तपदार्थजातस्रष्टृत्वादिरूपतन्महिमनिरूपणं पर्यवस्यति ŚivārkaMaDī. ii. 196. 8 (*on* iii. 1.1)

अनन्तप्राणिदृश्यमान (anantaprāṇi-dṛśyamāna) *adj.* being perceived by innumerable living beings अनन्तप्राणिदृश्यमानपरस्परविरुद्धानन्तस्वप्नप्रपञ्चप्रदर्शकत्वेनापि तस्य (परमेश्वरस्य) महामहिमसिद्धेः ŚivārkaMaDī. ii. 232. 30 (*on* iii. 2. 6)

अनन्तप्रियभक्ति (anantapriya-bhakti) *f.* devotion to (Prahlāda) the beloved of Ananta (i. e. Viṣṇu) इन्द्रः ···। अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ BhāgP. vii. 7. 11.

अनन्तप्रीत्यर्थम् (anantaprity-artham) *adv.* for the sake of pleasing the Lord Ananta (i. e. Viṣṇu) सहस्रशीर्षा° नारायणोऽनन्तोऽनुष्टुप् अनन्तप्रीत्यर्थम् ··· भोः ··· दिशां रक्ष BālamBha. i. 23. 9 (*on* 1. 11–12)

अनन्तफणिन् (ananta-phaṇin) *m.* the serpent Ananta (*lit.* having infinite hoods) मेघेद्विपराज इन्दौ। तार्क्ष्येऽप्यनन्तफणिनि प्रथितः प्रवीणैः KośaKaTa. 2. 4395.

अनन्तफल (ananta-phala) *adj.* i yielding abundant reward पात्रे दानं स्वल्पमपि काले दत्तं युधिष्ठिर। मनसा सुविशुद्धेन प्रेत्यानन्तफलं स्मृतम् MahāBhā. iii. 245. 33; एतद्धि पञ्चकं ज्ञात्वा क्रियते कर्म यद्द्विजैः। तदनन्तफलं तेषां भवेत् BṛParāSm. 2. 46; सद्रोगलक्षणं बन्धमनन्तफलमर्थिनाम् PauṣkS. 29. 9; सजातीयं हि यत्पीठं बिम्बस्य ···। तदनन्तफलं विद्धि JayāS. 20. 89; श्राद्धमेतेषु (तीर्थेषु) यद्दत्तं तदनन्तफलं स्मृतम् MatsyaP. 22. 37; 22. 78; अनन्तफलस्य ··· ईदृशस्य वित्तस्य, मां प्रत्येव केवलम् अदाता मा भूद्भवान् BṛĀraUBh. 766. 2 (*on* vi. 2. 7); यत् ···। दीयते विष्णवे वापि तदनन्तफलं स्मृतम् KūrmaP. 638.1 (2. 26); अस्ति काञ्चीपुरी ख्याता ···। यत्र कृतं तपः किंचिदनन्तफलमुच्यते SkandP. i(3A). 3. 60; ii(8). 9. 10; ii(9). 22. 34; अक्षयः अनन्तफलः कैवल्यान्निरतिशयो हेतुः स श्रेयान् प्रशस्यः MāṭhVṛ. 8. 25 (*on* 2); रवौ दत्तं हुतं जप्तं बलिं पूजां निवेदयेत्। अनन्तफलमादिष्टं ब्रह्मादिसुरसत्तमैः BhaviP. 241A. 25 (i. 162 23); 352A. 11 (ii(2). 3. 32); अक्षयोऽनन्तफलो निधिरिव निधिर्नाश: स राज्ञा ब्राह्मणेषु निधातव्यः। तेभ्यो देय इत्यर्थः ManvaMu. 262. 9 (*on* 7. 83); ii resulting in unending consequences वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् YogSū. 2. 34; *n.* i abundant reward अस्य प्रदानस्य यदेव युक्तं तस्यैव चानन्तफलं भविष्यम् MatsyaP. 42. 12; अनन्तफलमाप्नोति स्तुतिं कुर्वन् स्वभावतः PadmP.(Ra.) 32. 182; ii eternal fruit देवयजः ··· मामेव न प्रपद्यन्ते अनन्तफलाय GītāBh.(Śaṅ.) 225. 18 (*on* 7. 23); 270. 10 (*on* 9. 26); तत् श्राद्धं अस्य आनन्त्याय अनन्तफलाय कल्पते KāṭhUBh. 148. 10 (*on* 3. 17); प्रयोक्तुम्(क्तुः) ··· शिवलोकगतमनन्तफलं नृत्तस्येति AbhinBhā. i. 205. 10 (*on* 4. 319); मन्त्री सहस्रं यदि वा जपेत्।··· ततोऽनन्तफलं भवेत् NityāṢoḍa. 5. 5; मनुष्यः ··· प्रसादे(?प्रासादे) ··· अनन्तफलमाप्नोति रत्नादिरचिते तथा BhaviP. 331B. 30 (ii(1).9. 44)

अनन्तफलता (anantaphala-tā) *f.* the state of yielding eternal reward श्रोतृप्रवृत्त्यर्थं चानन्तफलता धर्मस्योक्ता ManuBh. i. 48. 15 (*on* 1. 111)

अनन्तफलत्व (anantaphala-tva) *n.* i the state of being the eternal fruit प्राप्तमेवार्थं वर्तमानापदेशादनुवदति श्रुतिरर्थवादत्वेन, तदा कुतस्तत्प्रामाण्यादनन्तफलत्वम् BrahmSi. 78. 18; ii the state of having the eternal fruit प्रकृतदहराकाशविज्ञानस्यानन्तफलत्वं वदन्, परमात्मत्वमस्य सूचयति BrahmSūBh.(Śaṅ.) 168. 6 (*on* i. 3. 14); iii the state of having innumerable fruits उपभोगश्चाशक्यः अनियतविपाकसमयत्वात्। अनन्तत्वादनन्तफलत्वाच्च NyāyVārPari. 81. 6.

अनन्तफलद (anantaphala-da) *adj.* [*f.*-ā] bestowing infinite rewards or fruits कस्मिन् काले च तच्छ्राद्धमनन्तफलदं भवेत् MatsyaP. 22. 1; 22. 44; 22. 85; अदृष्टं एतद्द्वयोर्निवर्तकं सकृत्कृताज्जातमनन्तफलदम् PārāSū. 59. 1; SkandP. iii(1). 3. 71; BhaviP. 245B.15 (i. 164. 17); इमामनन्तफलदां यः कुर्यात् फलसप्तमीम्। सर्वपापविशुद्धात्मा सूर्यलोके महीयते PadmP. v. 21. 260; सर्वभूताश्रया भूमिः ···। अनन्तफलदा VasiS. 18. 167; CaturCin. iii(1). 410. 4; प्रभाते दक्षिणायनसंक्रान्तिरनन्तफलदा भविष्यति Pañcā. 137. 6; शीर्णं धर्म्मतरोरनन्तफलदम् ··· तेनाकारि ·· विष्णोरिदं मन्दिरम् EI. i. 157. 7.

अनन्तफलदान (anantaphala-dāna) *n.* 1 the yielding of eternal reward अनन्तफलदानाच्च क्षपिताशेषकल्मषात् ।··· अक्षमालिका KulārT. 17. 58; II gift yielding endless fruit अनन्तफलदानानामनन्तरमुक्रमः CaturCin. i. 4. 20; i. 891. 9.

अनन्तफलदायक (anantaphala-dāyaka) *adj.* which yields eternal rewards, giving endless fruits सर्वपापप्रशमनमनन्तफलदायकम् । कल्याणीनां च कथितं तत्कुरुष्व वरानना: MatsyaP. 70. 62.

अनन्तफलदायिनी (anantaphaladāy-inī) *adj.* (*f.*) which gives endless fruit पूर्णिमा ···। मार्गशीर्षेण संयुक्ता अनन्तफलदायिनी SkandP. ii(5). 17. 63.

अनन्तफलप्रद (anantaphala-prada) *adj.* [*f.*-ā] which gives endless fruits उक्तानन्ततृतीयैषा सदानन्तफलप्रदा MatsyaP. 62. 33 = PadmP. v. 22. 98 = BhavīP. 651A. 9 (iv. 26. 35); यथा शिवश्च धर्मश्च सदानन्तफलप्रदौ । तथुक्तफलदानेन तौ स्यातां मे वरप्रदौ MatsyaP. 96. 15; धर्मः सारः समुद्दिष्टः प्रेत्यानन्तफलप्रदः KūrmaP. 523. 17 (2. 12); PadmP. i. 51. 42; रुद्राक्षमालया जप्तो मन्त्रोऽनन्तफलप्रदः SkandP. iii(3). 20. 9; DevīBhāP. xi. 6. 35; SkandP. iii(3). 2. 130; सर्वत्र गौतमीतीरे पितृणां दानमुत्तमम् । विशेषतः कोटितीर्थे तदनन्तफलप्रदम् BrahmP. 148. 27.

अनन्तफलप्रवाह (anantaphala-pravāha) *m.* series (*lit.* stream) of innumerable fruits यागादिप्रध्वंसा एव स्वर्गादीनुत्पादयन्तु, कृतमपूर्वकल्पनया । तेषामनन्तत्वादनन्तफलप्रवाहः प्रसज्यते NyāyKuA. i. 34. 2.

अनन्तफलभाज् (anantaphala-bhāj) *adj.* enjoying innumerable rewards परमेश्वरः ।··· सर्व दर्शयेत् साधकस्य च । येनासौ कृतकृत्यः स्यादनन्तफलभागपि JayāS. 31. 38; पितृणां तर्पणं यस्तु जले तस्मिन् करिष्यति । बिन्दौ बिन्दौ तु तोयस्य ह्यनन्तफलभाग् भवेत् VāmaP. 45. 26; इत्थं विन्यस्य गायत्रीम् ···। जपेदायम्य तु प्राणाननन्तफलभाग् भवेत् IśānŚiPa. i. 9. 134.

अनन्तफलमालित (anantaphala-mālita) *adj.* encircled with (i. e. full of) innumerable fruits नारदः ··· विलोकयांचक्रे ··· विन्ध्यं धराधरम् ।··· उदुम्बरैरम्बरगैरनन्तफलमालितैः । ब्रह्माण्डकोटीर्बिभ्रद्भिस्तमनन्तमिव सर्वतः SkandP. iv. 1. 16.

अनन्तफलश्रवण (anantaphala-śravaṇa) *n.* scriptural statement of eternal fruit दहरविज्ञानस्यानन्तफलश्रवणादपि दहरः परमात्मेत्याह PrakaVi. 245. 19.

अनन्तफलसंप्राप्ति (anantaphala-samprāpti) *f.* obtainment of innumerable fruits अनन्तफलसंप्राप्ताववक्षतत्वे च कारणम् । सविस्मयं तया पृष्टः स तामेवं तदाब्रवीत् RājTa.(Ka.) 6. 359.

अनन्तफलसिद्धि (anantaphala-siddhi) *f.* securing of endless or eternal rewards तर्पयेत् ··· । दीनानाथांस्तथा भृत्याननन्तफलसिद्धये PauṣkS. 41. 137; अविचोद्धृतनुष्ठेन पुंसा यत्कल्पितं फलम् । अनन्तफलसिद्ध्यर्थं तदनुक्तिः प्रवृत्तये TaiUBhāVā. 43. 8(2)

अनन्तफलार्थिन् (anantaphalārth-in) *adj.* desirous of innumerable fruits तत्सूर्याय निवेद्यं सद्भक्त्यानन्तफलार्थिना BhaviP. 258B. 29 (i. 174. 28)

अनन्तफलावाप्ति (anantaphalāvāpti) *f.* attainment of endless fruits तथानन्तफलावाप्तिरस्तु मे सप्तजन्मसु MatsyaP. 76. 10; 96. 16; PadmP. v. 21. 260.

अनन्तबन्धन (ananta-bandhana) *n.* tying (on the right arm) of a sacred thread having fourteen knots (on which Lord Ananta is invoked) अनन्तबन्धनं कृतम् PurāPraSam. 55. 4.

अनन्तबल (ananta-bala) *adj.* I possessing inexhaustible strength कपाली पिङ्गलः ··· भवस्तथा । एत एकादशानन्तबला रुद्राः ···। अपालयन्त त्रिदशान् SkandP. i(2). 21. 20; स महाभुजगः । परिदश्य भवन्तमनन्तबलं समवेष्टयत Nārāy. x. 55. 6; II having a huge army तेन महाराजेनानन्तबलेन सममेकाकिनस्तव न समुचितं युद्धम् । नीतिविरुद्धमेतत् PuruṣPa. 23. 20; *m.* name of a sage सुवर्णपर्वतेऽमुष्मिन्ननन्तव(? ब)लसंज्ञया । कथितो मुनिः PadmP.(Ra.) 14. 10; ततोऽनन्तबलोऽवोचद्धिशिष्यं सौक्तं शृणु PadmP.(Ra.) 14. 163.

अनन्तबलपौरुष (ananta-balapauruṣa) *adj.* of inexhaustible strength and manliness श्रीभगवानुवाच — (अहम्) अतिहा सर्वलोकानामनन्तबलपौरुषः BrahmP. 51. 2.

अनन्तबलबाहु (anantabala-bāhu) *m.* the arm with inexhaustible strength अनन्तबलबाहुभ्यामवष्ट(? ष्ट)भ्यैकपाणिना । मथ्यतामप्रतं देव MatsyaP. 249. 44.

अनन्तबलभृत् (anantabala-bhṛt) *adj.* possessing inexhaustible strength अथो ··· श्रीमाननन्तबलभृन्नियमशतसहस्रभूषितो गतविकृतिः PadmP. (Ra.) 123. 151.

अनन्तबलविक्रम (ananta-balavikrama) *adj.* of inexhaustible strength and valour रुद्राश्च शतकोटयः ···। तवानुजागता ह्येते ··· अनन्तबलविक्रमाः SaurP. 57. 42.

अनन्तबलविघुष्टनिर्नादितश्रीसंभवमति (anantabalavighuṣṭanirnāditaśrīsambhavamati) *m.* name of a Buddha तदन्यानि च दश बोधिसत्त्वासंख्येयशतसहस्राणि येभगवतोऽनन्तबलविघुष्टनिर्नादितश्रीसंभवमतेस्तथागतस्य दर्शनेन अनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितम् GaṇḍVyū. 277. 6 [but DBHS. °निनादित°]

अनन्तबलवीर्य (ananta-balavīrya) *m.* one of the epithets of Śiva (*lit.* of inexhaustible strength and valour) नमो भवाय भव्याय ···। अनन्तबलवीर्याय भूतानां पतये नमः BrahmāṇḍP. i. 27. 67 = LiṅgaP. i. 31. 37.

अनन्तबलवीर्यवत् (anantabalavīrya-va(n)t) *adj.* possessing inexhaustible strength and valour तं खोटं धारयेद्वक्त्रे लक्षायुर्जायते नरः ।··· अनन्तबलवीर्यवान् Rasā. 12. 335.

अनन्तबलसमुदायवत् (anantabalasamudāya-va(n)t) *adj.* possessed of a troop of huge army कस्मिंश्चिदनन्तबलसमुदायवति नरपतौ समुद्रपरिसरवर्तिनि ··· पयोधेः ··· कम्पो जातः Loc. 109. 25 (*on* 2. 28)

अनन्तबला (ananta-balā) *f.* name of a Śakti (*lit.* of infinite power) तथानन्तबला प्रभा ।··· संपूर्णा चेति कथिताः शक्तयो विश्वधारिकाः PāraS. 10. 29.

अनन्तबलौजस् (ananta-balaujas) *adj.* having inexhaustible strength and vitality तस्यानन्तबलौजसः । वयमेकाकिनः पान्थाः स्थाने स्थाने न दुर्ग्रहाः PāṇḍaC. 7. 166.

अनन्तबाहु (ananta-bāhu) *adj.* having or possessing innumerable arms अनन्तबाहुम् ··· पश्यामि त्वाम् MahāBhā. vi. 33. 19 = BhagGī. 11. 19; VarāP. 3. 16; PadmP. v. 14. 145; LiṅgaP. i. 72. 157; ŚivaP. ii(5). 48. 45 (279B. 6); *m.* epithet of the Moon-god (*lit.* having innumerable arms) सोमनामापि कीर्तयन् । सोमाय शान्ताय नमोऽस्तु ··· संपूजयेन्मेदमनन्तबाहवे MatsyaP. 57. 8.

अनन्तबिन्दुसंयुक्त (anantabindu-saṃyukta) *adj.* united with the sounds *a* and *anusvāra* पृथ्व्यग्निजलनाचान्तवरुणानीलसेश्व(? श्र)रैः । अनन्तबिन्दु संयुक्तै(?°बिन्दुसंयुक्तै)रच्चार्या पाशेन मायया TantrSā.(K.) 87. 30.

अनन्तबीजकोण (ananta-bījakoṇa) *m.* innumerable corners with mystic letters अनन्तबीजकोणेषु षट् शिवज्योतिषां स्थितिः KālīViT. 33. 18.

अनन्तबीजरूप (anantabīja-rūpa) *adj.* having the form of the seed for innumerable (manifestations) परं ब्रह्म ··· स्मृतम् ।··· अनन्तबीजरूपम् PañcaRā.(Nā.) ii. 1. 3.

अनन्तरातीत (anantarātīta) *adj.* [*f.* -ā] **A** just past, immediately preceding सोऽनन्तरातीतां स्वजातिमनुसस्मार JātaMā. 15. 3 (3. 3(1)); सोऽहमादाय तमुदग्ररभसं प्रस्थितः … क्रमेणास्यानन्तरातीतायां विभावर्यामिह नगर्यां प्रविष्टः TilaMañ. 99. 14; **B** just mentioned, just referred to अनन्तरातीतो ग्रन्थः आत्मशरीरादीनां रथिरथादिरूपकक्लृप्तिं दर्शयति BrahmSūBh.(Śaṅ.) 227. 5 (*on* i. 4. 1); अनन्तरातीतो योगः सकर्मकार्थो विज्ञायते Nyās. i. 238. 21 (*on* i. 3. 58); अनन्तरातीतः पक्षः, अतीतत्वसामान्यं च हेतुः NyāyRa. 313.10 (*on* 5(3). 162); नन्वेतदनन्तरातीतेनैव गतार्थम् NyāySu.(Ja.) 166A. 10 (*on* i. 2. 5)

अनन्तरातीतविज्ञान (anantarātīta-vijñāna) *n.* cognition or knowledge in the immediate past (i. e. in this birth) अनन्तरातीतविज्ञानं धर्मि, प्रत्यक्षस्यालम्बनं न भवतीति साध्यो धर्मः, अतीतत्वादिति हेतुः, जन्मान्तरातीतविज्ञानवदिति दृष्टान्तः TātpaṬ.(U.) 279. 12 (*on* 5(3). 161)

अनन्तरातीतव्रीहिक्षण (anantarātīta-vrīhikṣaṇa) *m.* immediately preceding moment (of the existence) of rice यच्चोक्तं क्रमयौगपद्याभ्यामर्थक्रियाविरोधः समानो योऽसावन्त्यो व्रीहिक्षणो यस्मादङ्कुरोत्पत्तिरिष्यते साप्यङ्कुरजननस्वभावो न भवति व्रीहिक्षणत्वादनन्तरातीतव्रीहिक्षणो यस्मादसमानसंततावकस्माद्विलक्षणक्षणान्तरोत्पत्तिसंभवः BrahmSūBh.(Bhā.) 120. 3 (*on* ii. 2. 20)

अनन्तरातीतसूत्र (anantarātīta-sūtra) *n.* immediately preceding aphorism (in Patañjali's *Yogasūtra*) अनन्तरातीतसूत्रे संप्रज्ञातसमाधेरुक्तत्वात् JīvanVi. 101.22.

अनन्तरादर्शन (anantarādarśana) *n.* subsequent non-appearance (of something) चित्रेति धर्मिनिर्देशः, पशुफला न भवतीति साध्यो धर्मः, चित्रोत्पत्तावनन्तरादर्शनादिति हेतुः TātpaṬ.(U.) 425. 15 (*on* 5(9). 4); चित्रेष्टिफलस्यैहिकत्वानुमतेरनन्तरादर्शने नेष्टिजन्यता संस्कारद्वारा कल्प्या NayaVi. 171. 12 (*on* i. 1. 5)

अनन्तरादर्शनहता (anantarādarśana-hatā) *adj.* (*f.*) vitiated by subsequent non-appearance (of the fruit) सत्यार्थताप्यनन्तरादर्शनहता NayaVi. 172. 3 (*on* i. 1. 5)

अनन्तरादर्शितविषय (anantarādarśita-viṣaya) *m.* [Loc.] in the matter (of title to property) shown without a break यद्यपि स्वत्वागमकारणानि बहूनि सन्ति … तथाप्यनुपलभ्यमानकारणविशेषे विंशतिवार्षिकभोगेऽनन्तरादर्शितविषये बन्धरूपताभ्युपगन्तुं युक्ता ManuBh. ii. 140. 15 (*on* 8. 148)

अनन्तरादि (anantarādi) *adj.* proximity etc. शब्दस्यापि शब्देनानन्तरादयोऽभिसंबन्धाः MahāBh. i. 119. 22 (*on* i. 1. 49); शब्दस्याप्यनन्तरादयः संबन्धाः संभवन्ति PariVṛ.(Sī.) 13. 20.

अनन्तरादिनिरूपितसंबन्ध (anantarādinirūpita-sambandha) *m.* relation described or determined by the correlative term *anantara* etc. 'अस्तेरनन्तरे' इत्यादेरपि अनन्तरादिनिरूपितसंबन्धे इत्येवार्थः LaŚabdeŚe. i. 58. 3.

अनन्तराधिकरण (anantarādhikaraṇa) *n.* **i** immediately preceding section समधिगतमेतदनन्तराधिकरणे BrahmSūBh.(Śaṅ.) 793. 12 (*on* iv. 1. 18); तदेतदधिकरणं गुणक्रियाफलप्रतिपादनपरयोरनन्तराधिकरणयोरुभयोरप्यपवादभूतम् TantrVā. 576. 20 (*on* ii. 2. 29); अनन्तराधिकरणे…सिद्धान्तितं 'निर्देशाद्वान्यदागमयेत्' इति Kāśi. i. 23.10 (*on* 1. 54); अनन्तराधिकरणे वेदद्वारेण तासां (चोदनानाम्) पौरुषेयत्वमाशङ्कितम् ŚāstrDī. 2. 6 (*on* i. 2. 1); अनन्तराधिकरणेऽसकृद्वेदनावृत्तिर्दर्शिता VedāntKau. 386. 10 (*on* iv. 1. 3); अनन्तराधिकरणे … निरासो विहितः NyāySu.(Ja.) 295B. 3 (*on* ii. 1. 6); **ii** immediately following or next section अनन्तराधिकरणेन … संबन्धमाह VedāntKa. 48. 11 (*on* i. 1. 2); अनन्तराधिकरणे अन्तर्यामिणः परमात्मत्वसाधनं च … द्योतयति ŚrutaPra. iB. 316. 22 (*on* i. 2. 18); तदेतत्सर्वं 'अत्ता चराचरग्रहणात्'-दित्यनन्तराधिकरणे स्फुटीकरिष्यते ŚivārkaMaDī. i. 320. 29 (*on* i. 2. 3); i. 469. 16 (*on* i. 3. 32)

अनन्तराधिकरणतात्पर्य (anantarādhikaraṇa-tātparya) *n.* purport of the immediately following section एवमध्यायतात्पर्यमुक्त्वानन्तराधिकरणतात्पर्यमाह PrakaVi. 384. 13.

अनन्तराधिकरणद्वय (anantarādhikaraṇa-dvaya) *n.* **i** pair of immediately preceding sections अनन्तराधिकरणद्वयस्य त्वाक्षेपसमाधानार्थत्वेनार्थवादाधिकरणशेषत्वादव्यवधायकत्वम् MīmāKau. iii(1). 57. 15 (*on* i. 2.33); **ii** pair of immediately following sections तदनन्तरविशेषणेनानन्तराधिकरणद्वयार्थः (अनूदितः) ŚivārkaMaDī. i. 246. 9 (*on* i. 1. 21)

अनन्तराधिकरणन्याय (anantarādhikaraṇa-nyāya) *m.* maxim (explained) in the immediately following section अनन्तराधिकरणन्यायेनोद्गीथाद्युपासनानामिवानियमस्य सिद्धतया कृतकरत्वात् ŚrutaPra. ii. 512. 16 (*on* iii. 3. 40)

अनन्तराधिकरणपूर्वपक्ष (anantarādhikaraṇa-pūrvapakṣa) *m. prima facie* view (stated) in the immediately following section तथा सति अनन्तराधिकरणपूर्वपक्षहेतुरर्थसिद्धः स्यात् ŚrutaPra. ii. 552. 20 (*on* iii. 4.26)

अनन्तराधिकरणविचारानुपपत्ति (anantarādhikaraṇa-vicārānupapatti) *f.* untenability of the discussion in the immediately following section तत्तु अनन्तराधिकरणविचारानुपपत्तेरनुपपन्नम् ŚrutaPra. ii. 568. 23 (*on* iii. 4. 51)

अनन्तराधिकरणविरोध (anantarādhikaraṇa-virodha) *m.* contradiction with the immediately following section 'कर्ता शास्त्रे'त्यत्र कर्तृत्वस्य स्वाभाविकतया पारमार्थ्यं किं प्रतिपिपादयिषितम्, उत… प्रथमे अनन्तराधिकरणविरोधः ŚrutaPra. ii. 374. 4 (*on* ii. 3. 39)

अनन्तराधिकरणव्युत्पादित (anantarādhikaraṇa-vyutpādita) *adj.* explained in the immediately preceding section अनन्तराधिकरणव्युत्पादितस्वतःप्रामाण्योपजीवनेन … प्रकृतसंगतिः MīmāKau. i. 85. 7 (*on* i. 3. 12)

अनन्तराधिकरणसाध्यता (anantarādhikaraṇasādhya-tā) *f.* the state of being that which is to be established in the immediately following section जीवस्योत्पत्तिप्रलयनिषेधस्य 'नात्मा श्रुते'रित्यनन्तराधिकरणसाध्यतया पूर्वोत्तरयोरधिकरणयोरन्यतरस्य पुनरुक्तिप्रसङ्गात् ŚrutaPra. ii. 352. 23 (*on* ii. 3.17)

अनन्तराधिकरणसिद्ध (anantarādhikaraṇa-siddha) *adj.* established or proved in the immediately preceding section अनन्तराधिकरणसिद्धदृष्टार्थत्वभङ्गापत्तेश्च देवतानाम्नामादेशः BhāṭṭCan. 54.8 (*on* xiv. 3. 2)

अनन्तराधिकरणातिदेश (anantarādhikaraṇātideśa) *m.* transference (of details) in the immediately preceding section किं पश्वालम्भो नित्यः, उतानित्य इति संदेहे 'एतेन व्याख्यातम्' इत्यनन्तराधिकरणातिदेशोऽयम् SaṅkarKāBh. 17. 11 (*on* i. 2. 15)

अनन्तराधिकारिन् (anantarādhikārin) *m.* next successor or claimant (to the property) वयमत्रानन्तराधिकारिणो रक्ष्याम इदं धनमित्यादिव्याजेन ये बान्धवास्तासां जीवन्तीनां तद्धनं गृह्णन्ति तान् … राजा दण्डयेत् ManvaMu. 294.3 (*on* 8. 29); 392. 20 (*on* 9. 154)

अनन्तरानन्तरवर्तिन् (anantarānantaravart-in) *adj.* being next to the next (in sequential order) आद्यक्षणादनन्तरानन्तरवर्तिनः उपर्युपरिवर्तिनोऽनपेक्षाः स्वस्वकार्यजनने VedāntKa. 276.27 (*on* ii. 2. 4)

अनन्तरानन्तरार्धमिति (anantarānantarārdha-miti) *adj.* amounting to one half of the next and the next (remainder) (मुक्तामयकण्ठिका… निपतिता) षड्भागः शय्यायामनन्तरानन्तरार्धमितिभागाः। षट्संख्यानास्तस्याः सर्वे सर्वत्र संपतिताः GaṇiSāSaṁ. 3. 21.

अनन्तरानवस्थायिन् (anantarānavasthāyin) *adj.* not existing in the immediately next moment यद्विनश्वरस्वरूपं तदनन्तरानवस्थायि यथान्त्यक्षणवर्ति घटस्य रूपम् TarkBhā.(Mo.) 19. 28; यद्यदनन्तरानवस्थायि न भवति न तत्तदा विनश्वरस्वरूपं यथाकाशम् TarkBhā.(Mo.) 21. 5; SyādvāMañ. 16(85)

अनन्तरानीत (anantarānīta) *adj.* drawn immediately afterwards रविकर्णे स्वदृक्क्षेपचिह्नमानं भुजस्तदानन्तरानीतकर्णो क इति योजनाद्या लम्बनज्या सा त्रिज्यागुणा चन्द्रकर्णभक्ता ज्या स्यात् SiddhāTaVi. 308. 2; अनन्तरानीतचापजात्यभुजांशानां पातस्थानीयविषुवांशभुजांशानामनन्तरं अर्कगोलसंधिपर्यन्तम् SiddhāTaVi.

(ŚeṣaVā.) 46. 23.

अनन्तरानुपलब्धि (anantarānupalabdhi) *f.* non-appearance (of something) subsequently पुरुषं हि निपुणानः साध्यसिद्धिमवगमयति …। किमेवं सत्यनन्तरानुपलब्धिर्निरस्ता भवति Bṛha. 202. 3 (*on* i. 1. 5); न चैवं श्रूयते कृते कर्मणि तावत्येव फलं भवतीति। … अनन्तरानुपलब्ध्या हेतावद् भवति यदुत प्रलयानुमानाभ्यां न कर्मणः फलसाधनत्वमवगम्यते TantrRa. 190. 3; ननु साध्यसाधनसंबन्धमात्रं विधिना बोध्यते नानन्तर्यं तत्कथमनन्तरानुपलब्ध्या विधिविषयबाधः YuktiSneha. 89. 22 (*on* i. 1. 5)

अनन्तरानुभव (anantarānubhava) *m.* experience (of something) in continuous order वासनानामनन्तरानुभवो हेतुः RājMār. 69. 25.

अनन्तरानुभूत (anantarānubhūta) *adj.* experienced immediately before अनन्तरानुभूतपदार्थातिक्रमेण व्यवहितानि पदानि न युक्तं यद्वाक्यार्थावगतेः कारणं भवन्तीति कल्पयितुम् NyāyRaMā. 85. 10.

अनन्तरानुष्ठान (anantarānuṣṭhāna) *n.* act of performing (something) subsequently दीक्षितसंस्कारान्कृत्वा पश्चात्क्रियमाणस्य रुक्मप्रतिमोचनादेः पश्चात्पाठोपपत्तौ नावश्यमनन्तरानुष्ठानम् ŚāstrDI. 428. 9 (*on* v. 2. 11); अप्रकरणे प्रायश्चित्ताभिधानमनन्तरानुष्ठानार्थम् BālaKrī. i. 52. 21 (*on* 1. 38); i. 123. 10 (*on* 1. 175)

अनन्तरापत्य (anantarāpatya) *n.* immediate descendant (ष्वडादेशः) येषां त्वनन्तरापत्येऽपीष्यते दैवदत्त्या याज्ञदत्या इति ते क्रौड्यादिषु द्रष्टव्याः KāśiVṛ. *on* iv. 1. 79; अनन्तरापत्यरूपेणैव कृष्णाभिधानं भविष्यति KāśiVṛ. *on* iv. 1. 104; येऽणादयोऽनन्तरापत्ये सावकाशास्ते … गोत्रे न प्राप्नुवन्ति PradI. iv. 122B. 34 (*on* iv. 1. 93); दक्षस्यानन्तरापत्यं गोत्रापत्यं वा दाक्षिः PrakriKau. i. 699. 5; i. 707. 1; गार्गेरिति। गर्गस्यानन्तरापत्यम्। गार्ग्यस्येति। गर्गगोत्रापत्यम्। गार्ग्यायणस्येति। गर्ग्युवापत्यस्य Prasā. i. 702. 16; i. 727. 4; अनन्तरापत्ये कौञ्जिः SiddhāKau. 229B. 3 (*on* v. 3. 113); आनन्तर्ये अनन्तरापत्ये LaŚabdeŚe. ii. 208. 11; ii. 212. 1; ii. 234. 3.

अनन्तरापत्यपरत्व (anantarāpatyapara-tva) *n.* the state of having reference to the immediate descendant इञविडादीनामनन्तरापत्यपरत्वे भाष्यमते जातित्वाभावात् LaŚabdeŚe. ii. 106. 9.

अनन्तरापत्यप्रत्ययान्त (anantarāpatyapratyayānta) *adj.* ending with a secondary suffix expressing 'immediate descendant' अनन्तरापत्यप्रत्ययान्तात्तु गोत्रे प्रत्ययः स्यादेवेति भावः PradI. iv. 122B. 3 (*on* iv. 1. 93); iv. 122A. 34 (*on* iv. 1. 93); अनन्तरापत्यप्रत्ययान्ते 'अवन्ती' इत्यत्र जातिप्रयुक्तो ङीष् LaŚabdeŚe. i. 409. 9; अनन्तरापत्यप्रत्ययान्तात्तापत्यप्रत्ययः LaŚabdeŚe. ii. 201. 7; ii. 204. 10; ii. 232. 3.

अनन्तरापत्यवाचिन् (anantarāpatya-vācin) *adj.* expressive of the sense 'immediate descendant' इह पौत्रप्रभृतावपत्ये विवक्षिते मूलप्रकृतेरेव गर्गादेः प्रत्यय इष्यते । न तु अनन्तरापत्यवाचिनो गार्गिप्रभृतेः PradI. iv. 121A. 17 (*on* iv. 1. 93)

अनन्तरापत्यविवक्षा (anantarāpatya-vivakṣā) *f.* intention to express the sense 'immediate descendant' अनन्तरापत्यविवक्षायां तु कृष्णेनैव भवितव्यम् — जामदग्नः, पाराशर इति KāśiVṛ. *on* iv. 1. 105.

अनन्तरापत्यस्त्री (anantarāpatya-strī) *f.* female as the immediate descendant तत्रानन्तरापत्यस्त्रियां गोत्रस्त्रियां चानियमप्रसङ्गाभावात् सामर्थ्यात् पौत्रप्रभृतेरपत्यं स्त्री गृह्यते PradI. iv. 123B. 27 (*on* iv. 1. 93)

अनन्तरापत्यार्थ (anantarāpatyārtha) *adj.* having the sense 'immediate descendant' (युञ्प्रत्ययः) तद्यथनन्तरापत्यार्थो गोत्रोक्ष्णोरुत्रराज [P iv. 2. 39] इत्यत्र क्रियते PariVṛ. (SI.) 166. 20; LaŚabdeŚe. ii. 234. 13; *m.* [Loc] in the sense of 'immediate descendant' तद्यथनन्तरापत्यार्थे PariVṛ. (SI.) (Paribhāṣāsaṃgraha) 257. 25.

अनन्तरापत्यार्थक (anantarāpatyārtha-ka) *adj.* having the sense 'immediate descendant' तद्यथनन्तरापत्यार्थकगोत्रादवयुतोऽनन्तरो दैवदत्त्या याज्ञदत्येति भारद्वाजीयोक्तिपरभाष्यात् … अनन्तरापत्यप्रत्ययान्ते विध्यर्थम् LaŚabdeŚe. ii. 232. 1.

अनन्तरापादित (anantarāpādita) *adj.* brought about from the preceding (quarters of a verse) अनन्तरापादितलक्ष्मशोभौ। पादौ भवेतां विविधैर्विकल्पैः। … स्मृताः स्मृतीशैरुपजातयस्ताः JayaChand. 6. 18.

अनन्तरापुत्र (anantarā-putra) *m.* son of a woman of the next lower caste ब्राह्मणस्यानन्तरापुत्रस्तुल्यांशः ArthŚā. ii. 38. 6 (3. 6); ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णाः ArthŚā. ii. 42. 3 (3. 7); सवर्णापुत्रानन्तरापुत्रयोरनन्तरापुत्रश्चेद् गुणवान् स ज्येष्ठांशं हरेत् BaudhDS. ii. 2. 12.

अनन्तरापेक्षा (anantarāpekṣā) *f.* requirement of that (word) which is immediately close अनन्तरापेक्षायामसंभवन्त्यामाम्नानसामर्थ्यादितरापेक्षावृत्तिराश्रीयते ŚābaBh. 1254. 23 (*on* iv. 3. 11); [Inst.] A in respect of the immediately following (rule) (पुरस्तादपवादाः) अनन्तरापेक्षयोत्तरान् व्यवहितान् (विधीन् न बाधन्ते) इत्यर्थः LaŚabdeŚe. i. 185. 13; B in relation to the person of the next lower caste ब्राह्मणस्यर्पभे स्मृतिरस्ति मानं तथाप्येकान्तरस्य द्व्यन्तरापेक्षयोत्कृष्ट(?ष्ट)त्वात्तदनुगमनाशौचकालान्यूनत्वानन्तरापेक्षया चापकृष्टत्वात् … पक्षिण्येव तदाशौचपरिच्छेदिका कृता बुधा BālamBha. iii. 77. 33 (*on* 3. 26)

अनन्तरापेक्षिन् (anantarāpekṣin) *adj.* expecting (the fulfilment) without any obstacle अजातशत्रुः कौन्तेयः सात्वतं प्रत्यभाषत … कृत्यस्यानन्तरापेक्षी शैनेयम् MahāBhā. vii. 85. 40 (BhārBhāDI. अनन्तरापेक्षी अविघ्नाकाङ्क्षी)

अनन्तराप्ति (anantarāpti) *f.* gaining (of perfection etc. by the soul) in the immediately next birth JainaL.

अनन्तराभवन (anantarābhavana) *n.* non-occurrence (of the result) immediately afterwards यद्यपि कर्मानुष्ठानानन्तरमेव नियोगसिद्धिः तथापि यत् फलस्यानन्तराभवनं तद् उपपत्त्या कल्प्यते PrakaPañ. 444. 12.

अनन्तराभाव (anantarābhāva) *m.* absence of the immediate descendant यान् द्वादश पुत्रान् हैरण्यगर्भो मनुराह तेषां मध्यादाद्याः षड् बान्धवाः गोत्रदायादाश्च, तस्माद् बान्धवत्वेन … अनन्तराभावे च गोत्ररिक्थं गृह्णन्ति ManvaMu. 393. 10 (*on* 9. 158)

अनन्तराम (anantarāma) *m.* name of a person [PW., MW.]

अनन्तराम्नान (anantarāmnāna) *n.* immediately previous mention ज्योतिष्टोमविधिरनन्तराम्नानात् द्वादशाहभूतस्य स्यात् LāṭyāŚS. ix. 6. 13; DrāhyŚS. (Ed. B. R. Sharma) xxvi. 2. 10.

अनन्तराय (án-antarāya) *m.* absence of impediment, non-interruption यद् संकृति अच्छावाकसामं भवत्यर्धस्य सर्वत्वाय पूर्योत्त्यै अनन्तरायाय TaiS. V. iv. 12. 3; संनयति। … पशुभिर्यजमानम्। शुक्रं त्वा … इत्याह सर्वत्वाय। पर्याप्त्या अनन्तरायाय TaiBr. III. iii. 4. 6; अथाध्वर्यु चातुर्थिं च संवृणक्ति … अग्नीषुमस्यानन्तरायाय ŚatBr. (K.) II. iv. 3. 10; विरोधिकारणमन्तरायः। तदभावः सत्त्वसाक्षाभिः। अविरोधकारणम(न)न्तरायः। तदभावः तत्स्यैवान्तरायस्याभावः AbhidhSa. 29. 2; *adj.* [*f.* -ā] not involving or causing impediments नास्त्यनन्तरायः कालक्षेपः ĀśaCū. 1. 10(10); अन्धाङ्ग्रीहीनहतवाञ्छितमानसानां दृष्ट्वा न जातु हितवृत्तिरनन्तराया YaśasCam. i. 276. 4; i. 423. 7.

अनन्तरायता (anantarāya-tā) *f.* [Inst.] because of the fact of absence of obstacles इतश्चानन्तरायतया तथानुमता हि मता हि मतिपाटवः (तन्यानुमताहितमतिपाटवः, BJP. Ed., 1964) सचिवोऽपि … लोकमिममुपन्यास्यद् YaśasCam. ii. 364. 4.

अनन्तरायपरिसमाप्ति (anantarāya-parisamāpti) *f.* completion without obstruction नारायणप्रणामादिकं प्रारिप्सितस्यानन्तरायपरिसमाप्तेः … हेतुतया … ग्रन्थादौ निबध्नाति NyāySu.(Ja.) 1A. 13 (*on* i. 1. 1); 9B. 3 (*on* i. 1. 1)

अनन्तरायम् (ánantarāyam) *adv.* I without interruption of time, immediately यं त्वेव द्वेष्टि यर्हेन् द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति TaiS. VI. i. 8. 4 = VI. ii. 10. 2; II without interruption or omission, continuously सर्वाभ्य एवैनं तद् देवताभ्योऽनन्तरायं निर्वपन्ति AitBr. 1. 1(7); ता एता नवानन्तरायमन्वाह AitBr. 8. 2(218) (Sāy. द्वयोर्ऋचोर्मध्येऽन्तरायो विच्छेदो न भवति तथानुब्रूयाद्); (विद्वान्) तान् सर्वाननन्तरायं प्रीणाति AitBr. 13. 3 (388); उतो पात्र्यै गृह्णन्ति। अनन्तरायमु तर्हि यजुःषि जपेद् ŚatBr. I. i. 2. 8; 'अभि देवं इयक्षते' इति सर्वा एवैतेन देवता अनन्तरायमभियजते JaimiBr. 1. 90; 2. 17; कथमु खल्वेतानुवाकाननुब्रुयादिति। यथाप्रकृत्यस्तथानन्तरायं होतव्याः BaudhŚS. iii. 287. 2.

अनन्तरायहतता (anantarāyahata-tā) *f.* the state of being not obstructed by any obstacle or impediment स्वधर्मभूते कर्मणि … निधनमपि श्रेयः। अनन्तरायहततयानन्तरजन्मन्यव्याकुलकर्मयोगारम्भसंभवात् GītāBh.(Rā.) 214. 2 (*on* 3. 35)

अनन्तरायिक (anantarāyika) *adj.* not connected with (causing or subject to?) hindrances सदोद्वहीतधर्मविस्मरणप्रज्ञोपायनिग्रहागतसत्त्वनिस्तारणप्रसादसंदर्शनशुभमानन्तरायिकवैशारद्यम् MahāVyu. 28. 3 [DBHS.]

अनन्तरारम्भ (anantarārambha) *m.* commencement immediately after (the Vedic recitation) वेदानां विवक्षितार्थतया साधिते शास्त्रस्यावेदनानन्तरारम्भे … अवघट्टसालौकिकार्थत्वमाशङ्कितम् TātpaṬ.(U.) 3. 17 (*on* 1.11)

अनन्तरारयुग्म (anantarāra-yugma) *n.* pair of immediately contiguous or next spokes अनन्तरारयुग्मे तु वारुणा च यशस्विनी। दक्षिणारे सुषुम्नायाः पिङ्गला वर्तते क्रमात् VarāU. 5. 24; AhirbuS. 32. 14.

अनन्तरार्थ (anantarārtha) *adj.* A having the purpose of substitution which is not close (i. e. which is dissimilar) (स्थाब्दोरित्व इत्यत्र, तपरकरणे) इदं तर्हि प्रयोजनमनन्तरे प्लुतो मा भूदिति। कुतो न खल्वेतदनन्तरार्थं आरम्भे ह्रस्वो भविष्यति न पुनः प्लुत इति MahāBh. i. 198.25 (*on* i. 2.17); Nyās. i. 157.20 (*on* i. 2.17); B having the purpose of expressing 'immediate descendant' पौत्रादावर्थे चत्वारः प्रत्ययाः क्रमेण भवन्ति। … द्वैप्यायणः। अस्योत्सार्गो पाठोऽनन्तरार्थोऽनपत्यार्थश्च GaṇRa. 3.239(282); *m.* [Loc.] in the sense of 'immediately next' मासतन्वोरनन्तरार्थे वा Vār. 1 *on* P. iv. 4.128; MahāBh. ii. 334.22 (*on* iv. 4.128); DharK. 2890.

अनन्तरार्थत्व (anantarārtha-tva) *n.* the state of being meant for the immediately next (action) (मुष्टिकरणवाग्यमयोः) योग्यता पुनरनन्तरार्थत्वे च समा TantrVā. 757.22 (*on* iii. 1.24)

अनन्तरालत्व (anantarāla-tva) *n.* the state of not having an intermediate space न च परमाणुरूपं तच्छरीरम्। अनन्तरालत्वेन निर्मनस्कतया इन्द्रियाश्रयत्वानुपपत्तेः ĀtmaTaVi. 878.7.

अनन्तरालोचना (anantarālocanā) *f.* [Inst.] because of the following consideration यावज्जीवमिति कालशास्त्रम् … अनन्तरालोचनयैवं योजयितव्यम् TantrVā. 637.11 (*on* ii. 4.7)

अनन्तरावगमार्थम् (anantarāvagamārtham) *adv.* for the sake of the understanding of what immediately follows (the Vedic recitation) अतोऽनन्तरावगमार्थं धर्मजिज्ञासाहेतुरध्ययनम् Bṛha. 14.15 (*on* i. 1.1)

अनन्तरावतीर्णबाधा (anantarāvatīrṇa-bādhā) *adj.* (*f.*) having the sublation appearing immediately afterwards यस्तु तत्र बुद्धेर्भ्रमत्वाभावोऽप्युक्तः स त्वनन्तरावतीर्णबाधया एव बुद्धेस्तत्र भ्रमत्वेन प्रक्रमात्र विरुद्धः LaŚabdeŚe. ii. 381.12 (comm. अनन्तरं स्वोत्पत्त्युत्तरक्षणेऽवतीर्णः संजातो बाधो यस्यास्तस्यैव भ्रमत्वेन कल्प्यते)

अनन्तरावबुद्ध (anantarāvabuddha) *adj.* cognized immediately afterwards द्वाभ्यां पदार्थाभ्यां वाक्यार्थः संजन्यते नान्यतरेण। … कथमुभाभ्यां पदार्थाभ्यां विशिष्टां बुद्धिमुत्पादयेयुरिति। अनन्तरावबुद्धेन सह वाक्यार्थः शक्यते कर्तुम्। असंबद्धपदोचारणे च नानन्तरावबुद्धो भवति ŚābaBh. 734.10 (*on* iii. 1.21)

अनन्तरावमर्श (anantarāvamarśa) *m.* reference to what occurs immediately before यथनन्तरावमर्शः तदा सपिण्डीकरणेतिकर्तव्यतातिदेशः प्राप्नोति ManuBh. i. 313.10 (*on* 3.238)

अनन्तरावान्तरसामान्यवचन (anantarāvāntarasāmānya-vacana) *adj.* expressive of sub-classes which are next (to the Summum Genus = *sattā*) तत्रानन्तरावान्तरसामान्यवचनानां द्रव्यगुणकर्मशब्दानामेव तावदसंकीर्णार्थत्वात्सत्तार्थत्वमनुपपन्नं किम(? मु)त दूरान्तरितार्थगवादिशब्दानाम् TantrVā. 251.19 (*on* i. 3.26)

अनन्तरावेक्षिन् (anantarāvekṣin) *adj.* looking for (the fulfilment) without any obstacles अजातशत्रुः कौन्तेयः सात्वतं प्रत्यभाषत। … कृत्यस्यानन्तरापेक्षी(v. l. अनन्तरावेक्षी) शैनेयं शिनिपुंगवम् MahāBhā. vii. 85.40.

अनन्तराशि (ananta-rāśi) *m.* infinite quantity or number [PW., MW.]; a periodic decimal fraction [MW.]

अनन्तराशिन् (an-antarāśin) *adj.* not taking food in between (two meals) अनन्तराशी यश्चापि वर्तते व्रतवत्सदा। … स विमानेन दिव्येन याति शक्रपुरं नरः MahāBhā. xiv. App. I. 4 (1386); VṛGautaSm. 552.19(7); अनन्तराशितोये(? नो ये) तु दम्भाहंकारवर्जिताः(? ताः)। तेऽपि सारसयुक्तेन यान्ति यानेन वै सुखम् VṛGautaSm. 528.20(5); BrahmP. 216.42.

अनन्तराशोकलता (anantarāśokalatā) *f.* adjacent *aśoka* creeper स राजसूनुः सुतरां चकासे। अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन RaghuVa. 7.21.

अनन्तरासंभवित्व (anantarāsambhavi-tva) *n.* the state of not coming into being immediately afterwards स्वर्गो हि स्वभावाद्देहान्तरानुभवनीयत्वादनन्तरासंभवित्वेन शास्त्रार्थावधारणवेलायामेव निश्चीयते ŚāstrDī. 88.15 (*on* i. 1.5)

अनन्तरास्तमित (anantarāstamita) *adj.* which has ceased to exist in the immediate past (भावानां) भेदाभावाधिरानन्तरास्तमितानुपजातानामविशेषात्, असति तदन्वये कचित्सदा प्रतीतिप्रसङ्गः SphoṭSi. 71.1.

अनन्तरिक्ष (an-antarikṣa) *adj.* devoid of sky, devoid of the space between heaven and earth अनन्तरिक्षे लोकेऽस्मिन्देवदानववर्जिते। त्वमेव प्रलये विप्र ब्रह्माणमुपतिष्ठसि MahāBhā. iii. 186.3; तस्मिन्नेकार्णवे घोरे …। अनन्तरिक्षे लोकेऽस्मिन् भ्रमाम्येकोऽहम् MahāBhā. iii. 186.78; *n.* other than the sky, other than the space between heaven and earth अनन्तरिक्षे हादिवि च पृथिव्यां नित्य चयनं प्राप्तम् TantrVā. 9.11 (*on* i. 2.5); अनन्तरिक्षे अदिवि च पृथिव्यां चयनस्य नित्यप्राप्तत्वात् MīmāKau. iii(1). 13.9 (*on* i. 2.5); अन्तरिक्षे दिवि च चयनं न प्रतिषिध्यते, अप्राप्तत्वात्। नापि पर्युदस्यते, अदिव्यनन्तरिक्षे च नित्यप्राप्तत्वात् GuruCandr. i. 248.16.

अनन्तरित (án-antarita) *adj.* [*f.* -ā] **A I** not passed over, not omitted प्रजापतिर्यज्ञमसृजत तेन सृष्टदर्शोऽनन्तरितः MaiS. iv. 4.10 (iv. 61.10); यथा वाव शस्त्रमेवं याज्या तिस्रो देवताः शस्यन्तेऽग्निरिन्द्रो वरुण इत्यथैन्द्रावरुण्या यजति कथमग्निरनन्तरितः … त्वमग्ने वरुणो जायसे यदिति तदग्नेवैन्द्रावरुण्या यजति तेनाग्निरनन्तरितः AitBr. 29.10(763) (Sāy. अनन्तरितोऽपरित्यक्तः); अथोत्तरस्याह उक्थेभ्योऽधिरात्रिमुपयन्ति तेनोक्थान्यनन्तरितानि PañcBr. xx. 11.8; **A II** not separated by, uninterrupted कथमेषामग्निहोत्रमनन्तरितं भवतीति व्रतेनेति ब्रूयात् ŚatBr. XII. iii. 5.3; कथमेषां पितृयज्ञोऽनन्तरितो भवतीत्यौपासनैरिति ब्रूयात् ŚatBr. XII. iii. 5.5; कथमेषामाग्रयणेष्टिरनन्तरिता भवतीति सौम्येन चरुणेति ब्रूयात् ŚatBr. XII. iii. 5.7; अथ केनैषां छन्दोमा अनन्तरिता भवन्तीति। स्तोमेनेति ब्रूयात् JaimiBr. 3.282; GopBr. i. 5.9 (124.1); ध्यानं नाम … भिन्नजातीयैरनन्तरितः प्रत्ययसंतानः ChāndoUBh. 431.17 (*on* vi. 6.2); (भुञ्जीत … न चासने) भाजनायनन्तरितेन(? ते न) आसने अन्नं स्थापयित्वा। आनन्तर्याद् भोज्यस्य प्रतिनिर्देशः, न भोक्तुः ManuBh. i. 357.28 (*on* 4.74); अचानन्तरितो हसः स्वसंज्ञः स्यात् MugdhaBo. 3.18 (12.12); तं च संकेतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरानन्तरिता शक्तिरभिधा नाम SāhiDa. 33.2; **B I** (often with Abl., rarely with Gen.) not separated from एवमु हास्यात्मा सोमपीथादनन्तरितो भवति AitBr. 8.4(229); अनन्तरिताः पितरः सोम्याः सोमपीथात् TaiBr. III. vii. 14.4; ĀpaŚS. xiv. 32.4; VaikhāŚS. 20.28; LāṭyāŚS. iii. 2.13; DrāhyŚS. vii. 2.14; तथो हास्यैषानन्तरिता भवति ŚatBr. VII. v. 1.28; तथा हास्यैतानि सर्वाण्यनन्तरितानि भवन्ति JaimiBr. 1.310; तौ यदत्रैव पृष्ठयमात्रौ तौ पृष्ठ्यादनन्तरितौ NidāSū. 169.5 (9.11); **B II** standing close or proximate, being near तस्य च प्रकारा अनन्तरिता आग्नेये विधीयन्ते ṬupṬ. 254.17 (*on* x. 4.1); (यमकन्) पादसमुद्गकसंज्ञं तत्रावृत्तानि कुर्वते तच्च। अन्तरितानन्तरितव्यस्तसमस्तेषु पादेषु Kāvyālaṁ.(Ru.) 3.26 (comm. अनन्तरितमपि प्रथमद्वितीययोर्युगपद् द्वितीयतृतीययोर्वा); विजिगीषोर्नृपस्यानन्तरितं चतुर्दिक्षमप्यरिप्रकृतिं विजानीयात् ManvaMu. 276.3 (*on* 7.158); यावतो(? न्तो)ऽनन्तरिताः समानगोत्रास्तावतां सकृदित्याश्वलायनसूत्रे समानगोत्राः समानप्रवरा इति व्याख्यानात् VīraMi.(Saṃskāra.) 594.25; वृत्ते पूर्वविचारे सत्युत्तरविचार एवानन्तरितो न शास्त्रान्तरसापेक्षविवेकावसर इत्यानन्तर्यमुच्यत इति चेत्। न SiddhāSi. i. 14.12.

अनन्तरितप्रताप (anantarita-pratāpa) *adj.* whose valour is not concealed (i. e. of well-known valour) तस्मादनंतरमनंतरितप्रतापः प्राप क्षितिं क्षतरिपुर्व्वणप्रसादः EI. viii. 210.14.

अनन्तरितवृत्ति (anantarita-vṛtti) *f.* uninterrupted (mental) function or activity श्रद्धालुरविचारयन्। चिन्तयेत्प्रत्ययैरन्यैरनन्तरितवृत्तिभिः PañcDa. 9.77 (comm. उपास्यतत्त्वम् … अव्यवहितवृत्तिभिश्चिन्तयेत्)

अनन्तरिति (án-antariti) *f.* [used only in Dat.] the act of not excluding or passing over, non-omission अथो यज्ञपरुषोऽनन्तरित्यै TaiS. V. ii. 5.6 = TaiBr. I. vi. 4.3 (comm. यज्ञावयवस्य अनन्तरित्यै अबहिष्कारार्थम्); स यदनुवषट्करोत्यग्नेरेव स्विष्टकृतोऽनन्तरित्यै AitBr. 4.5(95); एतं तृचं तं नान्तरियात् स्तोत्रियस्यानन्तरित्यै KauṣBr. 27.4 (132.4); अग्नये स्वाहा वायवे स्वाहेति जुहोत्यनन्तरित्यै TaiBr. III. viii. 17.2 (comm. अनन्तर्हितत्वाय); द्विपन्तं भ्रातृव्यमतिक्रामत्यनन्तरित्यै TaiBr. III. viii. 18.1; III. viii. 18.5; III. ix. 11.2; वर्पति न धावेत्। अमृतं वा आपः। अमृतस्यानन्तरित्यै TaiĀ. i. 26.7 (164.4)

अनन्तरी (anantar-ī) *f.* name given to the third day of the second fortnight (of every month on which a particular vow is to be observed) एषा विशेषविहितामिहिता तृतीया यानन्तरीत्यविधवाभिरुदीरितोच्चैः BhaviP. 657B.14 (iii. 29.77); अनन्तरी तृतीया च गणशान्तिव्रतं तथा BhaviP. 901A.30 (iii. 208.8)

अनन्तरीकर्तुम् (anantarī-kartum) *inf.* for bringing close, for making proximate एवं वाक्ये पदानां प्रकरणे च वाक्यानां संबन्धो यावत्साकाङ्क्षेण तत्संबन्धार्हेण परस्याप्यनन्तरीकर्तुं समर्थेन व्यवधानम् TantrVā. 439.21 (*on* ii. 1.48)

अनन्तरीकृत्य (anantarīkṛt-ya) *ger.* having brought close तदमुमेव तावदस्य क्रोधानलस्य सौमित्रेरनन्तरीकृत्य तिरोभवन्पश्यामि AdbhuDa. 3.14(4)

अनन्तरीभवन्ती (anantarī-bhavanti) *adj.* (*f.*) becoming close or proximate to सर्वत्रैवमपेक्षा पुरस्तात्परस्ताच्च प्रस्तैकत्रारुढेतरेषामनन्तरीभवन्ती

तावदपेक्ष्यमाणा निगृह्णाति यावत्किंचिन्न योऽयमस्यदोषं चोपलभ्यम् TantrVā. 439. 14 (*on* ii. 1. 48)

अनन्तरीभू (anantarī-bhū-) I. P. to be immediately next, to be close हृदयाद्धि मनः प्रणीतमिवानन्तरीभवति ChāndoUBh. 325. 6 (*on* v. 18. 2)

अनन्तरीय (anantarīya) *n.* crime bearing immediate fruition, deadly sin [DBHS.]

अनन्तरीय (anantar-īya) *adj.* [P. iv. 2. 138] being next in order अनन्तरीयं बलमाज्ञापयितुमर्हति महाराजः Abhiṣe. 3. 6(2); अनन्तरीयः GaṇRa. 5. 317(356); [concerning or belonging to the next of kin, MW; next in succession, APTE]

अनन्तरीयक (anantarīya-ka) *adj.* not appearing apart from, invariably concomitant with स मुद्गरप्रहारादिप्रयत्नानन्तरीयकः यस्मात्कृतको दृष्टो हेतुः स्याद्व्यभिचारार्थतः ŚlokaVār. 6. 29 (737. 2) = TattvSaṃ. 2329.

अनन्तरीयमाण (an-antarīyamāṇa) *adj.* not being interrupted अङ्गैरप्यनन्तरीयमाणैर्यज्ञो विस्तार्यते ŚābaBh. 1665. 24 (*on* ix. 1. 24)

अनन्तरुचिरोचिष्णु (anantaruci-rociṣṇu) *adj.* shining with the lustre similar to that of Ananta (i. e. of Viṣṇu or of Baladeva) (विभिन्नवर्णद्वयानां पड्भेदाः। यथा श्वेतश्यामौ ··· एषां क्रमेण शब्दाः यथा — श्वेतश्यामौ ··· रामानन्तार्जुन° ··· 'सिंहौजाः') अनन्तरुचिरोचिष्णुः। अनन्तशब्देन विष्णुर्बलदेवश्च KāvyKaVṛ. 67. 26 (3. 3)

अनन्तरुद्र (ananta-rudra) *m.* epithet of Śiva (*lit.* eternal Rudra) वेदे चास्य समाम्नातं शतरुद्रीयमुत्तमम्। नाम्ना चानन्तरुद्रेति उपस्थानं महात्मनः MahāBhā. vii. 173. 79, एषः ··· तदाप्रभृति ···। अभूत्सहायः करणीयपक्षेऽप्यनन्तरुद्रस्य धिया विशुद्धया ŚivLī. 5. 32.

अनन्तरूप (ánanta-rūpa) *adj.* [*f.* -ā] **i** having an infinite form यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् TaiĀ. x. 1. 1 (757. 3); क्षयो नानन्तरूपस्य स्यात्समष्टिवपुर्भृतः BṛĀraUBhVā. v. 16. 62; **ii** having endless or innumerable forms अनन्तमव्यक्तमजं पुराणं सनातनं विश्वमनन्तरूपम् MahāBhā. i. 1917*(2); अनन्तरूपा ध्वजिनी त्वदीया नरेन्द्र भीमा न तु पाण्डवानाम् MahāBhā. vi. 20. 20; पश्यामि त्वा सर्वतोऽनन्तरूपम् MahāBhā. vi. 33. 16 = BhagGī. 11. 16; त्वया ततं विश्वमनन्तरूप MahāBhā. vi. 33. 38 = BhagGī. 11. 38; अनन्तरूपो भगवान् पुराणः BṛParāSm. 10. 384; अनन्तरूपो भगवान् वनमाली तु यः स्मृतः PauṣkS. 12. 22; योऽनन्तरूपोऽखिलविश्वरूपो गर्भेऽपि लोकान् वपुषा बिभर्ति ViṣṇuP. v. 3. 12 = BrahmP. 182. 16; कालो ह्यनन्तरूपस्तु PrajāSm. 169; सर्वतोऽनन्तरूपः। इन्द्रो मायाभिरास्ते ŚatŚlo. 50; अनन्तरूपम् ··· भक्त्या नमामि शिरसा जिनवर्धमानम् GaṇiSāSaṃ. 7. 1; विभवोऽनन्तरूपस्तु ··· अनिरुद्धस्य विस्तारो दर्शितस्तस्य सात्वते LakṣmīT. 2. 58; अनन्तरूपं मां द्रष्टुं पुरा हरिचतुर्मुखौ। पातालमन्तरिक्षं च जग्मतुः BṛKathāMañ. i. 1. 25; यावद् विशुद्धं स्वयमेव बुद्ध्या ह्यनन्तरूपं परमभ्युपैषि YogVā. ii. 19. 35; v. 43. 40; सूक्ष्मं परं ज्योतिरनन्तरूपम्। ··· वदन्तीश मुमुक्षवस्त्वाम् BrahmP. 122. 74; नमामि गणनाथम् ··· वाचामगोचरमनादिमनन्तरूपम् GaṇeP. i. 3. 7; मातः ···। पुण्यैरनन्तरूपा त्वं भुवश्रीश्च उत्तरा ŚāliC. 5. 93; अचिन्त्यमव्यक्तमनन्तरूपम् ··· तदेवाहम् ŚaṅkaVi.(Ā.) 267. 6; 246. 16; अनन्तरूपं खलु बोधयन्ति त्वामेव वेदा जय विश्वनाथ BallāC. 116. 3; अनन्तरूपम् ··· गोविन्दमादिपुरुषं तमहं भजामि BrahmS. 5. 42; अनन्तरूपस्य शिवस्य ···। अनेन रूपेण च भीषणेन तत्स्वरूपहानिर्न भवेत् कदाचन Vidvanmo. 8. 68; **iii** having the form of an infinite entity सत्यज्ञानानन्तरूपम् ··· ब्रह्म ··· निरूप्यते BrahmSūBh.(Śrī.) i. 188. 6 (*on* i. 1. 4); **iv** having many (inflected) forms अनन्तरूपस्येण एकोऽयमिकारोऽजिति व्यपदिश्यते PradI. v. 3A. 29 (*on* vi. 1. 1); **v** of the form of (the serpent-king) Ananta इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तरूपैर्नामभिर्बलिमन्त्रमूर्तैर्नमोऽन्तैश्च ··· दद्यात् VīraMi. 337. 17 (*on* 1. 286)

अनन्तरूप (ananta-rūpa) *n.* **i** form (i. e. incarnation) of Ananta (i. e. of Viṣṇu) दंष्ट्राग्रेणोद्धृता गौः ··· मृत्पिण्डवत्प्रागबृहद्वरुवपुषानन्तरूपेण येन। ··· नुदतु मम रिपून्नादिदेवो वराहः VarāP. 1. 2; **ii** infinite form महाविष्णुः ··· अनन्तरूपमास्थाय प्रविवेश तदण्डकम् ŚivaP. ii. 15. 31 (58B. 12); अतः अभ्यासादनन्तरूपेणाविर्भावः AṇuBh. 198. 2 (*on* iii. 2. 26); न च स्वस्यानन्तरूपैर्बहुभावं संकल्प्य 'इदं सर्वमसृजत' इति प्रपञ्चसर्जनानुपपत्तिः Nyāyāmṛ. 504A. 12; AdvaiSi. 762. 7; सुदर्शन तवानन्तरूपाणि स्मर सांप्रतम् BṛBrahmaS. i. 2. 68; *m.* **A** one of the epithets of Śiva (*lit.* having an infinite form) अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ··· अनन्तरूपः MahāBhā. xiii. 17. 132; **B** name of a Brahmin मंगलविला-विनिर्गत-(।) भट्टपुत्र-(।) बहुसुत-(।) अनन्तरूप-सुतः [Read अनन्तरूपसुताय] EI. xii. 158. 19.

अनन्तरूपतस् (anantarūpa-tas) *adv.* because of having infinite forms विश्वंभरा तद्धरणाच्चानन्तानन्तरूपतः। पृथ्वीयम् BrahmVaiP. ii. 9. 32.

अनन्तरूपता (anantarūpa-tā) *f.* the state of having many or innumerable forms (नाटिकायाम्) एकद्वित्र्यादिपात्राद्विभेदेनानन्तरूपता DaśRū. 3. 45; परं ब्रह्म ··· सगुणं बभौ ···। पालनाय स्वधर्मस्य बिभ्रतेऽनन्तरूपताम् GaṇeP. ii. 59. 4.

अनन्तरूपत्व (anantarūpa-tva) *n.* the state of having infinite forms संकल्पः ···। सत्यज्ञानन्तरूपत्वे पक्षधा स विजृम्भते AhirbuS. 14. 14; चशब्दादनन्तरूपत्वं चैके शाखिनः पठन्ति BrahmSūBh.(Ma.) 49A. 9 (*on* iii. 2. 13); ब्रह्मणोऽनन्तरूपत्वे यानि यानि रूपाणि विविधैर्बैरुपासितुं शक्यानि AṇuBh. 208. 1 (*on* iii. 3. 1); परमित्रिया वा विरुद्धक्रियोपनिषदामाप्नुं संमता सैवानन्तरूपत्वान्नायेत्युच्यते SetuBa. 135. 16; अमात्रोऽनन्तमात्रश्च इत्येके शाखिन एवमभेदेनानन्तरूपत्वेन चैनं पठन्ति GovīBh. 201. 5 (*on* iii. 2. 13)

अनन्तरूपवत् (anantarūpa-va(n)t) *adj.* **A** assuming the form of (the mythical serpent-king) Ananta तमर्थं यज्ञियं नागो जहारानन्तरूपवान् Rāmā. i. 851*(2); **B** having infinite forms अनन्तकर्मानन्तश्रीस्तथैवानन्तरूपवान् ĀdiP. 22. 31.

अनन्तरूपिन् (ananta-rūpin) *adj.* **A** possessed of infinite forms यः ··· अनन्तरूपी ···। दृष्ट्वा तं तादृशं शेषो भीत्या भ्रान्त इवाभवत् GaṇeP. i. 90. 47; अनन्तरूपी यो देवो वेदकर्ताखिलार्थदः। ··· गुणेश इति पप्रथे GaṇeP. ii. 79. 28; **B** having the name (*lit.* form) Ananta (i. e. Anantadeva, Āpadeva's father) अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् MīmāNyāPra. 193. 10; **C** having the form of Viṣṇu, MīmāNyāPra. 193. 10.

अनन्तरै (ananta-rai) *adj.* abounding in riches (i. e. having infinite glory) दृग्वदुज्झितान्तरायमनन्तरायम् ··· आकलय्य (जिनम्) ··· कर्तुं स्तुतिं प्रस्तुतवान् (समरकेतुः) TilaMañ. 218. 3.

अनन्तरोक्त (anantarokta) *adj.* [*f.* -ā] **i** mentioned or referred to before or above सविषपुष्पघ्राणाच्छिरोव्यथा साश्रुनेत्रत्वं गन्धाज्ञानं च। तत्रानन्तरोक्तो विधिर्विष्टोदितश्चेति AṣṭāSaṃ. i. 48. 23 (1. 8); नानन्तरोक्तया युक्त्या तस्य बाधोपदर्शनात् TattvSaṃ. 281; धूमादिक्रमेण चन्द्रान्ततयानन्तरोक्तन्यायेन गतिं प्राप्य पुनराकाशादिक्रमेण पृथिवीं प्राप्नुवन्ति BālaKrī. ii 70. 3 (*on* 3. 186-87 (? 196-97)); श्रोणीतटे व्याघ्रपदं लिखन्ति। दीर्घायतां तां प्रवदन्ति रेखां स्थानं तदीयं यदनन्तरोक्तम् NāgaSa. 22. 3; अनन्तरोक्तेन प्रलाख्यानेन तुल्यमेतद् प्रलाख्यानम् Nyās. i. 198. 3 (*on* i. 2. 57); तत्रानन्तरोक्तया नीत्याभिमतनियमे प्रतिपद्यमाने प्रतिपत्तिगौरवं भवति Nyās. ii. 719. 5 (*on* vii. 2. 35); अनन्तरोक्तेन न्यायेन सर्वगतत्वं ब्रह्मणः BrahmSūBh.(Bhā.) 172. 4 (*on* iii. 2. 37); यदि हि मुख्यमुपगमस्तदा स एव विवाहोऽन्यस्यानन्तरोक्तेन न्यायेनाभावात् ManuBh. i. 224. 11 (*on* 3. 34); नायमनन्तरोक्तो दोषः श्रुतिस्मृतिचोदिते वधे ManuBh. i. 435. 11 (*on* 5. 39); i. 271. 6 (*on* 3. 137); उभयमनन्तरोक्तं मार्गद्वयमात्मा यस्येति विग्रहः VakroJī. 45. 11; अनन्तरोक्तस्य गुणद्वयस्य विषयं प्रदर्शयति VakroJī. 75. 18; 83. 13; सर्वशब्देनात्र प्रकृतापेक्षयानन्तरोक्तानि मूर्तद्रव्याणि परामृश्यन्ते NyāyKa. 22. 14; 50. 7; नैव शशतादोषः किं त्वक्षतदोषो वाच्यः। एतेनैवेत्यनन्तरोक्तेन स्वजातीयन्यायेन JayaMa. 277. 20 (*on* 5. 4); 337. 16 (*on* 6. 4); तत्र तयोरभ्यासवैयर्थ्ययोर्मध्ये अभ्यासस्यानन्तरोक्तस्येति TattvVai. 36. 22 (*on* 1. 32); 86. 22 (*on* 2. 19); तच्छब्दस्य चानन्तरोक्तपरामर्शकत्वात् Bhām. 518. 23 (*on* ii. 4. 17); एवं स्थित इति। अनन्तरोक्तेन प्रकारेण ध्वनिगुणीभूतव्यङ्ग्ययोर्विभागे स्थिते सतीत्यर्थः Loc. 215. 26 (*on* 3. 41); 'तद् व्याकरणमस्याः' इति अनन्तरोक्तान्वभूमित्युचितपरामर्शायाः स्मृतेः इति PratyabhiVi. i. 182. 5 (*on* i. 4. 6); अत्र किं स्यादित्यस्यानिर्देशात् अनन्तरोक्तं हविरन्तरोत्पादनं संबध्यते NyāyRa. 17. 14 (*on* 1. 54); अनेन श्लोकेनानन्तरोक्तं पुरुषोत्तमविषयं ज्ञानम् GītāBh.(Rā.) 606. 18 (*on* 15. 20); अनन्तरोक्ते प्रयोजनेऽभिमते सूत्रस्यासामर्थ्यात् 'नापत्यात्' इति वक्तव्यम् PradI. iv. 122A. 28 (*on* iv. 1. 93); उक्ततः प्रोहसद्वारः ··· इत्यत्र त्वनन्तरोक्तः प्रकारो न संभवतीति कुतोऽर्थान्तरप्रतीतिः VyaktiVi. 119. 23; **ii** referred to subsequently, cf. **अनन्तरोक्तप्रबोध.**

अनन्तरोक्तत्व (anantarokta-tva) *n.* the state of being referred to immediately before तस्याथेतोऽस्मिन् इति तस्याभिधेयसंज्ञकस्य शास्त्रस्यानन्तरोक्तत्वाद् ग्रहणम् Sphuṭā. i. 11. 1 (*on* 1. 2); न च (शब्दः) कल्पयितुं शक्यः, अनन्तरोक्तत्वात्, स्थूलन्यक्षोपपत्तेः ĀgaPrā. 5. 23.

अनन्तरोक्तदोष (anantarokta-doṣa) *m.* fault referred to before अनन्तरोक्तदोषपरिहारमभ्युपगम्य सूत्रोक्तो दोषः परिहर्तुं न शक्यते PrakaVi. 463. 21; अनन्तरोक्तदोषद्वयपरिहारं शङ्कते YuktiSneha. 150. 34 (*on* i. 1. 7); LaCandr. 533. 15.

अनन्तरोक्तनय (anantarokta-naya) *m.* rule stated immediately before तस्मात्तत्तुल्यवृत्तान्ताभिधानसामर्थ्यादेवानन्तरोक्तनयेन तदवगतेः VyaktiVi. 75. 10.

अनन्तरोक्तपक्ष (anantarokta-pakṣa) *m.* view stated immediately before उह्यश्चानन्तरोक्तपक्षवदेव BhāṭṭDī. iii. 308. 19 (*on* x. 4. 25)

अनन्तरोक्तपद्य (anantarokta-padya) *n.* verse quoted immediately before अनन्तरोक्तपद्ये तु नोत्साहः प्रतीयते RasGaṅ. 51. 14.

अनन्तरोक्तपाठार्थ (anantaroktapāṭhārtha) *m.* meaning of the (variant) reading stated immediately before एष चानन्तरोक्तपाठार्थाद् विशिष्यते न वेति सहृदया एव प्रमाणम् VyaktiVi. 127. 19.

अनन्तरोक्तप्रकार (anantarokta-prakāra) *m.* I method stated immediately before एवं स्थित एव शास्त्रे रोरुकारमकृत्वैव पुनरनन्तरोक्तप्रकारेणेष्टसिद्धेरुकारोऽनुबन्धो व्यर्थः स्यात् PariVṛ.(Sī.) 41. 18; अनन्तरोक्तप्रकारेण प्राणायामै रागादिदोषान् दहेत् ManvaMu. 241. 13 (*on* 6. 72); II special feature stated above ये तथाभूता इति। अनन्तरोक्तप्रकारमापन्ना इत्यर्थः Nyās. ii. 206.3 (*on* vi. 1.7)

अनन्तरोक्तप्रक्रिया (anantarokta-prakriyā) *f.* A derivational stages mentioned earlier (वाक्यादौ च द्वे द्वे उदात्ते भवतः) वाक्यादौ चेति। अनन्तरोक्तप्रक्रियेति भावः PradI. ii. 32B. 16 (*on* i. 2. 37); B procedure mentioned before नो चेदनन्तरोक्तप्रक्रियया परमात्मनस्सर्वदोषानुषङ्गः NītiMā. 52. 8.

अनन्तरोक्तप्रबोध (anantarokta-prabodha) *m.* awakening referred to subsequently 'स यदा प्रतिबुध्यते' इति अनन्तरोक्तप्रबोधस्यैकधाभवनसमानकर्तृकत्वस्वारस्यात् ŚrutaPra. ii. 141. 21 (*on* i. 4. 18)

अनन्तरोक्तप्रमेय (anantarokta-prameya) *n.* object of knowledge referred to immediately before अनन्तरोक्तप्रमेयस्य वक्ष्यमाणप्रमेयेणासंगतिमाशङ्क्य YuktiSneha. 108. 19 (*on* i. 1. 5)

अनन्तरोक्तभ्रान्ति (anantarokta-bhrānti) *f.* illusory knowledge referred to immediately before अविद्यायोगः—अनन्तरोक्तभ्रान्तियोगः ŚrutaPra. iA. 173. 28 (*on* i. 1. 1)

अनन्तरोक्तयुक्ति (anantarokta-yukti) *f.* argument or reasoning stated before ततः सोऽनन्तरोक्तयुक्त्या कृतप्रायश्चित्तविषय एव BālamBha. iii. 40.31 (*on* 3. 16)

अनन्तरोक्तवत् (anantarokta-vat) *adv.* as in the case of what is referred to immediately before विकल्पाभावश्चानन्तरोक्तवत् TantrVā. 8. 3 (*on* i. 2. 2)

अनन्तरोक्तविधि (anantarokta-vidhi) *m.* method laid down above or before एवमित्यनेनानन्तरोक्तविधिना ... आचार्यपुत्रादीनामप्यग्निपर्यन्तानां शुश्रूषकः ... अनुतिष्ठति ManvaMu. 84. 21 (*on* 2. 249)

अनन्तरोक्तविरोध (anantarokta-virodha) *m.* contradiction with what is stated afterwards अन्यथोपक्रमविरोधोऽनन्तरोक्तविरोधश्च BrahmSūBh. (Rā.) 609. 13 (*on* iii. 2. 35)

अनन्तरोक्तव्यावृत्त्यर्थ (anantaroktavyāvṛtty-artha) *adj.* meant for the exclusion of whatever is stated earlier वाशब्दोऽनन्तरोक्तव्यावृत्त्यर्थः VedāntDī. 161. 16 (*on* iii. 2. 27)

अनन्तरोक्तसमन्वय (anantarokta-samanvaya) *m.* co-ordination referred to earlier अनेन अनन्तरोक्तसमन्वयाक्षेपेणोत्थानादवान्तरसंगतिरिति सूच्यते ŚrutaPra. iB. 173. 24 (*on* i. 1.5)

अनन्तरोक्तस्वभाव (anantarokta-svabhāva) *adj.* having the characteristics referred to earlier एष इत्यनन्तरोक्तस्वभाव एव कर्तव्यो न शुद्धः AbhinBhā. i. 251. 9 (*on* 5.174)

अनन्तरोक्तागम (anantaroktāgama) *m.* verbal testimony referred to earlier सत्यं नैयायिकैरिदमुक्तम्। न तु युक्तम्। अनन्तरोक्तागमावहिर्भावात् Kāśi. iii. 137. 21 (*on* 5(6). 2)

अनन्तरोक्ति (anantarokti) *f.* I subsequent statement ज्ञातत्वेऽनन्तरोक्तौ त्वं पक्षौ संस्मर्तुमर्हसि UpadeSā. 407. 136; II preceding statement निरंशे निर्विशेषे इत्यनन्तरोक्तेः ŚrutaPra. iB. 18.21 (*on* i. 1.1); III expression of the sense 'afterwards' अथेत्यनन्तरोक्तिः स्यात् BṛĀraUBhVā. i. 3. 165.

अनन्तरोक्तिविरोध (anantarokti-virodha) *m.* contradiction with the statement occurring immediately after अन्यथा तत्सामानाधिकरण्येनेत्यनन्तरोक्तिविरोधात् ŚrutaPra. iA. 243. 20 (*on* i. 1.1)

अनन्तरोचितविचार (anantarocitavicāra) *m.* subsequent proper thought अत्र राज्ञो वल्लभाविरहवैधुर्यदशावेशविवशवृत्तेः ... प्रथमतरमेव स्वाभाविकसौकुमार्यसंभाव्यमानम् अनन्तरोचितविचारापसार्यमाणोपपत्ति ...अनवलोकनकारणमुत्प्रेक्ष्यमाणस्य ... रसः परां परिपोषपदवीमधिरोपितः VakroJī. 150. 15.

अनन्तरोच्चरित (anantaroccarita) *adj.* mentioned in close proximity अर्थः ... अन्विष्यते ... ततः पुरस्तात्परस्ताद्वा अनन्तरोच्चरिते पदान्तरे TantrVā. 436. 19 (*on* ii. 1. 48)

अनन्तरोज्झिति (anantarojjhiti) *f.* recent discharge अनतिबहुषु च व्यतीतेष्वहस्त्व(? स्स्व)नन्तरोज्झ[ज्झि]तौ स्नाता शरद्दिवसकरमूर्तिरिव भास्वरं तेजो बभार गर्भमुदरेण TilaMañ. 74. 19.

अनन्तरोत्पत्त्यर्थ (anantarotpatty-artha) *m.* the sense 'subsequent origination' कः पुनरुपमर्दार्थः आनन्तर्यसामर्थ्यात् अनन्तरोत्पत्त्यर्थः यस्माद्बीजोपमर्दादनन्तरमयं प्रादुर्भवति NyāyVār. 458. 12 (*on* iv. 1. 16)

अनन्तरोत्पादप्रसङ्ग (anantarotpāda-prasaṅga) *m.* undesired contingency of immediate birth (of a son) पुत्रादीनां तर्ह्यनन्तरोत्पादप्रसङ्गः BālaKrī. i. 174. 4 (*on* 1. 267)

अनन्तरोदाहरण (anantarodāharaṇa) *m.* subsequent example (अत्र हि द्वयोः प्रकृतिप्रत्यययोः प्रक्रमभेदः) आर्थः प्रक्रमभेदो यथा अनन्तरोदाहरणयोराद्यमाहितविपर्ययम् VyaktiVi. 63. 8.

अनन्तरोदाहरणद्वय (anantarodāharaṇadvaya) *n.* two subsequent examples अनन्तरोदाहरणद्वये च धर्मस्याप्यनुपादानम् PratāYaBhū. 364. 14.

अनन्तरोदाहृत (anantarodāhṛta) *adj.* stated immediately before सहोपनीत्या कुर्याच्चेदित्यनन्तरोदाहृतनारदवचनविरोधात् VīraMi. (Saṁskāra.) 313. 16.

अनन्तरोदाहृतवाक्य (anantarodāhṛta-vākya) *n.* sentence stated immediately before न पश्यो मृत्युमित्यत्रापि पश्यशब्दस्य ब्रह्मदर्शीत्यर्थः, तदेकं पश्यतीत्यनन्तरोदाहृतवाक्ये विषयस्य दर्शितत्वात् ŚrutaPra. iA. 40. 12 (*on* i. 1. 1)

अनन्तरोदित (anantarodita) *adj.* mentioned before अनन्तरोदितं न्यायं वेदाप्रामाण्यकारणम्। प्राज्ञा जल्पन्ति तेनामी भवेयुः सत्यवादिनः TattvSaṁ. 2445; 'सहस्रशीर्षम्' इति द्वितीयानिर्देशस्यानन्तरोदितोपासिना संबन्धस्यैव युक्तत्वाच्च VedāntDī. 191. 11 (*on* iii. 3. 43)

अनन्तरोदीरित (anantarodīrita) *adj.* described just before अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम VṛttaRa. 3. 31.

अनन्तरोद्गत (anantarodgata) *adj.* arising or appearing subsequently भवदपि वा सादृश्यकृतं स्मरणं न तदविवेकाय कल्पते देवदत्तदर्शनानन्तरोद्गततत्सदृशपुरुषान्तरस्मरणवत् NyāyMañ. i. 167. 7.

अनन्तरोद्देश (anantaroddeśa) *m.* immediately previous mention कुतोऽयं नियमस्तर्कविषय इति तर्कस्यानन्तरोद्देशात् तर्कविषय इति नियमः NyāyVār. 146.5 (*on* i. 1. 41)

अनन्तरोद्भूतप्रत्यय (anantarodbhūta-pratyaya) *m.* notion arising immediately afterwards चक्षुराद्यतिरिक्तं तु मनोऽस्माभिरपीष्यते। षण्णामनन्तरोद्भूतप्रत्ययो यो हि तन्मनः। ... तेन हेतुरिह प्रोक्तो भवति TattvSaṁ. 631.

अनन्तरोपदिष्ट (anantaropadiṣṭa) *adj.* [*f.* –ā] I mentioned immediately before अनन्तरोपदिष्टेन वाजेनान्नेन वाजिनः। ... प्रतीयन्ते TantrVā. 530. 13 (*on* ii. 2. 23); निवृत्तेरनन्तरोपदिष्टाया अर्थवादो द्वितीयं न समाचरितव्यमिति। व्रतं न ह्यातव्यन् ManuBh. ii. 443. 26 (*on* 11. 231); स संक्षिप्तोऽथ संकीर्णः संपूर्णः सम्यगृद्धिमाम्। अनन्तरोपदिष्टेषु संभोगेषूपपद्यते SaraKaṇṭhā. 563. 4; II mentioned or pointed out immediately afterwards पूर्वस्यैवानन्तरोपदिष्टं 'मांसं वा गोमूत्रयावकं पिबेयुरेवं शुद्ध्येयु'रिति BālaKrī. ii. 124. 2 (*on* 3. 252(? 258))

अनन्तरोपपन्नक (anantaropapanna-ka) *adj.* which has arisen after (something) अनन्तरदण्डके 'अणंतर'त्ति एकस्मादनन्तरमुत्पन्ना ये तेऽनन्तरोपपन्नकाः, तदन्यथा तु परंपरोपपन्नकाः (दण्डकाः) SthānṬ. 60A. 4.

अनन्तरोपलब्ध (anantaropalabdha) *adj.* cognized (i. e. heard) immediately before अथवान्त्यस्यैवानन्तरोपलब्धवर्णद्वयानुगृहीतस्य संस्कारमन्तरेणैव निमित्तत्वम् TātpaṬ.(U.) 464. 21 (*on* 5(11). 97); न तावत् पूर्वयोरन्त्यं प्रति विज्ञानयोरनुग्राहकत्वम्, अन्त्यवर्णज्ञानवेलायां तिरोहितत्वात् ...। नाप्यनन्तरोपलब्धयोः, संस्काराभावेन उपलम्भानुपलम्भयोरविशेषात् TātpaṬ.(U.) 465. 22 (*on* 5(11). 101)

अनन्तरोपविष्ट (anantaropaviṣṭa) *adj.* seated immediately next एवमनन्तरोपविष्टब्राह्मणहस्ते तदनन्तरोपविष्टब्राह्मणहस्ते च जलनिनयनादि पुनर्जलनिनया(? य)नान्तं कुर्यात् SmṛtiCan. v. 303.10.

अनन्तरोपाधि (anantaropādhi) *m.* immediately preceding delimiting factor यत्तु ब्रूषे, प्रियादीनां शिरस्त्वादिकल्पनानुपपन्ना मुख्यस्यात्मन इति—अतीतानन्तरोपाधिजनिता सा, न स्वाभाविकीत्यदोषः BrahmSūBh.(Śaṅ.) 53. 12 (*on* i. 1. 12)

अनन्तरोर्मि (anantarormi) *m., f.* waves without any interruption or gap संक्षोभयामास सोऽर्णवं सलिलाश्रयः। अनन्तरोर्मिभिः सूक्ष्ममथ च्छिद्रम-

भूत् पुरा MatsyaP. 168. 4.

अनन्तर्गत (an-antargata) *adj.* not included within, not contained in गुणोऽनन्तर्गतश्चात्र पश्चादभिहितो भवेत् TantrVā. 406. 3 (*on* ii. 1. 18); यद्यपि च प्राधान्यांशः कर्तृत्ववचनेनानभिहितस्तत्र चानन्तर्गतः TantrVā. 931.13 (*on* iii. 4. 12); प्रतिबिम्बपक्षेऽप्युपाधावनन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो वाच्यः, न तु जलचन्द्रन्यायेन कृत्स्नप्रतिबिम्बः SiddhāLeSam. 96. 1; MayūMāli. 757. 23 (*on* x. 7. 3)

अनन्तर्गतत्व (anantargata-tva) *n.* the state of not being included within, non-inclusion योगिनामिति पञ्चम्यर्थे षष्ठी। ··· चतुर्विधा योगिनः प्रतिपादितास्तेष्वनन्तर्गतत्वाद्वक्ष्यमाणस्य योगिनो न निर्धारणे षष्ठी संभवति GītāBh.(Rā.) 360. 7 (*on* 6. 47)

अनन्तर्गर्भ (an-antargarbha) *adj.* [*f.* -ā] not having a shoot (*lit.* embryo) within (समिधौ) मध्यमाद्धातोरनन्तर्गर्भे स्यातामित्यौपमन्यवः BaudhŚS. iii. 26 3; बर्हिषः समावनन्तर्गर्भौ विधृती कृत्वा मध्ये वेदेरुदीचीनाग्रे निदधाति BhārŚS. ii. 9. 9; समावनन्तर्गर्भौ दर्भौ विधृती कुरुते ĀpaŚS. ii. 9. 12; HirŚS. i. 8. 10 (172. 15); VaikhāŚS. 5. 7; कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ कुशेश्छिनत्ति पवित्रे स्थ इति KātyŚS. ii. 3. 31; पुरस्तादप्रच्छिन्नप्रान्तौ दर्भावनन्तर्गर्भावुदगग्रौ बर्हिषि वितनोति VārāŚS. I. iii. 3. 16; कुशतरुणे ··· अनन्तर्गर्भे प्रादेशेन मापयित्वा कुशेन छिनत्ति ŚāṅkhāGS. i. 8. 14; KauṣīGS. i. 4. 1; ĀśvaGS. i. 3. 3; प्रस्तरात्पवित्रे गृह्णाति प्रादेशमात्रे समे अप्रशीर्णाग्रे अनन्तर्गर्भे JaimiGS. 1. 2 (2. 7); अप्रच्छिन्नाग्रावनन्तर्गर्भौ प्रादेशमात्रौ कुशौ पवित्रे PārāSū. 51. 30; VīraMi.(Āhnika.) 331. 16; 216. 14.

अनन्तर्गर्भक (anantargarbha-ka) *adj.* not having a shoot (*lit.* embryo) within अनन्तर्गर्भकं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् CaturCin. ii(1). 41. 2.

अनन्तर्गर्भिन् (an-antargarbhin) *adj.* not having a shoot (*lit.* embryo) within अनन्तर्गर्भिणमित्यादिलक्षणं पवित्रमित्युक्तम् VīraMi.(Paribhāṣā.) 94. 19; (Āhnika.) 267. 12.

अनन्तर्दधत् (an-antardadhat) *adj.* not hiding युधोऽपराजिष्णुः ··· । कुतोऽप्यनन्तर्दधदस्य सोऽस्ति लक्षः सखा जात इवैकमातुः DvyāśraKā. 2. 105 (comm. अनिलीयमानः)

अनन्तर्दोषता (anantardoṣa-tā) *f.* the state of not having internal defects (कल्केन) तेनास्रावसंनिरोधो मृदुता पूतिमांसापकर्षणमनन्तर्दोषता व्रणशुद्धिश्च भवति SuśruS. i. 18. 6 (comm. अनन्तर्दोषतेति दोषोऽत्र पूयः, तेनाभ्यन्तरपूयवर्जितत्वम्)

अनन्तर्द्धि (anantarddhi) *m.* one of the one thousand and eight epithets of Jina (*lit.* of endless prosperity) त्वां गिरां पतिम्। नाम्नामष्टसहस्रेण तोष्टुमः ··· अनन्तर्द्धिरमेयर्द्धिः MahāP. 25. 150.

अनन्तर्धान (an-antardhāna) *n.* non-disappearance, non-vanishing (i. e. presence) देवदेवनिवासस्य पुरस्य ज्योतीरूपस्य वान्तर्धानात्काशीलक्षणायास्तु पुर्या मुक्त्यादिफलदाया अनन्तर्धानान्न काचिदनुपपत्तिः TristhaSe. 97. 14.

अनन्तर्धाय (an-antardhāya) *ger.* I not having covered अन्तर्धाय देवानां पत्नीः संयाजयेदिति बौधायनोऽनन्तर्धायैवेति शालीकिः BaudhŚS. iii. 32.14; हिरण्यमन्तर्धायादित्यमुदीक्षयेदिति बौधायनोऽनन्तर्धायैवेति शालीकिः BaudhŚS. iii. 89. 8; iii. 95. 2; II not having placed (something) in between नानन्तर्धायासीत JaimiGS. 1. 19 (18. 7); न भूमावनन्तर्धाय (मूत्रपुरीषकर्मणी ··· कुर्यात्) GautDS. i. 9. 38 (comm. मूत्रपुरीषकर्मणी भूमौ तृणादिभिरन्तर्धायैव कुर्यात्); दर्व्यादिनन्तर्धाय साक्षाद्धस्तेनैव यद्दत्तं तद्धस्तदत्तम् CaturCin. iii(i). 615. 17.

अनन्तर्धि (an-antardhi) *m.* [w. r. for अन्तर्धि, KANGLE's Ed.] ArthŚā. ii. 245. 6 (7. 2)

अनन्तर्धी (an-antardhī) *adj.* whose mind is not inward, not introspective कपालमपि ते करे त्वमशिवोऽस्यनन्तर्धियाम् ŚivStu.(N.) 10.

अनन्तर्भवत् (an-antarbhavat) *adj.* not being included in, not being an inherent part ते (यमकादयः) रसचर्वणायामनन्तर्भवन्तः सहृदयहृदयम् ··· रसपराङ्मुखं विदधीरन् RasGaṅ. 89. 11.

अनन्तर्भाव (an-antarbhāva) *m.* non-inclusion (of something in something else), the not coming or falling within (the scope of something), the not being inherent प्रत्यक्षमपि न सामान्यगोचरमित्यावेदितम्। न चाभ्यामन्यत्प्रमाणमस्ति। प्रमाणस्य सतोऽत्रैवान्तर्भावात्। अनन्तर्भावे वा प्रमाणत्वानुपपत्तेः TātpaṬ.(Vā.) 18. 21 (*on* i. 1.1); यदि कथंचिद्बुद्धिमारोक्ष्यते तदास्माभिरप्युक्तेष्वेवान्तर्भावयिष्यते। अनन्तर्भावे वा द्रव्यत्वं तस्य निराकरिष्यते Kiraṇā. 15. 14; 'नद्यन्तं क्षेत्र'मित्यत्र त्वन्तशब्दः सामीप्यवाचीत्यन्यपदार्थे नद्या अनन्तर्भावः Pradī. vi. 157.11 (*on* vii. 2. 91); vi. 32. 20 (*on* vii. 1. 28); अभिमुखीभावेऽस्यापि प्रातिपदिकार्थ एवान्तर्भावाद्, यत्र त्वनन्तर्भावः, तत्र तदभिद्योतनाय संबोधने चेति प्रथमा विधीयते स्वरोऽपि PadMañ. *on* KāśiVṛ. *on* P. i. 4. 105; इतरे सर्वज्ञत्वनित्यतृप्तत्वादयो ब्रह्मरूपान्तर्गततया अर्थसामान्याद् सर्वत्रोपसंहार्याः। प्रियशिरस्त्वादीनामनन्तर्भावान्नोपसंहारः BrahmSūBh.(Śrī.) ii. 306. 10 (*on* iii. 3. 13); ii. 413. 4 (*on* iii. 4. 48); उपलक्षितत्वस्य साध्यान्तर्भावे स एव दोषः। अनन्तर्भावे च प्रकाशस्वरूपताया एव साध्यत्वाद् तस्याश्चान्यत्रापि सिद्धत्वाद् न केवलव्यतिरेक्यनुमानावकाशः TattvPradī.(Ci.) 7. 11; 27. 5; समस्तत्वस्य च समुदायापरपर्यायस्य समुदायिषु अन्तर्भावानन्तर्भावाभ्यां दुर्भणत्वात् TarkSaṁ.(Ā.) 82. 22; 16. 24; पुत्रिकाविधिविवाहो नवमोऽन्य एव। एष्वनन्तर्भावात् ManvaVi. 301.19 (*on* 3. 34); अन्यत्र तु छलादौ जात्यन्तरे वा तेषामनन्तर्भावाच्च NyāyPari. 236. 8; एवंविधेष्वेवाद्रव्येषु गुरुत्वद्रवत्व°··· °वैशिष्ट्यादीनां यथासंभवमन्तर्भावः। एष्वपि केषांचिदनन्तर्भावः स्वयूथ्यसंमतस्तत्र तत्र वक्ष्यते NyāySiA. 247. 1; स्वपाठपक्षे याज्या होतुरपनीयते, न तु वषट्कारभक्षावपनीयेते। तयोर्याज्यायामनन्तर्भावात् NyāyMāVi. 176. 26 (*on* iii. 5. 18); नापि शब्दस्तदुपायः (व्याप्तिज्ञानोपायः)। काणादमतानुसारेणानुमान एवान्तर्भावात्। अनन्तर्भावे वा वृद्धव्यवहाररूपलिङ्गावगतिसापेक्षतया प्रागुक्तदूषणलङ्घनाक्षमत्वात् SarvaDaSaṁ. 1. 83; समन्वयलक्षणे प्रथमाध्यायेऽनन्तर्भावस्य (संगतेः) भवद्भिरेवोक्तत्वात् NyāySu.(Ja.) 175B. 2 (*on* i. 3.4); अण्प्रत्याहारे ऋकारस्यानन्तर्भावात् सावर्ण्येन ऋकारेण ॠकारस्याग्रहणाद्ऋकारस्याच्त्वं नास्ति PariVṛ.(Sī.) 3. 15; अभावादावस्तित्वादिर्नाभावादितो भिन्नः। गुणादिष्वनन्तर्भावेन षट्पदार्थनियमभङ्गात् Nyāyāmṛ. 564A. 12; ननु नास्तिकानामपि प्रस्थानान्तराणि सन्ति, तान्येतेष्वनन्तर्भावात् पृथग्गणयितुमुचितानि PrasthāBhe. 2.6; ŚivārkaMaDī. ii. 413. 14 (*on* iii. 4. 48); तेषामपूर्वविध्यन्तर्भावावश्यंभावादन्यथा तेषां नियमपरिसंख्ययोरप्यनन्तर्भावेन विधित्रैविध्यभङ्गापत्तेः VidhiRa. 2(10. 23); न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति, अन्वयव्याप्त्यज्ञानेनान्वयिनि अनन्तर्भावात् VedāntPari. 239. 11; वीप्सायामेकत्वलक्षणसंख्याया अनन्तर्भावात् LaŚabdeŚe. i. 175. 11.

अनन्तर्भावगम्यभूमि (anantarbhāvagamya-bhūmi) *f.* a piece of land (i. e. passage) which can be trodden upon because of its non-inclusion (in any *maṇḍala*) यत्तु चतुर्विंशतिराख्याता भूमेस्तु परिकल्पना। ··· तद् षोडशाङ्गुलस्य प्रथमावस्थानं मण्डलस्यागन्तव्यत्वेन। तदप्यनन्तर्भावगम्यभूमेरङ्गुलानां परिगणनविषयमिति न कश्चिद्विरोधः VīraMi.(Vyavahāra.) 195. 6.

अनन्तर्भावतस् (anantarbhāva-tas) *adv.* due to non-inclusion उद्भिदादिपदं धर्मे किममानमुत प्रमा। विध्यर्थवादमन्त्रांशेष्वनन्तर्भावतो न मा NyāyMāVi. 40. 6 (*on* i. 4. 1)

अनन्तर्भावप्रसङ्ग (anantarbhāva-prasaṅga) *m.* undesired contingency of non-inclusion नापि द्वितीयः अनभ्युपगमात्। (भेदाख्यस्य धर्मत्वे) सप्तपदार्थाना(?सप्तपदार्थ्या)मनन्तर्भावप्रसङ्गात् KhaṇḍanKhā. 1160. 10.

अनन्तर्भावित (an-antarbhāvita) *adj.* not being included within न हि शक्यतेऽनन्तर्भावितेऽपि चैत्रे गृहाभावो ग्रहीतुम् NyāyRa. 456.15 (*on* 5(7). 23); शक्यते च ··· प्रागनन्तर्भावितमपूर्वं पश्चादन्तर्भावयितुम् NyāyRa. 683. 13 (*on* 5(16). 8)

अनन्तर्भावितविशेषणा (anantarbhāvita-viśeṣaṇā) *adj.* (*f.*) in which the attribute is not included न ह्यनन्तर्भावितविशेषणा विशिष्टप्रतीतिर्नाम ĀtmaTaVi. 279. 18.

अनन्तर्भावितापूर्व (anantarbhāvitāpūrva) *adj.* in which the unseen force (*apūrva*) is not included अनन्तर्भावितापूर्वमेव कर्म फलसाधनत्वेन बोधितम् NyāyRa. 495. 10 (*on* 5. (9)7)

अनन्तर्भाविताश्रय (anantarbhāvitāśraya) *adj.* in which the substratum (i. e. the individual) is not included सामान्यस्यानन्तर्भाविताश्रयस्य प्रत्येतुमशक्यत्वात् KhaṇḍanKhā. 789. 11

अनन्तर्भाव्य (an-antarbhāvya) *ger.* not having included, not having considered as an inherent part सिद्धिस्तु नानन्तर्भाव्य बहिर्भावमस्य भवति TātpaṬ.(U.) 392. 20 (*on* 5(7). 19) = Kāśi. iii. 167. 20 (*on* 5(7). 19); न ह्यनन्तर्भाव्य प्रतिसंबन्धिनं गुर्वर्थोऽवगम्यते Kāśi. iii. 3. 19 (*on* 5(4). 2); कृतिज्ञप्त्योरसामर्थ्ये समर्थमर्थान्तरमध्यवसेयमनन्तर्भाव्य कुतो हेतुत्वमिति चेन्न ĀtmaTaVi. 183. 2; बहिर्भावमनन्तर्भाव्य ··· प्रतिपक्षमानस्येदृशी प्रतिपत्तिरापद्यते ŚāstrDī. 78. 6 (*on* i. 1. 5); NyāyRa. 455. 23 (*on* 5(7). 22); न च भावनावेशो जात्यादिषु स्वरूपतो द्रव्यादिकमनन्तर्भाव्य संभवति Kiraṇā. 29. 8; अथ सदपि सत्तामनन्तर्भाव्य कारणम् KhaṇḍanKhā. 61. 14; न ह्यज्ञानाश्रयत्वमनन्तर्भाव्य कश्चिद्ग्रन्थो नाम ŚatDū. 107. 29; 142. 1; न ह्यनिष्टं किंचिदनन्तर्भाव्य कश्चिदपि दोषत्ववर्णनम् ŚatDū. 178. 7; न हि विषयाबाधमनन्तर्भाव्य प्रामाण्यग्रहणं नाम Nyāyāmṛ. 142B. 5 = AdvaiSi. 351. 7; प्रतियोगिनमनन्तर्भाव्यैव घटस्याभावः Nyāyāmṛ. 183B. 9; 182B. 7; YuktiSneha. 78. 21 (*on* i. 1. 5);

अनन्तशक्तिरत्न (anantaśakti-ratna) *n.* jewel in the form of innumerable powers अनन्तशक्तिरत्नानां यदेकाश्रयसंश्रयात्। विचित्ररचिन्त्रिकोल्लाससंसिद्धिस्तं स्तुमः शिवम् PratyabhiVi. i. 345. 3 (*on* i. 7. 1)

अनन्तशक्तिरूप (anantaśakti-rūpa) *adj.* of the form of un-

limited power देवा ऊचुः ... विष्णो ... नमस्ते ... । अनन्तशक्तिरूपाय ŚivaP. ii(5). 16.12 (238B. 6)

अनन्तशक्तिरूपत्व (anantaśaktirūpa-tva) *n.* the state of being of the form of unlimited power परमद्यात्वम् ... (पराशक्त्याम्) तस्यामेवायत्तमित्यन्तरङ्गत्वेनाभेदोपचारात्सापि तथा व्यपदिश्यत इति प्रदर्शयितुं तस्या एव ज्ञानक्रियाशक्त्याद्यनन्तशक्तिरूपत्वे प्रदेशान्तरस्थं वायुसंहितावचनमुदाहरति ŚivārkaMaDI. i. 301. 24 (*on* i. 2. 1)

अनन्तशक्तिसंयुक्त (anantaśakti-saṁyukta) *adj.* possessed of unlimited power प्रत्यगानन्दरूपात्मा ... । अनन्तशक्तिसंयुक्तो जगद्रूपेण भासते TriBrU. 9; नानाविचित्रविचित्राङ्गं गरुडाञ्जननं तव । अनन्तशक्तिसंयुक्तम् KālīViT. 18. 20.

अनन्तशक्तिसंवृतत्व (anantaśaktisaṁvṛta-tva) *n.* the state of being encompassed with unlimited power आत्माभिन्नदेवताया वैभवं विभुत्वमनन्तशक्तिसंवृतत्वरूपं प्राभवं यस्या सा (ललिता) LalitāSaBh. 42.28 (*on* 75)

अनन्तशक्तिसंपन्न (anantaśakti-sampanna) *adj.* [*f.* -ā] endowed with unlimited power अनन्तशक्तिसंपन्नो मायोपाधिक ईश्वरः SarvaVeSāSam. 330; अनन्तशक्तिसंपन्ना सा परा परमेश्वरी BṛBrahmaS. i. 8. 23.

अनन्तशतपत्त्रपद्मोद्भासित (anantaśatapattrapadmodbhāsita) *adj.* **1** shining with innumerable lotuses having hundred petals प्रविश्य च तस्य तरुखण्डस्य मध्यभागे ... उरगकुलमिवानन्तशतपत्त्रपद्मोद्भासितम् ... अच्छोदं नाम सरो दृष्टवान् Kād. 124. 2; **II** illustrious with (the serpents called) Ananta, Śatapattra and Padma, Kād. 124. 2.

अनन्तशब्द (ananta-śabda) *m.* **I** innumerable (expressive) words यादृच्छिकशब्दव्यवहारेणानन्तशब्दव्युत्पत्त्यनुपपत्तिश्च ŚrutaPra. iB. 88. 25 (*on* i. 1.1); **II** innumerable sounds (produced in succession) सर्वतो दिक्ष्वनन्तशब्दसंतानोत्पा(? त्पा)दकमेण कर्णोत्पादे कल्पनागौरवं मानाभावात् TattvCin. i. 619.2; वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्तिकल्पनागौरवं, भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य भ्रमत्वकल्पनागौरवं च स्यात् VedāntPari. 142. 1.

अनन्तशब्दजशब्द (ananta-śabdajaśabda) *m.* innumerable simultaneous sounds bursting forth (*lit.* coming) from the original sounds कदम्बमुकुलादिन्यायेनानन्तशब्दजशब्दानां तत्प्रागभावध्वंसानां च तत्प्रत्यक्षानुपपत्त्या कल्पने गौरवं स्यात् VaiyāSiMañ. 198.2.

अनन्तशयन (ananta-śayana) *m.* **1A** epithet of Viṣṇu (*lit.* lying on the serpent-king Ananta) अनन्तशयनं देवं ध्यायेद्वृत्तायते गृहे PauṣkS. 42.55; पूर्वेणानन्तशयनं प्रद्युम्नं पूर्वदक्षिणे ... । स्थापयेत् MatsyaP. 276.8; अनन्ताय नमस्तुभ्यमनन्तशयनाय च SkandP. iv. 21.13; अनन्तशयनं शेषशायिनं गुणपीठे स्थापयेत् CaturCin. i. 236. 16; **1B** name of one of the incarnations of Viṣṇu अनन्तशयनो नाम योऽवतारो हरेरहम् । स्थिता चतुर्दिशं तस्य चातुरात्म्यमुपेयुषी LakṣmīT. 8.35; **2** name of a place (= modern Trivandrum) स कदाचिदगाद्राजा ह्यनन्तशयनं द्विज । ... तत्र श्रीरमणं देवं संपूज्य विधिवत् SkandP. ii(4). 26.8; (श्रीशंकराचार्यः) तस्मादनन्तशयनं नाम भगवदर्चामूर्तिसंनिहितप्रदेशं संप्राप्तः ŚaṅkaVi.(Ā.) 51.1; 81.1; अथ नन्तुमच्युतमगादवनेरधिभूरनन्तशयनाभिमुखम् AcyutarĀ. 6. 32 (comm. अनन्तशयननामकनगरम्); *n.* couch or bed in the form of (the serpent-king) Ananta (सङ्कर्षः) अनन्तशयने दार्भे उत्तानस्थं स्मरेद्विभुम् PauṣkS. 43. 133; अनन्तशयने ... शयानं योगशायिनम् । ... देवी (वसुंधरा) प्रसादयति माधवम् VarāP. 113.21.

अनन्तशयना (ananta-śayanā) *f.* epithet of Pārvatī (*lit.* lying on Ananta) अनन्तशयनानन्ता ... सदाशिवा ... । एवं नाम्नां सहस्रेण स्तुत्वासौ हिमवान् गिरिः । ... प्रोवाच KūrmaP. 121. 12 (1.12)

अनन्तशरीर (ananta-śarīra) *n.* innumerable bodies स्वस्वातन्त्र्योपकल्पितभेदावभासस्य अनन्तशरीराद्येकतयैव विमृशेत् 'आवां युवां वयं यूयम्' इति ParāTri. 77.2; मुक्तात्मनोऽपि स्वेच्छयानन्तशरीरपरिग्रहणसामर्थ्येन विभुत्वम् BrahmSūBh.(Śrī.) ii. 493. 7 (*on* iv. 4. 15); यद्युच्येत निरन्तरमनन्तरमनन्तशरीरादिजननेनापचितशक्तिकं प्रधानम् ... कदाचित्प्रसोतुमक्षममास्ते ŚivārkaMaDI. ii. 58. 24 (*on* ii. 2.3)

अनन्तशर्मन् (ananta-śarman) *m.* name of a Brahmin धरणीधरपुत्राय ... अनन्तशर्म्मणे ब्रा(ब्रा)ह्मणाय वंटकमेकम् ... दातव्यम् EI. ix. 111. 55; *n.* infinite happiness कष्टसाध्योऽपि कर्तव्यः सद्धर्मोऽनन्तशर्मणे PārśvC. 3.86; *adj.* bestowing infinite happiness विश्वातिशायिमहिमा धरणोरगेन्द्रपद्मावतीलक्ष्मीम् PārśvC. 8. 393. सततसेवितपादपीठः । अन्तर्बहिश्च दुरितच्छिदनन्तशर्मा देवः क्रियादुदयिनीं शुभभाव-

अनन्तशशिसंकाश (anantaśaśi-saṅkāśa) *adj.* resembling innumerable moons (in brightness) अनन्तशशिसंकाशमनन्तमथ संस्मरेत् । सहस्रफणमालाढ्यम् PauṣkS. 24. 24 = PāraS. 5. 57.

अनन्तशस् (ananta-śas) *adv.* endlessly, for innumerable times or in endless number शोकाश्चानन्तशः प्राप्ता भवे जीवेन मैथिलि PadmP.(Ra.) 98. 85; मातरः पितरोऽन्ये च संसारेऽनन्तशो गताः PadmP.(Ra.) 110.72; 112. 79; बध्नात्यष्टविधं कर्म एकप्राणिविहिंसनात् । नानायोनिषु तेनात्मा दुःखान्याप्नोत्यनन्तशः VarāṅgaC. 4. 105; अतीतेऽनन्तशः काले जीवेन भ्रमता भवे । कानि दुःखानि नाप्तानि विना जैनेन्द्रशासनम् SubhāRaSaṁ. 827; सर्वे भावाः सर्वजीवैः प्राप्तपूर्वा अनन्तशः TriṣaŚaPuC. iv. 3. 205.

अनन्तशाख (ananta-śākha) *adj.* having innumerable branches or schools (of religious practices or of the Vedas etc.) अनन्तशाखाः कथिताः शिवमूलैकमाश्रिताः । ... शिवधर्माः सनातनाः PadmP. ii. 69.3; ते च ... अक्षरराशयो वेदा ऋग्यजुःसामाथर्वभेदभिन्ना अनन्तशाखा वर्तन्ते VedāSaṁ. 168. 9; NyāyPari. 392. 17.

अनन्तशाखत्व (anantaśākha-tva) *n.* the state of having innumerable branches प्रत्यक्षमूलतायां तु गुर्वी भवति कल्पना । वेदस्त्वनन्तशाखत्वान्मूलं तत्र स्वसंगतम् NyāyMañ. i. 246. 32.

अनन्तशाखा (ananta-śākhā) *f.* innumerable branches or schools (of the Vedas) अनन्तशाखानुगतस्य वाक्यार्थस्यैकदेशङ्गेर्द्रुखबोधत्वादिति भावः ŚrutaPra. ii. 206. 28 (*on* ii. 1.1); सर्वाण्यु(? ण्या)ख्यानानि पारिप्लवे शंसन्तीत्यत्रानन्तशाखागतसर्वाख्यानशंसनस्याशक्यतया UpaParā. 44. 13; ŚivārkaMaDI. ii. 395. 14 (*on* iii. 4. 23); अशक्तिर्हि ... अनन्तशाखाविहितानन्तगुणानुसंधानाङ्गानुष्ठानाशक्तिः ŚivārkaMaDI. ii. 291. 12 (*on* iii. 3.5); ii. 291. 17 (*on* iii. 3.5)

अनन्तशायिन् (anantaśāy-in) *adj.* lying on (the serpent-king) Ananta भगवानप्यनन्तशायी ... विष्णुरेनम्(न्व)ग्रहीत् स्वप्ने AvantiKa. 153. 13; अनन्तशायिनं देवं नारायणमनामयम् । पञ्चामृतेन प्रथमं स्नापयेत् BṛNāraP. 16. 88; *m.* epithet of Viṣṇu भवप्रदः । अनन्तशायी ... इत्येतत् कथितं देवि सहस्रं नाम चोत्तमम् । आदिदेवस्य वै विष्णोः PañcaRā.(Nā.) iv. 8. 106; Vaija. 4. 13; AgaNi. 19.

अनन्तशास्त्र (ananta-śāstra) *n.* endless scriptures अनन्तशास्त्रं बहुलाश्च विद्याः ... । यत्सारभूतं तदुपासनीयम् CāṇaNīDa. 15. 10; अनन्ता वै वेदा इति श्रुतेरनन्तं हि शास्त्रमवगम्यते । न चानन्तशास्त्राधिगमोऽस्माकं कल्पकोटिशतैरपि संभवति NyāySu.(Ja.) 113B. 8 (*on* i. 1.5)

अनन्तशिरस् (ananta-śiras) *n.* hood of (the serpent-king) Ananta निहितचरणोऽनन्तशिरसि । -- जगन्नाथः स्वामी नयनपथगामी भवतु मे JagannāA. 6.

अनन्तशीर्ष (ananta-śīrṣa) *m.* epithet of Rudra (*lit.* having innumerable heads) नमस्तीक्ष्णाय ... अनन्तशीर्षाय ... उच्छुष्मरुद्राय नमः स्वाहा AVPari. 36(9). 15.

अनन्तशीर्षक (anantaśīrṣa-ka) *adj.* (serpent-king Ananta or Śeṣa) having innumerable hoods शासनं परिजग्राह नरान्तकसमीरितम् । करभारं वार्षिकं स (शेषः) स्वीचक्रेऽनन्तशीर्षकः GaṇeP. ii. 4. 14.

अनन्तशीर्षन् (ananta-śīrṣan) *adj.* having innumerable heads यो देवः सर्वभूतेषु गूढश्चरति विश्वकृत् । योऽनन्तशीर्षानन्तश्रीरनन्तचरणः ... । तमिमम् ... । गुणेशमनिशं ध्याये GaṇeP. ii. 79. 27.

अनन्तशीर्षनयन (ananta-śīrṣanayana) *adj.* having innumerable heads and eyes यन्मे साक्षात्परं रूपं दृष्टवानसि भूधर । अनन्तशीर्षनयनमनन्तचरणं महत् । ... तदेव पूजयेन्नित्यम् DevīBhāP. vii. 39. 7.

अनन्तशीर्षा (anantaśīrṣā) *f.* name of the wife of (the serpent-king) Vāsuki, ŚabdaKaDru.

अनन्तशील (ananta-śīla) *m.* epithet of Viṣṇu (*lit.* possessed of eternal character) सर्वकाम्योऽनन्तशीलः ... । इत्येतद्वासुदेवस्य विष्णोर्नामसहस्रकम् PañcaRā.(Nā.) iv. 3. 25.

अनन्तशुद्धि (ananta-śuddhi) *f.* eternal purity प्रत्यक्षं हि ज्ञानमुद्भिन्नानन्तशुद्धिसंनिधानमनादिसिद्धचैतन्यसामान्यसंबन्धम् TattvPradī.(A.) 72. 2 (*on* 1. 54)

अनन्तशुष्म (ánanta-śuṣma) *adj.* possessing boundless boldness or vehemence अस्तार्‌ इषुं दधिरे गर्भस्त्योरनन्तशुष्मा वृषखादयो नरः ṚV. i. 64. 10.

अनन्तश्री (ananta-śrī) *m.* **1** epithet of Viṣṇu (*lit.* possessing infinite glory) अनन्तरूपोऽनन्तश्रीः -- । सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तितम् MahāBhā. xiii. 135. 113; अनन्तकर्मानन्तश्रीस्तथैवानन्तरूपवान् । नामान्यस्य (विष्णोः) भविष्यन्ति गुणः कर्मकृतिर्यथा ĀdiP. 22. 31; **II** epithet of Gaṇeśa अनन्तश्रीः ...। इति वैनायकं नाम्नां सहस्रम् GaṇeP. i. 46. 176; योऽनन्तशीर्षानन्तश्रीः ... । तमिमम् -- । गुणेशमनिशं ध्याये GaṇeP. ii. 79. 27; *f.* in-

finite glory एवमनन्तश्रीद्युतिकान्तियुतो नूनमनार्तमूर्तिर्भगवान्। कैवल्यसुखसमृद्धि बलदेवोऽवाप्तवान् PadmP.(Ra.) 122.75; एतां (राजधानीम्) पुनरनन्तश्रीमण्डनीयां मण्डयति … सरः HammīMaMa. 5.25(1); जीवोऽनन्तश्रियं पुनः। अर्जित्वा विश्वसंमान्यः सुखी स्याद् रत्नचूडवत् RatnaCūKa. 538; *adj.* **A** having infinite wealth पालयञ्शरणागतान्। जनोऽस्यान्तरनन्तश्रीर्विदञ्श्चयोतति मध्विव DvyāśraKā. 1.69 (comm. असंख्यलक्ष्मीकः); **B** glorious like Viṣṇu, DvyāśraKā. 1.69 (comm. अनन्तस्येव श्रीर्यस्य … विष्णुतुल्य इत्यर्थः)

अनन्तश्रुति (ananta-śruti) *f.* innumerable Vedic statements तथाहि – जीवेश्वरयोर्भेदो निर्दिश्यते … 'येषामीशे पशुपतिः पशूनाम्' इत्यादिभिरनन्तश्रुतिभिः BrahmSūBh.(Śrī.) ii. 31.11 (*on* ii. 1.22); ii. 378.5 (*on* iii. 3.56); अनन्तश्रुतिकल्पने तावतां पाठासंभवादपठितानां च मूलत्वस्य स्मृत्यधिकरणे निरासात् MīmāKau. i. 42.6 (*on* i. 3.7); i. 109.1 (*on* i. 3.24); अत एव नाचोरेण तत्तद्विकृतिपर्युदासरूपेणानन्तश्रुतिकल्पना गौरवापत्तेः BhāṭṭDī. iii. 136.3 (*on* ix. 2.17)

अनन्तश्रुतिनेत्र (ananta-śrutinetra) *adj.* having innumerable ears and eyes अनन्तश्रुतिनेत्रः …यो देवः …। तमिमम् …। गुणेशमनिशं ध्याये GaṇeP. ii. 79.28.

अनन्तश्रेयस् (ananta-śreyas) *n.* eternal bliss सन्तः प्रसज्य यदनन्तगुणाननन्तश्रेयोनिधीनधिकभावजुषो भजन्ति PadmP. iv. 85.34; गुरुभिरपि निषिद्धा तामहं यावदक्ष्णोः पदमनयमनन्तश्रेयसां सद्म राधाम् UjjvaNīMa. 399.3.

अनन्तश्रोत्र (ananta-śrotra) *n.* **i** innumerable ears सहस्रलोचनः …। तावद्ददर्श तम् (कश्यपनन्दनम्) …अनन्तश्रोत्रसंयुतम् GaṇeP. ii. 11.18; **ii** innumerable auditory faculties न चानन्तवीणाद्यवच्छेदकत्वेनानन्तश्रोत्रस्वीकारे गौरवम् TattvCin. i. 618.2; अनन्तश्रोत्रवृत्तिकल्पनापेक्षयानन्तपरमाणुपरिणामकल्पनापेक्षया च तस्यैकस्य कल्पने लाघवम् VaiyāSiMañ. 209.3.

अनन्तषट्त्रिंशदादितत्त्व (ananta-ṣaṭtriṁśadāditattva) *n.* thirty-six primordial principles which are eternal पारमेश्वरी हि शक्तिः अनन्तषट्त्रिंशदादितत्त्वगर्भिणी ParāTri. 66.6.

अनन्तसंयोग (ananta-saṁyoga) *m.* innumerable conjunctions विसर्ग एव परमेश्वरो घनीभूय हकारात्मतां प्रतिपद्यानन्तसंयोगवैचित्र्येण क्षरूपतामभ्येति ParāTri. 200.5; पृथिव्यादावनन्तसंयोगादिकमिन्द्रियतत्क्रियासंयोगादिकं तस्य प्रत्यक्षहेतुत्वम् … न कल्प्यते GuruCandr. ii. 346.19.

अनन्तसंविद् (ananta-saṁvid) *f.* infinite cognitions संविद् … प्रकाशकत्वात् प्रदीपवत्। अथवा संवित् … पूर्वसंयोगे [संवेदन]निवृत्तेः भावे वा युगपदनन्तसंवित्प्रसङ्गः PrakaVi. 33.19; तद्विषयज्ञानस्यापि तथेत्यनन्तसंविदावलीसमुदयस्यावर्जनीयत्वात् ज्ञानान्तरानवकाशः स्यात् ŚrutaPra. iA. 103.30 (*on* i. 1.1); अनन्तसंविदध्यासात्प्रकाशाप्रकाशोपपत्तिरिति चेन्न, घटादिविषयसंविदामध्यस्तत्वे संविदन्तरानुपलम्भे च शून्यवादप्रसङ्गात् ŚatDū. 113.4.

अनन्तसंसार (ananta-saṁsāra) *m.* endless transmigratory existences अनन्तसंसाररोहणैकरत्नकन्दलीं दमयन्तीमद्राक्षम् NalaCam. 7.19(30); जन्तोरनन्तसंसारभूर्नेनोरथवर्त्मनी। आर्तरौद्रे त्यजेद्ध्याने दुरन्तफलदायिनी YaśasCam. ii. 393.21; स (गुणाधरः) कथंचिदनन्तसंसारे संभवति TātpaVṛ. 357.18 (*on* 3.66); अशुभः कर्मबन्धोऽस्यानन्तसंसारकारणम् SamarāSaṁ. 9.627; प्राच्यैरनन्तसंसारभ्रमिभृद् दर्शितं महत् PrabhāC. 164.16; मुक्तस्यापि सर्वज्ञस्य सृष्टौ सर्वहेयतादात्म्यानुसंधानेन अनन्तसंसारयोगात् NyāySiA. 215.10.

अनन्तसंसारकर (anantasaṁsāra-kara) *adj.* causing infinite transmigrations दुरन्तमिथ्यात्वविषं शरीरिणामनन्तसंसारकरं प्ररोहति SubhāRaSaṁ. 148; मुधैव कल्पितो मोहमहंभावः प्रयच्छति। अनन्तसंसारकरम् YogVā. iv. 33.33.

अनन्तसंसारित्व (anantasaṁsāri-tva) *n.* the state of having innumerable transmigratory existences or births श्रीसुधर्मस्वामिकृतसिद्धान्तविवरणे मन्दमतित्वादुत्सूत्रप्ररूपणादनन्तसंसारित्वम् PurāPraSaṁ. 95.15.

अनन्तसंसारिन् (anantasaṁsār-in) *adj.* having innumerable transmigratory existences or births यदि चेद्गुणाधिकेभ्यः सकाशाद्गर्वेण पूर्वं विनयवाञ्छां करोति पश्चाद्विवेकबलेनात्मनिन्दां करोति तदानन्तसंसारी न भवति TātpaVṛ. 357.23 (*on* 3.66)

अनन्तसंस्कार (ananta-saṁskāra) *m.* innumerable impressions न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उपपद्यत इति वाच्यम्, अनन्तसंस्कारकल्पने गौरवात् SiddhāMu. 24.15 (*on* 48); अनन्तसंस्कारतन्नाशकल्पनापेक्षया चरमस्मरणस्यैव लाघवात् SiddhāMu. 53.13 (*on* 85)

अनन्तसख (ananta-sakha) *adj.* **I** having Ananta (i.e. Balarāma) as (one's) companion आस्ते यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान् BhāgP. i. 14.35; **II** having (the serpent-king) Ananta as (one's) companion शेते पुमान्स्वदृगनन्तसखस्तदङ्के BhāgP. iv. 9.14.

अनन्तसंकट (ananta-saṅkaṭa) *n.* infinite difficulties or dangers उत्पत्तिः …। अनन्तसंकटानर्थकार्यसत्कारकारिणी YogVā. iii. 93.22.

अनन्तसंकल्पमय (anantasaṅkalpa-maya) *adj.* full of innumerable assumptions तस्य …। अनन्तसंकल्पमयं श्रोत्रियत्वं बभूव ह YogVā. iv. 48.30.

अनन्तसंख्य (ananta-saṅkhya) *adj.* **i** of infinite quantity ऋणादिवानृण्यमनन्तसंख्यात् … यथा …। तद्वत्परां शान्तिमुपागतोऽहम् Saund. 17.69; **ii** of infinite number, innumerable षड्जीवकायं त्वमनन्तसंख्यमाख्यः MahāVīSt.(H.) 1.29; SyādvāMañ. 29; अनन्तसंख्यानां विष्णूनां मध्ये यस्य कस्यचिदन्यतमस्यापि नामकवचनादिकमपीत्यर्थः LalitāSaBh. 233.14 (*on* 302)

अनन्तसंख्यक (anantasaṅkhya-ka) *adj.* of infinite quantity or measure सुव्रतो मे गतः कालो विपुलोऽनन्तसंख्यकः DevīBhāP. viii. 1.47.

अनन्तसंख्यातस् (anantasaṅkhyā-tas) *adv.* into infinite numbers प्राणस्यैव चैकस्य सर्वः अनन्तसंख्यातो विस्तरः BṛĀraUBh. 461.15 (*on* iii. 9.9)

अनन्तसंख्यान (ananta-saṅkhyāna) *n.* counting up to infinity पुद्गलपरमाणुद्रव्येऽपि स्निग्धत्वं रूक्षत्वं च बन्धकारणभूतम् … शक्तिविशेषेण वर्धते। किंपर्यन्तं, यावदनन्तसंख्यानम् TātpaVṛ. 226.11 (*on* 2.72)

अनन्तसंख्यापर (anantasaṅkhyā-para) *adj.* intending to convey infinite number सर्वाणि बहुवचनानि पुनरनन्तसंख्यापराणि LalitāSaBh. 15.5 (*on* 35)

अनन्तसंगुण (ananta-saṅguṇa) *adj.* infinitefold, infinite times more पुण्यम् …। चैत्येऽत्र सहस्रगुणं पालनेऽनन्तसंगुणम् ViviTīKa. 3.5.

अनन्तसत्तादात्म्य (ananta-sattādātmya) *n.* innumerable identities with the real entity न च — एकस्यैवानादेः सत्तादात्म्यस्याविद्यायामिव घटादावपि संभवात् घटाद्यवच्छेदेनानन्तसत्तादात्म्यानामुत्पत्तौ न मानमिति — वाच्यम् LaCandr. 45.15; व्यावहारिकभ्रमस्थले एकस्यैवाध्यास उत्पत्तिश्चेति कल्पनानुपस्थितविषयकत्वेन गुर्वी। आवश्यकानामनन्तसत्तादात्म्यानाम् … सत्यत्वापत्तेः LaCandr. 46.15.

अनन्तसत्त्व (ananta-sattva) *m., n.* infinite beings or creatures तस्य चित्तवरस्य सहोद्याद् बोधिसत्व(? त्त्व)स्य सुसंवृतं(? तं) चित्तं भवत्यनन्तसत्वा(? त्त्वा)धिष्ठानाद् दुष्कृतादतोऽस्य दुर्गतितो भयं न भवति MaYānaSū. 17.19 (4.22); 32.13 (8.19); *adj.* possessed of boundless (spiritual) strength अथ मुनिवृषभं तथानन्तसत्त्वम् … भुवोऽथोनिवासाः … समालोक्य तस्याभिजग्मुः समीपम् PadmP.(Ra.) 78.62(1); सोऽनन्तो भगवान् देवोऽनन्तसत्त्वो महाशयः। … आस्ते DevīBhāP. viii. 20.31.

अनन्तसदस् (ananta-sadas) *n.* abode of Ananta (i.e. of Viṣṇu) तस्मिन्नायतने साक्षात् … हरिः … इज्यते …। तदनन्तसदो नाम सर्वलोकेषु विश्रुतम् VāyuP. i. 38.59.

अनन्तसन्त (ananta-santa) *m.* saint (called) Ananta (referring to Prince Sambhājī, son of King Śivājī) अनन्तसन्तः प्रथितः …नरपालस्त्वम् ParamāKā. 73.75.

अनन्तसंततास्रुप्रवाह (ananta-santatāsrupravāha) *m.* constant flow of incessant tears देवो हर्षः … अनन्तसंततास्रुप्रवाहनिपतननिम्नीकृताविव दुःखक्षामौ कपोलावुद्वहन्तम् … ज्येष्ठं भ्रातरमपश्यत् HarṣaC. 243.7.

अनन्तसंतति (ananta-santati) *adj.* having many offsprings दैवज्ञवद् सहस्रं परमोच्चग्रहान्वितम्। यत्प्रभावेण मत्पुत्रो जायतेऽनन्तसंततिः MallīC. 3.43.

अनन्तसंतापा (ananta-santāpā) *adj.* (*f.*) causing endless afflictions सा माया … अनन्तसंतापा …। ययेदमखिलं लोकमावृत्यावस्थया स्थितम् KalkiP. ii. 5.12.

अनन्तसंनिधि (ananta-sannidhi) *m.* [Loc.] in the vicinity of (the serpent-king) Ananta नागी सा …। तं मृतं सुतमादाय जगामानन्तसंनिधौ SkandP. vi. 114.28.

अनन्तसमय (ananta-samaya) *m.* endless period of time भवायुष्कायकर्मादिस्थितिसंकलनात्मकः। सोऽनन्तसमयस्तस्य परिवर्तोऽप्यनन्तधा MahāP. 3.13.

अनन्तसमसंयोग (ananta-samasaṁyoga) *adj.* having complete association with the infinite अतो मनोजयश्चिन्त्यः शमसंतोषसाधनः। अनन्तसमसंयोगस्तस्मादानन्द आप्यते YogVā. ii. 13.45 (but comm. अनन्ते समः संयोग ऐकरस्यलक्षणः)

अनन्तसमाधान (ananta-samādhāna) *n.* endless meditation भगवान् ब्रह्मा …। बद्धपद्मासनोऽनन्तसमाधानगतोऽभवत् YogVā. vi(2). 71.1.

अनन्तसमापत्ति (ananta-samāpatti) *f.* (mental) state of balance with reference to (the serpent-king) Ananta प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् YogSū. 2.47 (TattvVai. अनन्ते वा नागनायके — समापन्नं चित्तमासनं निर्वर्तयतीति); 'फणासहस्रेण धरणीं धारयित्वा स्थैर्येणावतिष्ठते सोऽयमनन्तः स एवाहमस्मि' इति ध्याने चित्तस्यानन्तसमापत्तिः JīvanVi. 88.5.

अनन्तसमावेश (ananta-samāveśa) *m.* fusion with the infinite आद्या सैका परा शक्तिश्चिन्मयी शिवसंश्रया । ... अथानन्तसमावेशान्माया कालमवाप्नुवत् ŚivaP. vii(2). 4. 22 (548A. 14)

अनन्तसमुद्र (ananta-samudra) *m.* vast (*lit.* unbounded) ocean विद्यामयाननन्तसमुद्रानतिक्रम्य ... उपासकः परमानन्दं प्राप TripāMaNāU. 371. 7(6)

अनन्तसंपद् (ananta-sampad) *f.* unlimited wealth अनन्तसंपत्संपन्नभूरिगोत्रजविप्लवे । राजश्रीर्दुर्जरा तस्य नवत्वे भुभुजोऽभवत् RājTa.(Ka.) 5. 19.

अनन्तसंपूजिता (ananta-sampūjitā) *adj.* (*f.*) worshipped by (the serpent-king) Ananta क्वचिन्मुनिगणैः स्तुता क्वचिदनन्तसंपूजिता ... जयति भीष्ममाता सती KalkiP. iii. 20. 9.

अनन्तसंबोधि (ananta-sambodhi) *f.* eternal perfect enlightenment इहैव जन्मन्यथ तेन सत्त्वा अनन्तसंबोधिमवाप्नुवन्तु DharmoPra. 257. 28.

अनन्तसरस् (ananta-saras) *n.* lake (named) Ananta कथं मनोविस्मयकारि तद्धवेदनन्तरं तत्र यदग्रणीः सताम् । समाहितानन्तसरोऽवगाहनः स पुण्यकोट्या लभते स्म संनिधिम् YātrāPra. 3. 199.

अनन्तसरसीवर्य (anantasarasī-varya) *adj.* excellent pond (called) Ananta रमापतिः । ... अनन्तसरसीवर्येऽवमृश्यं महमास्थितः JayāS. 1. 78½ (+153)

अनन्तसर्गप्रलयपरंपरा (anantasargapralaya-paramparā) *f.* chain of endless or innumerable creations and dissolutions प्रधानं महदादिधरान्तीभूतं यावद् विततीभूतमनन्तसर्गप्रलयपरंपरात्मतां प्राप्तम् PratyabhiVi. ii. 195. 2 (*on* ii. 4. 18)

अनन्तसर्वज्ञसिद्धि (anantasarvajña-siddhi) *f.* establishment of innumerable omniscient beings सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृग्राहकाद् वा TattvCin. ii(2). 85. 13.

अनन्तसहचररूप (anantasahacara-rūpa) *adj.* having the form of innumerable associative factors or emotions ते विभावादयोऽनन्तकारणानन्तकार्यानन्तसहचररूपा अपि काव्यशिक्षादिबलोपकल्पिताः कृत्रिमाः सन्तः किं कृत्रिमत्वेन सामाजिकैर्गृह्यन्ते न वा Kāvyānu.(He.) 71. 16.

अनन्तसहित (ananta-sahita) *adj.* accompanied by *ananta* (i. e. by the letter *kṣa*) आषाढोऽनन्तसहितो वह्निर्दीर्घसमन्वितः । ... मनुरेष तु कङ्कणी AhirbuS. 34. 56.

अनन्तसामन्त (ananta-sāmanta) *m.* innumerable feudatory kings (राज्यवर्धनहर्षौ) अनन्तसामन्तसंक्रान्तिश्रान्तायाः श्रियो विशालं शशिमणिशिलापट्टशयनमिव बिभ्राणं वक्षुः ... माधवगुप्तं ददृशतुः HarṣaC. 198. 6; पुनः समामागतयोः प्रभाते भूपयोर्द्वयोः । बभूवानन्तसामन्तैः संघर्ष इव संपदाम् RāmāMañ. 44. 4; सोऽनन्तसामन्तयुतः पदं फुल्लपुरे व्यधात् RājTa.(Ka.) 8. 1964.

अनन्तसामान्यकल्पना (anantasāmānya-kalpanā) *f.* assumption of endless universals or generalities अपरपरिकल्पनायां तथैव प्रलयदर्शनादनन्तसामान्यकल्पनाप्राप्तिः Śarka. 7. 7.

अनन्तसामान्याभावकल्पन (anantasāmānyābhāva-kalpana) *n.* assumption of innumerable absences (of something) characterised by the general property न चोक्तप्रतियोगिताकत्वान्यव्यासज्यवृत्तिप्रत्यक्षत्वेन कार्यत्वे गौरवमिति – वाच्यम्, अनन्तसामान्याभावकल्पनापेक्षया प्रतियोगितानिरूपकत्वान्यत्वनिवेशस्यैव लघुत्वात् GuruCandr. ii. 391. 14; अनन्तसामान्याभावकल्पने महागौरवं स्यात् LaCandr. 555. 32.

अनन्तसार (ananta-sāra) *adj.* having unlimited strength सः ... तक्षकात्मजायामजीजनदनन्तसारमन्त्रिनारम् AvantiKa. 147. 14.

अनन्तसारा (ananta-sārā) *f.* one of the epithets of Gaṅgā (*lit.* having many currents) अभिरामानवद्याङ्गी अनन्तसाराकलङ्किनी । ... इति नामसहस्रं हि गङ्गायाः कलशोद्भव SkandP. iv. 29. 24.

अनन्तसिद्ध (ananta-siddha) *m.* innumerable Siddhas (or liberated souls) अयं शैलः ... । अनादिकाले यस्मिन्नन्तोऽनन्तसिद्धाः KumāPraPra. 105. 24.

अनन्तसिद्धान्तमतिप्रबोधक (anantasiddhāntamati-prabodhaka) *adj.* which awakens the knowledge of innumerable doctrines यजन्ति देव्यो हरपादपङ्कजम् ... । अनन्तसिद्धान्तमय(v. l. मति)प्रबोधकं नमामि KulārT. 8. 31.

अनन्तसिद्धान्तमयप्रबोधक (anantasiddhāntamaya-prabodhaka) *adj.* which awakens (knowledge) consisting of innumerable doctrines यजन्ति देव्यो हरपादपङ्कजम् ... अनन्तसिद्धान्तमयप्रबोधकं नमामि KulārT. 8. 31.

अनन्तसीर (ananta-sīra) *m.* name of a village-chief (*lit.* having many ploughs) जनपदमहत्तरः शताहलिः ... दुष्टग्रामण्यमनन्तसीरं जनपदकोपेन घातयेयमिति ... अभ्युपागमत् DaśKuC. 77. 21.

अनन्तसुख (ananta-sukha) *n.* infinite bliss or happiness समर्थग्रहणं किम्, अनन्तसुखं मोक्षस्य मार्गः स्वर्गस्य व्रतम् JaineVyā. 46. 21 (*on* i. 3. 1); मुरारीशब्दमात्रेण अनन्तसुखमाप्नुयात् KāliViT. 35. 10; इह लोके परत्रापि सोऽनन्तसुखमश्नुते SkandP. iii(1). 30. 99; अभयं सनातनमनातुरधीरलोकयन्निजमनन्तसुखम् । न मुनिः प्रपश्यति किमप्यसुखम् SaṁkṣeŚā. 2. 224 (ii. 132. 15); (लब्धतत्त्वाः) कायादतः किमपि तत्फलमैयन्तु यस्मादनन्तसुखसस्यविभूतिरेषा YaśasCam. i. 267. 6; निर्वाणस्य फलमनन्तसुखं कथयति TātpaVṛ. 15. 20 (*on* 1. 13); क्षुधादुःखितस्यानन्तसुखमपि नास्ति TātpaVṛ. 28. 14 (*on* 1. 20); 85. 16 (*on* 1. 65); 164. 10 (*on* 2. 24); अनन्तसुखसर्वस्वनिधानाख्यानबीजकम् । ... चरितं कीर्तयिष्यामि श्रीमत्पार्श्वजिनप्रभोः PārśvC. 1. 11; स सर्वहितप्राप्तीच्छुरनन्तसुखं प्राप्नोति ManvaMu. 202. 24 (*on* 5. 46); *m.* epithet of Jina (*lit.* having infinite bliss) अनन्तसुखाय नमः MahāP. 40. 25(3); *adj.* **i** which consists of infinite bliss क्लेशक्षयोद्भवमनन्तसुखं च मोक्षं संप्राप्नुवन्ति मनुजा गुरुसंश्रयेण VarāṅgaC. 1. 21; (ते) सीतापतेः पदमनन्तसुखं प्रयान्ति AdhyāRā. vi. 7. 70; **ii** leading to unending bliss यतस्ततः साधुजनैस्तपःश्रमो न मन्यतेऽनन्तसुखो महाफलः SubhāRaSam. 902.

अनन्तसुखकारण (anantasukha-kāraṇa) *n.* cause of infinite bliss त्रयो जिनाः । प्राप्स्यन्ति ज्ञातसाम्राज्यमनन्तसुखकारणम् PadmP.(Ra.) 5. 210.

अनन्तसुखद (anantasukha-da) *adj.* (*f.* -ā) bestowing infinite bliss हूँकारनादिनी विद्या ... अनन्तसुखदा मता KāliViT. 35. 10; पद्मूर्मीणां वेगं सुरवर सदा नाशय विभो ततोऽमुक्तिः श्लाघ्या तव भजनतोऽनन्तसुखदात् GaṇeP. ii. 123. 48.

अनन्तसुखप्रद (anantasukha-prada) *adj.* bestowing infinite bliss पायादनन्तस्वामी वः सिद्धानन्तचतुष्टयः । इहापि देहिनां मोक्ष इवानन्तसुखप्रदः TriṣaŚaPuC. iv. 4. 1.

अनन्तसुखभाज् (anantasukha-bhāj) *adj.* enjoying infinite happiness रात्रावपि हि योऽर्थिने । अर्घं प्रयच्छते स्नात्वा सोऽनन्तसुखभाग्भवेत् PadmP. v. 18. 243.

अनन्तसुखसंयुक्त (anantasukha-saṁyukta) *adj.* full of infinite bliss साधुः सनत्कुमारोऽपि कृत्वा कर्मविनाशनम् । अनन्तसुखसंयुक्तं प्रययौ सिद्धिपत्तनम् BṛKathāK. 129. 58.

अनन्तसुखसागर (anantasukha-sāgara) *m.* one of the epithets of Viṣṇu (*lit.* ocean of infinite bliss) भगवानननन्तसुखसागरः । -- इत्येतत्कथितं विप्र विष्णोर्नामसहस्रकम् SātvaT. 6. 195.

अनन्तसुखाकर (anantasukhākara) *m.* mine (i. e. abode) of unending bliss ससारसागरतरङ्गनिमग्नजीवान् -- । सद्धर्मपत्तनमनन्तसुखाकरं यत् तत् प्रापयन्ति गुरवः VarāṅgaC. 1. 19.

अनन्तसुखात्मक (anantasukhātma-ka) *adj.* **i** having the nature of infinite bliss मोक्षोऽनन्तसुखात्मकः MahāP. 24. 116; **ii** enjoying manifold pleasures अमरेभ्यो प्रवीचारवद्भ्योऽनन्तसुखात्मकाः । ... देवाः ग्रैवेयकादिषु TriṣaŚaPuC. ii. 3. 796.

अनन्तसुखात्मन् (anantasukhātman) *m.* one of the epithets of Jina (*lit.* having the nature of infinite bliss) नमोऽनन्तसुखात्मने MahāP. 25. 83.

अनन्तसुखाभिवर्षिन् (anantasukhābhivarṣin) *adj.* showering infinite happiness कृष्णाय चानन्तसुखाभिवर्षिणे । ... नुमो वयम् SkandP. ii(6). 1. 1

अनन्तसुखामृततृप्त (anantasukhāmṛta-tṛpta) *adj.* satiated with the nectar of infinite bliss जिनदीक्षां गृहीत्वा सः ... निश्चयरत्नत्रयात्मकपरमात्मध्यानेनानन्तसुखामृततृप्तो जातः TātpaVṛ. 156. 10 (*on* 2. 19)

अनन्तसुखाम्बुराशि (anantasukhāmburāśi) *m.* ocean of infinite bliss (संचिन्तयेत् ... मुकुन्दम्) अनन्तसुखाम्बुराशिम् PañcaRā.(Nā.) iii. 5. 16; PadmP. iv. 99. 36.

अनन्तसुखावाप्ति (anantasukhāvāpti) *f.* attainment of infinite bliss परमस्य तु यागस्य त्वनन्तं नाम कीर्तितम् । तदनन्तसुखावाप्तिं संयच्छत्याशु दर्शनात् PauṣkS. 5. 12.

अनन्तसुखिनी (ananta-sukhinī) *adj.* (*f.*) having infinite bliss or happiness विललाप भृशं सीता ... । अनन्तसुखिनी चेति ये मामूचुर्द्विजातयः Rāmā. vi. 784*(1)

अनन्तसुखैकरूप (anantasukhaikarūpa) *adj.* having the uniform (i. e. only) nature of infinite bliss आत्मानमद्वयमनन्तसुखैकरूपं पश्यामि दग्धरशनामिव च प्रपञ्चम् SaṁkṣeŚā. 4. 54 (ii. 389. 21)

अनन्तसुभटोन्मथन (anantasubhaṭonmathana) *n.* killing of innu-

merable good soldiers अनन्तसुभटोन्मथने कथं नु साहायकं तव करद्वयमाततान AlaṅkāRa. 47(19)

अनन्तसूत्रप्रभव (anantasūtra-prabhava) *adj.* produced from many threads अनन्तसूत्रप्रभवम् ··· वसनं गृह्णतां शिवे BrahmVaiP. ii. 64.66.

अनन्तसूनु (ananta-sūnu) *m.* son of King Ananta अनन्तसूनुरानन्दः ··· डामरैः प्रचलन् हतः RājTa.(Ka.) 8. 1427.

अनन्तसेन (ananta-sena) *m.* i epithet of Kumāra Kārttikeya अनन्तसेनो भगवान्कुमारो वरदः प्रभुः MahāBhā. i. App. I. 55(55); ii epithet of Viṣṇu स्नात्वा यो विष्णुकाञ्च्यां वानन्तसेनं समर्चयेत् SkandP. ii(4). 35. 27; *adj.* having a huge (*lit.* endless) army अनन्तसेनः प्रभया जितेनः ··· बुधः स यातो वसुधामिवासौ VīraBhā. 2. 2.

अनन्तसेनवसति (anantasena-vasati) *f.* abode of Lord Anantasena (i. e of Viṣṇu) सर्वेभ्यश्च स्थलेभ्यश्च आर्यावर्तं तु पुण्यदम्। अनन्तसेनवसतिर्वराहक्षेत्रमेव च SkandP. ii(4). 4. 29.

अनन्तसेवा (ananta-sevā) *f.* service of Lord Viṣṇu श्रुतिस्मृतिभ्यां विहिता व्रतादयः पुनन्ति पापं न लुनन्ति वासनाम्। अनन्तसेवा तु निकृन्तति द्वयीम् Nārāy. vi. 22. 7.

अनन्तसैन्यगहन (anantasainya-gahana) *adj.* having a dense forest (i. e. a dense array) of innumerable soldiers अनन्तसैन्यगहनम् ···। सगरन् ··· प्रेक्ष्य ··· किराताः ···। सक्रोधम् ··· बभाषिरे TriṣaŚaPuC. ii. 40. 199.

अनन्तसौख्य (ananta-saukhya) *adj.* [*f.* -ā] i having infinite bliss ते क्षीणनिःशेषभवप्रपञ्चाः प्रापुः पदं जैनमनन्तसौख्यम् PadmP.(Ra.) 110. 94; कर्मक्षयोद्भूतमनन्तसौख्यम्। ··· मोक्षमुदाहरिष्ये VarāṅgaC. 10.1; ii from which comes infinite bliss यात्यन्तेऽनन्तसौख्याम् ···मुक्तिकान्तां यतोऽङ्गी जैनेन्द्रं तत्तपः ···मङ्गलं नस्तनोतु SubhāRaSaṁ. 907; *n.* infinite bliss or happiness कथां यः शृणुयात् ··· अनन्तसौख्यं प्राप्नोति AdhyāRā. vii. 3. 60; अनिन्द्रियः सन् किं करोति। ··· केवलज्ञानमनन्तसौख्यं च परिणमतीति TātpaVṛ. 27.8 (*on* 1. 19); विदांकरोतु भूपालो देवार्चाफलमुत्तमम्। पारत्रिकं ममानन्दसौख्यलक्ष्मीविधायकम् MalliC. 8. 224.

अनन्तसौख्यप्रदा (anantasaukhya-pradā) *f.* one of the epithets of the river Gaṅgā (*lit.* bestowing infinite bliss) अपारानन्तसौख्यप्रदा-न्नदा। ··· इति नामसहस्रं हि गङ्गायाः SkandP. iv. 29. 21.

अनन्तसौख्ययुज् (anantasaukhya-yuj) *adj.* possessed of infinite bliss अहं सत्यमहं ज्ञानं शाश्वतोऽनन्तसौख्ययुक् ĀdiP. 17. 74.

अनन्तस्थ (an-antastha) *adj.* (a type of *anusvāra*) not occurring at the end of a word (i.e. *anusvāra* inside a single word) अनन्तस्थं तमनुस्वारमाहुः ṚPrāti. 13. 15 (comm. अनन्तस्थं पदमध्ये वर्तमानम्)

अनन्तस्थिर (ananta-sthira) *adj.* [*f.* -ā] infinite as well as permanent अनन्तस्थिरा च श्रीः मुक्तैश्वर्यम् ŚrutaPra. iB. 261. 15 (*on* i. 1. 26); cf. अनन्तस्थिरत्व etc.

अनन्तस्थिरत्व (anantasthira-tva) *n.* the state of being infinite and permanent कर्मणामेव स्थिरफलत्वप्रतिपादनाच्च कर्मफलाल्पास्थिरत्वब्रह्मज्ञानफलानन्तस्थिरत्वज्ञानहेतुको ब्रह्मविचारारम्भो न युक्तः BrahmSūBh.(Rā.) 127. 2 (*on* i. 1. 1); ŚrutaPra. iB. 88. 14 (*on* i. 1. 1); प्राप्यस्य ब्रह्मणोऽनन्तस्थिरत्वेऽपि प्राप्तेः कादाचित्कत्वशङ्काव्यावृत्त्यर्थमपुनर्निवृत्तिमाह ŚrutaPra. iA. 39. 28 (*on* i. 1. 1); आपातप्रतीतेरितिहासपुराणयोश्चाल्पास्थिरत्वानन्तस्थिरत्वविपर्ययप्रतीतिहेतुत्वात् ŚrutaPra. iA. 73. 15 (*on* i. 1. 1)

अनन्तस्थिरफल (anantasthira-phala) *adj.* yielding infinite and permanent fruit अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी BrahmSūBh.(Rā.) 1. 14 (*on* i. 1. 1); अल्पास्थिरफलाग्निहोत्रादिधर्मावबोधानन्तरं विवेकवैराग्यादिसंपन्नेनानन्तस्थिरफलब्रह्मावबोधसिद्ध्ये तद्विचारः कर्तव्यः ŚivārkaMaDī. i. 35. 8 (*on* i. 1. 1); *n.* infinite and permanent fruit अनन्तस्थिरफलापातप्रतीतिश्च कथम् ŚrutaPra. iA. 14. 6 (*on* i. 1. 1); यदि मन्त्रार्थवादेष्वनन्तस्थिरफलप्रतीत्या ब्रह्मविचारारम्भः ··· शारीरकशास्त्रमारभेत ŚrutaPra. iB. 88.11 (*on* i. 1. 1); अनन्तस्थिरफलस्य केवलकर्मभिरलभ्यतां मत्वा···शारीरकशास्त्रमारभेत ŚatDū. 75. 11.

अनन्तस्थिरफलता (anantasthiraphala-tā) *f.* the state of being one yielding infinite and permanent fruit अनन्तस्थिरफलतया प्रथममापातप्रतीतकर्माख्यप्रतिबन्धकनिवृत्तिसूचनेन निर्विघातब्रह्मविचारारम्भद्योतनाद् ŚatDū. 76. 30.

अनन्तस्थिरफलत्व (anantasthiraphala-tva) *n.* the state of being one yielding infinite and permanent fruit यदा कर्मविधिस्वरूपं निरूपितम्, न त्वाराध्यपरदेवतेति भावः। तदाराधनत्वेन ह्यते ह्यनन्तस्थिरफलत्वसिद्धिः ŚrutaPra. iA. 38. 12 (*on* i. 1. 1)

अनन्तस्थिरफलरूप (anantasthiraphala-rūpa) *adj.* having the form of infinite and permanent fruit अनन्तस्थिरफलब्रह्मजिज्ञासेति। अनन्तस्थिरफलरूपस्य ब्रह्मणो जिज्ञासेत्यर्थः ŚrutaPra. iA. 14. 13 (*on* i. 1. 1); विद्यानन्तस्थिरफलरूपब्रह्मप्राप्तिमाह ब्रह्मविदिति ŚrutaPra. iA. 39. 29 (*on* i. 1. 1); प्रामाण्याभावनिश्चयरहितपुरुषस्य अनन्तस्थिरफलरूपब्रह्मविषयापातप्रतीतिप्रामाण्यसंभावनासिद्धेः विशिष्टहेतुसिद्धया ब्रह्ममीमांसा आरम्भणीया ŚrutaPra. iB. 85. 23 (*on* i. 1.1)

अनन्तस्मरणानुपपत्ति (anantasmaraṇānupapatti) *f.* untenability of endless recollections अनन्तदेशकालभेदावगतं तद्देशावगतं च दृश्यत्वाद् स्मर्यमाणं विविक्तं गम्यते। न च देशकालभेदग्रहणात्, अनन्तस्मरणानुपपत्तेः BrahmSi. 141. 13.

अनन्तस्मृतिव्यक्ति (ananta-smṛtivyakti) *f.* innumerable (instances of) individual recollections न हि 'न जानामी'ति प्रत्यक्षकाले प्रमारूपप्रतियोगिस्मृतिनियमः, तथा सति त्वन्मतेऽनन्तस्मृतिव्यक्तिकल्पने गौरवात् LaCandr. 551. 14.

अनन्तस्यन्दन (ananta-syandana) *m.* name of a son of Anaraṇya and Pṛthvīmatī and the elder brother of Daśaratha (also known as Anantaratha) (*lit.* having many chariots) अनरण्योऽगमन्मोक्षमनन्तस्यन्दनो महीम्। ··· विजहार यथोचितम् PadmP.(Ra.) 22. 168.

अनन्तस्वतन्त्र (ananta-svatantra) *adj.* eternal as well as self-dependent भगवद्भैरवभट्टारकस्तु सदापूर्णोऽनन्तस्वतन्त्र एव न विपर्यस्यते जातुचिदपि ParāTri. 146. 5.

अनन्तस्वरूप (ananta-svarūpa) *adj.* having infinite or unlimited forms त्रिसमयावच्छिन्नसकलपदार्थपरिच्छेद्याकारवैश्वरूप्यप्रकाशनास्पदीभूतं चित्रभित्तिस्थानीयमनन्तस्वरूपं स्वयमेव परिणमत् केवलमेव परिणामः TattvPradī.(A.) 79. 5 (*on* 1. 60); नमः शिवाय ···। नमोऽनन्तस्वरूपाय ··· प्रपन्नं पाहि मां प्रभो KathāKau. 14. 44; *n.* infinite (instances of) essential forms न च स्वरूपसंबन्धेन सिद्धसाधनम्, अर्थान्तरं वा, अनन्तस्वरूपाणां संबन्धत्वकल्पने गौरवाल्लाघवादेकसमवायसिद्धिः SiddhāMu. 6. 14 (*on* 11)

अनन्तस्वरूपिन् (ananta-svarūpin) *adj.* who has infinite forms or manifestations नमस्ते ब्रह्मरूपाय नमोऽनन्तस्वरूपिणे GaṇeP. ii. 21. 66.

अनन्तस्वर्ग (ananta-svarga) *m.* everlasting heaven यः सौपर्णमधीयीत नित्यं पर्वणि पर्वणि। अनन्तस्वर्गमारोहेत् Suparṇādhyāya 31.5.

अनन्तस्वर्गापत्ति (anantasvargāpatti) *f.* undesired contingency of (the attainment of) heaven for ever कृतकाशीयात्रस्याकृतकाशीपातकस्य काशीतो निर्गमनसमनन्तरमेव मरणेऽनन्तस्वर्गापत्तिः TristhaSe. 100. 3.

अनन्तस्वर्गोत्पत्त्यापत्ति (anantasvargotpatty-āpatti) *f.* undesired contingency of the origination of innumerable heavens 'ऋद्धिकामास्सत्रमासीरन्' इत्यादौ ··· एकसत्रप्रयोगादनेकफलनिष्पत्तौ दर्शादावप्येकस्मादेव प्रयोगाद्युगपत् क्रमेण वा अनन्तस्वर्गोत्पत्त्यापत्तेरेकप्रयोगादेकफलोत्पत्तिनियमस्यावश्यं वाच्यत्वादेकमेव फलं सर्वैरवयवशो भुज्यते BhāṭṭDī. ii. 238. 5 (*on* vi. 2.1)

अनन्तस्वलक्षणावभासन (anantasvalakṣaṇāvabhāsana) *n.* manifestation of the infinite (objects) which have their own nature यस्य सामानाधिकरण्ययोगादनन्तस्वलक्षणावभासनव्यूहविशेषपूर्वकः समस्तोऽयं शरीरभुवनादिविभवः, तम् ··· दर्शयति PratyabhiVi. ii. 214.2 (*on* iii. 1. 1)

अनन्तस्वामिन् (ananta-svāmin) *m.* i name of a Brahmin (donee) पूर्वभोक्तु(क्तृ)ब्राह्मणेभ्यः प्रतिपादितम् ··· शाण्डिल्यो वाजसनेयि–अनन्द-(न्त)स्वा(मी) अंश[:] EI. xix. 120. 43; ii name of a Brahmin minister of the king of Tārāvaloka ततस्तारावलोकस्य नृपतेः सचिवो द्विजः। श्रीमाननन्तस्वामीति तं मित्रं प्राप सार्थपम् BṛKathāMañ. 15. 290; चिंत्रिः सार्थवाहस्य तस्य मित्रं द्विजोत्तमः। गृहाननन्तस्वामीति सहस्त्यश्वपदातिकः KathāSaSāg. ix. 6. 42; ix. 6. 118; ix. 6. 125; iii name of one of the sixty-three (Jaina) Śalākā puruṣas (also known as Anantanātha) पायादनन्तस्वामी वः सिद्धानन्तचतुष्टयः TriṣaŚaPuC. iv. 4. 1; विमलस्वामिनिर्वाणादनन्तस्वामिनिर्वृतिः। व्यतिक्रान्तेषु नवसु वारिराशिष्वजायत TriṣaŚaPuC. iv. 4. 303; iv. 5. 362.

अनन्तःसङ्ग (an-antassaṅga) *m.* absence of inner or close attachment अन्तःसंसक्तमङ्गानामङ्गारं विद्धि राघव। अनन्तःसङ्गमङ्गानां विद्धि राम रसायनम् YogVā. v. 68. 50.

अनन्तःस्थानुनासिक (an-antassthānunāsika) *adj.* excluding the semi-vowels and the nasals धुड् व्यञ्जनमनन्तःस्थानुनासिकम् Kātan. ii. 1. 13 (Vṛtti अन्तःस्थानुनासिकवर्जितं व्यञ्जनं धुट्संज्ञं भवति)

अनन्तहर्षभाज् (anantaharṣa-bhāj) *adj.* enjoying immense pleasure कीकसानि समांसानि पस्पुरनन्तहर्षभाक्। अश्नाति सारमेयीयमहो संसार [illegible]

अनन्तहर्षसंपूर्ण (anantaharṣa-sampūrṇa) *adj.* overwhelmed with (*lit.* completely filled with) immense joy भूपालः …। अनन्तहर्षसंपूर्णः सरोमाञ्चः सगद्गदः। कृष्ण कृष्णेति कृष्णेति कृष्णेत्याह पुनः पुनः BṛNāraP. 15.71.

अनन्तहस्तचरण (ananta-hastacaraṇa) *adj.* having innumerable hands and feet सहस्रलोचनः…ददर्श तम् … अनन्तहस्तचरणम् (बटुम्) GaṇeP. ii. 11. 18.

अनन्तहेतुताकल्पन (anantahetutā-kalpana) *n.* assumption of endless causalities न चैकत्वाद्यन्वयबोधे घटपटादिज्ञानजन्योपस्थितित्वेनानन्तहेतुताकल्पनमपेक्ष्य स्वादिपदज्ञानजन्यतदुपस्थितित्वेन कतिपयहेतुताकल्पनायां लाघवात् कतिपयशक्तिकल्पने गौरवमकिंचित्करम् VyutpaVā. 100. 4.

अनन्तहेतुत्व (ananta-hetutva) *n.* endless causalities न हि शतादिवर्षावच्छिन्नभोगहेतुत्वेन श्रुत्युक्तं कर्म दशादिवर्षमात्रावच्छिन्नभोगेऽपि हेतुरिति कल्पना युक्ता अनन्तहेतुत्वापत्तेः GuruCandr. ii. 324.16; दशादिवर्षावच्छिन्नभोगजनककर्मणः पञ्चादिवर्षावच्छिन्नभोगजनकत्वादिकल्पने अनन्तहेतुत्वादिकल्पनापत्तेः LaCandr. 531. 29.

अनन्तहेयोपाधि (anantaheyopādhi) *m.* adjuncts of innumerable evils (to be discarded) ब्रह्मण्यच्छेद्ये निरवयवे निर्विकारे त्वनियमेनानन्तहेयोपाधिसंसर्गदोषो दुष्परिहर एव VedāSaṁ. 105. 6.

अनन्तह्रद (ananta-hrada) *m.* name of a pond पापहरं सरः। चन्द्रस्वामी ययौ स्नातुमनन्तह्रदसंज्ञकम् KathāSaSāg. ix. 6. 121.

अनन्ता (an-antā) *f.* **1A** (du.) heaven and earth **B** the earth **C** the north-west quarter **2Ai** name of Janamejaya's wife **ii** name of the wife of Svāyambhuva Manu **Bi** name of Pārvatī **ii** name of the *śakti* related to Brahmā **iii** name of the Buddhist goddess Tārā **iv** one of the names of Cāmuṇḍā **Ci** name or epithet of the river Gaṅgā **ii** epithet of the river Aruṇā **3** name of various plants **Ai** *śārivā*, *Hemedesmus indicus* **ii** *bhadrā* **Bi** *dūrvā*-grass **ii** *śvetadūrvā* **iii** *nīladūrvā* **C** *durālabhā* or *yavāsa*, *Alhagi maurorum* or *Hedysarum alhagi* **D** *āmalakī*, *Emblica myrobalan* **E** various plants (which cannot be identified) **4Ai** name of one of the eight *kalās* of *cidātman* **ii** name of one of the eight *śaktis* **iii** name of one of the sixteen *kalās* produced from the *nāda* **iv** name of a Tantric deity **Bi** name of the opposite of the first of the nine *tuṣṭis* (of the Sāṁkhyas) **ii** name of Prakṛti **Ci** mystic name of the syllable *au* **ii** mystic name of the syllable *aḥ* **5** name of a vein (of a horse) **6** full-moon day **1A** (du.) heaven and earth रोदसी।… पार्श्वौ। दूरे अन्ते। अनन्ते। द्यावापृथिव्योः AVPari. 48. 60; **1B** the earth अनन्ता गीयते देवी पृथिवी बहुविस्तरा VāyuP. i. 50. 3; भूरनन्ता क्षमा धात्री AgniP. 362. 1; विश्वंभरा धारणाच्चानन्तानन्तस्वरूपतः DevīBhāP. ix. 10. 30; य[Read त्व]द्बाहाविस्तोंद्रदंडनृपतेर्व्वि[Read ते वि]भ्रत्यनन्ताधुरम् … साहस्रीं रसनामधात्तव गुणान् स्तोतुं कृ[ता*]र्थः फणी EI. viii. 19. 49; अस्पृशद्भिरिव क्षोणीं पतिभिर्दैवतैरिव। स्वरिवाचरि(र)तानन्तां चित्रयानविशारदैः VīraBhā. 3.59; भारं मदीयं खलपार्थिवौघं हरिष्यतेऽसौ विभुरित्यनन्ता। अधान् मुदा … पुलकप्ररोहान् Raghunā. 8. 65; अनन्तायां मापितायां दिष्टे दिष्टज्ञ सूचिते।… शिल्पिनो मृष्टकुण्डलाः।… प्रसन्नमनसः सर्वे ParamāKā. 156. 26; [Lexicons — AmaK. 560; AbhidhāRaMā. 2. 1; DhanvNi. 291. 12; AṣṭāNi. 36. 4; Vaija. 257. 4; AbhidhāCin. 936; DharK. 964; AnekāK. 307; NānārthSaṁ. 2.15; NānārthāSaṁ. ii. 47. 8; ParyāŚaRa. 358; MediK. 63. 82; AnekāTi. 3. 6; ŚabdaRa.(Vā.) 726; 4068; ParaNā. 548; 2628; ViśvaLoK. 132. 78; KośaKaTa. 1. 2468; 2. 2443; 2. 5505; KalpaK. 2.15; ŚabdaRaSaK. 136. 15]; **1C** the north-west quarter मारुत्यनन्ता शार्वी तु शालाक्षाप्यपराजिता Vaija. 17. 5; NānārthāSaṁ. ii. 47.8; ŚabdaRa.(Vā.) 305; **2Ai** name of Janamejaya's wife जनमेजयः खल्वनन्तां नामोपयेमे माधवीम् MahāBhā. i. 90.12; **2Aii** name of the wife of Svāyambhuva Manu स्वायंभुवो मनुर्धीमांस्तपस्तप्त्वा सुदुश्चरम्। पत्नीमेवाप रूपाढ्यामनन्तां नाम नामतः MatsyaP. 4.33; **2Bi** name of Pārvatī त्रिपुरघ्नाय विश्वेशमनन्तायै करद्वयम्।… अर्चयेत् MatsyaP. 60.22; कुमुदा विमलानन्ता भवानी च … प्रीयतामित्युदीरयेत् MatsyaP. 62. 30; BhaviP. 651A. 1 (iv. 26. 31); नाम्नामष्टसहस्रेण तुष्टाव परमेश्वरीम्। … अनन्तशयनानन्ता नरनारायणोद्भवा KūrmaP. 121. 12 (1. 12); 101. 16 (1. 12); 102. 15 (1. 12); अनन्तां त्रिपुरघ्नं च पूजयेत् करसंपुटे BhaviP. 648B. 33 (iv. 25. 21); गौरी … विष्णुना च प्रसादिता।… येषु स्थानेषु द्रष्टव्यासि … तानि वक्ष्यामि … अनन्ता भरताश्रमे PadmP. v. 17. 210; तुष्टाव शिवां शंकरवल्लभाम्।… जयानन्ते जयाव्यक्ते SaurP. 49. 45; ईशानः परमेशानस्तदार्या परमेश्वरी। अनन्तवल्योऽनन्तो ह्यनन्तानन्तवल्लभा ŚivaP. vii(2). 4. 47 (549A. 1); [Lexicons — AnekāSaṁ. 3. 231; ViśvaPra. 67. 130; MediK. 63. 81; AnekāTi. 3. 6; ViśvaLoK. 132. 78; KalpaK. 394. 128; 394. 135; ŚabdaRaSaK. 136. 15]; **2Bii** name of the *śakti* related to Brahmā या ब्रह्मशक्तिः सत्त्वस्था सा अनन्ता प्रकीर्तिता VarāP. 96. 68; **2Biii** name of the Buddhist goddess Tārā तारा महाश्रीरोंकारा …। तारिणी च जयानन्ता TrikāŚe. i. 1. 18; KalpaK. 442.27; **2Biv** one of the names of Cāmuṇḍā अनन्ता विजया क्षेमा … स्कन्दमाता … चामुण्डायाम् ŚeṣaNā. 1596; **2Ci** name or epithet of the river Gaṅgā ओम् नमो गङ्गादेव्यै। ओंकाररूपिण्यजरातुलानन्ता SkandP. iv. 29. 17; अनन्ता इन्दिरा ईशा …। इमं सहस्रनामाख्यम् …। भगवत्या हि गङ्गायाः …। यः पठेत् BṛDharmaP. i. 50. 169; i. 50. 65; **2Cii** epithet of the river Aruṇā नदी …। अरुणाख्या … वर्तते …। आद्या मायातुलानन्ता … कान्तिदायिनीति स्मृता DevīBhāP. viii. 5. 30; **3** name of various plants **3Ai** *sārivā* (or *anantamūla*), *Hemidesmus indicus* नलमूलान्यनन्तां च प्रदेहमुपकल्पयेत् CaraS. vi. 21. 88 (1941 Ed.) (comm. अनन्ता उत्पलसारिवा); i. 25. 40 (1941 Ed.); अनन्ताम् …। पिष्ट्वा … पूर्वोक्तान्यौषधानि च। एभिस्तद् विपचेत् तैलम् SuśruS. iv. 3.61 (comm. अनन्ता उत्पलसारिवा); i. 16. 26; iv. 11. 10; v. 3. 12; vi. 3. 25; देवदारुनतानन्तामधुकाञ्जनगैरिकम्।… विकिरेत् श्लक्ष्णचूर्णितम् AṣṭāSaṁ. i. 50. 15 (1. 8); i. 81. 8 (1. 13); i. 85. 19 (1. 14); अनन्तां कुक्कुटीं बिम्बीम् …। सूत्रेण ग्रथिता एता धारयेत् पाणिपादयोः KāśyaS. 102A. 26; 144B. 3; निघण्टुं संप्रवक्ष्यामि …। अनन्ता सारिवा गोपी AśvaVai. 12. 7; कार्पासपल्लवानन्तारसतैलयुतो हितः। अस्थिस्रावे मृतरसः RasRaSa. 30. 63; [Lexicons — AmaK. 872 = AgniP. 362. 54; ParyāRaMā. 64; Vaija. 257. 4; AnekāSaṁ. 3. 254; ViśvaPra. 67. 130; DharK. 964; NānārthāSaṁ. ii. 47. 8; MediK. 63. 81; NānārthaMa. 724; ViśvaLoK. 132.78; KośaKaTa. 1. 4019; 2. 5505; ApūNā. 23B. 3; ŚabdaRaSaK. 136. 14]; **3Aii** *bhadrā* बहुला च बलानन्ता भद्रा पातालवासिनी DhanvNi. 131. 3; AnekāSaṁ. 2. 433; ViśvaPra. 129. 56; MediK. 138. 71; ViśvaLoK. 288. 69; KośaKaTa. 2. 7762; KalpaK. 266. 162; ŚabdaRaSaK. 257. 18; **3Bi** *dūrvā* grass (रक्तपित्ते प्रलेपः) कुचन्दनं शैवलमप्यनन्ता CaraS. vi. 4. 103 (1941 Ed.); vi. 3. 258 (1941 Ed.) [Lexicons — AmaK. 965; Vaija. 257. 4; TrikāŚe. iii. 3. 144; AnekāSaṁ. 3. 254; AbhidhāCin. 1192; NighŚe. 2264; Liṅgānu.(He.) 46. 4; ViśvaPra. 67. 130; DharK. 964; AnekāK. 307; NānārthSaṁ. 2. 15; NānārthāSaṁ. ii. 47. 8; MediK. 63. 81; AnekāTi. 3. 6; NānārthaMa. 724; AbhidhāMañ. 264. 10; Anekā.(Pa.) 2628; ViśvaLoK. 132. 78; KośaKaTa. 1. 4339; 2. 5505; ŚabdaRaSaK. 136. 14]; **3Bii** *śvetadūrvā* श्वेतदूर्वा तु गोलोमी श्वेतदण्डा सिता लता। सहस्रवीर्यानन्ता च DhanvNi. 163. 8; RājNi. 163. 23; AbhidhāMañ. 33. 12; ṢaḍrasaNi. 5. 8; KalpaK. 288. 353; ApūNā. 23B. 3; **3Biii** *nīladūrvā* नीलदूर्वा रुहानन्ता भार्गवी शतपर्विका BhāvPra. (Bhā.) 6(4). 172; 6(24) (203. 10); BhāvPraNi. 64. 171; 199. 20; **3C** *durālabhā* or *yavāsa*, *Alhagi maurorum* or *Hedyserum alhagi* दूर्वानन्ता निम्बवासात्मगुप्ता AṣṭāHṛ. i. 15. 6 (comm. अनन्ता यवासः); i. 15. 37; ii. 2. 55; यासो यवासः … अनन्ता समुद्रान्ता दुरालभा AmaK. 832; AgniP. 362. 45; अनन्ता सारिवा रास्ना … प्रयोक्तव्या गर्भस्रावे SiddhYo. 65. 2 (comm. अनन्ता यवासकः); 54. 16 = ŚārṅgaS. iii. 11. 59; SiddhYo. 65. 6; ŚārṅgaS. ii. 2. 1; अनन्ता दुरालभा Mānaso. i. 19. 300; अनन्ता दुरालभा नीलदूर्वा लाङ्गली च BhāvPra.(Bhā.) 6(24) (203. 10); दुरालभा … गान्धारी कच्छुरानन्ता BhāvPra.(Bhā.) 6(4).211; [Lexicons — RājNi. 421. 21; AṣṭāNi. 14. 6; Vaija. 257. 4; NighŚe. 2115; AbhidhāMañ. 34. 3; 264. 10; AnekāSaṁ. 3. 231; NānārthSaṁ. 2. 15; AnekāK. 307; MediK. 63.81; BhāvPraNi. 69. 212; 199. 20; ParyāMu. 3. 29; ApūNā. 23B. 3]; **3D** *āmalakī*, *Emblica myrobalan* अनन्ता …। कणादुरालभापथ्यापार्वत्यामलकीषु च MediK. 63. 81; **3E** various plants (which cannot be identified) अनन्तां सहदेवीं च क्वथितां पयसा सह। निशासु प्रमदा पीत्वा भर्तारमुपसंचरेत्। मेधाविनं प्रजायेत पुत्रम् BṛSaṁ. 78. 22 (v. 1. p. 60, 1. 5); अनन्ता विश्वभैषज्यकटुकातोयतोयदाः। ज्वरतृड्भ्रमसंमोहधूमकाम्लकनाशनाः AṣṭāSaṁ. ii. 6. 1 (4. 1); कल्कैरनन्ताखदिरेरिमेदजम्बाम्रयष्टीमधुकोत्पलानाम्। तत्तैलमाश्वेव धृतं मुखेन स्थैर्यं द्विजानां विदधाति सद्यः SiddhYo. 58. 87; 63. 16; अनन्ता काकजङ्घा च काकमाची कपोतिका।… एता नियामकौषध्यः Rasā. 5. 3; स्यात् तिक्तपर्वा चानन्तागुडूचीयष्टिषु ŚabdaRaSaK. 323. 12; एरण्डमूलं वर्षाभूरनन्ता च शतावरी।…कषायम्…पाययेत् AśvaVai. 47. 6; अनन्तावनकुटन्नटम् … प्रतिवापं कार्षकमौषधानां भागं कृत्वा … कटाहेऽधिश्रयेत् Hastyāyur.

591. 16 (4. 4); 100. 14 (1. 14); [Lexicons give the following as synonyms of *anantā* — *rodanī*, AmaK. 832; ParyāMu. 3. 29; *kacchurā*, AmaK. 832; NighŚe. 2115; ParyāMu. 3. 29; *samudrāntā*, AmaK. 832; NighŚe. 2115; ViśvaLoK. 132.79; ParyāMu. 3. 29; *viśalyā*, AmaK. 921; AnekāSaṁ. 3. 231; ViśvaPra. 67. 130; MediK. 63. 81; NānārthaMa. 724; ŚabdaRa.(Vā.); 1219; ViśvaLoK. 132. 79; ŚabdaRaSaK. 136. 14; ApūNā. 23B. 3; *agniśikhā*, AmaK. 921; ŚabdaRa.(Vā.) 1219; *phalinī*, AmaK. 921; ŚabdaRa.(Vā.) 1219; *śakrapuṣpikā*, AmaK. 921; *śakrapuṣpī*, ŚabdaRa.(Vā.) 1219; *svarṇakṣīrī*, ParyāRaMā. 177; ParyāMu. 15. 31; *guḍūcī*, TrikāŚe. iii. 3. 144; AnekāSaṁ. 3. 231; NighŚe. 2204; ViśvāPra. 67. 130; MediK. 63. 81; NānārthaMa. 724; ViśvaLoK. 132.78; ŚabdaRaSaK. 136. 15; ApūNā. 23B. 3; *lāṅgalī* (*Cynodon dactylon*), AnekāSaṁ. 3. 231; NighŚe. 2202; ViśvaPra. 67. 130; NānārthaMa. 724; BhāvPraNi. 199. 20; ViśvaLoK. 132. 78; KośaKaTa. 1. 4061; 2. 5505; ŚabdaRaSaK. 136. 14; *lāṅgalā*, ApūNā. 23B. 3; *haimavatī*, AnekāSaṁ. 3. 231; ViśvaPra. 67. 130; AnekāTi. 3. 6; ŚabdaRaSaK. 136. 15; *harīṇī*, DharK. 964; *śārivikā*, DharK. 964; *kaṇā*, MediK. 62. 82; *pathyā*, MediK. 63. 82; *viśvambharā*, MediK. 63. 81; *amṛtā*, AnekāTi. 3. 6; Anekā.(Pa.) 2628; KośaKaTa. 2. 5505; *kalihārī*, BhāvPraNi. 54. 82; *ardhendupuṣpī*, KośaKaTa. 1. 4061; *kuṭajapuṣpikā*, KośaKaTa. 1. 4061; *gopatanayā*, KośaKaTa. 2. 5505; *agnijvālikā*, KośaKaTa. 2. 5505; *hemadantī*, ApūNā. 23B. 3]; **4Ai** name of one of the eight *kalās* of *cidātman* अनन्तता ह्यनन्ताख्या कला कमलसंभव PauṣkS. 22. 34 = PāraS. 5. 50; **4Aii** name of one of the eight *śaktis* (to be established on eight supporting pillars) न्यसेत् । प्रणवेन स्वनाम्ना च नमोऽन्तेन महामते । बलवीर्यवती नित्या अनन्ताख्या PauṣkS. 42. 186; PāraS. 10. 32; **4Aiii** name of one of the sixteen *kalās* produced from the *nāda* निवृत्तिः सप्रतिष्ठा स्यात् ··· व्योमरूपा स्युरनन्ता स्वरसंयुताः । सदाशिवेन संजाता नादात् ŚāraTi. 2. 27; 2. 24; व्यापिनी व्योमरूपा च अनन्ता चापि नादजाः । कलाः षोडश संख्याताः IśānSiPa. i. 2. 41; ii. 17.227; ii. 18. 120; TantrSa. 8.43; **4Aiv** name of a Tantric deity (representing the *kalās* of the mystic sounds *kṣa* and *aḥ*) ततः पञ्चाशत्कलापूजा ···। क्षं अनन्तायै, नमः सर्वत्र TantrSā.(K.) 51. 21; अः अनन्तायै TantrSā.(K.) 51. 27; **4Bi** name of the opposite of the first of the nine *tuṣṭis* (of the Sāṁkhyas according to which view the *pradhāna* which is responsible for creation does not exist at all) तुष्टिविपर्ययास्तावद्वच्यन्ते । तत्र नास्ति प्रधानमिति या प्रतिपत्तिरनन्ता ।··· इति तुष्टिविपर्यया नवधा तुष्टयो व्याख्याताः TattvSa. (13) 132. 15; **4Bii** name of Prakṛti (the Primordial Matter) साविर्बभूव सहसा मूलप्रकृतिरीश्वरी ।··· गुणोऽस्त्यनन्तोऽनन्तावाः BrahmVaiP. ii. 1.21; **4Ci** mystic name of the syllable *au* औकारः शक्तिको नादः ···। अनन्ता ज्वालिनी व्योमा Tantrābhi.(2) 10. 6; **4Cii** mystic name of the syllable *aḥ* अः ···। सुन्दरी सुयशानन्ता(न्दा) गणनाथो महेश्वरः Tantrābhi.(2) 11. 1; पूर्णामृता तथानन्ता अः – स्वरस्तु वृषध्वजः Tantrābhi.(8) 55. 8; **5** name of a vein (of a horse) अनन्तां वेधयेद् वैद्यः शिरां शस्त्रेण चौरसीम् AśvaVai. 32. 8; **6** full-moon day अनन्ता पूर्णिमा दूर्वा यवापद्मशारिवा मही Vaija. 257. 4; अनन्ता तु पौर्णमास्याम् NānārthāSaṁ. ii. 47.8; [*anantā* is given as a synonym for *kajjalī*, a kind of fish, ŚabdaKaDru. citing the *Śabdaratnāvalī*; number one, MW.]

अनन्तांश (anantāṁśa) *m.* **i** ultimate minute part (*lit.* part not having further finality) विश्रान्तो यदनन्तांशः क्वचिदस्तीति गम्यते AnuVyā. 24B.11 (*on* 2. 2); विश्रान्त इत्यस्य त्र्यणुकापेक्षया परिमाणतोऽनन्तांशो द्रव्यविशेषः कश्चिदस्ति NyāySu.(Ja.) 343A. 13 (*on* ii. 2. 6); **ii** part (i. e. partial incarnation) of (the serpent-king) Ananta सुराणामसुरां(? राणां) च ये येंऽशा भुवि विश्रुताः । तानहं संप्रवक्ष्यामि ··· बलदेवस्त्वनन्तांशः DevīBhāP. iv. 22. 31.

अनन्तांशत्व (anantāṁśa-tva) *n.* the state of having innumerable regions (occupied by those many atoms) यथैकाण्वव्याप्येनांशेन गण्यमानस्याकाशस्यानन्तांशत्वादनन्तप्रदेशत्वं तथैकाण्वव्याप्येनांशेन गण्यमानानां धर्माधर्मैकजीवानामसंख्येयांशत्वात् प्रत्येकमसंख्येयप्रदेशत्वम् TattvPradī.(A.) 193.10 (*on* 2. 45)

अनन्तांशरूप (anantāṁśa-rūpa) *adj.* having the form of the ultimate minute part परिमाणापकर्षतारतम्यमियत्तानवच्छिन्नमेव । किं त्वनन्तांशरूपमपि तत् क्वचिदाश्रितम् NyāySu.(Ja.) 343B. 1 (*on* ii. 2.6)

अनन्तांशसंभव (anantāṁśa-sambhava) *adj.* where Baladeva (*lit.* the partial incarnation of Ananta) was born सहस्रपत्रं कमलं गोकुलाख्यं महत्पदम् । तत्कर्णिकारं तद्धाम तदनन्तांशसंभवम् BrahmS. 5.2 (but comm. अनन्तस्य बलदेवस्यांशेन ज्योतिर्विभागविशेषेण संभवः सदाविर्भावो यस्य तत्)

अनन्तांशोपेत (anantāṁśopeta) *adj.* **i** consisting of very minute parts अनन्तांशोपेतमपि तत्सर्वं क्वचिदाश्रितमेव NyāySu.(Ja.) 342B. 6 (*on* ii. 2. 6); **ii** possessed of or having infinite parts विशेषसमवायनिर्भेदमध्याकाशमनन्तांशोपेतम् NyāySu.(Ja.) 347A. 12 (*on* ii. 2. 6)

अनन्ताकार (anantākāra) *m.* innumerable forms तद्रूपिणी शक्तिर्वस्तुत एकैव सती ज्ञातृदेहव्य° ··· °प्रतियोगिभेदात् ज्ञाने च्छाक्रियात्सृष्टिपालनसंहारतिरोधानानुग्रहशक्त्याद्यनन्ताकारेण भाति ŚivārkaMaDī. i. 301.29 (*on* i. 2. 1); i. 301. 32 (*on* i. 2. 1)

अनन्ताकाश (anantākāśa) *m., n.* space having no terminal point व्योमान्तं सततं ध्येयमनन्ताकाशमव्ययम् । चिन्तयामो वयं यद्वै धियो यो नः प्रचोदयात् BṛPaīĀSm. 12.175(+100); अस्य लोकस्य का गतिरित्यनन्ताकाशं निर्दिश्य ··· आकाशस्यैव परोवरीयस्त्वादिगुणयोगं दर्शयति VedāntKa. 405. 15 (*on* iii. 3. 7); यथानन्ताकाशः सत्येन सत्त्वेन वर्तते तद्वदान्तरभेदाश्च । तथा भगवन्मतं तदन्तर्गतमतान्यपि सत्तात्मिलर्थः TattvPrakā. 188A. 1 (*on* iii. 4. 9)

अनन्ताकाशदेशत्व (anantākāśadeśa-tva) *n.* the state of having the infinite regions of space दिशामन्त इह ग्राह्यः — अनन्ताकाशदेशत्वान्नाजसान्तो दिशां यतः BṛĀraUBhVā. i. 3. 219.

अनन्ताकाशमध्यग (anantākāśamadhya-ga) *adj.* existing or present in the middle of the endless space लोकः ··· जीवाद्यर्थावगाहकः । नित्यः ··· सोऽनन्ताकाशमध्यगः MahāP. 4.15.

अनन्ताकाशवत् (anantākāśa-vat) *adv.* like the limitless space कथमनन्ताकाशवदन्तर्भावितान्यमतत्वं तस्येत्यत आह TattvPrakā. 188A. 2 (*on* iii. 4. 9)

अनन्ताकाशसंकाशहृदय (anantākāśasaṅkāśa-hṛdaya) *adj.* possessed of the heart like the endless space नाहं नेदमिति ध्यायंस्तिष्ठ त्वमचलाचलः । अनन्ताकाशसंकाशहृदयो हृदयेश्वर: YogVā. v. 14. 48.

अनन्ताकुलकल्लोला (anantākula-kallolā) *adj.* (*f.*) having waves of endless worries अनन्ताकुलकल्लोला विवर्तावर्तसंकुला । प्रवहत्याशयारण्ये तृष्णानामा नदी नृणाम् YogVā. v. 15.14 (comm. अनन्तव्याकुलताल्लक्षणकल्लोलवती)

अनन्ताकृति (anantākṛti) *adj.* of varied forms (व्रणः) अनन्ताकृतिरागन्तुः स भिषग्भिः पुरातनैः । समासतो लक्षणतः षड्विधः परिकीर्तितः SuśruS. iv. 2. 8.

अनन्ताक्रान्त (anantākrānta) *adj.* who has trampled upon a snake रजोभिरेभिर्मण्डलं वर्तयित्वा···त्र्यहस्तं मण्डलं त्र्याशुद्धादिकम् । तन्मध्येऽनन्ताक्रान्तं हेवज्रं लिखेत् HevajraT. i. 2. 20.

अनन्ताक्ष (anantākṣa) *adj.* having innumerable eyes सहस्रनामानन्ताक्षः सहस्रबाहुर्नमोऽस्तु ते SkandP. v(1). 63. 232.

अनन्ताक्षमय (anantākṣa-maya) *adj.* having innumerable eyes इति विकृवितं तेषां समाकर्ण्य कृपामयी (देवी) । अनन्ताक्षमयं रूपं दर्शयामास ŚivaP. v. 50.15 (467B. 7)

अनन्ताक्षयफलत्व (anantākṣayaphala-tva) *n.* the state of having endless and permanent fruit मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वाद् ··· ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात् कर्मज्ञानादनन्तरमत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति BrahmSūBh.(Rā.) 2. 17 (*on* i. 1. 1)

अनन्ताक्षयसुख (anantākṣaya-sukha) *n.* endless and permanent bliss देवेन्द्रचक्रवर्त्यादयोऽनन्ताक्षयसुखादिगुणास्पदं सर्वज्ञस्वरूपं नमस्कुर्वन्ति TātpaVṛ. 69. 15 (*on* 1.53)

अनन्ताक्षरमालिनी (anantākṣara-mālinī) *adj.* (*f.*) adorned with the garland of eternal sounds (*lit.* syllables) श्रीः — व्योम्न्याहं परमे दिव्या ह्यनन्ताक्षरमालिनी LakṣmīT. 18. 36.

अनन्ताक्षिमय (anantākṣi-maya) *adj.* having innumerable eyes अनन्ताक्षिमयं रूपं दर्शयामास पार्वती DevīBhāP. vii. 28. 33; अस्मदर्थं त्वया रूपमनन्ताक्षिमयं धृतम् — अम्बिके ŚivaP. v. 50. 34 (468A. 5)

अनन्यचित्त (ananya-citta) *adj.* [*f.* -ā] with the mind not fixed on anything or anybody else, having an undistracted mind (स्त्री) अनन्यचित्ता सुमुखी भर्तुः सा धर्मचारिणी MahāBhā. xiii. 134.33; अनुरक्ता हि वैदेही रामम् ···। अनन्यचित्ता रामे च Rāmā. v. 57.9; ii. *607; अनन्यचित्तस्य तत् समाप्तौ स नियमो ज्ञेयः AbhidhKoBh. 251.13 (on 4.81); महात्मानः ··· सेवन्ते अनन्यमनसः अनन्यचित्ताः ज्ञात्वा ··· आदिं कारणम् अव्ययम् GītāBh.(Śaṅ.) 262.14 (on 9.13); अनन्यचित्तो भुञ्जीत वाग्यतोऽन्नमकुत्सयन् VedavyāSm. 3.71; (संवीताङ्गः समाहितः) समाहितः अनन्यचित्तः कार्यदर्शने ManuBh. ii. 82.26 (on 8.23); तच्चार्च्यते श्रीपतिपादपद्मद्वन्द्वं न वस्त्रैर्न धनैः···। अनन्यचित्तेन नरेण किं नु(?तु) उच्यते केशव माधवेति NaraP. 43.12; ततस्तया साकमनन्यचित्तया ···। स विक्रमादित्यनरेन्द्रचन्द्रमाः ··· पाटलिपुत्रकं ययौ KathāSaSāg. vii. 4.158; वराथिनी देवमनन्यचित्ता तपःप्रवृत्ता हरिमर्थयेऽहम् DaśāvaC. 7.63; अनन्यचित्तानतुकम्पमानः।··· भक्त्या स्वयं तारयसे भवाब्धिम् Yādavā. 20.63; विद्यया वेष्टयेत् स्थानं रक्तपुष्पसमानया। बहुधानन्यचित्तस्तु सद्याम्यन्तरं बुधः MāliniT. 23.23; सम्यगनन्यचित्तो देवताध्यानपर एव होमान् कृत्वा ··· दिक्षु ··· बलिं हरेत् ManvaMu. 103.24 (on 3.87); हुतशेषमन्नं भाजनेषु समाहितोऽनन्यचित्तः प्रदद्यात् ViraMi. 300.11 (on 1.237); *n.* undistracted mind, mind which does not think of anything else, *cf.* **अनन्यचित्तनियत.**

अनन्यचित्तता (ananyacitta-tā) *f.* the state of having the mind not fixed on any other object, the state of having an undistracted mind भगवतः···आराधनमनन्यमनन्यचित्ततयाभिप्रेयते BrahmSūBh.(Śaṅ.) 415.18 (on ii. 2.42); सम्यगनन्यचित्ततया देवताध्यानपरः ManuBh. i. 244.20 (on 3.87)

अनन्यचित्तत्व (ananyacitta-tva) *n.* the state of having the mind not fixed on any other object सिद्धिस्त्वनन्यचित्तत्वम् TantrRā. 35.14.

अनन्यचित्तनियत (ananyacitta-niyata) *adj.* controlled with the undistracted mind वित्तसमाश्रये गुणगणे वित्ते च नान्याश्रये वित्तं चित्तमनन्यचित्तनियताः संपन्निमित्तं नृणः SamaMā. 4.90.

अनन्यचित्तवृत्ति (ananya-cittavṛtti) *adj.* having the undistracted function of the mind आर्ये वचनमनन्यचित्तवृत्तिः स्वीकुर्वन्नरपतिरानतेन मूर्ध्ना ।— उत्तस्थौ Surath. 12.20.

अनन्यचीर्ण (an-anyacīrṇa) *adj.* not practised by anyone else शिव उवाच ··· गुह्यान्तरं घोरमनन्यचीर्णम्। एतद्व्रतं पाशुपतं चरामि ŚivaP. ii(5). 44.58 (273A. 13)

अनन्यचेतन (ananya-cetana) *adj.* having the mind not fixed on anything else, having an unwavering mind वयं स्वामिवशाः स्थिताः। तत्कार्यैकपरं नैव जानीमोऽनन्यचेतनाः PrabhāC. 198.23.

अनन्यचेतस् (ananya-cetas) *adj.* having the mind not fixed on anything else, having an undistracted mind अनन्यचेताः सततं यो मां स्मरति नित्यशः MahāBhā. vi. 30.14 = BhagGī. 8.14 = BṛBrahmaS. i. 6.52; मत्प्रियार्थं प्रिये सीते शुश्रूषस्वानन्यचित्तया (v. l. नन्यचेतसा) Rāmā. ii. *607; अनन्यचेतसस्तस्य ध्यायतो भगवान् हरिः।··· सर्वभावगतोऽभवद् ViṣṇuP. i. 12.7; iii. 7.22; यथा ब्रह्मविदो वेधं वस्तु चानन्यचेतसः। प्रविशन्ति परं ब्रह्म

ब्राह्म VāyuP. ii. 43. 40; अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णम् ... दद्याद् द्विजपुंगवाय ।... अनन्यचेता यमदिङ्मुखः सन् MatsyaP. 61. 47; 68. 42; तयोरियं कथा यावद् वर्ततेऽनन्यचेतसोः । तावत् संप्राप्तः सुग्रीवः PadmP.(Ra.) 47. 29; अनन्यचेतसः शान्ता ब्राह्मणाः ...। उपास्य ... संध्यां प्राप्ताः पूर्वेऽपरां गतिम् KūrmaP. 577. 17 (2. 18); अनन्यचेता यो नित्यं सदा मां पर्युपासते SkandP. iii(3). 14. 63; पठन्ति ये नित्यमनन्यचेतसः शृण्वन्ति चाध्यात्मिकसंज्ञितम् ... । रामायणम् AdhyāRā. i. 1. 3; अनन्यचेताः सुभगे परं सौभाग्यमाप्नुयात् PratyabhiHr. 44. 15(18); अनन्यचेता यः स्मरति अल्पधर्मतिप्रियत्वेन GītāBh.(Rā.) 427. 4 (on 8. 14); समाहितोऽनन्यचेताः ManavaVi. 178. 26 (on 2. 104); भजनीयमनन्यचेतसा ... शिवं भजे Rāstrau. 5. 22; अनन्यचेतसां पुंसामज्ञानमवघ्नते ।... सर्वविदे नमः SatDū. 107. 2; त्वत्पदं परमनन्यचेतसः संश्रयन्ति निरपायमाश्रयम् Yādavā. 17. 98; समीहते नित्यमनन्यचेता नभस्वदात्मभरिवंशनेता RasGañ. 416. 11.

अनन्यचेतस्क (ananyacetas-ka) *adj.* whose mind is not fixed on anything else, having an unwavering mind अध्वर्युर्वाग्यमेनानन्यचेतस्को न पदार्थान् प्रमादयिष्यति ŚābaBh. 1665. 23 (on ix. 1. 24); तस्मादनन्यचेतस्का जिनमर्चयतानिशम् PadmP.(Ra.) 106. 130; जपस्वानन्यचेतस्को मय्यासक्तमना नृप KūrmaP. 227. 17(1. 20)

अनन्यचोदित (an-anyacodita) *adj.* not urged or impelled by anyone else (i. e. independent) तम् ... पूर्णमनन्यचोदितम् । ... प्रभुं प्रपद्ये BhāgP. viii. 1. 16.

अनन्यज (an-anyaja) *m.* epithet of Kāma or god of love (*lit.* not born of anyone else, self-born) कस्य वायमपहतहरहुंकारोऽहंकारो (v. l. हुंकाराहंकारो) पर इवानन्यजो युवा HarṣaC. 40. 9; (अ)नन्यजस्य नित्यमित्रम्... तारापतिः AvantiKa. 146. 9; तस्यां च तादृशीं दशां गतायां जनस्यास्यानन्यजेन हन्येत शरीरधारणाशा DaśKuC. 123. 13; अनन्यजस्य वीरोऽपि परिप्राप्तोऽतिवश्य-ताम् PadmP.(Ra.) 93. 17; मदनोऽनन्यजश्चेति व्याजहुस्तं तदाङ्गनाः MahāP. 16. 25; 35. 192; प्रवृत्ततनुतरङ्गपर्यायोत्क्षिप्तपक्षिनीदलोपलक्ष्यमाणसुकुमारावर्तामिवोचान-नदिकामनन्यजनिवासवेश्मनो जघनमण्डलस्योपरि परिस्फुरन्तीम् ... दिव्यरूपां कन्यका-मद्राक्षम् TilaMañ. 160. 13; अनन्यजस्य विधुरः कोऽप्युद्यमो जृम्भते VakroJī. 123. 16; चापत्वम् ... सेवायै जगद्गुरनन्यजस्य वल्ल्यः ŚrīKaC. 6. 59; अस्त्रावनिं नूनमनन्यजाय कदम्बकं कौरवकं व्यतानीत् YātrāPra. 3. 27; संपश्यन् गिरिश-तपोविलोपकोपव्यापन्नं सुहृदमनन्यजं वसन्तः ŚivLī. 6. 29; [Lexicons also give Madana, Kandarpa etc. as synonymous with *ananyaja* — AmaK. 51; Vaija. 5. 38; AbhidhāCin. 227; AgaNi. 26; NāmaMā. 77; Pary āŚaRa. 91; ŚabdaRa.(Vā.) 74; ParaNā. 115; KośaKaTa. 1. 231]

अनन्यज (an-anyaja) *adj.* I not belonging to (i. e. not found in) anybody else इन्दनाच(? द्रव)णिमाद्यष्टगुणैरिन्द्रो ह्यनन्यजैः MahāP. 22. 22; II not born of anybody else (than the legitimate father) नानन्यजः पितृद्वेषी ...। नाक्षुद्रविधः पापीयानिति भूतार्थसंग्रहः RājTa.(Ka.) 4. 92; III not caused by others, cf. **अनन्यजभ्रम**.

अनन्यजनप्रवेशयोग्य (an-anyajanapraveśayogya) *adj.* not fit for the entry of anybody else अयम्(रावणः) ... स्वावरोधविहारमनन्यजन-प्रवेशयोग्यमभिधावत्शोकवनिकाभ्यन्तरम् AdbhuDa. 6. 19(3)

अनन्यजनसाधारणी (an-anyajanasādhāraṇī) *adj.* (*f.*) not common to other people (i. e. uncommon, unique) सोऽपि राजा तयोः ... वाचि वपुषि चानन्यजनसाधारणीं मधुरतां निर्वर्ण्य (अचिन्तयत्) YaśasCam. i. 190. 1.

अनन्यजनसाध्य (an-anyajanasādhya) *adj.* not curable by any other person कुशलैः कृतप्रयोगं हि नेयमपनीय मानग्रहमपरमेव कंचिदनन्यजनसाध्य-माधिमुत्पादयति मनस्विनीनाम् YaśasCam. ii. 55. 7.

अनन्यजनसामान्यवृत्ति (an-anyajanasāmānyavṛtti) *adj.* not found common with other persons अनन्यजनसामान्यवृत्तिभिः ... तपःप्रारम्भैः ... भगवतः सर्वसाधुपरमेष्ठिनोऽष्टतयीमिष्टिं करोमि YaśasCam. ii. 376. 5.

अनन्यजनसुलभ (an-anyajanasulabha) *adj.* not easily available to any other person कथमिव च नावधारितमनन्यजनसुलभविलासानां संपादनम् YaśasCam. ii. 54. 7.

अनन्यजनाधेय (an-anyajanādheya) *adj.* not to be located or found in any other person धर्मश्चित्ते करे त्यागः सत्यं वक्त्रे श्रुतं श्रुतौ । यस्या-नन्यजनाधेयमेतद् भूषणतां गतम् YaśasCam. i. 211. 4.

अनन्यजनाविल (an-anyajanāvila) *adj.* not disturbed (*lit.* made dirty) by any other person मयातुरोधेन मया विलेऽनन्यजनाविले । कालोऽयमरि-सत्कालो नीयते वचनीयते RāmC. 11. 76.

अनन्यजन्मन् (an-anyajanman) *m.* god of love (*lit.* not having birth from anyone else, self-born) मा मूमुहत् खलु भवन्तमनन्यजन्मा MālaMā. 1. 283 = SaraKaṇṭhā. 613. 7 = ŚṛṅgāPra. 323. 22; दयिताम-पश्यत् । ... शरीरकृतैरेभिरनन्यजन्मा भिनत्ति चेतांसि वियोगिनीनाम् । इतीव पुष्पाण्यु-पकारभूमौ संशोषयन्ती श्वसितोष्णवातैः HarVi. 25. 45; मया किलायमनन्यजन्मा क्षत्रसमुचितेन गान्धर्वेण परिणयमार्गेण तव पाणिमग्राहयन् न विरमति SubhaDha. 3. 13(14); तैस्तैरनन्यजन्मनो रसप्रसरैः ... तया सह संवेशसुखमनुभूय ... निद्रामिवा-हमकरवम् YaśasCam. ii. 36. 6; मुल्यमायुधमनन्यजन्मनः ... सोममण्डलममण्डय-न्नमः Surath. 6. 46.

अनन्यजन्मनयनश्लाघ्या (ananyajanmanayana-ślāghyā) *adj.* (*f.*) admirable to the eyes of the god of love आतन्वानमनन्यजन्मनयनश्लाघ्या-मनर्घ्यां दशाम् KṛṣṇaKa. 1. 87 (comm. अनन्यजन्मा कामस्तस्यापि नयन-श्लाघ्याम्; but also अनन्यानामस्माकं जन्मनयनयोः श्लाघ्यां श्लाघार्हाम्)

अनन्यजन्य (an-anyajanya) *adj.* [*f.* -ā] I having no opponent in the fight निहन्तुमैच्छत् जन्योद्धतं दैत्यमनन्यजन्यः Yādavā. 20. 76 (*but* comm. अन्यैरतुल्यायः कृष्णः); II not fit for or common to ordinary persons इत्थं विधाय जलकेलिमनन्यजन्याम्...हम्मीरवीरः।... वेश्मासाद Hammī-MaKā. 6. 65; नरेन्द्रचक्रेषु विराजमानमनन्यजन्येन महामहिम्ना । ... हम्मीरदेवं स हृदीति दध्यौ HammīMaKā. 11. 50.

अनन्यजन्यसौजन्य (ananyajanya-saujanya) *adj.* having goodness not found in any other person ह्यनन्यजन्यसौजन्य ... । कथंकारं भविष्यामि प्राणदोऽप्यनृणस्तव HammīMaKā. 13. 163.

अनन्यजभ्रम (ananyaja-bhrama) *m.* I delusion not caused by others (i. e. natural delusion) सखे सखेदोऽहमनन्यजभ्रमादमूं विहातुं न ततः समुत्सहे RasiRañ. 109; II delusion caused by love or passion, RasiRañ. 109.

अनन्यजातीयप्रयोजकत्व (ananyajātīyaprayojaka-tva) *n.* the state of being that which does not lead to the effect of a different type सामान्यार्थे एव कः ...। असाधारणविशेषणादनन्यजातीयप्रयोजकत्वं च तदिति चेन्न KhaṇḍanKhā. 1079. 14.

अनन्यजानि (an-anyajāni) *adj.* [P. v. 4. 134] not having another wife श्लाघ्यस्त्यागोऽपि वैदेह्याः पत्युः ... । अनन्यजानेः सैवासीद्यस्माज्जाया हिरण्मयी RaghuVa. 15. 61; ŚṛṅgāPra. 315. 18; नायकः ... अनन्यजानिरसाधारणः SaraKaṇṭhā. 681. 16.

अनन्यजानुप्लवा (ananyajānuplavā) *adj.* (*f.*) having the god of love as an ally or a companion प्राणोऽपि ... वशिकविशिखाविहारिणीष्वनन्य-जानुप्लवासु प्रचलितास्वभिसारिकासु ... निवासस्थानमगात् HarṣaC. 126. 6 (comm. अनन्यजः कामः । अनुप्लवः सहायः)

अनन्यजुष् (an-anyajuṣ) *adj.* not serving anyone else सा च । 'सर्वा-नर्वाचीनान्निर्वास्य मनोरथानन्यजुषाम्' इति पूर्वार्धे तदनुपादानम् RasGañ. 469. 15 (comm. अनन्यजुषां स्वान्यासेवकानाम्)

अनन्यजैकरूप (ananyajaikarūpa) *adj.* having beauty only like that of the god of love अनन्यजैकरूपेण यौवनेन धनश्रिया । ... सक्तिरासीत् परं तयोः PadmP.(Ra.) 7. 169.

अनन्यज्ञातृकत्व (ananyajñātṛka-tva) *n.* the state of having no other cogniser (than the self) वस्तुतन्त्रं न हि ज्ञानं नृतन्त्रं लोकवद्धिवत् । अनन्यज्ञातृकत्वाच्च प्रत्यग्ज्ञानस्य सर्वदा BṛĀraUBhVā. i. 4. 1522.

अनन्यतनय (an-anyatanaya) *adj.* not having any other offspring श्रुत्वाद्भुतं तु तद्वाक्यमनन्यतनयो हि सन् । पुलकाङ्कितसर्वाङ्गः क्षणमासीद् विशां पतिः KathāKau. 4. 3.

अनन्यतन्त्र (an-anyatantra) *adj.* not depending on anyone else, self-dependent अनन्यतन्त्रः स्वयमेव देवान् पद्मासनादीन् प्रजनय्य रक्षन् । सः ... आसीन्नेता गवाम् Yādavā. 4. 66; अनन्यतन्त्रस्य पितुः पितामहः सुतस्य चारुध्म-वेक्ष्य संयुगम् । ... प्रक्षुभ्यमानो न निरोधमादधे Yādavā. 14. 9; 23. 13.

अनन्यतन्त्रसापेक्ष (an-anyatantrasāpekṣa) *adj.* not expecting (i. e. not depending upon) any other Tantra text करिष्ये तन्त्रपद्धतिम् । अनन्यतन्त्रसापेक्षस्वार्थसंदोहसंगतिम् ĪśānŚiPa. i. 1. 4.

अनन्यतपोवनसाधारण (an-anyatapovanasādhāraṇa) *adj.* not common to any other penance-grove इदमनन्यतपोवनसाधारणं नैमिशस्य माहात्म्यमवलोक्य KundaMā. 4. 5(2)

अनन्यतर (an-anyatara) *adj.* uniform (*lit.* not one of the two) कालः ...। अन्योऽनन्यतरोऽव्यतिक्रमगतिः सूक्ष्मोऽविभागी पुनः KalyāKā. 4. 2.

अनन्यतस् (ananya-tas) *adv.* because of not being different, because of being identical स्वरूपत्वान्न सर्वस्य त्यक्तुं शक्यो ह्यनन्यतः (आत्मा) UpadeSā. 285. 42 (comm. भेदाभावात्); आत्मनस्तु स्वतःसिद्धिरात्मसिद्धेर-नन्यतः BṛĀraUBhVā. i. 4. 727.

अनन्यता (ananya-tā) *f.* the state of not being different, identity, unification तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः NyāySū. ii. 2.32; तदभावे स्वरूपाभावात् कस्यानन्यता IṣṭaSi. 222. 14; अन्याश्रयाणां त्यागोऽनन्यता BhaktiSū.(Nā.) 1. 10; 1. 9; [Inst.] I because of being the same or not different प्रोच्यमानब्रह्मात्मभूतेनाचार्येण अनन्यतया प्रोक्ते आत्मनि अगतिः ··· नास्ति KāṭhUBh. 126. 16 (*on* 2. 8); एकमृत्पिण्डारब्धघटशरावादीनां तन्मृत्पिण्डादनन्यतया तज्ज्ञानेनैव तेषां ज्ञातता VedāntDī. 5. 4 (*on* i. 1. 1); II because of not being treated differently एकदेशविकृतस्यानन्यतया-नङ्गित्वे । सखा SiddhāKau. 64A. 3 (*on* vi. 4. 85); III as not being subservient to anything else मुमुक्षुभिरनन्यतया (ब्रह्म) वरणीयमित्यर्थः VedāntaRaMañ. 1. 4 (52. 13)

अनन्यताधी (ananyatā-dhī) *f.* notion of non-difference or oneness अनन्यताधियैव प्रत्यभिज्ञामिच्छतः क्रियायां प्रत्यभिज्ञा स्यात् NayaVi. 245. 4 (*on* i. 1. 8(¶ 20)

अनन्यतिरश्चीनता (ananyatiraścīna-tā) *f.* [Inst.] because of being that which does not move away from something, because of not being dissociated उत्पत्तावेवाङ्गयागस्वरूपस्यान्यतिरश्चीनस्य नियोगान्तराविषय-त्वात्, नियोगान्तरविषयता न स्यात् । उत्पत्तिदशायां त्वनन्यतिरश्चीनतयाभिधानादुक्तं नियोगान्तरविषयत्वम् PrakaPañ. 443. 8.

अनन्यतुल्य (an-anyatulya) *adj.* [*f.* -ā] not comparable to anything or anybody else, incomparable परात्मन् । रूपं तवाद्यं यदनन्यतुल्यम् ViṣṇuP. iii. 17. 31; राजनायिका ··· । वाचामगोचरमगोचरमेव बुद्धेरीदृक्तया न कलनीयमनन्यतुल्यम् । त्रैलोक्यगर्भपरिपूरितशक्तिचक्रसाम्राज्यसंपदभिमानमभिस्पृशन्ती BrahmāṇḍP. iii. 18.6; वन्दिघोषितशब्देन शक्त्या वानन्यतुल्यया । जनैर्दशरथो जज्ञे PadmP.(Ra.) 24. 120; राजानम् ··· भिल्लराजो व्यजिज्ञपत् । ··· मे ··· कन्यका । अनन्यतुल्या रूपेण KathāSaSāg. xviii. 4. 74; स्तुमः ··· प्रभुहेमसूरेरनन्यतुल्या-मुपदेशशक्तिम् KumāGuṇo. 34. 1; तच्छौण्डीर्यमनन्यतुल्यम् ··· । गाङ्गेयस्य मुनेः ··· व्याख्या(? ख्य)न्तः पथि पाण्डवा अपि ततो जग्मुः पुरं हास्तिनम् PāṇḍaC. 15.129; अस्याः किल भक्तवात्सल्यमनन्यतुल्यं पश्यामि Jīvān. 55. 1.

अनन्यतुल्यमहिमन् (ananyatulya-mahiman) *adj.* of incomparable greatness द्रष्टव्यस्त्वमनन्यतुल्यमहिमा मध्ये धरित्रीभृताम् TilaMañ. 240. 22.

अनन्यतुल्याकृति (ananyatulyākṛti) *adj.* of incomparable form इदानीमुदीक्ष्य दूरादनन्यतुल्याकृतिं भवन्तम् UdaySuKa. 37. 26; कुतोऽत्र समागता किमभिधाना त्रिभुवनेऽप्यनन्यतुल्याकृतिः कुमारी UdaySuKa. 69. 27.

अनन्यत्रचरितार्थ (an-anyatracaritārtha) *adj.* not having scope anywhere else एवमनन्यत्रचरितार्थमिन्द्रियमवश्यमपेक्षणीयं रूपाभावानुभवेन NyāyKuA. ii(1). 232. 9.

अनन्यत्रभाव (an-anyatrabhāva) *m.* I non-operation (i. e. non-domain) elsewhere विषयो ह्यनन्यत्रभावः । यथा चक्षुष्प्रभृतीनां रूपादिभ्योऽनन्यत्र-भावाच्चक्षुरादीनां रूपादयो विषयाः Nyās. i. 292. 13 (*on* i. 4. 45); II non-presence elsewhere (i. e. excluding a specific locus) अनन्यत्रभावो विषय-शब्दस्यार्थः । यथा मत्स्यानां जलं विषयः Nyās. i. 362. 2 (*on* ii. 1.51); i. 10. 16 (*on* i. 1. 0); i. 860. 25 (*on* iv. 1. 63); i. 967. 20 (*on* iv. 2. 125); TantrRaha. 61. 8; सोपसर्गस्य धातोरनन्यत्रभावोऽर्थः ŚivārkaMaDī. i. 21. 7 (*on* i. 1. 1); i. 128. 8 (*on* i.1. 2); i. 180. 9 (*on* i. 1. 4)

अनन्यत्रभावरूपता (ananyatrabhāvarūpa-tā) *f.* the state of having the nature of non-presence elsewhere अनन्यत्रभावरूपतानिमित्तता अत्र विषयार्थः PratyabhiVi. ii. 55. 1 (*on* ii. 2. 6)

अनन्यत्रभावविषयार्थ (ananyatrabhāvaviṣayārtha) *adj.* having the sense of domain in the form of non-presence elsewhere (ध्वनिः ···। वाक्ये संघटनायां च) वाक्य इत्येतत्कारिकायां न निमित्तसप्तमीमात्रम् । अपि त्वन्यत्र भाव-विषयार्थम् (? त्वनन्यत्रभावविषयार्थम्) अपि Loc. 132. 25 (*on* 3. 2)

अनन्यत्रभावार्थत्व (ananyatrabhāvārtha-tva) *n.* the state of having the sense of non-presence elsewhere (i. e. excluding a specific domain) इन्विषयो यः क्तस्तदीये कर्मणि सप्तमी विधेया । कश्चेन्विषयः क्तः । यस्तदन्तस्तेनैव सह प्रयुज्यत इत्यर्थः । अनन्यत्रभावार्थत्वादत्र विषयशब्दस्य Nyās. i. 418. 12 (*on* ii. 3. 36)

अनन्यत्रभाविन् (an-anyatrabhāvin) *adj.* not existing elsewhere उदारैर्गुणैरेभिस्त्वमनन्यत्रभाविभिः । स्वयमेत्य वृतो नूनमदृष्टशरणान्तरैः MahāP. 25. 50.

अनन्यत्रावकाशत्व (ananyatrāvakāśa-tva) *n.* the state of having no place elsewhere साधनधर्मे हि धूमे साध्यधर्मेणाग्निना व्याप्तेनाग्निः तत्र निवेशम-लभमानोऽनन्यत्रावकाशत्वाद् धूम एव निवेशितः NyāyMañ. ii. 139.26.

अनन्यत्रोपक्षीणेन्द्रियव्यापार (ananyatropakṣīṇendriyavyāpāra) *m.* operation of the sense-organ not ceasing to exist elsewhere अनन्यत्रो-पक्षीणेन्द्रियव्यापारानन्तरभावित्वात् NyāyKuA. ii(1). 232. 2; भूतले घटो नास्तीति प्रतीतिरिन्द्रियजन्या अनन्यत्रोपक्षीणेन्द्रियव्यापारान्वयव्यतिरेकानुविधायित्वात् TārkiRa. 102. 3.

अनन्यत्रोपलब्ध (an-anyatropalabdha) *adj.* not found elsewhere सास्नामात्रदर्शनादित्यनन्यत्रोपलब्धचेष्टमानावयवविशेषदर्शनोपलक्षणपरं को नु खल्वत्र प्राणी स्यात् Kiraṇā. 270. 17.

अनन्यत्व (ananya-tva) *n.* 1 (Gr.) the state of not being treated as a different one (from the original) एकदेशविकृतस्यानन्यत्वात् प्लुतादयः Vār. 4 *on* ŚivSū.(Gr.) 2; एकदेशविकृतस्यानन्यत्वाद् सिद्धम् Vār. 10 *on* P. i. 1. 56; Vār. 8 *on* P i. 1. 69; Vār. 10 *on* P. ii. 4. 85; न वावयवस्यानन्य-त्वात् Vār. 4 *on* P. viii. 3. 65; Vār. *on* P. viii. 3. 85; 'ऋतोः ··· इत्यूठि कृते एकदेशविकृतस्यानन्यत्वात् दिव्शब्द एवायमित्यूकारस्यौत्वं प्राप्नोति तत्र भवति Prasā. i. 216. 7; तदन्तायश्च । पाफाल्यते । पाफालीतीति । कथमत्र स्यात् । एकदेशविकृतस्यानन्यत्वात् Prasā. ii. 356. 15; रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् । अहोरूपम् । गतमहो रात्रिरेषा । एकदेशविकृतस्यानन्यत्वात् — अहोरात्रः । अहोरथन्तरम् SiddhāKau. 37B. 9 (*on* viii. 2. 69); एकदेशविकृतस्यानन्यत्वाद् वीवधादपि छन्, वैवधिकः SiddhāKau. 271A. 6 (*on* iv. 4. 17); 2A (Philo.) the state of not being different, non-difference, identity, oneness तदनन्यत्वमारम्भणशब्दादिभ्यः BrahmSū. ii. 1. 14; बीजाङ्कुराभ्यां तु अनन्यत्व-मनादिमत् PauṣkS. 38. 160; अनन्यत्वेऽन्वयाभावादन्यत्वेऽप्यनपाश्रयात् । न याति न च तत्रासीदस्ति पश्चान्न चांशवत् PramāVār. 1. 153; जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते GauḍKā. 3. 13; 4. 12; व्यक्तिलक्षणपक्षेऽपि आत्यन्यानन्यकल्पना । अन्यत्वे धर्म्यसिद्धिर्नोऽनन्यत्वेऽपि परान् प्रति ŚlokaVār. 6. 351 (819. 8); अन्यत्वं वाप्यनन्यत्वं वस्तु नैवातिवर्तते TattvSaṁ. 339; यदि शब्दार्थानामनन्यत्वं लोक-वेदयोर्भवेत् TantrVā. 242. 17 (*on* i. 3. 26); अनन्यत्वेऽपि कार्यकारणयोः कार्यस्य कारणात्मत्वम् BrahmSūBh.(Śaṅ.) 299. 10 (*on* ii. 1. 9); तस्मात्कारणात्पर-मार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते BrahmSūBh.(Śaṅ.) 308. 4 (*on* ii. 1. 14); अनन्यत्वेऽपि बालस्य कालान्तरविशिष्टं वार्धकं स्वात्मभूतमेव गन्तव्यं दृष्टम् BrahmSūBh.(Śaṅ.) 834. 6 (*on* iv. 3. 14); अनन्यत्वमधिष्ठानाद् आरो-प्यस्य निरीक्षितम् ViveCū. 408; अनन्यत्वं प्रविष्टैः स्यान्नानात्वमिति दुर्भगम् BṛĀraUBhVā. i. 4. 552; जन्मनाशयोरन्यत्वेऽनन्यत्वे च वस्तुनो न क्षणिकता IṣṭaSi. 310. 1; ब्रह्मणोऽनन्यत्वं भोग्यभोक्तृवर्गयोः सिद्धवत् कृत्वा विभागो वर्णितः अथेदानीमनन्यत्वमसिद्धमिति साध्यते BrahmSūBh.(Bhā.) 93. 2 (*on* ii. 1. 14); वृत्तिभ्योऽनन्यत्वं वृत्तिमतो नेष्यते नापि वृत्तीनामनन्यत्वं वृत्तिमतः TātpaṬ.(Vā.) 522. 21 (*on* iii. 1. 34); अन्यत्वमनन्यत्वं च द्वयं सदसत्त्वया न शक्यं दर्शयितुम् NyāyRa. 633. 9 (*on* 5(14). 78); कारणभूताद् ब्रह्मणः कार्य-भूतस्य जगतोऽनन्यत्वमभ्युपगम्य ब्रह्मणो जगत्कारणत्वमुपपादितम् BrahmSūBh. (Rā.) 419. 7 (*on* ii. 1. 15); 171. 5 (*on* i. 1. 5); न चानुन्मत्तः कोऽपि ··· तेषां स्वात्मनोऽनन्यत्वं जानंस्तेभ्यः कमप्यर्थमुपदिशति GītāBh.(Rā.) 65. 4 (*on* 2. 12); VedāntSā.(Rā.) 149. 3 (*on* ii. 1. 15); VedāntDī. 3. 16 (*on* i. 1. 1); 87. 5 (*on* ii. 1. 15); VedāSaṁ. 79. 8; 113. 7; 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति वाक्यमपि न कार्यघटादेर्मिथ्यात्वं ब्रूते किन्तु तस्य कारणभूत-मृद्द्रव्यादनन्यत्वं वक्ति NītiMā. 17. 2; न च क्षणिकस्यान्वयव्यतिरेकबुद्धिद्वयकालेऽवस्थानं संभाव्यते, अतो न कर्तृत्वम् । अनन्यत्वेऽपि तथेत्यर्थः PrakaVi. 518. 18; अत्र केचित् तदनन्यत्वं वर्णयन्ति तस्मात्कारणाद्ब्रह्मणः कार्यस्यानन्यत्वं परमार्थतो व्यतिरेकेणाभाव इति ŚrutaPra. ii. 231. 25 (*on* ii. 1. 15); जीवाद् ब्रह्मणो भेदवादिन्यः श्रुतयो जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः VedāntTaSā. 52. 2; एवं च कार्यकारणयो-रनन्यत्वमप्यारम्भणाधिकरणे प्रतिपादितमुपपन्नतरं भवति SarvaDaSaṁ. 4. 184; न केवलं चेतनानामचेतनानां चानन्यत्वे प्रमाणाभावः TattvPrakā. 87B. 7 (*on* ii. 1. 18); 87B. 13 (*on* ii. 1. 18); तयोर्जीवब्रह्मणोर्व्याप्यव्यापकभावेनानन्यत्वम् BrahmSūBh.(Śrī.) ii. 159.1 (*on* ii. 3.42); ii. 21. 3 (*on* ii. 1. 15); उपादानोपादेययोस्तृणच्छदिषोरिष्टकाप्राकारयोश्चानन्यत्वेऽपि तृणत्वच्छदिष्ट्वादिसमावेशा-विरोधः उन्नेयः ŚivārkaMaDī. ii. 24. 25 (*on* ii. 1. 16); ii. 13. 23 (*on* ii. 1. 8); [Abl. and Inst.] because of not being different, because of non-difference or identity or oneness अनन्यत्वेन वै विष्णोः परस्य परमा-त्मनः । प्रयत्नेनार्थनीयं च महतानेन देशिकः PauṣkS. 30. 196; अन्यदन्यस्मादनन्य-त्वादनन्यदित्यन्यताभावः NyāySū. ii. 2. 31; यदिदमन्यदिति मन्यसे तत् स्वात्म-नोऽनन्यत्वादन्यन्न भवति NyāyBh. 139. 6 (*on* ii. 2. 31); अथानन्यद् तथाप्य-न्यन्न भवति अनन्यत्वात् NyāyVār. 304. 4 (*on* ii. 2. 32); एकज्ञानादनन्यत्वाद् ग्राह्यग्राहकयोर्मिथः । एकत्वेन भवेज्ज्ञानम् ŚlokaVār. 5(4). 125 (303. 1); व्यक्त्यन्तरानयनेऽपि जातेरनन्यत्वाद्गुणत्वाच्चोभयमनुपपन्नम् TantrVā. 271. 5 (*on* i. 3. 26); अथोच्येतानन्यत्वेन सुतरां स्तुतिर्भवति अनन्यसंभविचरितत्वात् TantrVā. 298. 17 (*on* i. 4. 5); अन्यतिरेकपक्षे ताभ्यामनन्यत्वेन समवायस्य यदि

संबन्धान्तरकल्पनाभाव इष्यते, तदा धर्मधर्मिणो रूपानुप्रविष्टस्य तस्याभावप्रसङ्ग इत्यर्थः TātpaṬ.(U.) 157.22 (*on* 5(1). 149); स्वात्मनोऽनन्यत्वाद् ब्रह्मविषया जिज्ञासा शिष्यस्य निवर्तिता स्यात् KenUBh. 36.8 (*on* 1.4); न हि स्वभावसिद्धं वस्तु सिषाधयिषति साधनैः।… अनन्यत्वात् KenUVāBh. 69.14 (*on* 1.1); 81.11 (*on* 2.3): यत् वाक् भूतं गायति च त्रायते च, गायत्र्येव तत् गायति च त्रायते च, वाचः अनन्यत्वाद् गायत्र्याः ChāndoUBh. 160.8 (*on* iii. 12.1); 338.7 (*on* vi. 1.4); गतिश्रुतिभ्यः प्राप्यो मोक्ष इति चेत्, न, सर्वगतत्वात् गन्तृभिश्चानन्यत्वात् TaiUBh. 220.6 (*on* 1.11); 222.6 (*on* 1.11); स्रष्टुरनन्यत्वात् सृष्टानाम् BṛĀraUBh. 91.3 (*on* i. 4.6); स्याज्ज्ञानं फलवद्यस्माच्छान्तान्तःकरणे गुरौ। तस्येश्वरेणानन्यत्वाद् भूयः शान्तिरियं ततः TaiUBhāVā. 39.15(1); 184.8(2); नन्वात्मनोऽपि ज्ञानस्वरूपत्वादनन्यत्वाच्च … नैवाज्ञानं घटते NaiṣkaSi. 106.5; अन्तस्यापि मेयत्वेऽतद्धर्मत्वात्, अमेयत्वेऽप्यनन्यत्वात् न तद्वत्ता चितः IṣṭaSi. 1.11; 18.6; 77.22; 171.3; उत्पाद्यतेऽस्मादित्युत्पादो योग्यता कथ्यते सा चात्रानुमेया, अत एव तस्य वस्तुनोऽनन्यत्वात् स्वभावानुमानमिदमिष्यते NyāyMañ. i. 117.1; अथ परस्यापि वैदिकेषु पदसंदर्भेषु कुतोऽनधिगतार्थबोधनम्। अर्थान्तरान्विते स्वार्थे पदसामर्थ्यावगमाल्लोके वैदिकानां पदानां लौकिकेभ्योऽनन्यत्वादिति चेत् — तन्न TattvBi. 137.3; भवतु वा परमाणुसमूह एव भ्रूक्षेपस्तथापि समूहस्य समूहिभ्योऽनन्यत्वात् परमाणव एव TātpaṬ.(Vā.) 217.8 (*on* i. 1.10); 443.3 (*on* ii. 2.13); ननु … धर्मिणोऽनन्यत्वेन धर्मेणापीह धर्मिवद् भवितव्यम् TattvVai. 128.20 (*on* 3.13); आदित्यशरीराभिमानिनस्तु जीवात्मनो न जगत्कारणत्वम्।… रूपवत्त्वं चास्य परानुग्रहाय कायनिर्माणेन वा, तद्विकारतया वा सर्वस्य कार्यजातस्य, विकारस्य च विकारवतोऽनन्यत्वात् तादृशरूपभेदेनोपदिश्यते Bhām. 142.17 (*on* i. 1.20); सामान्यं प्रतिपिण्डं भिन्नं भिन्नेभ्योऽनन्यत्वात् पिण्डस्वरूपवत् NyāyRa. 559.18 (*on* 5(12). 53); कारणात् कार्यस्यानन्यत्वेन कारणविज्ञानेन कार्यस्य ज्ञाततयैकविज्ञानेन सर्वविज्ञानं च समीहितमुपपन्नतरम् GītāBh.(Rā.) 573.5 (*on* 13.2); गृहस्य भुवोऽनन्यत्वेन तच्छुद्धिविधानेनैव शुद्धत्वसिद्धौ पृथग्वचनम्। … तस्य मार्जनं लेपनं च प्रत्यहं कार्यमेव … इति ज्ञापनार्थम् Aparā. 264.20 (*on* 1.188); अस्मत्पक्षे गुणाद्याश्च तद्वन्तो हि विशेषतः। अनन्यत्वान्नानवस्था भेदो नाशे भवेत्तथा AnuVyā. 26A.8 (*on* 2.2); भगवतो माधवस्य भक्तः …। आत्मनोऽनन्यत्वान्न श्रूयते VedāntRaMañ. 4.10 (148.2); गुणगुणिनोरन्यत्वानन्यत्वाभ्यामनिरूपणात् NyāySu.(Ja.) 102B.5 (*on* i. 1.2); **2B** the state of being excluded from mutual negation, the state of having absence of mutual negation अनन्यत्वं स्वत्वं सर्वभावानाम् ĀtmaTaVi. 747.17 (comm. अनन्यत्वं अन्योऽन्याभावात्यन्ताभाववत्त्वमित्यर्थः); अनन्यत्वं हि भेदाभावः। अत्यन्ताभेद इति यावत् NyāySu.(Ja.) 296A.5 (*on* ii. 1.6); न ह्यनन्यत्वं भेदाभावः। किं तु दण्डदेवदत्तवत् कदाचिदपि पृथगवस्थितेरभावः ŚivārkaMaDī. i. 202.14 (*on* i. 1.10); **3** (with Loc.) the state of being solely devoted to तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि। अपि सा निर्दहेदग्निम् Rāmā. v. 53.23; **4** the state of being without a second यद्यनन्यशब्दो बहुव्रीहिरभिमतः, तदान्यशून्यत्वमनन्यत्वम् ŚrutaPra. ii. 231.28 (*on* ii. 1.15); तस्य ब्रह्मणोऽनन्यत्वं द्वितीयशून्यत्वम् LaCandr. 503.41; **5** (Rhet.) identification (of two entities owing to their similarity) भेदेऽनन्यत्वमन्यत्र नानात्वं यत्र बध्यते। तथा संभाव्यमानार्थनिबन्धेऽतिशयोक्तिगीः KāvyālaṅSāSaṁ. 2.12; अत्र तन्व्या अनन्यत्वेऽप्यन्यत्वेन घटितत्वोक्तावभेदेऽपि भेदः AlaṅkāRa. 37(41)

अनन्यत्वकथा (ananyatva-kathā) *f.* talk of the state of not being different, talk about non-difference चिदचिद्वस्तुनोरत्यन्तविलक्षणत्वादनन्यत्वकथा दूरत एव BrahmSūBh.(Śrī.) ii. 22.2 (*on* ii. 1.15)

अनन्यत्वकर (an-anyatvakara) *adj.* not causing (categorical) difference अनेकान्तो ह्यनन्यत्वकरः Vār. 9 *on* P. i. 1.69 (MahāBh. यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति)

अनन्यत्वकारण (ananyatva-kāraṇa) *n.* [Abl.] because of non-difference (कामाः) तत्र ये त्वात्मनोऽभिन्नास्तेऽनन्यत्वकारणात्। प्रमुक्तिरात्मनो नास्ति BṛĀraUBhVā. iv. 4.406.

अनन्यत्वज्ञान (ananyatva-jñāna) *n.* knowledge of non-difference or identity शिवविष्ण्वोरनन्यत्वज्ञानान्नास्त्यत्र (अन्यत्) मुक्तये BrahmP. 129.112.

अनन्यत्वदर्शनार्थम् (ananyatvadarśanārtham) *adv.* for the sake of indicating non-difference द्रष्टुरनन्यत्वदर्शनार्थं भूमैव निर्दिश्यते अहंकारेण अहमेवाधस्तादित्यादिना ChāndoUBh. 462.16 (*on* vii. 25.1)

अनन्यत्वनियामकहेतु (ananyatvaniyāmaka-hetu) *m.* cause which exclusively establishes (*lit.* regulates) non-difference अतस्तत्रान्यत्वहेत्वन्यथासिद्धावुक्तायामनन्यत्वनियामकहेतुपरत्वं द्वितीयस्य युक्तम् ŚrutaPra. ii. 233.30 (*on* ii. 1.15)

अनन्यत्वन्याय (ananyatva-nyāya) *m.* principle of non-difference प्रपञ्चस्य ब्रह्मप्रभवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेकः BrahmSūBh. (Śaṅ.) 296.10 (*on* ii. 1.6)

अनन्यत्वपक्ष (ananyatva-pakṣa) *m.* the view that maintains non-difference कथम् … अनन्यत्वपक्षेऽप्यनन्यत्वेनान्यत्वेन वा शिष्यस्योपलम्भः ŚatDū. 143.7.

अनन्यत्वप्रतिपादन (ananyatva-pratipādana) *n.* explanation of non-difference इदानीं तमेव सर्वात्मानं दर्शयति कार्यकारणयोरनन्यत्वप्रतिपादनेन ŚvetāUBh. 72.11 (*on* 1.4)

अनन्यत्वप्रदर्शन (ananyatva-pradarśana) *n.* indication of non-difference महत्त्वस्यापेक्षिकत्वशङ्कायामाह — विभुं व्यापिनमात्मानम्, आत्मग्रहणं स्वतोऽनन्यत्वप्रदर्शनार्थम् KāṭhUBh. 135.11 (*on* 2.22); ब्रह्मणः सर्वकारणतया सर्वकार्यैरनन्यत्वप्रदर्शनेन तां प्रतिज्ञामुपपादयितुं लोकेऽपि घटरुचकादिकार्याणां मृल्लोहादिकारणादनन्यत्वं दर्शयति TattvPradī. (Ci.) 44.6.

अनन्यत्वबोधकता (ananyatvabodhaka-tā) *f.* the state of being that which conveys non-difference एषां वाक्यानामनन्यत्वबोधकतामुपपादयति ŚrutaPra. ii. 251.29 (*on* ii. 1.15)

अनन्यत्वरूप (ananyatva-rūpa) *adj.* of the form of non-difference अपृथग्भावेनानन्यत्वरूपं विशिष्टाद्वैतमभेदश्रुतीनामर्थ इत्येव सूत्रकारस्याभिप्रायः ŚivārkaMaDī. ii. 31.30 (*on* ii. 1.22)

अनन्यत्ववियोग (ananyatva-viyoga) *m.* absence of non-difference or sameness (i.e. absence of eternality) अनन्यत्ववियोगेऽपि शब्दानां न विरुध्यते। अर्थप्रत्यायनं यद्वत्पाणिकम्पादिकारणम् TattvSaṁ. 1635 (TattvSaṁPañ. तत्रान्यत्वमनित्यत्वं, नान्यत्वमनन्यत्वं — नित्यत्वमिति यावत्)

अनन्यत्वविरोध (ananyatva-virodha) *m.* contradiction with non-difference किमिदं ब्रह्मोपादानत्वं ब्रह्मसमवायित्वं वा ब्रह्मपरिणामत्वं वा यत्परेणाङ्गीकारितम्। नाद्यः कल्पः। तस्यानन्यत्वविरोधात् NyāySu.(Ja.) 296A.3 (*on* ii. 1.6)

अनन्यत्वविरोधित्व (ananyatvavirodhi-tva) *n.* the state of being contradictory to non-difference यदि तद्वैलक्षण्यमनन्यत्वविरोधि तदा तद्युक्तमित्येवमनन्यत्वविरोधित्वाविरोधित्वाभ्यां संदिह्यमानं वैलक्षण्यमुपन्यस्तसंदेहस्य कारणमित्यर्थः ŚivārkaMaDī. ii. 21.17 (*on* ii. 1.15)

अनन्यत्वविरोधिन् (ananyatva-virodhin) *adj.* contradictory to non-difference यदि तद्वैलक्षण्यमनन्यत्वविरोधि तदा तद्युक्तम् ŚivārkaMaDī. ii. 21.16 (*on* ii. 1.15)

अनन्यत्वव्यवस्थापनार्थत्व (ananyatvavyavasthāpanārtha-tva) *n.* [Inst.] because of being meant for the establishment of non-difference मृद उपादानात् तद्विकाराणां घटादीनामनन्यत्वव्यवस्थापनार्थत्वेन…व्याख्यास्यमानत्वात् ŚivārkaMaDī. i. 559.31 (*on* i. 4.23)

अनन्यत्वश्रुति (ananyatva-śruti) *f.* Vedic statement about non-difference कारकव्यापारवैयर्थ्यं चानन्यत्वे। अतो वस्तुविरोधात् अनन्यत्वश्रुतयो लक्षणया नेयाः VedāntDī. 87.5 (*on* ii. 1.15)

अनन्यत्वसाधक (ananyatva-sādhaka) *adj.* which proves non-difference न हि कार्यकारणत्वमनन्यत्वसाधकम् BrahmSūBh.(Śrī.) ii. 22.2 (*on* ii. 1.15); उदाहृतश्रुतिकलापानुग्राहकस्यानन्यत्वसाधकानुमानस्य दृष्टान्तप्रसाधनार्थत्वेन उत्तरसूत्रमवतारयति ŚivārkaMaDī. ii. 22.30 (*on* ii. 1.16)

अनन्यत्वसिद्धि (ananyatva-siddhi) *f.* establishment of non-difference कारणस्य त्रिगुणात्मकस्य प्रधानस्य सच्छब्दवाच्यत्वादेव हि कार्यकारणयोरनन्यत्वसिद्धिः ŚrutaPra. iB. 175.27 (*on* i. 1.5); iB. 331.9 (*on* i. 2.23); श्रुतियुक्तिभ्यामनन्यत्वसिद्धिः TattyaPrakā. 88A.1 (*on* ii. 1.18); नन्वभेदव्याप्तेनोपादानोपादेयभावेन ब्रह्मप्रपञ्चयोरनन्यत्वसिद्धौ … स्वातन्त्र्यपारतन्त्र्यादिना वैलक्षण्यमुपपादनीयम् ŚivārkaMaDī. ii. 22.16 (*on* ii. 1.16)

अनन्यत्वादि (ananyatvādi) *adj.* non-difference (between *upamāna* and *upameya*) etc. अन्यत्वादिभिरनन्यवस्तुप्रतीतेरेव चमत्कारित्वं, न त्वनन्यत्वादिभिः। तेषामनुभवासंगतेः RasGaṅ. 419.2.

अनन्यत्वाभ्युपगम (ananyatvābhyupagama) *m.* acceptance of non-difference स्थितावपि हि समानोऽयं प्रसङ्गः, कार्यकारणयोरनन्यत्वाभ्युपगमात् BrahmSūBh.(Śaṅ.) 299.14 (*on* ii. 1.9); प्रधानस्य तु युज्यते … कार्यकारणयोश्चानन्यत्वाभ्युपगमात् सांख्यानाम् BrahmSūBh.(Bhā.) 55.1 (*on* i. 3.10)

अनन्यत्वायोग (ananyatvāyoga) *m.* impropriety of non-difference आगन्तुकस्य प्राक् सता कारणेनानन्यत्वायोगात् असत्कार्यवादपादप्रसारिकापत्तेश्च ŚivārkaMaDī. ii. 24.31 (*on* ii. 1.16)

अनन्यत्वासिद्धि (ananyatvāsiddhi) *f.* non-establishment of non-difference भेदे सत्यनन्यत्वासिद्धेः VedāntDī. 90.1 (*on* ii. 1.21); भेदे सत्यनन्यत्वासिद्धिः VedāntTaSā. 52.3 = 73.3.

अनन्यत्वोपपादन (ananyatvopapādana) *n.* explanation of non-

difference ततोऽपि कारणावस्थप्रकृतिशरीरकमेव ब्रह्म कार्यावस्थप्रकृतिशरीरकमित्यनन्यत्वोपपादनं वरम् ŚrutaPra. ii. 232.23 (*on* ii. 1. 15)

अनन्यत्वोपपादनपर (ananyatvopapādana-para) *adj.* intending to explain non-difference अतो ब्रह्मानन्यत्वमिति प्रत्यक्षादेवानन्यत्वोपपादनपरं सत्त्वाच्चापरस्येति सूत्रं व्याख्यातम्, तदत्यन्तानुपपन्नम् ŚrutaPra. ii. 234.16 (*on* ii. 1.15)

अनन्यथा (an-anyathā) *adv.* **1** not untruly or falsely, truly, really, certainly महर्षिरेष यद् ब्रूयात् तच्छ्रद्धेयमनन्यथा MahāBhā. iii. 89.22; अनन्यथाविपर्यासितन्निरोधार्थगोचरैः। हेतुत्वाच्चार्थधर्माणां पर्यायार्थो यथाक्रमम् MadhyāVi. 1. 16 (Bhāṣya अनन्यथार्थेन तथता); नित्यं क्रियापरो धीमान् ब्रह्मण्यस्सत्यविक्रमः। अनन्यथा विशुद्धात्मा ··· । श्वेतद्वीपं समायाति PauṣkS. 30. 181; क्षत्रिया ननु कुर्वन्ति सकृत् कार्यमनन्यथा PadmP.(Ra.) 32. 130; परं प्रवचनं सूक्तमाप्तोपज्ञमनन्यथा। मन्यमानो मुनिर्ध्यायेद् भावान् MahāP. 21.139; संस्थानावस्थाक्रियादि यद्यस्य यादृशं भवति। लोके चिरप्रसिद्धं तत् कथनमनन्यथा जातिः Kāvyālaṅ.(Ru.) 7.30; विष्ण्वष्टकमिदम् ··· । यः पठेत् ··· । विष्णुतुल्यस्तदा भूत्वा गङ्गां पश्येदनन्यथा BṛDharmaP. i. 55.23; गणोऽयं मामकः सिद्धो यस्त्वोपरि साधकः। जन्मान्तरेऽस्य राज्येच्छां कुर्यामहमनन्यथा RājT.(Ka.) 3.270; **2** not otherwise, not in a different manner यदभावि न तद्भावि भावि यत्तदनन्यथा Tantrākhyā. 77.11; यदभावि न तद्भावि भावि यन्न तदन्यथा (v. l. यत्तदनन्यथा) PañcT. 2.68 (245.7); अभिन्नत्वेऽपि न ग्राह्यमिति यच्चाब्रवीद् भवान्। कृतकत्वादिधर्माणां धीभेदेऽनन्यथा कथम् ŚlokaVār. 5(3). 99 (296.4); अङ्कुशं पुस्तकं तथा। पुष्पेषु मण्डलाग्रं च···। दधानां दक्षिणैर्हस्तैर्ध्यायेद्देवीमनन्यथा TantrRā. 16.10; सयत्नं तव कर्तुं तन्मनोरथमनन्यथा। अथ मामित्थमादिक्षत् क्षपारमणशेखरः RājTa.(Ka.) 3.269.

अनन्यथाकरण (an-anyathākaraṇa) *n.* not doing otherwise (i.e. not transgressing) पारिभाषिकस्य चानन्यथाकरणप्रसङ्गेन भूयः समयानपाकरणार्थं समूहक्रियामुपोद्घातत्वेनाह BālaKrī. i. 266.23 (*on* 2.189)

अनन्यथागति (an-anyathāgati) *f.* [Abl.] because of the absence of any other course left (विशेषः) खण्डितेनापि मनसा स्वीकार्योऽनन्यथागतेः AnuVyā. 45A. 9 (*on* 3.2); अनन्यथागतेर्हेतोः खण्डितेनोत्तरोत्प्रेक्षारहितेन। इदानीं भेदाभेदवादिनं विशेषमङ्गीकारयति NyāySu.(Ja.) 518B.12 (*on* iii. 2. 15)

अनन्यथात्व (ananyathā-tva) *n.* the state of not being otherwise यथा होमे तथा कार्यान्तरे शब्दार्थयोरव्यभिचारस्यानन्यथात्वात् SaṅkarKāBh. 136. 8 (*on* iii. 2. 16); अनन्यथात्वं वृत्तमात्मकर्मणामपि त्यजन् दूरत एव शंकरः। ··· ननर्त ŚivLī. 16. 23.

अनन्यथाप्राप्ति (an-anyathāprāpti) *f.* non-occurrence in any other form स्थितस्यानन्यथाप्राप्तेदृष्टिष्ट इति चोदितः AnuVyā. 55B.2 (*on* 3.4)

अनन्यथाभाव (an-anyathābhāva) *m.* not being different or otherwise स्वसाक्षात्कृते आगमानुमानशतैरप्यनन्यथाभावस्य स्वसंवेदनात् AbhinBhā. i. 281. 17 (*on* 6. 31); Kāvyānu.(He.) 76.18; अविसंवादः कालान्तरेऽपि निष्णातार्थस्यानन्यथाभावः SmṛtiCan. iii. 138. 7.

अनन्यथाभावता (ananyathābhāva-tā) *f.* the nature of not being different or otherwise किमुपादाय तथता तथतोच्यते। अनन्यथाभावतामुपादाय AbhidhSa. 12.22.

अनन्यथाभूतस्वरूप (ananyathābhūta-svarūpa) *n.* form which has not become otherwise, unaltered form तदा हेतुयोगविशेषो हेम्नोऽनन्यथाभूतस्वरूपमेव IṣṭaSi. 230. 5.

अनन्यथावक्तृ (an-anyathāvaktṛ) *adj.* not speaking falsely एकोऽपि वाध्यात्मवित्तमः। स हि सम्यग्वेत्तानन्यथावक्ता च BālaKrī. i. 28.19 (*on* 1.9)

अनन्यथावादिन् (an-anyathāvādin) *adj.* who does not speak falsely प्रकृत्या ऋजवः उपलब्धातिरिक्तवचनाशक्त्यानन्यथावादिनः, ते त्र्यवराः साक्षिणो ज्ञेयाः BālaKrī. i. 226. 8 (*on* 2. 70-71)

अनन्यथावृत्ति (an-anyathāvṛtti) *adj.* not having any activity aimed otherwise, not engaged in any other pursuit अन्येद्युरनन्यथावृत्तिरनङ्गो मय्येवेषुवर्षमवर्षत् DaśKuC. 72. 9.

अनन्यथासंभवमात्र (ananyathāsambhava-mātra) *n.* [Inst.] because of the mere absence of any other possibility भावना कर्तारमात्मसिद्ध्यर्थमनन्यथासंभवमात्रेणोपत्तर्जनीकृतमेव गमयति TantrVā. 933. 14 (*on* iii. 4.12)

अनन्यथासिद्ध (an-anyathāsiddha) *adj.* [*f.* -ā] **1** not accounted for otherwise, not explicable otherwise, not (possible to be) established in a different way or by another means, not proved or known otherwise चन्द्रशब्दादनन्यथासिद्धं यच्चन्द्रज्ञानं तदेवेदमर्थापत्तिनिरपेक्षमुपन्यस्तम् TātpaṬ.(U.) 321.19 (*on* 5(4). 65); अनन्यथासिद्धा बुद्धिः सामान्यकल्पनाबीजम् PrakaPañ. 102. 17; वक्तृत्वम् ··· यद्यपि परमात्मनि स्वरूपेण न संभवति तथाप्यनन्यथासिद्धबहुब्रह्मलिङ्गविरोधात् ··· कथंचिद्व्याख्येयम् Bhām. 157. 12 (*on* i. 1. 28); चरममनन्यथासिद्धं प्रथमावगतमन्यथयति Bhām. 190. 6 (*on* i. 2. 26); न तन्मात्रादपि त्वबाधितादनन्यथासिद्धादिति तदेवाह TātpaṬ.(Vā.) 400. 5 (*on* ii. 1. 36); अनन्यथासिद्धावन्वयव्यतिरेकौ कारणत्वमात्रे प्रमाणम् TātpaṬ.(Vā.) 505.3 (*on* iii. 1. 2); अनन्यथासिद्धाभ्यामेवान्वयव्यतिरेकाभ्यां शब्दार्थयोः संबन्धावधारणम् SaraKaṇṭhā. 661. 21; अनन्यथासिद्धस्यागमस्य बाधकसहस्रेणाप्यपनेतुमशक्यत्वात् NyāyVārPari. 375. 5; शब्दे तु नैवं भेदे प्रमाणमनन्यथासिद्धमस्तीति स्वरूपैक्यनिबन्धनैव प्रत्यभिज्ञेति वैषम्यमिति NyāyRa. 837. 17 (*on* 6. 415); अनन्यथासिद्धमनवकाशमितरद्बाधकम् BrahmSūBh.(Rā.) 18.14 (*on* i. 1. 1); अभेदस्यानन्यथासिद्धशास्त्रमूलत्वादनाद्यविद्यामूल एव भेदप्रत्ययः BrahmSūBh.(Rā.) 165. 2 (*on* i. 1. 4); 541. 4 (*on* ii. 3. 42); निर्दोषं शास्त्रमनन्यथासिद्धं प्रत्यक्षस्य बाधकमिति चेद् VedāSaṁ. 102.16; नादस्तु ··· अनन्यथासिद्धोऽन्यथासिद्धं शब्दार्थं बाधत एव Kāvyānu.(He.) 286. 15; एतेनानन्यथासिद्धान्वयव्यतिरेकानुविधायित्वमपि व्युदस्तम् KhaṇḍanKhā. 1204. 22; विमतं मिथ्याज्ञानोपादानं कार्यत्वादनन्यथासिद्धतदन्वयव्यतिरेकवत्त्वाद्वा PrakaVi. 6. 14; 131.22; अल्पशब्दस्य संख्यायां प्रयोगादर्शनाच्चानन्यथासिद्धाल्पशब्दानुगुणार्थो बहुशब्द इति ŚrutaPra. ii. 10. 16 (*on* i. 3. 7); यत्रानन्यथासिद्धप्रत्यक्षसिद्धधर्मविरुद्धधर्म आगमेन प्रतीतः ŚrutaPra. ii. 341. 14 (*on* ii. 3. 2); तत्कृतश्च जीवब्रह्मणोर्भेदः प्रत्यक्षाद्यगोचरत्वेनानन्यथासिद्धः VedāntTaSā. 58. 2; अप्रतिपन्नस्यापि प्रामाण्याभावस्यानुमाने चोक्तो हेतुः कारणाभावोऽनन्यथासिद्ध एव NyāyKu. 22.3; 52. 6; 157. 15; उपलब्धिः(? ब्धेः) अथ(? अपि) उपलम्भे प्रमाणत्वात् अनन्यथासिद्धा उपलब्धिः तथा प्रकृतात्तु ··· नैवम् - इति चेत् TarkSaṁ.(Ā.) 22. 22; मुख्यामुख्यतया तु विभागः संभवेदपि यद्यनन्यथासिद्धो लघुविधिस्सिध्येत् ŚatDū. 228. 8; 234. 22; तदभिप्राये चानन्यथासिद्धं किमपि न लिङ्गं पश्यामः NyāyPari. 17. 1; एतस्य नाभसत्वदिगुपादानत्ववादानामनन्यथासिद्धासहकारिकत्ववचनबलादाप्यायितत्वादिभिर्निर्वाहः NyāySiA. 194.17; 200. 2; ननु ज्ञानमात्रं न विरोधिबुद्धिनिवर्तकं भ्रमोत्तरं बाधकज्ञानोदयात् किन्त्वनन्यथासिद्धम् TattvCin. i. 222. 3; अनन्यथासिद्धेन सूत्रगतधर्मग्रहणेन वेदार्थैकदेशविषयः संपद्यते VivaPraSaṁ. 166.2; यथा पशुत्वजातिः यथा वा तदेकत्वम्, वृद्धव्यवहारेऽन्वयव्यतिरेकाभ्यामनन्यथासिद्धाभ्यां शब्दार्थः, तथा लिङ्गस्यापि कुतः शब्दार्थता न स्यात् NyāyMāVi. 223. 15 (*on* iv. 1. 6); मयटामनन्यथासिद्धतत्समभिव्याहारात्तु विकारित्वमर्थोऽपि तु प्राचुर्यमेवेति निश्चीयते TattvPrakā. 17B. 10 (*on* i. 1. 13); अयं तन्तुपटसंबन्धप्रत्ययश्चक्षुर्जन्योऽनन्यथासिद्धतदन्वयव्यतिरेकानुविधायित्वात् NyāySu.(Ja.) 358B. 10 (*on* ii. 2. 6); 237B. 9 (*on* ii. 1. 1); लिङ्गेनानन्यथासिद्धेन ज्ञानान्तरमुत्पद्यमानं पूर्वज्ञानमेव स्थिरीकरोति Upask. 180.10 (*on* iii. 2. 11); (लोकानाम्) तेषामनन्यथासिद्धानां भूयसामनुग्रहानुरोधेन UpaParā. 47. 23; अनन्यथासिद्धस्यानुभवस्य ··· विषयसंनिकर्षः कारणम् SiddhāLeSaṁ. 209. 7; व्युत्पाद्यमानो विपर्यस्यतीति वक्तुमशक्यमित्यनन्यथासिद्धेन व्युत्पादनेन सिद्धार्थे व्युत्पत्तिः सुदृढा भवति ŚivārkaMaDī. i. 175. 33 (*on* i. 1. 4); i. 265. 17 (*on* i. 1. 23-24); i. 321.11 (*on* i. 2. 3); अनन्यथासिद्धः पाठोऽपूर्वमपि क्रमं कल्पयति BhāṭṭDī. iv. 147. 20; VīraMi.(Bhakti.) 163. 12; तस्यापि (कर्मणः) घटादिवदनन्यथासिद्धेन्द्रियान्वयव्यतिरेकानुविधानात् प्रत्यक्षत्वसिद्धेः MānaMe. 277. 6; 278. 7; यत्र तूक्तानन्यथासिद्धतात्पर्यग्राहकाभावस्तत्र विशिष्योपदेशे ··· तात्पर्यमाचार्यैर्बोध्यते VaiyāBhū. 127.26 (*on* 26); **2** indispensable (antecedent) (used in the context of causal relation, mainly in the Nyāya-Vaiśeṣika system, to show that a cause is an invariable and indispensable antecedent of the effect) अनन्यथासिद्धं तद्भावभावित्वं तत्कार्यतामवगमयति नान्यथासिद्धम् NyāyMañ. i. 339.15; पूर्वभावि प्रत्यक्षमनन्यथासिद्धं सदसत्प्रतिपक्षमनुमानं समानविषयसमावेशाद् बाधते TātpaṬ.(Vā.) 49.8 (*on* i. 1.1); अनन्यथासिद्धप्रत्यक्षागमसमुत्थापितमुपमानमनुमानेन यदि बाध्यते NyāyVārPari. 288.2; यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् कारणम् TarkBhā.(Ke.) 28. 8; अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं वा तत्त्वम् TattvCin. ii(2). 154. 1; महदादिकं वा प्रागभावकार्यम् । अनन्यथासिद्धनियतपश्चाद्भावितत्वात् NyāySu.(Ja.) 283A. 7 (*on* ii. 1. 4); 337A.10 (*on* ii. 2.6); अनन्यथासिद्धनियतपूर्ववृत्ति कारणम्। ··· अन्यथासिद्धिशून्यमनन्यथासिद्धम् TarkKau. 7. 8; Tarkāmṛ. 4.1; एवं चानन्यथासिद्धनियतपूर्ववर्तिजातीयत्वम् ··· कारणत्वम् Upask. 49. 11 (*on* i. 2. 2); यावतां मेलनक्षणाव्यवहितोत्तरक्षणावच्छेदेन यस्य संबन्धः तावतामनन्यथासिद्धानां तद्विशिष्टं प्रति तत्कारणत्वं व्यवह्रियते GuruCandr. i. 91.21; कार्यप्राक्कालवर्तितो योऽनन्यथासिद्धकार्यव्यापकतावच्छेदकधर्मरूपो नियमः तद्रूपे हेतुत्वे । आवयोः प्रपञ्चसत्यत्वमिथ्यात्ववादिनोः तुल्ये स्वीकृते LaCandr. 364.18; 682. 16; 825. 20; तस्यानन्यथासिद्धनियतपूर्ववर्तित्वरूपतया तदभिव्यञ्जकधर्मान्तरकल्पने मानाभावात् BhāṭṭCin. i. 34. 26 (*on* i. 1. 4); अनन्यथासिद्धनियतभाव्यन्यचेतनसंनिधिकाल एव भवनशीलत्वात् Bhāsk. ii. 166. 13 (*on* ii. 4. 9)

अनन्यथासिद्धकार्य (ananyathāsiddha-kārya) *n.* effect which cannot be accounted for otherwise अगत्या हीन्द्रियाणां प्राप्तिसामान्येऽपि केषु-

चिच्छक्तिः केषुचिन्नेत्यनन्यथासिद्धकार्यदर्शनबलात् कल्प्यते NyāyKu. 83.1; न च निरवयवानां संयोगेऽपि संयुक्तप्रदेशातिरिक्तप्रदेशान्तराभावात् प्रथिमा नोपपद्यत इति वाच्यम् । अनन्यथासिद्धकार्यस्य प्रत्यक्षसिद्धत्वात् NītiMā. 43.15.

अनन्यथासिद्धता (ananyathāsiddha-tā) *f.* the state of not being established otherwise or by other means लिङ्गानामनन्यथासिद्धतां च स्मृत्या साधयति TattvPrakā. 27A.6 (*on* i. 1.28); सौम्यद्वितीयाग्नेययोः पाठस्यानन्यथासिद्धतयापूर्वक्रमबोधकत्वात् BhāṭṭDī. iv. 147.14 (*on* xi. 1.9)

अनन्यथासिद्धत्व (ananyathāsiddha-tva) *n.* I the state of not being established otherwise भेदप्रत्ययस्याप्यबाधितस्य भावादनन्यथासिद्धत्वाच्च गवादिवत् सामान्यविशेषरूपतां ब्रूमः NyāyMañ. i. 202.24; संयोगस्तावच्चिरकालमनुवर्तते प्रत्यभिज्ञानस्यानन्यथासिद्धत्वात Kiraṇā. 242.15; अथ मन्यसेऽनन्यथासिद्धत्वं बलं विवक्षित्वेदमुच्यते तेनानन्यथासिद्धेन बोधितो यदीयसाध्यस्य व्यतिरेकस्तत्त्वं बाधितविषयत्वमिति । मैवम् KhaṇḍanKhā. 933.15; कारणोत्तरस्य अनन्यथासिद्धत्वादिना मिथ्यातो गुरुतरत्वादित्यभिप्रायः SmṛtiCan. iii. 104.2; का चेयं नियतिः, किं तस्मिन् सत्येव भावः अनन्यथासिद्धत्वं वा TattvPradī.(Ci.) 322.1; (ईश्वरस्य) तस्याचित्त्वव्यपदेशश्चैतन्यस्य नित्यतिरोहिततया वेदितव्य इति मतम्, तदप्ययुक्तम्, सर्ववस्तुविरोधात् । अपरिणामित्वश्रुतेरनन्यथासिद्धत्वाच्च NītiMā. 28.1; अनन्यथासिद्धत्वं नाम तदर्थप्रमाणतां विनानुदयत्वम् ŚrutaPra. iA. 84.28 (*on* i. 1.1); i. 16.28 (*on* i. 1.1); कार्यस्यान्यथानुपपद्यमानताव्यवस्थाप्यत्वं वा अनन्यथासिद्धत्वम् TattvCin. ii(2). 156.1; (तमः) न चायमचाक्षुषः प्रत्ययः । तदनुविधानस्यानन्यथासिद्धत्वात् SarvaDaSaṁ. 10.157; अस्य लोकस्य का गतिरिति शालावत्यपृष्टेन जैवलिना आकाशं गतित्वेनोक्ता स एषोऽनन्त इति तत्रानन्तत्वस्योपसंहृतत्वात् अनन्यथासिद्धत्वम् UpaParā. 51.21; तच्च लिङ्गमनन्यथासिद्धत्वात् प्रबलम् ŚivārkaMaDī. i. 231.28 (*on* i. 1.7); i. 277.25 (*on* i. 1.26); न चैवं सौत्रामण्यां पशुपुरोडाशे ··· प्राकृतकार्यस्याप्यतिदेशात् पुनः पशुपुरोडाशयागकरणापत्तिः । ··· प्रकृते तु तत्कार्यस्यानन्यथासिद्धत्वात् युक्तं तन्त्रेण स्विष्टकृत्प्रक्षेपकरणम् BhāṭṭDī. iv. 73.3 (*on* x. 7.3); लिङ्गादीनामनन्यथासिद्धत्वात् ततः श्रुतिकल्पनं युक्तम् MayūMāli. 19.19 (*on* i. 3.1); II the state of being indispensable (antecedent) न चोपसंहारगतत्वेऽपि सर्वकारणत्वादेरनन्यथासिद्धत्वं प्राबल्ये हेतुः UpaParā. 51.2; अनन्यथासिद्धत्वे सति कार्याव्यवहितप्राक्कालावच्छेदेन कार्यव्यापकत्वे इत्यर्थः GuruCandr. i. 286.14; LaCandr. 188.7; यद्यप्यन्यथासिद्धस्याप्युक्तावधित्वमस्ति, तथाप्यनन्यथासिद्धत्वस्यापि निवेश्यत्वाद्दण्डरूपात् घट इत्यादेर्नापत्तिः LaCandr. 760.26; तण्डुलविक्लित्त्यादिरूपकफलव्यवहितस्यापि तुषादिप्रक्षेपस्य तत्करणदशायां पचतीत्यादिव्यवहारानुरोधेन यथानन्यथासिद्धत्वं तथा खड्गप्रक्षेपादिकरणदशायां हन्तीति व्यपदेशानुरोधेन तत्र व्यवहितस्यापि मरणेऽनन्यथासिद्धत्वमवश्याभ्युपेयम् VyutpaVā. 162.3; वस्तुतस्तु जन्यत्वापेक्षया अनन्यथासिद्धत्वस्याप्रवेशेन प्रयोज्यत्वस्य लघुतया पदजन्यपदार्थोपस्थितेर्न हेतुत्वम् BhāṭṭCin. i. 53.19 (*on* i. 1.4); (नियतपूर्वभावं कारणं नियतपरभावं च कार्यम्) नियत इत्यत्र अनन्यथासिद्धत्वमपि योजनीयम् Bhāsk. ii. 188.16 (*on* ii. 4.14)

अनन्यथासिद्धत्वाभाव (ananyathāsiddhatvābhāva) *m.* absence of the state of not being established otherwise or by other means उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेः अनन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् TattvCin. iv(2). 478.2; ŚivārkaMaDī. i. 277.25 (*on* i. 1.26)

अनन्यथासिद्धदण्ड (ananyathāsiddha-daṇḍa) *m.* staff which is indispensable (antecedent) दण्डाद् घट इत्यादौ घटं प्रत्यनन्यथासिद्धदण्डघटितो यः समूहस्तदव्यवहितोत्तरसंबन्धाभिन्ना या उत्पत्तिः तद्वान् घटः LaCandr. 760.27.

अनन्यथासिद्धधीबल (ananyathāsiddhadhī-bala) *n.* strength of the notion which is otherwise inexplicable शब्दप्रतिपाद्यत्वादेरप्यनन्यथासिद्धधीबलेन स्ववृत्तित्वाच्च Nyāyāmṛ. 417A.1.

अनन्यथासिद्धपूर्वभावित्व (ananyathāsiddhapūrvabhāvi-tva) *n.* the state of not being an indispensable antecedent अनन्यथासिद्धपूर्वभावित्वमिति चेन्न KhaṇḍanKhā. 1202.16.

अनन्यथासिद्धपौर्वापर्य (ananyathāsiddha-paurvāparya) *n.* indispensable anterior-posterior relation संयोगविभागयोरनन्यथासिद्धपौर्वापर्यनियमलक्षणः कार्यकारणभावोऽप्यस्तु Kiraṇā. 233.14.

अनन्यथासिद्धप्रतिपत्ति (ananyathāsiddha-pratipatti) *f.* (act of) disposal which cannot be accounted for otherwise 'अपः प्रणयति' (इत्यत्र) ··· निनयनस्यार्थकर्मत्वात् प्रयोजकत्वमिति प्राप्ते — द्वितीयादिसंयोगादाकीर्णकराणां प्रतिपत्तिरेवेयम् । न च शेषाभावः ···। अनन्यथासिद्धप्रतिपत्तेरेव धारणप्रयोजकत्वात् BhāṭṭDī. ii. 114.9 (*on* iv. 2.5); अनन्यथासिद्धप्रतिपत्तिविधिबलादेव दक्षिणादानप्राक्कालभाविकण्डूयनस्यैव कार्यत्वावधारणात् BhāṭṭDī. ii. 118.8 (*on* iv. 2.7)

अनन्यथासिद्धप्रत्यक्ष (ananyathāsiddha-pratyakṣa) *n.* perception/ knowledge which cannot be explained otherwise न च तारत्वादीनां स्वाभाविकत्वं विरुद्धत्वं चासिद्धं मन्दस्तारो गकारस्तारान्मन्दोऽन्य इत्यनन्यथासिद्धप्रत्यक्षात् तत्सिद्धेः TattvCin. iv(1). 379.9.

अनन्यथासिद्धप्रत्यभिज्ञा (ananyathāsiddha-pratyabhijñā) *f.* recognition which is otherwise inexplicable अनन्यथासिद्धप्रत्यभिज्ञाबलादशेषशाखाप्रत्ययमेकमेवाग्निहोत्रादिकर्मेति शाखान्तराधिकरणे स्थापितम् CaturCin. iii(1). 750.17.

अनन्यथासिद्धप्रत्यभिज्ञान (ananyathāsiddha-pratyabhijñāna) *n.* recognition which is otherwise inexplicable वस्तुतस्तु अनन्यथासिद्धप्रत्यभिज्ञानबलेनाभेदसिद्धौ प्रतिनियतव्यञ्जकव्यङ्ग्यत्वसाधकस्यैव बलवत्त्वम् TattvCin. iv(1). 423.1.

अनन्यथासिद्धप्रमाणद्वय (ananyathāsiddhapramāṇa-dvaya) *n.* pair of means of valid knowledge which is otherwise inexplicable अतोऽनन्यथासिद्धप्रमाणद्वयबलेनोभयोरपि वाच्यत्वावधारणात् तुल्यबलत्वेन विकल्पः MīmāKau. i. 73.8 (*on* i. 3.9)

अनन्यथासिद्धप्रयोग (ananyathāsiddha-prayoga) *m.* use (of a word) which is not otherwise explicable न च संभूतिविनाशशब्दयोः सप्रपञ्चनिष्प्रपञ्चब्रह्मणि स्वारस्यम्, नाप्यनन्यथासिद्धप्रयोगः ŚrutaPra. ii. 501.27 (*on* iii. 3.34); अनन्यथासिद्धप्रयोगबलात्संज्ञारूपेण पृथक्शक्तिरवश्यं कल्पनीया MayūMāli. 604.24 (*on* ix. 2.5)

अनन्यथासिद्धप्रयोजनवत्त्व (ananyathāsiddhaprayojanavat-tva) *n.* the state of having a purpose which is otherwise inexplicable बाधितार्थस्यानन्यथासिद्धप्रयोजनवत्त्वाभावात् GuruCandr. i. 322.5.

अनन्यथासिद्धप्रायश्चित्तविधि (ananyathāsiddha-prāyaścittavidhi) *m.* injunction for expiatory rite which is otherwise inexplicable नाभुक्तं क्षीयते कर्मेति स्मृतिरुत्सर्गतो भोगेनैव क्षयमाह, अनन्यथासिद्धप्रायश्चित्तविधिना सा बाध्यते TattvCin. ii(2). 192.16.

अनन्यथासिद्धफलसंभव (ananyathāsiddhaphala-sambhava) *m.* possibility of a result which is otherwise inexplicable स्वपदस्य ··· अनन्यथासिद्धफलसंभवे विफलकत्वापादनायोगात् ŚivārkaMaDī. i. 201.32 (*on* i. 1.10)

अनन्यथासिद्धब्रह्मलिङ्ग (ananyathāsiddha-brahmaliṅga) *n.* characteristics of Brahman which are otherwise inexplicable तस्मादनन्यथासिद्धब्रह्मलिङ्गानुसारतः । एकवाक्यबलात् प्राणजीवलिङ्गोपपादनम् Bhām. 159.22 (*on* i. 1.28); अनन्यथासिद्धब्रह्मलिङ्गानुसारेणेतरेषामन्यथासिद्धिवत् ··· पुनरुक्तिं शङ्कते VedāntKa. 127.17 (*on* i. 1.28)

अनन्यथासिद्धमन्त्रान्तर (ananyathāsiddha-mantrāntara) *n.* other *mantras* which cannot be justified otherwise आग्नेयादीनामग्नेरहमित्याद्यनन्यथासिद्धमन्त्रान्तरावरोधेन लिङ्गप्रकरणाभ्यां सर्वार्थत्वासंभवेन MayūMāli. 239.19 (*on* iii. 3.5)

अनन्यथासिद्धयुक्ति (ananyathāsiddha-yukti) *f.* reasoning which is otherwise inexplicable नन्वेवमुदयनादीनामिव स्वरूपसहकारिव्यतिरिक्तशक्त्यभावः प्रसक्त इति चेत् अनन्यथासिद्धयुक्तिवशादागमबलाद्वा तत्सिद्धेः NyāyPari. 505.4.

अनन्यथासिद्धरूपप्रत्यभिज्ञान (ananyathāsiddharūpa-pratyabhijñāna) *n.* recognition of the form which is otherwise inexplicable अनन्यथासिद्धरूपप्रत्यभिज्ञानाच्छाखाभेदेऽपि कर्म न भिद्यते NyāyMāVi. 108.8 (*on* ii. 4.2)

अनन्यथासिद्धलिङ्ग (ananyathāsiddha-liṅga) *n.* I grammatical gender which is otherwise inexplicable सिंहः सिंहीत्यादावनन्यथासिद्धलिङ्गप्रतीतिः शब्दस्य वाचकत्वं कल्पयति ŚāstrDī. 354.7 (*on* iv. 1.6); सिंहः सिंही इत्यादावनन्यथासिद्धलिङ्गप्रतीतेर्लिङ्गमपि क्वचित् टाबादीनाम् ··· वाच्यम् BhāṭṭDī. ii. 92.10 (*on* iv. 1.6); II characteristic mark which is otherwise inexplicable रुद्रेन्द्रादिश्च यत्र स्फुरति परतयानन्यथासिद्धलिङ्गैः तत्तत्त्वैर्विशिष्टो हरिरखिलतनुस्तासु विद्यासु वेद्यः TattvMu. 3.9 (comm. रुद्रेन्द्रादिग्रहणमन्तरान्वयमलभमानैः लिङ्गैः धर्मैः); III inferential cause which cannot be justified otherwise श्रुत्यनन्यथासिद्धलिङ्गाभ्यां लिङ्गान्यथासिद्ध्यनन्यथासिद्धिभ्यां वा पूर्वोत्तरपक्षकोटिद्वयमित्यभिप्रेत्य संशयं दर्शयति ŚivārkaMaDī. i. 264.20 (*on* i. 1.23-24); i. 499.21 (*on* i. 3.41); अनन्यथासिद्धलिङ्गसद्भावे हि नित्यानुमेयवस्तुसिद्धिः MayūMāli. 19.18 (*on* i. 3.1); IV force of the word which is otherwise inexplicable, cf. **अनन्यथासिद्धलिङ्गोपष्टब्ध**.

अनन्यथासिद्धलिङ्गोपष्टब्ध (ananyathāsiddhaliṅgopaṣṭabdha) *adj.* supported by the force of the word which is otherwise inexplicable 'इमाम् अगृभ्णन् रशनाम्' इत्यादिनानन्यथासिद्धलिङ्गोपष्टब्धप्रकरणवशेनैव क्रत्वङ्गत्वसंभवे

वाक्येनाङ्गत्वकल्पनायोगः BhāttDī. ii. 136.9 (*on* iv. 3.12); ii. 321.21 (*on* vi. 7.8); iii. 19.19 (*on* viii. 2.2)

अनन्यथासिद्धवाक्यान्तर (ananyathāsiddha-vākyāntara) *n.* other (Vedic) sentence which is otherwise inexplicable न चास्मिन् वाक्ये विधानाभावादीपदे शिकार्थाधिगमालम्बनसंशीलनयोः सिद्धिः शङ्कनीया, 'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं पाण्डित्यं च निर्विद्याथ मुनिः' इत्यनन्यथासिद्धवाक्यान्तरसिद्धत्वात् ŚrutaPra. iA. 58.3 (*on* i. 1.1)

अनन्यथासिद्धव्यवहार (ananyathāsiddha-vyavahāra) *m.* (daily) activities or transactions (of the family) which are otherwise inexplicable सा च (अनुमतिः) क्वचिद्वाचनिकी क्वचिदनन्यथासिद्धव्यवहारगम्या BālamBha. ii. 245.31 (*on* 2.138)

अनन्यथासिद्धशब्दबल (ananyathāsiddha-śabdabala) *n.* force of the words which is otherwise inexplicable तत्त्वज्ञानाददत्तफलान्येव कर्माणि प्रायश्चित्तादिव विनश्यन्ति अनन्यथासिद्धशब्दबलात् TattvCin. ii(2). 191.16.

अनन्यथासिद्धशब्दानुविधान (ananyathāsiddha-śabdānuvidhāna) *n.* subsequent conformation on (hearing) the word which is otherwise inexplicable न च शब्दानन्तरं प्रत्यक्षेण तयोरुपस्थितिः तत्र हेतुर्न शब्द इति वाच्यम्। अनन्यथासिद्धशब्दानुविधानात् इमे रजतखण्डे इति स्वकीयं यथार्थज्ञानमनादृत्य तत्रैवेमे रङ्गरजते इति प्रतारकवाक्ये विश्वासेन प्रवृत्तिनिवृत्तिदर्शनाच्च TattvCin. i. 521.5.

अनन्यथासिद्धशास्त्र (ananyathāsiddha-śāstra) *n.* scripture which is otherwise inexplicable भेदप्रतीतेरन्यथासिद्धत्वादनन्यथासिद्धशास्त्रावगतमैक्यं तात्त्विकमित्यर्थः ŚrutaPra. iB. 146.13 (*on* i. 1.4)

अनन्यथासिद्धसामग्री (ananyathāsiddha-sāmagrī) *f.* indispensable (causal) aggregate ज्वालैक्यप्रत्यक्षं तु ... अनन्यथासिद्धसामग्र्यनुवृत्त्यादिहेतुबलात् ... बाध्यतामनुभवति ŚatDū. 210.25.

अनन्यथासिद्धहेतु (ananyathāsiddha-hetu) *m.* reason which is otherwise inexplicable तत्र हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य प्रतिज्ञांशस्य प्राचीनभाष्यैणैव व्याख्यातत्वात् सौत्रमनन्यथासिद्धहेतुमेव व्याचष्टे। नेतर इति TattvPrakā. 19B. 11 (*on* i. 1.16)

अनन्यथासिद्धहेत्वन्तर (ananyathāsiddha-hetvantara) *n.* another reason which is otherwise inexplicable विरिञ्चादय स्वानन्दमयादयः सन्तु तत्प्रापकसद्भावात्। न चोक्तहेतुभ्यस्तद्दूषणम् ...अनन्यथासिद्धहेत्वन्तरस्य चाभावादित्यत आह न चेति TattvPrakā. 19B. 9 (*on* i. 1.16)

अनन्यथासिद्धानन्तर्यनियम (ananyathāsiddhānantaryaniyama) *m.* restriction regarding the subsequent occurrence (of an effect) which is otherwise inexplicable अतोऽनन्यथासिद्धानन्तर्यनियमाधिगमादन्यत्रैवात्रापि स्वानन्तरभाविविशिष्टवाक्यार्थबोधं प्रति करणत्वं प्रत्यक्षत एव सिद्धम् ŚatDū. 168.6.

अनन्यथासिद्धानुमान (ananyathāsiddhānumāna) *n.* inference which is otherwise inexplicable तदेवमागमस्यार्थान्तरलब्धावकाशस्य नान्[न]न्यथासिद्धानुमानाद्यपबाधने सामर्थ्यसंभवः NyāyMa. 7.6.

अनन्यथासिद्धानेकश्रुति (ananyathāsiddhānekaśruti) *f.* many scriptural statements which are otherwise inexplicable अनन्यथासिद्धानेकश्रुतिगणप्रतिपन्नस्य ब्रह्मविभूत्यादेः ... बाधो न युक्तः ŚatDū. 214.5.

अनपभ्रंशरूपत्व (anapabhraṁśarūpa-tva) *n.* the state of not being a corrupt form यास्त्वेताः ... संज्ञाः ... टिघुमादयः। कथं तु तासां साधुत्वम्...। अनपभ्रंशरूपत्वात् नाप्यासामपशब्दता। हस्तचेष्टा यथा लोके तथा संकेतिता इमाः PadMañ. *on* KāśiVṛ. *on* P. i. 1. 0.

अनपभ्रंशसंस्कृतप्राकृता (an-apabhraṁśasaṁskṛtaprākṛtā) *adj.* (*f.*) other than Apabhraṁśa, Sanskrit and Prakrit ज्ञात्वा देवीप्रसादेन त्यक्तभाषात्रयोऽप्यहम्। पैशाचीमनपभ्रंशसंस्कृतप्राकृतां श्रितः BṛKathāMañ. i. 3. 51.

अनपभ्रंशिन् (an-apabhraṁśin) *adj.* not falling or slipping down तदाहुरपभ्रंशी यज्ञक्रतुरीश्वरः पुरायुषोऽमुं लोकमेतोरिति। तथत् प्रत्यवरोहीणि स्तोत्राणि भवन्ति तेनानपभ्रंशी तेनो आयुष्यः JaimiBr. 2. 290.

अनपभ्रष्ट (an-apabhraṣṭa) *adj.* 1 (word) not corrupt न लोकवेदाभ्यां कश्चिद् व्याकरणादृते। वाचकाननपभ्रष्टान् यथावज्ज्ञातुमर्हति TantrVā. 227. 6 (*on* i. 3. 24); यानि नामान्यनपभ्रष्टानि न पुनरिदानींतनान्यशक्तिजानि गाव्यादीनि ManuBh. i. 18. 26 (*on* 1. 21); गोणीशब्दस्यापि आवपनवाचिनोऽनपभ्रष्टस्य गवि साधुत्वापत्तेः MīmāKau. i. 124. 10 (*on* i. 3. 25); 2 not falling down ब्रह्मलोकमविच्युतोऽनपभ्रष्टः प्राप्नोति Aparā. 389. 16 (*on* 1. 212)

अनपभ्रष्टता (anapabhraṣṭa-tā) *f.* the state of not being a corrupt (word) (टिघुभादीनाम्) तदेवमनादिरनपभ्रष्टता साधुत्वमिति स्थितम्। ... अपर आह ... अनपभ्रष्टतानादिर्वृद्धाभ्युदययोग्यता। व्याक्रिया व्यञ्जनीया वा जातिः कापीह साधुता PadMañ. *on* KāśiVṛ. *on* P. i. 1. 0.

अनपभ्रष्टत्व (anapabhraṣṭa-tva) *n.* the state of not being a corrupt (word) साधुत्वं चानादिवाचकत्वम्, अनपभ्रष्टत्वं वा BhaṭṭDī. i. 52. 2 (*on* i. 3. 8); (टिघुभादीनाम्) तेषामनादित्वपक्षेऽनपभ्रष्टत्वादिलक्षणान्तरपक्षे वा तेषामपि साधुत्वं भाष्यादिसिद्धम् VaiyāBhū. 163. 10 (*on* 31)

अनपभ्रष्टपद (anapabhraṣṭa-pada) *n.* uncorrupt word अभियुक्तानां तावदप(? दनप)भ्रष्टपदेषु गोशब्दादिषु साधुशब्दप्रयोगाद् वर्णमात्रादिना अपभ्रष्टेषु च गाव्यादिषु असाधुशब्दप्रयोगात् MīmāKau. i. 123. 20 (*on* i. 3. 25)

अनपभ्रष्टसंबन्धग्रहणसंस्कार (anapabhraṣṭa-sambandhagrahaṇa-saṁskāra) *adj.* whose impression about the cognition of the relation (between a word and its meaning, i. e. convention) has not been lost यस्त्वनपभ्रष्टसंबन्धग्रहणसंस्कारः, स पदं श्रुत्वा नूनं तावदिदं स्मरति — इदमस्याकाङ्क्षित-संनिहित-योग्य-प्रतियोग्यन्वितस्य वाचकमिति PrakaPañ. 402. 2.

अनपभ्रष्टस्मरणपरंपरा (anapabhraṣṭa-smaraṇaparamparā) *f.* unbroken tradition (handed down) by memory तदेतुभूते सगोत्रत्वेऽपि परमशिष्टैर्यथा व्रियमाणतयानुवृत्तिरनपभ्रष्टस्मरणपरंपरामूलककल्पसूत्रनिबद्धैव VīraMi. (Saṁskāra.) 611. 4; 611. 20.

अनपयति (an-apayati) *adv.* in the early morning, before (the sun) rises प्रातरवेऽनपयति TrikāŚe. iii. 4. 2.

अनपयात् (an-apayāt) *adj.* not going or moving away ततश्चारभ्य ... चक्षुर्गोचरादनपयान्तौ ... सततं पार्श्ववर्तिनौ कुमारयोस्तौ बभूवतुः HarṣaC. 199. 2.

अनपर (an-aparā) *adj.* 1 not having an end स वा एषोऽपूर्वोऽनपरो यज्ञक्रतुर्यथा रथचक्रम् AitBr. 14. 5 (408) (Sāy. स एषोऽग्निष्टोमः पूर्वापररहितः पूर्वं आदिरपरोऽन्त आधन्तरहितः); अपूर्वमनपरम् आधन्तशून्यम् ... ब्रह्म TattvPrakā. 153B. 11 (*on* iii. 2. 12); 2 not followed by anything तदेतद् ब्रह्मापूर्वमनपरमम(? न)न्तरमबाह्यम् ŚatBr. XIV. v. 5. 19; BṛĀraU. ii. 5. 19; नास्मापरं कार्यं विद्यते इत्यनपरम् BṛĀraUBh. 346. 4 (*on* ii. 5. 19); अपूर्वेऽनपरे ... स्वे स्वरूपे अमृतः समभवत् AitUBh. 284. 11 (*on* 4. 6); ŚvetāUBh. 243. 12 (*on* 6. 20); SanatBh. 189. 7 (*on* 1. 6); प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः। अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः GauḍKā. 1. 26; अपरोऽहमनपरोऽहं बहिरन्तश्चापि पूर्ण एवाहम्।... अहैवाहं परं ज्योतिः SarvaVeSāSam. 869; त एते कर्माणि विज्ञानमयश्च आत्मा ... ब्रह्मणि ... अपूर्वेऽनपरेऽनन्तरे ... एकीभवन्ति MuṇḍUBh. 358. 15 (*on* iii. 2. 7); यच्चकास्त्यनपरम् ... ब्रह्म तत्त्वमसि VivеCū. 264; BṛĀraUBhVā. i. 4. 817; अपूर्वानपरानन्तं त्वमा तदुपलक्ष्यते NaiṣkaSi. 191. 7; असंवृतमपूर्वमनपरमनन्तमबाह्यं तदश्नाति किंचन न तदश्नाति किंचन LiṅgaP. ii. 9. 53; परं कार्यमस्य न विद्यते इत्यनपरम् VedāntKa. 376. 20 (*on* iii. 2. 11); 96. 23 (*on* i. 1. 4); अपूर्वानपरं ब्रह्म नोपादानं जगत्स्थितेः VedāntSiSūMañ. 1. 27; 3 not having another or a second, unique तदेतद् ब्रह्मापूर्वमपरमनपरमनन्तरमबाह्यम् ŚāṅkhāĀ. 13. 1 (47. 7); 4 that which has nothing else as superior प्रकृतिपुरुषयोः साधर्म्यवैधर्म्ये व्याख्यास्यामः तथथा उभावप्यनादी उभावप्यनन्तौ ... उभावप्यनपरौ SuśruS. iii. 1. 9.

अनपरगिर् (anapara-gir) *f.* statement (about Brahman) 'not followed by anything' अपूर्वमिति कार्यत्वनिषेधायाभिधीयते। कारणत्वनिषेधाय तथानपरगीरियम् BṛĀraUBhVā. ii. 5. 139.

अनपरप्रबन्धदर्शिन् (an-aparaprabandhadarśin) *adj.* not looking into (i. e. reading) others' compositions अमन्त्रशीलो महीपतिरनपरप्रबन्धदर्शी कविः ... न चिरं नन्दति BālRā. 7. 1(4)

[1]अनपरागतरा (anaparāga-tarā) *adj.* (*f.*) from whom love has not at all gone (i. e. extremely attached) उत्कण्ठा विलसदुज्ज्वलपत्रराजिरामोदभागनपरागतरातिगौरी। ... नले सा वासार्थितामभृत काञ्चनकेतकीव NaiṣC. 12. 110 (comm. अपगतोऽनुरागो यस्याः एवंभूता न भवति अतितरामनपरागतरां नलेऽतितरामनुरागिणी)

[2]अनपरागतरा (anaparāga-tarā) *adj.* (*f.*) from which the pollen-dust has not at all gone (i. e. having pollen-dust in plenty), NaiṣC. 12. 110 (comm. न विद्यते परागः पुष्परजो यस्याम्, एवंविधा न भवति। नितरामनपरागा अनपरागतरा। अतितरां परागसहिता)

[1]अनपरागता (anaparāga-tā) *f.* the state of not having the absence of attachment, extreme attachment प्रियावक्त्रं च तच्चापि (सहस्रपत्रं) वीक्ष्य ... पाण्डवेयाः ... द्वयोरपि तयोरत्त यद्यप्यनपरागता। तथाप्यधिकसौरभ्यं मेनिरे ते प्रियाननम् PāṇḍaC. 8. 405.

[2]अनपरागता (anaparāga-tā) *f.* the state of being that which has not lost pollen-dust (i. e. the state of having plenty of pollen-dust), PāṇḍaC. 8.405.

अनपराजित् (ana-parājit) *m.* epithet of Śiva (*lit.* controller of beings) वासुदेवार्जुनौ शर्वं तुष्टुवाते ... नमः ... महादेवाय ... शंभवे व्याधायानपराजिते MahāBhā. vii. 57.51 (BhārBhāDī. अनान् प्राणिनः पराजयतीति अनपराजित् सर्वभूतोत्तमत्वात्)

अनपराद्ध (án-aparāddha) *adj.* [*f.* -ā] 1 (inanimate) free from blemish एतद्वा अनपराद्धं नक्षत्रं यत् सूर्यः ŚatBr. II. i. 2.19; अनपराद्धा वै वाग् युधा ह्येव कुधा च प्रतिगृणाति वाचैव प्रतिगृणाति ŚatBr.(K.) V. iii. 3. 8; 2 (animate) who has not committed a sin or fault or offence त्वयैकेनापराद्धं मे सीतामाहरता बलात्। वधायानपराद्धानामन्येषां तद् भविष्यति MahāBhā. iii. 268. 12; अम्ब ! अनपराद्धोऽहमभिवादये Prati. 3. 15 (4); 6. 15(18); यथैवम् अनपराद्धा अद्रे उत्तिष्ठ Mālavikā. 3.17(17); अनपराद्धः खल्वयं तपस्वी BhagAjju. 8. 1; स्मर्तव्यं तु सौजन्यमस्य नरपतेर्येदपराधिनोऽप्यनपराद्धयोरिव नौ सांप्रतं चेष्टितवान् MālaMā. 8. 177; अनपराद्धस्य यथाप्रकृति द्रव्यदेवताभजने प्राप्ते, अपराधे निमित्ते नैमित्तिको भजनवियोगः शिष्यते TupṬ. (ASS. Ed.) 1463. 20 (*on* vi. 5. 11); अनपराद्धं किल शैशवम् CaṇḍaKau. 3. 26(19); 4. 33(6); (वस्तुगतक्रमविहितो ... कपटोऽत्र विज्ञेयः) यत्रानपराद्ध एव वञ्चकेन बध्यते स एवमुक्तः AbhinBhā. ii. 439. 14 (*on* 8. 71); Kāvyānu.(He.) 384.14.

अनपराद्ध (an-aparāddhá) *n.* absence of fault or harm यदुदङ् तत् प्रजायाअनपराद्धं त्वेव यजमानस्योर्ध्वा ह्येव पिन्वति ŚatBr. XIV. ii. 2.28 [but PW., MW., *adv.* without injury]

अनपराद्धेषु (anaparāddheṣu) *adj.* having the arrows free from blemish, having efficacious arrows लक्ष्ये स्थिरे चले दूरेऽनपराद्धेषुमर्जुनम्। पश्यञ्जज्ञे सकर्णोऽपि कर्णो मनसि मत्सरी PāṇḍaC. 3. 274.

अनपराध (án-aparādha) *m.* absence of defect or fault, perfection देवेभ्यो जुष्टमिह बर्हिरासद इत्याह। बर्हिषस्समृद्धयै। कर्मणोऽनपराधाय TaiBr. III. ii. 2. 3 (Bhaṭṭa Bhāskara अवैकल्याय); एतस्यां वेलायां वरान् वृणीरन् मनसा यानिच्छेयुः। अभयं धानञ्जय्यः सर्वकामानपराधात् DrāhyŚS. ix. 4. 20 (comm. अपराधः प्रच्युतिः); [Loc.] without any fault निरीक्षमाणं तं दृष्ट्वा सहायं तस्य रक्षसः।... यस्मादनपराधं (v. 1. °धे Baroda Ed. vii. 57.16) तं सहायं मम जघ्निवान् Rāmā. vii. 65. 16; अयत्नसाध्या योषितस्त्विमाः ... अनपराधे विमानिता KāmSū. 262. 11 (5. 1) (comm. अनपराध इति दोषं विना भर्त्रावमानिता परिभूता न तत्र सज्जते); KandaCū. v. 1. 52; जघ्निमोऽनपराधेऽपि नरान्नक्तंदिवं वयम् Bhaṭṭi. 4. 39; अत्रानपराधेऽपि निष्कासयतो रामस्यानुपालम्भाद् सीताया औदार्यं प्रतीयते RasāSu. 52. 12 (1. 198); अनपराधे वस्तुपालो न पीडयति कांचिद् PrabaK. 126.28; [Inst.] without any fault (i. e. with fault-

less effort) अतश्चानपराधेन व्यज्यमानेषु साधुता। सापराधेष्वसाधुत्वं व्यवस्थैवं च तत्कृता TantrVā. 223.11 (*on* i. 3. 22); NyāyRa. 891.11 (*on* 7. 161)

अनपराध (an-aparādha) *adj.* [*f.*-ā] **1** faultless, innocent (अनागाः) अप्यनपराधो भीतः पलायते वर्षकर्मवतो यत् पर्जन्यः स्तनयन् हन्ति दुष्कृतः पापकृतः Nir. 10. 11(177. 10) = Sāy. *on* RV. v. 83. 2; नगरनिवासिनां विप्रेतराणामपि परिग्रहा अनपराधाः ŚaṅkhalikhitaDS. 255; त्वयैवैतानपराद्धं मे सीतामाहरता बलात्। वधायानपराद्धा(v. l. धा)नामन्येषां तद् भविष्यति MahāBhā. iii. 268. 12; अनपराधं तं सहायं मम जघ्निवान् Rāmā. vii. 65. 16; अनपराधोऽहं त्वया हास्तस्था विभो। कुरु प्रसादं भगवन्स्वशरीरासवे पुनः MatsyaP. 4. 16; प्रथममनपराधां तां समुत्सृज्य देवीमगममहमगाधे काननं लक्ष्मकाम: KundaMā. 3. 1; DaśKuC. 74. 7; अनपराधानां दण्डनं प्रतिषिध्यते ManuBh. ii. 130. 8 (*on* 8. 128); DīpKa. 38. 11 (*on* 2. 10); हरिणमनपराधं मार्गणो मङ्क्षु भित्त्वा HarVi. 41. 21; यस्तु ··· धूमकेतुरिवानपराधमपि जनपदं पीडयति YaśasCam. i. 436. 4 (comm. निर्दोषम्); KathāSaSāg. i. 5. 24; (सम्यगेतावदवक्तव्यं धर्मार्थसहितं वचः। शृणोति यदि नो राजा स्यात्तु सम्यक्ततोऽनृणः) अनृणः अनपराधः DaṇḍaVi. 19. 14; 39. 5; विलासिन्यापि स्फुटमनपराधा वयमपि HaṃsDū.(Rū.) 135; **2** not having any defect, skilful भिषक् स्वगुणसंपन्न उपकरणवान् ··· साध्यरोगमनपराधः संपादयत्येवातुरमारोग्येण CaraS. i. 10. 5.

अनपराधजन (anaparādha-jana) *m.* innocent person कीर्तिपर्तिविरा ··· अनपराधजनग्रसनलालसमानस ··· इति दशलोचनम् ··· अनभिनन्दन्ती ··· न कचिद्यापि बध्नाति स्थितिम् YaśasCam. i. 82. 1.

अनपराधत्व (anaparādha-tva) *n.* guiltlessness, innocence अनागास्त्वम्। अनपराधत्वम् Nir. 11. 24 (197. 6); अनपराधत्वमस्या इति व्यङ्ग्यं पुनः नियतमविषयम् Ekāva. 1. 13(153) (47. 3); विस्मरणादीनामपह्नवानपह्नवपूर्वकसंप्रतिपत्तौ च दण्डाभाव एव तत्र वादिनोऽनपराधत्वात् DaṇḍaVi. 351. 13.

अनपराधदण्डन (anaparādha-daṇḍana) *n.* punishment to one who is free from guilt or is innocent वर्त्मनीलादेः प्रजानवेक्षणानपराधदण्डनादिराजदोषाभावे तात्पर्यम् DaṇḍaVi. 213. 16.

अनपराधबाधित (anaparādha-bādhita) *adj.* troubled inspite of absence of any fault निशान्तनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः। प्रियेण तस्यानपराधबाधिताः प्रकम्पनेनानुचकम्पिरे सुराः ŚiśuVa. 1. 61 (comm. अनपराधेऽपराधाभावेऽपि बाधिताः)

अनपराधम् (ánaparādham) *adv.* without incurring harm or injury सर्वेणैव तं काममनपराधं राध्नु(? ध्नो)ति ŚatBr. I. iii. 5. 10 (Sāy. अविकलम्)

अनपराधमति (anaparādha-mati) *adj.* having an innocent mind तत् कथं नाम तृणमात्रेऽप्यनपराधमतीनां यतीनामात्मन्यशुभलोकनिषेकसर्गमुपसर्गं सहसा इत्युक्तम् YaśasCam. ii. 320. 20.

अनपराधवल्लभा (anaparādha-vallabhā) *adj.* (*f.*) whose husband is free from guilt अहितकारिण्यपि प्रियतमे हितकारिण्युत्तमा ··· आमोदकाराः ··· कदाप्यनपराधवल्लभायां स्वाधीनपतिकायां प्रियावमानं कुर्वत्यां कलहान्तरितायां चेदं लक्षणमव्याप्तं भवतीत्याशङ्क्य ··· लिखितवन्तः ŚṛṅgāMañ.(A.) 39. 16.

अनपराधसत्त्व (anaparādha-sattva) *n.* innocent being प्रभूतमपि नानपराधसत्त्वव्यापत्तये नृपाणां बलं धनुर्वा किं तु शरणागतरक्षणाय NītiVā. 26. 67.

अनपराधाभिधान (anaparādhābhidhāna) *n.* declaration of being faultless बृहस्पतिः — आक्रुष्टस्तु समाक्रोशन्नपराधी भवेन्नरः।··· बृहस्पतेरनपराधाभिधानमनुवन्धाभावविषयम् DaṇḍaVi. 216. 3; 233. 21.

अनपराधिजङ्गमहिंसन (anaparādhijaṅgama-hiṃsana) *n.* killing of a guiltless or innocent living (*lit.* moving) being पारानन्दोऽनपराधिजङ्गमहिंसनं विहितमपि वर्जयेत् PārāSū. 8. 19.

अनपराधित्व (anaparādhi-tva) *n.* guiltlessness, innocence अनागास्त्वम्। अनपराधत्वम् (v. l. अनपराधित्वम्) Nir. 11. 24 (197. 6)

अनपराधिन् (an-aparādhin) *adj.* [*f.*-ī] **1** not having any defect, efficacious तास्त्वा हन्तु विद्युता वज्रेणानपराधिना AV.(P.) xvii. 15. 2; **2** who has not committed any fault or offence, free from guilt, innocent (तक्षकेण) तेन ह्यनपराधी स दष्टः (ते पिता) MahāBhā. i. 3. 187; नार्हसि मण्डूकानामनपरान्तां वधं कर्तुम् MahāBhā. iii. 190. 33; SkandP. v(2). 84. 31; (तं विव्याध पुनर्भीमः) मर्मण्यनपराधी संदिधित्सुः कलहं तदा MahāBhā. vii. 832*; xv. 38. 12; हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम्। किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम् Rāmā. iv. 17. 31; त्वया ममानपराधी सुतो दष्टः PañcT. 3. 93(17) (357. 4); Tantrākhyā. 116. 9; अस्माभिरकार्यपण्डितैः कृतोऽपराधोऽनपराधिनस्तव VarāṅgaC. 21. 13; तदिहानपराधिनि प्रिये सखि कोऽयं करुणोज्झितक्रमः MālaMā. 9. 116; विहिता वापि हिंसा यानपराधिनाम्। सर्वथा दुःखदा PārāSū. 41. 22; (कृत्वा च स्तेनुपद्रवम्) ब्राह्मणभार्याया भर्तृद्वेषादनपराधिन्याः ··· वधः ManuBh. ii. 396. 22 (*on* 11. 86); (हीनाङ्गेन्द्रियरोगिणाम्) तेषां वधमनपराधिनामेव चापवादं विद्यमानेन्द्रियवैकल्यादिना सत्त्वेनैव दुष्टया वाचा क्षेपं कुर्वाद् (स दण्ड्यः) BālaKrī. i. 273. 28 (*on* 2. 208); i. 225. 7 (*on* 2. 68); अलं प्रहृत्य भूपाल सत्त्वेष्वनपराधिषु NavaSāC. 2. 32; यः पुनरेव्वनानर्हमनपराधिनं राजाज्ञया विना बध्नाति ··· असौ उत्तमसाहसं दाप्यः Mitā. 295. 18 (*on* 2. 243); (प्राणिनः) मृगयासक्तचित्तैश्च क्रीडया मांसकाम्यया। नरैस्तस्तदुपायेन हन्यन्तेऽनपराधिनः TriṣaŚaPuC. I. 1. 574; iii. 4. 123; व्यापादितेषु शिशुपालादिषु अलमिदानीमनपराधिनो भीष्मकस्य पुरप्रमर्दनेन RukmiHa. 4. 2(9); अभिद्रस्तस्य चानपराधिनोऽपि परिवित्तेरिव वचनात्प्रायश्चित्तम् Aparā. 1148. 10 (*on* 3. 286); अलं हि राक्षसैरेभिर्दैत्यैरनपराधिभिः LiṅgaP. i. 64. 111; कथं मां हन्तुमिच्छसि। द्विजम् ··· अनपराधिनम् GaṇeP. i. 7. 34; i. 5. 1; अद्रोहमनपराधी (अध्याप्यः) SmṛtiCan. i. 140. 4; करोति (यः) परद्रोहं जनस्यानपराधिनः। तस्य राज्ञः स्थिरापि श्रीः समूलं नाशमृच्छति SūktiRa. 62. 1; यदक्षिभूलतापातैः स्त्रियः कुर्वन्ति कामिनाम्। जघनेष्वेव तत्सर्वं पतत्यनपराधिषु ŚārṅgaPa. 4059; SubhāṢi. 2297; अभिचारेषु श्येनादिषु ··· अलौकिकेषु अनपराधिनं प्रति क्रियमाणेषु ··· दिशतो दमः DaṇḍaVi. 309. 21; आः कष्टमनपराधिनमपि परिजनमतिनिष्ठुरं निर्भर्त्सयन्ती नीचवृद्धवर्द्धकी समापतति VasaTi. 10. 15.

अनपराध्य (an-aparādhya) *adj.* not liable to fail, efficacious यां विदन्ननपराध्यमाशुगं प्रागजीयत कृतश्रमः स्मरः। अद्य लब्धमनया महद्यशः ŚivLī. 10. 101.

अनपराध्यन्ती (an-aparādhyantī) *adj.* (*f.*) not committing an offence अहं त्वनपराध्यन्ती कीचकेन ··· हता पादेन MahāBhā. iv. App. I. 16(8)

अनपरामृशत् (an-a-parāmṛśat) *adj.* not paying any attention, unconcerned [DBHS.]

अनपरार्थ्य (an-aparārthya) *adj.* not subordinate, chief, principal मुख्यवर्यवरेण्याश्च प्रवेकोऽनपरार्ध्यवत् Vaija. 206. 63.

अनपरुद्ध (an-aparuddha) *adj.* unhindered, unobstructed उद्गीथं शाट्यायनिराचष्टे ··· अपरोधोऽनपरुद्ध इति पार्थ्यद्दशीकनः JaimiUBr. ii. 4. 8.

अनपरुध्य (an-aparudhyá) *adj.* [DEBRU. 800] not liable to be expelled अपरुध्यमानो वा ··· स्वेन भागधेयेनोपधावति स एवैनं त्रायतेऽनपरुध्यो भवति TaiS. II. ii. 8. 5; आदित्यानेव धारयतः। स्वेन भागधेयेनोपधावति त एवैनं विशि दाधलनपरुध्यो भवति TaiS. II. iii. 1. 2; तान्नवैवेध्मेनाप्यादधानानपरुध्यमेवावगच्छति BaudhŚS. ii. 133. 10.

अनपरोध (an-aparodha) *m.* [Inst.] without moving oneself from or changing (the location) अभिप्रयायमभियुण्वन्ति देशानपरोधेन KātyŚS. xxiv. 3. 31.

अनपरोधुक (án-aparodhuka) *adj.* not detaining, not hindering यदेनमेतेभ्यः प्रोच्यामिषिञ्चन्ति तथा हैनमनपरोधुका भवन्ति MaiS. iv. 4. 2 (iv. 52. 3)

अनपरोध्य (an-aparodhyá) (*but* TaiĀ. anaparódhya) *adj.* [DEBRU. 800] irresistible, irremovable अथ यदेताः स्वेवर्चसि तथा हानपरोध्योऽवगच्छति MaiS. ii. 2. 2 (ii 15. 3); यमं महश्वो गाय यो राजानपरोध्यः KāṭhS. 38. 12 (iii. 113. 9); यमं भद्रश्रवो गाय यो राजानपरोध्यः TaiĀ. vi. 5. 2 (680. 1); ĀpaŚS. xvi. 6. 4; MānŚS. 144. 10; VārāŚS. II. i. 1. 50; HirŚS. xi. 1. 69 (17. 21)

अनपलपत् (an-apalapat) *adj.* not refuting, not denying तेऽपि हि न तद्बोधमनपलपन्तो जात्यादीनपलपितुमर्हन्ति Kāśi. ii. 23. 23 (*on* 5(1). 26)

अनपलपनीयत्व (anapalapanīya-tva) *n.* the state of not being deniable देहात्मभेदज्ञानं समाधिपरिपाकवतामेवेति। तदसत्। आविपालगोपालं मम देह इति प्रतिभासस्यानपलपनीयत्वात् NyāySu.(Ja.) 333A. 6 (*on* ii. 2. 3)

अनपलाप (an-apalāpa) *adj.* **I** who does not deny अत्रानपलापोऽस्मि HarṣaC. 123. 12; **II** not subject to denial आर्तत्राणदीक्षया चाचापि न्यायनिर्व्यूढया यथार्थमूढः क्षत्रशब्द इत्येतदप्यनपलापमेव AvantiKa. 43. 16; *m.* nonrefutation बाधे सत्यपि सामान्येन साध्यसाधनयोः संबन्धस्य दृष्टान्तावगतस्यानपलापात् KhaṇḍanKhā. 815. 17.

अनपलापदार्ढ्य (anapalāpa-dārḍhya) *n.* confirmation of nondenial अभियुक्तस्य हिरोवर्तनमनपलापदार्ढ्यव्यापनार्थम् SmṛtiCan. iii. 225. 5.

अनपलापनीयत्व (anapalāpanīya-tva) *n.* the state of being undeniable अस्यार्थस्य स्वसंविन्मयस्यानपलापनीयत्वात् न तद् युगपत् ParāTri. 161. 12.

अनपलाशुक (an-apalāśuka) *adj.* [P. iii. 2. 154] not coveting,

not desiring कृत्य उक इष्णुच् इत्येवमन्ताश्चार्वादयश्च नञ उत्तरेऽन्तोदात्ता भवन्ति। ... उक ...। अनपलाषुकम् KāśiVṛ. on vi. 2. 160.

अनपवदनीय (an-apavadanīya) *adj.* [*f.* -ā] not fit to be refuted, irrefutable संप्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिरप्यनपवदनीया भविष्यति BrahmSūBh. (Śaṅ.) 287. 19 (*on* ii. 1.3); कार्यत्वं (च) उत्पत्तिश्रुतेः अवगतम् अनपवदनीयम् TarkSaṁ.(Ā.) 46. 15.

अनपवर्ग (an-apavarga) *m.* **1** non-completion or continuity (of an action) तत्पुरुषे सति रुहादीनां क्तः कर्तरि भवति धात्वर्थस्यानपवर्गे। आरूढो वृक्षं देवदत्तः MahāBh. i. 384. 4 (*on* ii. 1.24); ii. 123. 10 (*on* iii. 2. 123); [Inst.] without any omission or exception सर्वमेकमित्यनपवर्गेण प्रतिज्ञाय कस्यचिदेकत्वमुच्यते NyāyBh. 270. 4 (*on* iv. 1. 43); सर्वमेकमित्येतस्मिन् प्रतिज्ञार्थे न किंचिदपवृज्यते अनपवर्गेण सर्वं पक्षीकृतम् NyāyVār. 486. 14 (*on* iv. 1. 43); **2** absence of emancipation or final beatitude कर्तृधर्मा नियन्तारः चेतिता च स एव नः। अन्यथानपवर्गः स्यादसंसारोऽथवा ध्रुवः NyāyKuA. i. 53.3; Kiraṇā. 10. 13; *adj.* endless, infinite, cf. **अनपवर्गवीर्य.**

अनपवर्गप्रसङ्ग (anapavarga-prasaṅga) *m.* undesired contingency of the absence of emancipation न ह्यदृष्टनिवृत्तिरप्यदृष्टान्तरसाध्या एकस्याप्यनपवर्गप्रसङ्गात् Kiraṇā. 10. 13.

अनपवर्गवीर्य (anapavarga-vīrya) *adj.* of endless or infinite power श्रीकृष्ण ... अनपवर्गवीर्य। ... भगवन् नमस्ते BhāgP. i. 8. 43; प्रचेतोभिरभिष्टुतो हरिः ... ययौ स्वधामानपवर्गवीर्यः BhāgP. iv. 30. 43.

अनपवर्गार्थिन् (an-apavargārthin) *adj.* not desirous of emancipation or final beatitude कर्म ... तदनपवर्गार्थिनः केवलाश्रमिणः प्राप्नोति, न वा VedāntKau. 371.4 (*on* iii. 4. 32)

अनपवर्ग्यत्व (anapavargya-tva) *n.* the state of being one who cannot be liberated जीवस्यारोपरूपत्वे बाध्येतारोप्यरूप्यवत्। बाध्यस्यानपवर्ग्यत्वादुपदेशोऽफलस्तव SiddhāSi. ii. 76. 11.

अनपवर्त (an-apavarta) *m.* not vanishing away, not getting reduced or lost तस्यैषोऽक्षो यद् गायत्रीषु बृहदग्निष्टोमसाम भवत्येतस्य रसस्यानपवर्दाय (? रसस्यानपवर्ताय) JaimiBr. 2. 34.

अनपवर्तक (an-apavartaka) *adj.* not vanishing away, everlasting शरं तु यः क्षिपति न यावदाहवे। शरासनं शरमिषुधिं परोऽक्षिपत् परं विदुर्यमनपवर्तकं महः RāghPāṇ.(Dha.) 2. 19 (comm. अनपवर्तकं नित्यम्)

अनपवर्तक्रम (an-apavartakrama) *m.* (Math.) absence of the procedure of reduction or division (by a common divisor without any remainder) अपवर्तानपवर्तक्रमात् कुट्टकरीतितः। ताभ्यां लब्धिगुणौ स्यातामधिमासावमासरौ SiddhāTaVi. 392. 15.

अनपवर्तित (an-apavartita) *adj.* (Math.) [*f.* -ā] not reduced or divided (by a common divisor without any remainder) अल्पत्वे तु अपवर्तितयोरनपवर्तितयोर्वा भाज्यहारयोः फलं तुल्यमिति तावदस्ति सुप्रसिद्धम् SiddhāTaVi. 54.10; 54. 12; दृढीकृतेऽप्यत्र हरे च भाज्येऽपवर्तयोग्येऽनपवर्तितां च। शुद्धिं गृहीत्वैव वदन्ति तन्त्रे मूढाः पुरोदाहरणस्य सिद्धिम् SiddhāTaVi. 393. 4; न हि सोऽनपवर्तितः फलपङ्क्त्यधः संनिवेशार्थमुपयुक्तः। तत्र दृढीकृतस्तूपयुक्तः SiddhāTaVi. (ŚeṣaVā.) 50.9.

अनपवर्त्यमहायुस् (anapavartya-mahāyus) *adj.* whose long life cannot be reduced पुण्याधिकास्त्वनपवर्त्यमहायुषस्ते KalyāKā. 1. 4.

अनपवर्द (an-apavarda) *m.* [w. r. for **अनपवर्त**] JaimiBr. 2. 34.

अनपवाचना (an-apavācanā́) *adj.* (*f.*) which cannot be warded off or exorcised away (by means of any *mantra* or formula) (*lit.* which cannot be talked or wished away) सेदिरुग्रा व्यृद्धिरार्तिश्चानपवाचना। ... तैरमूनभि दधामि सर्वान् AV. viii. 8. 9.

अनपवाद (an-apavāda) *m.* **1** non-exception (to a general rule or view) अध्वनश्चानपवादः Vār. 5 *on* P. ii. 3. 12; PadMañ. *on* KāśiVṛ. *on* P. ii. 3. 12; दोषाभावे द्वयासत्त्वादुत्सर्गस्यानपवादः NyāyRa. 66. 13 (*on* 2. 65); दोषाच्च प्रामाण्यापवाद इत्यनपवादाय प्रमाणान्तरमपेक्षते NyāyRa. 67.21 (*on* 2. 71); औत्सर्गिकस्य प्रामाण्यस्य ... शङ्कामात्रेणानपवादात् Nyāyāmṛ. 138A.6; सामान्यतोऽनृताभिधानजन्यपापस्यानपवादेन प्रायश्चित्तसंभवात् VīraMi. 518. 5 (*on* 2. 83); परस्त्रोपभोगलक्षणापराधनिबन्धनो राजदण्डस्त्वनपवादादभोक्तुर्भवत्येव VīraMi.(Vyavahāra.) 159. 29; **2** absence of censure तद्धीरत्वं यत्र यौवनेनानपवादः NītiVā. 27. 55.

अनपवाद (an-apavāda) *adj.* not having any fault or blame, faultless एवमेतत् सर्वमनपवादं यथा भगवानाह CaraS. i. 12.8; i. 25. 31 (1922 Ed.); आसवद्रव्याणामिदानीमनपवादं लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामहे CaraS. i. 25. 47 (1922 Ed.); व्याधितरूपहेतुविप्रतिपत्तौ कारणं सापवादं संप्रतिपत्तिकारणं चानपवादं निशम्य भगवन्तमात्रेयमग्निवेशोऽतः परम् ... पप्रच्छ CaraS. iii. 7. 8 (1941 Ed.); ब्रह्मात्मत्वं तु इह विवक्षितम् ... तस्मात् ('आत्मा वा इदमेक एवाग्र आसीत् ...' इति ऐतरेयके वाक्ये) इह आत्मगृहीतिरित्यनपवादम् BrahmSūBh.(Śaṅ.) 641. 1 (*on* iii. 3.17); एवं तत्सतोर्व्यत्ययेन लक्षणमनपवादमवकल्पते NyāyMañ. i. 94. 3; गान्धर्वः। ... आसुरः। ... पैशाचः।... राक्षसः। एते चत्वारोऽधर्म्या अपि नाधर्म्या यद्यस्ति वधूवरयोरनपवादं परस्परस्य भाव्यत्वम् NītiVā. 31. 13; शाब्दबोधे च तात्पर्यज्ञानबलाद् भानमनपवादमेव VyutpaVā. 146. 14.

अनपवादक (an-apavādaka) *adj.* not having any contradiction or negation, not contradictory उत्पत्तौ ज्ञप्तौ चात्र ज्ञानप्रामाण्यस्य स्वतस्त्वमनपवादकम् GuruCandr. i. 376. 15; अनुपादेयगुणश्रवणवदुपादेयानेकगुणश्रवणमप्यनपवादकमिति न दोषः MayūMāli. 174. 17 (*on* ii. 3. 11)

अनपवादकत्व (anapavādaka-tva) *n.* the state of not being contradictory न च गुणस्य गुणाश्रयत्वेऽनवस्था द्रव्यस्य द्रव्याश्रयत्ववदनपवादकत्वात् PrakaVi. 79. 13.

अनपवादगिर् (anapavāda-gir) *adj.* of faultless speech राज्ञानुज्ञातो जनको मुनिः। ... जगादानपवादगीः PrabhāC. 4. 31.

अनपवादत्व (anapavāda-tva) *n.* the state of not being refuted or anulled न ... हिरण्यगर्भजनकत्वं रुद्रचिह्नमिति शङ्कनीयम् ...। भगवतो हिरण्यगर्भजन्यत्वश्रुत्यभावेन तज्जनकतायास्तच्चिह्नतानिश्चयस्यानपवादत्वाच्च ŚrutaPra. ii. 194. 13 (*on* i. 4. 29)

अनपवादप्रतीकार (an-apavādapratīkāra) *adj.* not absolved of allegations or blames दोषावसेचनमन्यद् वा भेषजं प्राप्तकालमप्यातुरस्य नैवंविधस्य कुर्यात्। तद्यथा – अनपवादप्रतीकारस्याधनस्य CaraS. iii. 3.45 (1941 Ed.)

अनपवादम् (anapavādam) *adv.* without any exception ज्ञानस्याबोधकत्वासिद्धेः बोधकत्वमेवानपवादं सुस्थितं भवेत् IṣṭaSi. 82. 23; 52. 14.

अनपवादिन् (an-apavādin) *adj.* (Mus.) non-dissonant, non-discordant (i. e. harmonious) इदानीमौडुवितविधौ येषु(? ये) अनपवादिनः स्वरास्तान् दर्शयति BṛDeśī. 67.13.

अनपवाद्य (an-apavādya) *adj.* not to be censured or blamed, not blamable अपि च यदि नाम शुश्रूषवो मन्निबन्धने दोषानुपलभन्ते, तथाप्यहमनपवाद्यः Kāśi i. 3. 17 (*on* 0. 7)

अनपवासन (an-apavāsana) *adj.* whose subtle impressions are not (completely) removed विस्मृतस्त्वेव देहोऽसौ प्राक्तनोऽनपवासनः YogVā. iii. 58. 13 (comm. नात्यन्तं तद्वासनोच्छिन्नेत्याशयः)

अनपविद्ध (ȧn-apaviddha) *adj.* not driven away, not abandoned सोऽयमुनिरुक्तः प्राणः स यदेतामाहुति१ सतीं नाम्नौ जुहुत्येष्वेव प्राणेषु हूयते तस्मादयं प्राणः सन्ननपविद्धः ŚatBr.(K.) III. i. 12. 28.

अनपविद्धकर्ण (anapaviddhakarṇa) *m.* name of a former Buddha तेषां सम्यक्संबुद्धानाम् ... नामानि शृणु। ... अनपविद्धकर्णः MaVastuAva. i. 140. 4 [DBHS.]

अनपविद्धवाक्य (anapaviddha-vākya) *adj.* whose words are not dismissed or rejected (i. e. of truthful statements) गृही वदान्योऽनपविद्धवाक्यः ... स्वर्गमुपैति विद्वान् MahāBhā. v. 37. 13 (*but* BhārBhāDī. अनिरस्तगुरुवचनः)

अनपविद्धाग्निहोत्र (anapaviddhāgnihotra) *adj.* who has not given up the Agnihotra गृही वदान्योऽनपविद्धवाक्यः (v. l. °विद्धाग्निहोत्रः) ... स्वर्गमुपैति विद्वान् MahāBhā. v. 37.13.

अनपवृक्त (an-apavṛkta) *adj.* **i** which has not (yet) fulfilled or served (its purpose) यस्यानप्र(? प)वृत्तो(क्तो) यूपो विरोहेत्तस्मिंस्त्वाष्ट्रं (पशुम्) साण्डम् ... (सवनीयस्योपलम्भं) कुर्यात् HirŚS. xv. 8. 30 (342. 1) (comm. असमाप्तकार्यः); VaikhāŚS. 20. 39; **ii** (action or time-span) which has not (yet) ended, still continuous न्याय्या त्वेषा वर्तमानकालता। कुतः। आरम्भानपवर्गात्। आरम्भोऽत्रानपवृक्तः। एष नाम न्याय्यो वर्तमानः कालो यत्रारम्भोऽनपवृक्तः MahāBh. ii. 123. 10 (*on* iii. 2. 123); न ह्युपेतमनपवृक्तं सच्छक्यमुपेतुम्। अप्राप्तस्य हि प्रापणमुपगमनम्। तत् प्राप्तस्य न शक्यम् ŚābaBh. 2230. 7 (*on* xii. 1. 20); प्रवृत्तोऽनपवृक्तश्च दशरात्रादिकोऽवधिः। अन्तःपतितमाशौचं स व्याप्नोति स्वसंख्यया TantrVā. 109. 16 (*on* i. 3. 4); यद्यपि कथंचित् प्राकृतानां प्रयाजाद्यङ्गानां कार्याणि निष्पन्नान्यनपवृक्तानि संनिहितानीति कृत्वा तानि न क्रियेरन् ŚāstrDī. 847. 21 (*on* xii. 1. 2); **iii** not dissociated सर्वथा पूर्वावस्थां जहाति द्रव्यमिति न ह्यनपवृक्तस्य पूर्वावस्थातोऽभिव्यक्त्यनभिव्यक्ती भवतो विनाशप्रादुर्भावौ वा NyāyVār. 422. 6 (*on* iii. 2. 16); cf. **अनपवृत्त.**

अनपवृक्तकर्मन् (anapavṛkta-karman) *adj.* function of which is not (yet) completed प्रस्तरणमेव तावन्निषिद्धत्वादयुक्तं, विशेषतो हविषः सुतराम्

नपवृत्तकर्मणः NyāySu.(So.) 741. 17 (*on* ii. 2. 6); cf. **अनपवृत्तकर्मन्.**

अनपवृक्तत्व (anapavṛkta-tva) *n.* the state of not being dissociated or relieved (from a task) पूर्वत्र समाख्याबलाद् पशुपाकपर्यन्तमनपवृक्तत्वात् (हविष्कृतः) MayūMāli. 860. 10 (*on* xii. 2. 4)

अनपवृक्तार्थ (anapavṛktārtha) *adj.* purpose of which is not (yet) over यद्यनपवृक्तार्थो यूपो विरोहेत् तस्मिंस्त्वाष्ट्रं (पशुम्) साण्डम् ··· उपालम्भ्यं कुर्यात् ĀpaŚS. ix. 19. 15

अनपवृज्य (an-apavṛjyá) *adj.* [P. vi. 2.160] not to be finished, unending विष्वंग्धेनू वि चरतः सुमेकें । अनपवृज्यौं अध्वनो मिमाने ṚV. i. 146. 3.

अनपवृत्त (an-apavṛtta) *adj.* purpose of which is not over यूपे विरूल्हे(? ढे)ऽनपवृत्ते त्वाष्ट्रं (पशुम्) बहुरूपमालभेत ŚāṅkhāŚS. xiii. 4.1 [better read अनपवृक्त]

अनपवृत्तकर्मन् (anapavṛtta-karman) *adj.* function of which is not (yet) over, which has not (yet) served its function कपालं भिन्नमनपवृत्तकर्म गायत्र्या त्वा शताक्षरया संदधामीति संधायापोऽभ्यवहरेयुः ĀśvaŚS. I. iii. 14. 10 [better read अनपवृक्तकर्मन्]

अनपवृत्तार्थ (anapavṛttārtha) *adj.* purpose of which is not (yet) over, which has not (yet) served its purpose यद्यनपवृक्तार्थो (MSS. °वृत्तार्थो) यूपो विरोहेत् तस्मिंस्त्वाष्ट्रम् (पशुम्) ··· उपालम्भ्यं कुर्यात् ĀpaŚS. ix. 19. 15; cf. **अनपवृक्तार्थ.**

अनपवृष्ट (an-apavṛṣṭa) *n.* not non-raining (i. e. excessive or untimely raining) अधीयीत ··· नाक्तो नाभ्यक्तो(? क्तो) नार्द्रोऽनार्द्रे नानपवृष्टे HirŚS. xxiv. 8.36 (906. 23) (comm. नानपवृष्टे हिमवृष्टितोऽवसृष्टतृणादि अपवृष्टम्)

अनपव्ययत् (án-apavyayat) *adj.* not withdrawing or flinching, unflinching अश्वाः ···। अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः ṚV. vi. 75. 7; AV.(P.) xv. 10. 7; TaiS. IV. vi. 6. 3; MaiS. iii. 16. 3 (iii. 186. 6); KāṭhS. v. 6. 1 (iii. 173. 4); VājaS. 29. 44; [unremitting, MW., not letting go, able, Apte]

अनपव्ययेच्छा (an-apavyayecchā) *f.* lack of desire for lavish spending (यत्नेन जयेल्लोभम्) लोभः प्राप्तस्य विषयस्यानपव्ययेच्छा ManvaVi. 778. 7 (*on* 7. 49)

अनपव्याथ (an-apavyātha) *m.* not missing, not losing, not going astray तद्यथा वा अदः प्रतिकूलमुद्यन् प्रावन्न इव भवत्येवमेवैतत् । स्वर्गस्य लोकस्य समष्ट्या अनपव्याथाय (v.l. अनपव्याधाय, Caland Ed.) JaimiBr. 1. 85; रथन्तरे प्रस्तुते पृथिवीं हस्ताभ्यां गच्छेद् देवरथस्यानपव्याथाय JaimiBr. 1. 130; यावत् स्तोभेत तावत् पृथिव्यां हस्तौ स्यातां, देवरथस्यानपव्याथाय (अनपव्याधाय, Caland) JaimiBr. 1. 330; JaimiŚS. 18.

अनपव्याध (an-apavyādha) [prob. w.r. for **अनपव्याथ**] JaimiBr. 1.85; 1. 330.

अनपव्याहरत् (an-apavyāharat) *adj.* not uttering anything irrelevant or profane अनपव्याहरन्तः प्रचरन्ति BhārŚS. ii. 16. 1; ĀpaŚS. ii. 16. 1; HirŚS. ii. 2. 3 (189. 17); ये प्रस्तुतास्ते स्वकर्मणोऽन्यत्र तदनपव्याहरन्तः प्रचरेयुः VaikhāŚS. 6.5.

अनपशब्दत्व (anapaśabda-tva) *n.* the state of not being a corrupt usage or word भविष्यदधिकारस्य प्रयोजनं यावद् पचति पुरा पचतीत्यनपशब्दत्वाय Vār. 4 *on* P. iii. 3. 3; साधुशब्दस्यापि सामग्रीवैगुण्येनावाचकत्वादपशब्दत्वम् अपशब्दस्यापि तदानुगुण्येन वाचकत्वादनपशब्दत्वम् VyaktiVi. 121.9.

अनपशब्दम् (anapaśabdam) *adv.* correctly (*lit.* without incorrect utterance) शब्दितामनपशब्दमुच्चकैर्वाक्यलक्षणविदोऽनुवाक्यया । याज्यया यजनकर्मिणोऽत्यजन् द्रव्यजातमपदिश्य देवताम् ŚiśuVa. 14. 20.

अनपश्रित (an-apaśrita) *adj.* not leaning against anything (as a wall or the like) नावष्टब्धो न प्रतिस्तब्धो नातिवीतो नाङ्कं कृत्वोर्ध्वज्ञुरनपश्रितोऽधीयीत AitĀ. v. 3.3; एनाम् (औदुम्बरीम्) ··· ऊर्ध्वदशेन वसनेन प्रदक्षिणं परिवेष्ट्य च स्पृष्टोऽनपश्रित उद्गायेद् NidāSū. 18. 3 (1. 11); LāṭyāŚS. ii. 6. 2; DrāhyŚS. v. 2. 5; अनपश्रितोऽन्यत्र HirŚS. xxvi. 2. 40 (30. 17) (comm. अन्यत्र कुड्यादावाश्रितो न स्याद् । कुड्याद्यपश्रितो नासीत); ĀpaDS. i(2). 6. 17; [*but* pw. uncovered]

अनपष्ठु (an-apaṣṭhu) *adj.* [Uṇā. 1.25; P. viii. 3.98] not contrary, favourable प्रतिकूलानुकूलार्थे अपष्ठु त्वनपष्ठु च AbhidhāRaMā. 4. 71.

अनपसर (an-apasara) *adj.* **1** having no excuse (for property not acquired through gifts, sale etc.) विक्रीणीते परस्य स्वं यः ··· । अवहार्यो भवेच्चैव सान्वयः षट्शतं दमम् । निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम् ManuSm. 8. 198; यदि पुनः ··· अनपसरश्च स्याद्, अपसरत्यनेनास्माद् सकाशाद् धनमित्यपसरः प्रतिग्रहक्रयादिः स यस्य स्वामिसंबन्धिपुत्रादेः सकाशान्नास्ति ManvaMu. 325. 24 (*on* 8. 198); cf. **अनपसार 1.** **ii** having no easy access (to another's house hold) यदि तद्गृहं तस्य नापसृतं भवति तदानपसरश्चौरवद् दण्ड्यः ManuBh. ii. 167. 12 (*on* 8. 198)

अनपसरण (an-apasaraṇá) *n.* not going away (from a place) अथैतोऽनपसरणात् सपत्नाननुदन्त ··· अथैतोऽनपसरणाद् सपत्नान् नुदते ŚatBr. I. ix. 3. 11.

अनपसार (an-apasāra) *adj.* **1** having no valid excuse सौवर्णिकेनादृष्टमन्यत्र वा प्रयोगं कारयतो द्वादशपणो दण्डः, कर्तुर्द्विगुणः, सापसारश्चेत् । अनपसारः कण्टकशोधनाय नीयेत ArthŚā. i. 222. 2 (2.14); cf. **अनपसर 1;** **2** not moving away, immovable प्रहारादेव घटस्याभावः । यस्त्वनाहतमनपसारं च भावान्तरमभावरूपेणावगम्यते तत्कथमसद् भविष्यति Kāśi. iii. 197.12 (*on* 5(8). 8)

अनपसारमार्गा (an-apasāramārgā) *adj.* (*f.*) having no way for going out or escaping तदा च मृगाटवीषु मृगयाकुल्यवर्गेनाद्रिद्रोणीरनपसारमार्गाः शुष्कतृणवंशगुल्माः प्रवेश्य ··· अनन्तवर्मकटके जर्जरमकुर्वन् DaśKnC. 137.9.

अनपसार्या (an-apasāryā) *adj.* (*f.*) not to be dismissed, irrepressible वर्षाणां स्वस्वभावो यो वृष्टिप्रदः भवति च राजदोषाद्राष्ट्रदोषाद्वा कदाचिदवग्रहः । तस्माद् कर्मशक्तिरेवानपसार्या ManuBh. i. 24.8 (*on* 1. 30)

अनपसिद्धान्त (an-apasiddhānta) *m.* not a wrong conclusion, demonstrated conclusion अथ मन्यसे मध्यस्थेनैतद् विचारणीयं, किमनसिद्धान्तेनासिद्धिरुक्ता अनपसिद्धान्ते वापसिद्धान्तः KhaṇḍanKhā. 1010. 9.

अनपसृतत्व (anapasṛta-tva) *n.* the state of being one who has not gone away (from his concubine on his own accord) (इतस्ततश्च निष्कासितापसृतः स्थिरबुद्धिः) स्थिरबुद्धिः स्वयमनपसृतत्वात् JayaMa. 335. (*on* 6. 4)

अनपसृति (an-apasṛti) *f.* non-retreat संग्रामादनपसृतिः प्रेक्षाभिज्ञा सुभाषिताभिरतिः । आच्छोदनाभियोगः कुलविद्या राजपुत्राणाम् KuṭṭaMa. 949.

अनपसृप्त (an-apasṛpta) *adj.* which has not moved out (जीवस्य) न हि अनपसृप्तस्य देहाद् गत्यागती स्याताम् BrahmSūBh.(Śaṅ.) 453. 10 (*on* ii. 3. 20) = 461.18 (*on* ii. 3. 29)

अनपस्खदयत् (an-apaskhadayat) *adj.* not causing harm पर्यस्खादि च नो तेनाप्यनपस्खदयन्पथि । ··· महौजसा DvyāśraKā. 9. 3 (comm. अनपस्खदयन्नहिंसयन्)

अनपस्थित (an-apasthita) *adj.* not wrongly placed उत्करे प्रागीयं त्रिगवं त्रिच्छदिरनपस्थितं भवति HirŚS. xxii. 6. 7 (789. 8) (comm. त्रिच्छदिरवस्थितं भवतीति)

अनपस्पशान (an-apaspaśāná) *adj.* not obstructing, revealing परे युवांसं प्रवतो महीरनु बहुभ्यः पन्थामनपस्पशानम् । वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्यत TaiĀ. vi. 1. 1 (645. 1) (Sāy. अनपस्पशानम् अबाधमानम्); ĀgniveGS. iii. 5. 2 (141. 8); cf. **अनुपस्पशान.**

अनपस्पृश् (án-apaspṛś) *adj.* [P. iii. 2. 58] not refusing, unresisting देवानां धेनुरनपस्पृगेषा AV. xiii. 1. 27.

अनपस्फुर् (án-apasphur) *adj.* **i** not withdrawing (the milk), not refusing (to be milked) आ यत्पतन्त्येन्यः सुदुघा अनपस्फुरः । अपस्फुरं गृभायत सोममिन्द्राय पातवे ṚV. viii. 69. 10; AV. xx. 92.7; **ii** devoid of non movement, always flowing नद्यः ··· स्फुरणापगमनमासां नास्तीत्यनपस्फुरः । नित्यचलनस्वभावाः KarmaNi. 6A. 7.

अनपस्फुरत् (án-apasphurat) (accent TaiĀ. i. 7.1 (39. 3)?) *adj.* [*f.* -ntī] not withdrawing (i. e. not refusing to yield) तां धेनुमिन्द्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् ṚV. iv. 42. 10; VājaS. 7. 10; ŚatBr. IV. i. 4. 10; ĀpaŚS. xii. 14.12; HirŚS. viii. 4. 14 (836. 3); स्तनौ ···। ऊर्जं दुहाते अनपस्फुरन्तौ AV. ix. 1. 7; तथा हि यज्ञः सर्वपाद्दुहे दात्रेऽनपस्फुरन् AV. x. 10. 27; xii. 1. 45; xviii. 4. 36; एनीर्धाना हरिणीः ···। तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः AV. xviii. 4. 34; TaiĀ. vi. 7. 1 (695. 2); ĀgniveGS. iii. 8. 2 (163. 15); विमिमे त्वा पयस्वतीम् । देवानां धेनुं सुदुघामनपस्फुरन्तीम् TaiBr. III. vii. 7. 13 (comm. प्रातिकूल्यमप्रतिपद्यमानाम्); BhārŚS. xii. 4. 9; ĀpaŚS. xi. 4. 14; HirŚS. vii. 4. 39 (679. 29); ते अस्मै सर्वे दिवमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्तः इति TaiĀ. i. 7. 1 (39. 3)

अनपस्फुरा (án-apasphurā) *adj.* (*f.*) not withdrawing (the milk) (i. e. not refusing to be milked) आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः । सृजध्वमनपस्फुराम् ṚV. vi. 48. 11.

अनपस्वरी (an-apasvarī) *adj.* (*f.*) not ceasing to make a sound (i. e. not getting dry) देवयजनमध्यवस्यति यत्रापः पुरस्तात्सुखाः सूपावगाहा अनपस्वरीः ĀpaŚS. xx. 1. 3 (Kapardī अपेलापः न स्वरन्ति संभृता वहन्ति अम्बुस्रोतोभिः, अशोष्या वा); HirŚS. xiv. 1. 3 (209.8)

अनपहत (an-apahata) *adj.* i not dispelled or warded off, cf. **अनपहतपाप्मन्**; ii (grains) not husked, not thrashed अमावास्यायां स्कृद्गृहीतान्यवाननपहतानप्रतीहारपिष्टानाभिचारिकं परिस्तीर्यं तार्ष्टाघेम आवपति KauśiSū. 25. 27; cf. **अनपहतकल्क, अनपहतधाना**.

अनपहतकल्क (an-apahatakalka) *adj.* (grain) from which dirt (husk etc.) has not been removed, not husked or cleaned (अल्पेष्व-परिपूतेषु (धान्येषु) दण्डः स्यात् पञ्चकृष्णलः) अपरिपूतेषु अनपहतकल्केषु DaṇḍaVi. 138. 7.

अनपहतधाना (anapahata-dhānā) *f.* fried barley which has not been husked अनपहतधाना लोहितजाया द्रप्सेन संनीयाश्नाति KauśiSū. 19. 10.

अनपहतपाप्मत्व (anapahatapāpma-tva) *n.* the state of not being free from evils or sins यदि ब्रह्मैव ... अनपहतपाप्मत्वादिस्वरूपं भजते तर्हि ... अनपहतपाप्मत्वादिकम् ... ब्रह्मणः प्रसज्येत VedāntDī. 83. 21 (*on* ii. 1. 8); रुद्रवाक्यादेवानपहतपाप्मत्वं च तस्य श्रुतम् ŚrutaPra. iB. 136. 14 (*on* i. 1.4); ii. 192. 11 (*on* i. 4. 29); रुद्रस्य चतुर्मुखादुत्पत्तिश्रवणादपहतत्वश्रवणाच्च (v. l. अनपहतपाप्मत्वश्रवणाच्च) न रुद्रस्य कारणत्वम् YatīndraDī. 82. 1.

अनपहतपाप्मन् (ánapahata-pāpman) *adj.* i who has not smitten off evil अपरपक्षा अपेरऽदीक्षन्त ते नतरां पाप्मानमपाहत तस्मात् ते तम इव तम इव ह्यनपहतपाप्मानः AitBr. 19. 3 (511); सोऽब्रवीदनपहतपाप्मा वाऽअस्मि ŚatBr. VI. i. 3. 9; VI. ii. 1. 9; VI. viii. 2. 1; सः ... मनुष्यदेव मनुष्यं जनयेत्सत्यान्मृत्यं-मनपहतपाप्मनोऽनपहतपाप्मानम् ŚatBr. VII. iv. 1. 1; अपहतपाप्मानो वै देवा अनपहतपाप्मानो मनुष्याः ŚatBr.(K.) III. i. 11. 2; ii from whom evil has not been warded off, not freed from evil अनपहतपाप्मानः पितरो न पाप्मानमपहते ŚatBr. II. i. 3. 4; ŚatBr.(K.) I. i. 3. 3; I. i. 4. 8.

अनपहनन (an-apahanana) *n.* not checking or holding off, not repelling from स (श्येनः) हि वयसामाशिष्ठस्तस्यानपहननाय संपारणायैतत् क्रियते PañcBr. xiii. 10. 14; cf. **अनपहान**.

अनपहरण (an-apaharaṇa) *n.* resumption of or not taking back (a gift) 'न्यायमार्गेण यद् दत्त 'मिति। दत्तस्यानपहरणकथनेनैव तत्प्रतिपक्ष-भूतस्यादत्तस्य प्रत्याहरणमर्थसिद्धिमेवेलाह। 'य१ पुनरन्यायेन 'ति Subodhī. 84.14 (*on* 2. 176)

अनपहर्तृक (anapahartṛ-ka) *adj.* not having one who prevents (*lit.* takes away) another (from committing an offence) 'अणोहट्टर 'त्ति अकार्ये प्रवर्तमानं तं हस्ते गृहीत्वा योऽपहरति — व्यावर्तयति तदभावादनपहर्तृकः JñātāDhaṬ. 238A. 2.

अनपहान (an-apahāna) *m.* not checking or holding off तासु श्येनस् संपारणोऽनपहानाय क्रियते JaimiBr. 3. 158; cf. **अनपहनन**.

अनपहाय (an-apahāya) *ger.* not having got rid of or paid off (the debt to the gods and dead ancestors) यदासां निहताः पुत्राः ...। अमुक्त्वा पार्थिवान् भोगानृणान्यनवदाय (v. l. अनपहाय) च। पितृभ्यो देवताभ्यश्च गता वैवस्वतक्षयम् MahāBhā. xii. 7. 17.

अनपहार (an-apahāra) *m.* i non-disappearance, non-reduction अनुभूतस्य अनुभवप्रकाशितस्य विषयस्य अप्रमोषोऽनपहारः तथैव प्रकाशनम् Pratyabhi-Vi. i. 131. 6 (*on* i. 3. 4); ii non-contradiction (प्रपञ्चस्य मिथ्यात्वे) न कालात्ययापदिष्टता प्रतिज्ञा[ज्ञाता]र्थस्य सत्वप्राहिणानपहारात् PrakaVi. 431. 13.

अनपहारतस् (anapahāra-tas) *adv.* because of not taking away, because of non-removal बाध्यबाधकयोर्योगः स्वशक्त्यनपहारतः BṛĀraUBhVā. i. 4. 255; शीतवद् वा मतेच्छीतः शैत्यस्यानपहारतः BṛĀraUBhVā. ii. 1. 560.

अनपहार्य (an-apahārya) *adj.* i not liable to be stolen or taken away तथा च किंनामतेयोऽयममरगिरिणाप्यनपहार्यरामणीयकश्रीरहार्यः TilaMañ. 224. 7; ii which should not be taken back or resumed इदं दत्तं संप्रदानादनपहार्यमिदं चापहार्यमितिविवेकार्थं देयमदेयं चाह Aparā. 779. 10 (*on* 2. 175); दत्तं दाने सति संप्रदानादनपहार्यम् SmṛtiCan. iii. 7. 3.

अनपहार्यता (anapahārya-tā) *f.* the state of being that which cannot be taken back यदि पुनरवंविधस्यानपहार्यतां साधयितुमिच्छेद्याचकस्तदासौ राज्ञा तद्दत्तं सुवर्णादिकं दाप्यः SmṛtiCan. iv. 453. 8.

अनपहार्यत्व (anapahārya-tva) *n.* the state of being that which cannot be taken away सर्वधनेषु विद्यैव प्रधानम्(न)पहार्यत्वात् सहानुयायित्वाच्च NītiVā. 17. 62.

अनपहासक्षम (an-apahāsakṣama) *adj.* not tolerating fun or ridicule अनपहासक्षममेतद् राजयौतकम् PadmPrā. 19. 3.

अनपहृत (an-apahṛta) *adj.* i not stolen न पश्यामोऽनपहृतं धनं किंचित्क्वचिद्वयम् MahāBhā. xii. 8. 30; ii not refuted यदि चानपहृतयोरपि प्रमेययोरिदं प्रबलप्रमितमिदं दुर्बलप्रमितमित्यनेन विशेषेणानुष्ठानाननुष्ठाने भवतः तदो दूराद् वह्निमध्यक्षयन्नाराचानुमिमानोऽनुमितं हित्वा पाकार्थी दूरस्थमुपधावेत् Nyāy-RaMā. 184.22.

अनपहृतचेतन (anapahṛta-cetana) *adj.* in which consciousness (of people) is not lost अनपहृतचेतनेन निद्रागमेनानवगणितसूर्येणान्धकारेण (इव) ... त्रिभुवनमलङ्घ्यत रजसा Kād. 116. 9.

अनपहृतच्छत्र (anapahṛta-cchattra) *adj.* not deprived of the (royal) parasol (राजपुत्रौ) अनपहृतच्छत्त्रावनपि विच्छायानवनिपालान् कुर्वाणौ ... द्वीपान्तरेष्वपि प्रकाशतां जग्मतुः HarṣaC. 194. 12.

अनपहृतराज्य (anapahṛta-rājya) *adj.* who has not taken away the kingdom (of others) न ह्यनपहृतराज्या राजपुत्राः प्रथममेव विरुध्यन्ते इति शक्यते वक्तुम् Śarka. 69. 23.

अनपहृतसामान्या (anapahṛta-sāmānyā) *adj.* (*f.*) which has not taken away the generic property (of others) अनपहृतसामान्या शिंशपा न पलाशादिना विरुध्यते Śarka. 69. 24.

अनपहृत्य (an-apahṛtya) *ger.* not having taken away सः ... सुभट इव च स्वाम्यादेशेन दृष्टिपथे तिष्ठतामनपहृत्य जीवितं न निवर्तते AvantiKa. 38. 16.

अनपह्नव (an-apahnava) *m.* non-concealment, non-denial, avowal नापि सन्नपि सर्वो द्रष्टुं शक्तः। अत एवादृष्टस्यानपह्नवः PramāVāSvopVṛ. 83. 8; कश्चिदप्याल्यातस्य भावनावाचित्वाभावात्कथं तस्यां समानपदश्रुत्या करणत्वावगतिरिति चेत् न, धातोः ... धात्वर्थातिरिक्ताया आख्यातवाच्याया भावनाया अनपह्नवात् MīmāKau. iii(2). 16. 12 (*on* ii. 1. 5); न च वैपरीत्यम्, परिपूर्णचमत्कार-भूमेर्व्याजस्तुतेस्त्वयाप्यनपह्नवात् RasGaṅ. 607. 7.

अनपह्नवनीय (an-apahnavanīya) *adj.* [*f.*-ā] undeniable, which is not to be concealed or dismissed, avowable एतदेव मम हृद्व्योम, एवं यत् इदं प्रसृतम् ... तदेव नित्यम् ... अनपह्नवनीयमनुत्तरम् ParāTri. 88. 2; 106.7; असौ (स्मृतिः) स्वरूपेण अनपह्नवनीया सती अनुभवस्य नाशे किंचित् अविनष्टम् आवेदयति PratyabhiVi. i. 93. 6 (*on* i. 2.3); i. 229. 1 (*on* i. 5. 7); सहकारिभेदाच्च शक्तिभेदः स्पष्ट एव।... अक्षादिसहकृतस्य वा विकल्पत्व-व्यापारः। एवमभिहितान्वयवादिनामियदनपह्नवनीयम् Loc. 18. 17 (*on* 1.4); अभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव KāvPra. 249. 4; Kāvyānu.(He.) 35. 12; आक्षिप्तिः — गर्भस्योद्भेदनाक्षिप्ति-रिति।... अनपह्नवनीया या स्फुटतापत्तिः सा आक्षिप्तिः AbhinBhā. iii. 50. 16 (*on* 19.86)

अनपह्नवनीयचमत्कार (anapahnavanīya-camatkāra) *adj.* having the poetic charm which cannot be denied or concealed अनयोर्भेदयोरन-पह्नवनीयचमत्कारयोरपि प्राधान्याप्राधान्याभ्यामस्ति कश्चित् सहृदयवेद्यो विशेषः Ras-Gaṅ. 21.9.

अनपह्नवनीयत्व (anapahnavanīya-tva) *n.* the state of being undeniable इह यत्किंचन स्फुरति तत्तद्वक्ष्यमाणेश्वररूपस्वात्मप्रथामात्रम्, तत्र तु उपायोपेयभावप्रभृतिः कार्यकारणभावोऽपि यथाप्रकाशं परमार्थभूत एव, प्रकाशस्य अनपह्नवनीयत्वात् PratyabhiVi. i. 24. 3 (*on* i. 1.1); i. 335.4 (*on* i. 6.9); ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमिः। तत्पृष्ठेऽधिकप्रतीयमानांशोल्लिङ्गनात्। वाच्येन समशीर्षिकागणनं तस्याप्यनपह्नवनीयत्वं प्रतिपादयितुम् Loc. 13. 3 (*on* 1. 2); 'वीचिक्षालितकालियाहितपदे' इति प्रागुक्ते एकस्यैव विशेषणस्य चमत्कारिताया अनपह्नवनीयत्वात् RasGaṅ. 519. 6.

अनपह्नवपूर्वक (anapahnavapūrva-ka) *adj.* preceded by non-concealment or non-denial विस्मरणादीनामपह्नवानपह्नवपूर्वकसंप्रतिपत्तौ च दण्डाभाव एव, तत्र वादिनोऽनपराधत्वात् DaṇḍaVi. 47. 2; 351. 12.

अनपह्नुतत्व (anapahnuta-tva) *n.* the state of not being denied or rejected व्यङ्ग्य एव वाक्यार्थीभूतः काव्यजीवितमित्येष एव पक्षो वाक्यार्थविदां सहृदयानामावर्जकः। व्यञ्जनव्यापारस्य सर्वैरनपह्नुतत्वात्तदाश्रयेण च पक्षान्तरस्याप्रतिष्ठानात् AlaṅkāSa. 12. 4.

अनपह्नुतदास्य (anapahnuta-dāsya) *adj.* whose servitude (i.e. dependence on the Lord) is not concealed तदेवमवसीदत्सु दया देवेषु पात्यताम्। अनपह्नुतदास्यानां दोषनिह्नवसाक्षिणी Yādavā. 16. 45.

अनपह्नुतभेद (anapahnuta-bheda) *adj.* difference of which is not concealed आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा KāvyPra. 47. 2; 593. 2.

अनपह्नुतस्वरूप (anapahnuta-svarūpa) *adj.* whose own form is

unconcealed तत्र हि प्रकृतं वस्तु वस्त्वन्तरेणाच्छादितत्वेन प्रतीयते, इह त्वनपह्नुतस्वरूपमेव प्रकृतम् ।… वस्त्वन्तरगुणोपरक्ततया प्रतीयते AlaṅkāSa. 170. 6; (सारोपा जहदजहत्स्वार्था लक्षणा) आरोप्यमाणारोपविषयौ यदानपह्नुतस्वरूपौ सामानाधिकरण्येन निर्दिश्येते तदा सारोपा Ekāva. 2. 9(1) (68. 2)

अनपह्नुतोभयस्वभाव (anapahnutobhayasvabhāva) *adj.* having the (different) natures of both unconcealed एवमयमविद्याब्रह्मणोरनपह्नुतोभयस्वभावयोरेवानादिरासक्तिविशेष इति किमस्मान् वर्णनावशेन वशीचिकीर्षसि ŚatDū. 176. 16.

अनपह्नुत्य (an-apahnutya) *ger.* not having denied or concealed विप्रतिपत्तिरपि तावनपह्नुत्यैव तयोः स्वरूपविशेषे अन्यत्र वा कार्या IṣṭaSi. 80. 8; दर्पणमुखयोः स्वभावमनपह्नुत्य दर्पणे मुखाध्यासः ŚatDū. 176.15; अनपह्नुत्य लोकास्तदिन्द्रजालमिदं त्विति । जानन्त्येवानपह्नुत्य भोगं मायात्वधीस्तथा PañcDa. 7. 180.

अनपह्नुवान (an-apahnuvāna) *adj.* not denying मध्यमास्तु तद्रूपं जानाना अपि संदेहेनापह्नुवते । अन्त्यास्त्वनपह्नुवाना अपि लक्षयितुं न जानत इति क्रमेण विपर्याससंदेहाज्ञानप्राधान्यमेतेषाम् Loc. 10.21 (*on* I. 1)

अनपा (anapā) *f.* name of a daughter of Prāvā अनूपां (v.l. अनपां) सुभगां भासीमिति प्रावा व्यजायत MahāBhā. i. 59. 44.

अनपाकरण (an-apākaraṇa) *n.* 1 non-removal उपास्तेरनपाकरणा-'दितरत्र' सौमिकेषु नास्त्युपस्थापकं प्रमाणम् TantrRa. 280. 17; 2 non-payment (of debts including those to the Gods, Ṛṣis and Pitṛs etc.) (ऋणानां चानपाक्रिया) गृहीतस्य सुवर्णादेरप्रदानमृणानामनपाकरणम्, तथा देवर्षिपितृणां संबन्ध्यृणस्यानपाकरणं च Mitā. 415. 2 (*on* 3. 234); (पुत्रपौत्रैर्ऋणं देयम्) तस्य चानपाकरणे … साधारणोपपातकप्रायश्चित्तानामेकं कार्यम् Aparā. 1112. 18 (*on* 3.268); देवर्षिपित्रर्णानां यज्ञाध्यापनप्रजोत्पादनैरनपाकरणम् VīraMi. 930. 10 (*on* 3. 234); MīmāKau. i. 47.5 (*on* i. 3. 7)

अनपाकरणीय (an-apākaraṇīya) *adj.* not to be paid or discharged पैतृकमपि किंचिदृणं विभागकाले पैतृकधनादनपाकरणीयं, किंतु विभजनीयमेवेत्याह कात्यायनः SmṛtiCan. iv. 617. 7.

अनपाकर्मक्रिया (anapākarma-kriyā) *f.* the act of not paying अथ वेतनस्यानपक्रिया (v.l. अनपाकर्मक्रियोच्यते) VyavaNi. 312.11.

अनपाकर्मन् (an-apākarman) *n.* A non-observance, violation (of conventions, contracts etc.) व्यवहारस्थापना -- समयस्यानपाकर्म । ऋणादानम् ।… इति धर्मस्थीयं तृतीयमधिकरणम् ArthŚā. i. 9.4(1. 1); तेन देशजातिकुलसंघानां समयस्यानपाकर्म व्याख्यातम् ArthŚā. ii. 62.8(3. 10); पाषण्डिनैगमादीनां स्थितिः समय उच्यते । समयस्यानपाकर्म तद्विवादपदं स्मृतम् NāraSm. 163. 1; B non-payment or non-delivery (of dues, gifts etc.) प्रातिभाव्यं दण्डशुल्कशेषमाक्षिकं सौरिकं कामदानं च नाकामः पुत्रो दायादो वा रिक्थहरो दद्यात् । इति दत्तस्यानपाकर्म ArthŚā. ii. 95.2(3. 16); वेतनस्यानपाकर्म तथैवास्वामिविक्रयः ।… द्यूतं प्रकीर्णकं चैवेत्यष्टादशपदः (व्यवहारः) स्मृतः NāraSm. 9. 17; 151. 1; वेतनस्यानपाकर्म तदर्थं स्वामिपालयोः । क्रमशः कल्प्यते वादो भृतभेदत्रयं त्विदम् BṛhaspaSm. 141.3; AgniP. 252. 18; Mitā. 278. 3 (*on* 2. 193); Subodhi. 86. 12 (*on* 2. 193); वेतनं कर्ममूल्यं तस्यानपाकर्म भृत्यायासमर्पणम् VīraMi.(Vyavahāra.) 323.24; BālamBha. ii. 286. 10 (*on* 2. 175); C resumption तथा कर्मकाराद्यवैगुण्याद्दत्तस्यानपाकर्मानपनयनमस्मिन्निति व्युत्पत्त्या दत्तानपाकर्माख्यमपीदमेव पदम् SmṛtiCan. iii. 6. 16; वेतनं कर्ममूल्यं तस्यानपाकर्म … समर्पितस्य वा परावर्तनम् VīraMi.(Vyavahāra.) 323. 24.

अनपाकुर्वत् (an-apākurvat) *adj.* not separating निहितेषु नाराशंसेषु प्रातःसवनेऽनपाकुर्वन्नेकादश (गावः) दक्षिणा व्यादिशति KātyŚS. xxii. 5. 15 (comm. गोयूथादपृथक्कुर्वन्)

अनपाकृत (an-apākṛta) *n.* wrong act (i. e. non-fulfilment of a promise) न स्मराम्यनृतं किंचिन्न स्मराम्यनुपाकृतम् (v. l. °नपाकृतम्) MahāBhā. iii. 71.13; न स्मरामि प्रतिश्रुत्य किंचिदप्यनपाकृतम् MahāBhā. vii. 12.13; *adj.* (debt) not paid or discharged (पित्रा द्दृष्टमृणं यद् तु … नोद्धृतं पुत्रैः) पुत्रैर्नोद्धृतं पुत्रैर्दुश्चिकित्स्यरोगादिवशादनपाकृतम् SmṛtiCan. iv. 398. 3; आनृण्यकारणादित्यभिधानात् तस्याकरणे पितृणां ऋणमनपाकृतमेव तिष्ठति CaturCin. iii(1). 86.13.

अनपाकृतत्व (anapākṛta-tva) *n.* the state of being not refuted न चानन्दमयाधिकरणेन चरितार्थता, असच्छब्दस्य प्रधानपरत्वशङ्कायास्तत्रानपाकृतत्वात् ŚrutaPra. ii. 129. 21 (*on* i. 4. 14); ii. 399. 15 (*on* ii. 4. 14)

अनपाकृतर्ण (anapākṛtarṇa) *adj.* who has not paid or discharged the debts (to the ancestors etc.) अनपाकृतर्णस्य मोक्षेच्छा वार्यते BṛĀraUBhVā. i. 5. 261.

अनपाकृतर्णत्रय (anapākṛtarṇatraya) *adj.* who has not paid the three debts (to the Gods, Ṛṣis and the Pitṛs) कर्मविषये … कारमवतारयन्ति पुरुषम्, अनपाकृतर्णत्रयस्य तत्रानधिकारात् BrahmSi. 27. 18; प्रतिपन्नाप्रतिपन्नगार्हस्थ्यानाम् अपाकृतानपाकृतर्णत्रयाणां च ऊर्ध्वरेतस्त्वं श्रुतिस्मृतिप्रसिद्धम् BrahmSūBh.(Śaṅ.) 727. 9 (*on* iii. 4. 17); अनेनानपाकृतर्णत्रयस्य गृहस्थस्य प्रव्रज्यायामनधिकारं दर्शयति Mitā. 366. 1 (*on* 3. 57); तद्विषयाणि च अनपाकृतर्णत्रयसंन्यासनिषेधकमन्वादिवचनानि ManvaVi. 716. 4 (*on* 6. 35)

अनपाकृतशेवाल (anapākṛta-śevāla) *adj.* from which the moss has not been removed तरङ्गिर्नीलवसनैर्मज्जन्तीनां मृगीदृशाम् । अनपाकृतशेवालमिव जातं सरोजलम् NemiNir. 8. 55.

अनपाकृतांशान्तर (anapākṛtāṁśāntara) *n.* another unpaid remaining part पुत्रैरेकदेशापाकरणे तु अनपाकृतांशान्तरं देयम् SmṛtiCan. iv. 398. 7.

अनपाकृत्य (an-apākṛtya) *ger.* AI not having paid or discharged (a debt, both spiritual and secular) नाचार्यविद्योपकृत्वा (v.l. नाचार्यस्यानपाकृत्य) प्रवादं प्राज्ञः कुर्वीत MahāBhā. v. 44. 11 (BhārBhāDī. विद्यायाः निष्क्रयार्थमृणमर्थदानेन अपरिहृत्य); ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ManuSm. 6. 35; SiṁhāDvā. 74. 7; ViṣṇuDhaP. ii. 131. 3; ऋणमनपाकृत्य पितरि प्रोषिते मृते वापि … तदृणं पुत्रपौत्रैर्देयम् Aparā. 650. 3 (*on* 2. 50); VīraMi. (Vyavahāra.) 273. 33; AII not having discharged or cleared अनिर्दिष्टा मया भिक्षा ब्राह्मणस्य प्रतिश्रुता । अनपाकृत्य तां राजन् न ग्रहीष्यामि ते जराम् HariVaṁ. 22. 23; BrahmP. 12. 26; BI not having removed दारिद्र्यमनपाकृत्य पुत्रार्थांश्चैव पुष्कलान् । शुश्रूषामप्रयुक्त्वा च कथं वै गन्तुमर्हथ HariVaṁ. 18. 28; BII not having refuted or negated अस्यां चावस्थायामनपाकृत्यैव ब्रह्मणि प्रपञ्चं तेन तेन प्रपञ्चेनोपधीयमानं ब्रह्म तस्मै तस्मै फलायोपास्यत्वेन विधीयते PañcPā. 40. 15 (*on* i. 1.0); (अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्) अर्थिकृतमाक्षेपमनिस्तीर्य … अनपाकृत्यैनमर्थिनं प्रतिवादी न प्रत्यभियोजयेत् VīraMi. 415. 10 (*on* 2. 9)

अनपाकृष्ट (an-apākṛṣṭa) *adj.* not dragged along महान्तमप्यर्थमधर्मयुक्तं यः संत्यजत्यनुपाकृष्ट (v.l. अनपाकृष्टः) एव । सुखं स दुःखान्यवमुच्य शेते MahāBhā. v. 40. 2 (BhārBhāDī. परैरपकर्षमप्रापितः)

अनपाक्रिया (an-apākriyā) *f.* non-payment or non-clearing (of debt, both spiritual and secular) गोवधो व्रात्यता स्तेयमृणानां चानपाक्रिया । … उपपातकम् YājñaSm. 3. 234 (Mitā. देवर्षिपितृणां संबन्ध्यृणस्यानपाकरणं च); अनाहिताग्निता स्तेयमृणानां चानपाक्रिया । … नास्तिक्यं चोपपातकम् ViṣṇuDhaP. iii. 234. 13; ऋणानां गृहीतानामनपाक्रियापरिशोधनम् VīraMi. 930. 9 (*on* 3. 234)

अनपाचीन (an-apācīna) *adj.* not perverse (*lit.* not turned backwards) अनपाचीनचित्तवृत्तिग्राहिण्यो हि भवन्ति प्रज्ञावतां प्रकृतयः HarṣaC. 124. 6.

अनपाद् (an-apād) *f.* [w. r. for **अनापद्** or **अनापाद्य**] JaimiBr. 1. 141; *cf.* **अनापद्** and **अनापाद्य.**

अनपादान (an-apādāna) *n.* (sense) other than that of taking away (*but* later grammarians – 'when there is no word in the Abl.)' अद्रोऽनपादाने P. viii. 2. 48; अनपादानेऽन्वेः Kātan. iv. 6. 108; स्याश्चिदिवोऽस्पर्शानपादाना जये JaineVyā. v. 3. 65; स्या अश्चि दिव इत्येतेभ्यः परस्य तकारस्य नो भवत्यस्पर्शे अनपादाने अजये यथासङ्ख्यम् JaineVyā. 395. 17 (*on* v. 3. 65); 395. 22 (*on* v. 3. 65); समक्नौ न चेदपादानं तत्र भवति । शकुनेः पादौ । -- अनपादान इति किम् । उदक्तमुदकं कूपात् KāśiVṛ. *on* viii. 2. 48; SiddhaHe. iv. 2. 72.

अनपान (anapāna) *m.* name of a king (son of King Aṅga and father of King Diviratha) अङ्गादनपानस्ततो दिविरथः ViṣṇuP. iv. 18. 15; तत्राङ्गस्य तु राजर्षे राजासीद्दिधिवाहनः । … अनपानोऽभवन्नृपः । अनपानस्य पुत्रस्तु राजा दिविरथः VāyuP. ii. 37. 100; BrahmāṇḍP. ii. 74. 103.

अनपानत् (an-apānat) *adj.* not breathing downwards or out तस्मादप्राणन्ननपानन्वाचमभिव्याहरति ChāndoU. i. 3. 3; अप्राणन्ननपानन् प्राणापानव्यापारावकुर्वन् ChāndoUBh. 31. 17 (*on* i. 3. 3)

अनपानयितव्य (an-apānayitavya) *adj.* not to be made an object of *apāna* (i. e. breathing downwards or out) तदेतत् सत्यमात्मा ब्रह्मैव … एतद्द्वयशब्दमस्पर्शम् … अप्राणयितव्यमनपानयितव्यमव्यानयितव्यम् NṛsiṁhoTāU. 9(41)

अनपेक्षता (anapekṣa-tā) *f.* **Ai** the state of having no desire शिक्षाया अपरित्यागः कामानां विजुगुप्सनम्। निर्वित्सर्वास्तिसंत्यागोऽवलीनत्वानपेक्षते AbhisaAlaṅĀ. 96.23; अनपेक्षतयान्यस्य निराबाधतयात्मनः। मोक्षैकतानमनसा कर्तव्यं सात्त्विकं तपः PārśvC. 6.1005; **Aii** the state of not requiring the aid of anything else, independence (often implying self-validity) शक्यते वृद्धव्यवहारस्यानादितयानपेक्षता वक्तुमिति तस्यैवोपन्यासः Bṛha. 177.7 (*on* i. 1.5); सेयमनपेक्षता प्रामाण्यहेतुः Bṛha. 369.5 (*on* i. 1.7); तत्र ये कृतका भावास्ते सर्वे क्षणभङ्गिनः। विनाशं प्रति सर्वेषामनपेक्षतया स्थितेः TattvSaṁ. 353; स्वतःप्रामाण्यसिद्धौ तु वेदे वक्त्रनपेक्षताम्। वदामः NyāyMañ. i. 188.20; अनपेक्षतया न वेदवाचां घटते निष्प्रतिमः प्रमाणभावः NyāyMañ. i. 229.13; पुरुषापराधविनिवृत्तिफलः सकलो विचार इति वेदविदः। अनपेक्षतामनुपरुध्य गिरः SaṁkṣeŚā. 1.16 (i. 21.14); 1.284 (i. 214.23); अथानपेक्षता चाभावधियो वक्ष्यते Kāśi. iii. 202.7 (*on* 5(8).21); कस्मात्कारणमन्तरेण न कार्यं भवति। तथा च सत्यनपेक्षतया कादाचित्कत्वविहतिः TātpaṬ.(Vā.) 161.11 (*on* i. 1.5); Bhām. 76.3 (*on* i. 1.4); यथार्थानुभवो मानमनपेक्षतयेष्यते NyāyKuA. ii(2). 1.5; प्रधानं ह्यनागतापेक्षणनयादनपेक्षतामादाय भेदेन वक्तुं युक्तम् NayaVi. 64.5 (*on* i. 1.3); 64.8 (*on* i. 1.3); 67.4 (*on* i. 1.4); 82.7 (*on* i. 1.5); 169.4 (*on* i. 1.5); तत्र पदानां तावदनपेक्षतां दर्शयति ··· । उपमार्थो वाशब्दः, अर्थनिबन्धना हि पदानामपेक्षा, न स्वस्वरूपनिबन्धना, अनर्थकेष्वप्रतिपादितार्थेषु प्रथमश्रवणादौ वर्णवदपेक्षाभावात् NyāyRa. 849.14 (*on* 7.11); नानपेक्षतया हेतुः कर्म योगविभागयोः TattvPradī.(Ci.) 185.5; कार्यार्थत्वमनपेक्षतायामप्रयोजकम् VedāntKa. 62.7 (*on* i. 1.4); चोदनामात्रतैवात्र प्रयत्नसाध्यतां गता। अनपेक्षतया तस्य यतो मुख्यत्वमाश्रितम् NyāyMāVi. 16.20 (*on* i. 1.3); 18.4 (*on* i. 1.5); (कर्मणः) न च पूर्वतरस्यापौरुषनिर्मितत्वादनपेक्षता TattvPrakā. 92B.3 (*on* ii. 1.36); अपौरुषेयतया च प्रमाणान्तरपूर्वकता नास्ति प्रत्यक्षवत्। अत एव चानपेक्षतया वेदप्रामाण्यम् TantrRaha. 39.3; MayūMāli. 845.20 (*on* xii. 1.1); **Aiii** the state of being indifferent, indifference द्रौपदी च तदाज्ञाय पतीनामनपेक्षताम्। वासुदेवे भगवति ह्येकान्तमतिराप तम् BhāgP. i. 15.50; **B** the state of being disregarded or rejected (परमाणुवादस्य) श्रुतिस्मृत्यपरिगृहीतत्वाच्चात्यन्तमेवानपेक्षता BrahmSūBh.(Ma.) 29B.10 (*on* ii. 2.17)

अनपेक्षतांशमोष (anapekṣatāṁśa-moṣa) *m.* loss of the aspect of independence मितिस्वभावियमनपेक्षतांशमोषेण स्मृतियङ्गाता NayaVi. 143.8 (*on* i. 1.5)

अनपेक्षताक्षेप (anapekṣatākṣepa) *m.* objection to independence or self-validity 'अनिमित्तं विद्यमानोपलम्भत्वात्' इति सूत्रावयवान्तरेण शब्दस्यानपेक्षता औत्पत्तिकसूत्रावयवोक्ताक्षिप्यते। ··· विद्यमानोपलम्भनत्वादित्यमनपेक्षताक्षेपः — लोके हि फलसाधनतया कार्ये लिङ्गादिर्दृष्ट इति वेदेऽपि न स्वतन्त्रकार्यार्थः NayaVi. 169.8 (*on* i. 1.5)

अनपेक्षतासाम्य (anapekṣatā-sāmya) *n.* similarity in respect of independence or self-validity आम्नायस्यापि स्वतःसिद्धप्रमाणभावस्य प्रमितावनपेक्षतासाम्याद् युक्तं तस्य परस्यैव बलीयस्त्वम् NyāyMa. 150.1.

अनपेक्षताहति (anapekṣatāhati) *f.* blow to (the theory of) independence or self-validity 'अथ संबन्धः कः' इति प्रश्नः शाब्दस्यैव। यदि युतसिद्धौ शब्दार्थौ, न तु विवर्तपक्षः, तर्हि संज्ञासंज्ञिसंबन्धः कृतक इत्यनपेक्षताहतिरत्यन्तदुस्तरा NayaVi. 185.3 (*on* i. 1.5)

अनपेक्षताहानि (anapekṣatā-hāni) *f.* loss of independence or self-validity अतो विनियोगार्थानमेव नियोगमाहेति फलसाधनतात्मकविनियोगे मानान्तरापेक्षतयानपेक्षताहानिः NayaVi. 170.1 (*on* i. 1.5)

अनपेक्षत्व (anapekṣa-tva) *n.* **Ai** the state of not requiring the aid of anything else, independence (often implying self-validity) व्यतिरेकानवस्थितेश्चानपेक्षत्वात् BrahmSū. ii. 2.4; औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् MīmāSū. i. 1.5; ŚābaBh. 25.1 (*on* i. 1.5); 58.7 (*on* i. 1.5); न तु कर्म पश्चाद्भाविनिमित्तमपेक्षत इति अनपेक्षत्वं कर्मणः शास्त्र उक्तम् NyāyVār. 223.5 (*on* ii. 1.31); यदुक्तम् अनपेक्षत्वादिति प्रमाणान्तरानवगम्यमर्थमवगमयति इति Bṛha. 124.14; 198.9; 203.2; महत्त्वमनपेक्षत्वं सर्वभावक्रियाविधौ AhirbuS. 53.67; हेतुकृतो विनाशः ··· यः परैरिष्यते तं प्रत्यनपेक्षत्वं ख्यापयितुमुपक्रमते HetuBiṬ. 77.12; नित्यत्वे हेतुसंनिधानाद्धेत्वन्तरानपेक्षत्वाच्च सदा संयोगविभागोत्पादप्रसङ्गः BhāvanāVi. 56.8; पूर्वानपेक्षत्वे यथात्माध्यासशक्तता। शब्दस्य प्रथमेऽपि स्याच्छ्रवणेऽध्यस्तरूपता ŚlokaVār. 4.202 (195.7); 7.11 (849.3); वारवन्तीयं पुनः ··· अनपेक्षत्वाद् यागेनासंबध्यमानं स्वतन्त्रमेव TantrVā. 562.3 (*on* ii. 2.27); 961.4 (*on* iii. 4.13); 'तत्प्रमाणम्' इत्यनेन त्वनपेक्षत्वेन यत्प्रामाण्यं प्रतिज्ञातम्, तत् स्वत इति TātpaṬ.(U.) 185.12 (*on* 5(1).10); प्रत्यक्षं हि श्रुतिः, प्रामाण्यं प्रत्यनपेक्षत्वात् BrahmSūBh.(Śaṅ.) 191.9 (*on* i. 3.28); अथापौरुषेयत्वे सत्यनपेक्षत्वात् प्रमाणता तदप्यनपेक्षत्वं वेदान्तेऽपि तुल्यं लोके वेदे च पदानां स्वार्थप्रत्यायनेऽनपेक्षत्वमविशिष्टम् BrahmSūBh.(Bhā.) 13.10-12 (*on* i. 1.4); 62.4 (*on* i. 3.28); ज्ञानं फलमेव न प्रमाणम् ··· यत्र सापेक्षत्वमनपेक्षत्वं वास्य चिन्त्येत पुरुषप्रवृत्त्यादौ तु तदिच्छापेक्षत्वं विद्यत एव NyāyMañ. i. 158.8; i. 188.22; ii. 30.14; तदभिधाने चावस्थितं पुरुषकारस्यानपेक्षत्वम् BālaKrī. i. 196.16 (*on* 1.347 (? 346)); संभाव्यं नानपेक्षत्वं नियोगविरहात् क्वचित्। शब्दप्रवृत्तेः BṛĀraUBhVā. (Sambandha.) 447; सिद्धमपौरुषेया वेदा इति। अपौरुषेयाश्चेन्नास्ति प्रमाणान्तरापेक्षा प्रत्यक्षवत्। अतः प्रमाणमनपेक्षत्वादित्युक्तम् PrakaPañ. 248.10; ज्ञानस्यानपेक्षत्वाद्, विप्रलब्धपूर्वस्यापि निरपेक्षमेव निश्चयात्मकं ज्ञानमुत्पद्यते Kāśi. i. 89.16 (*on* 2.47); iii. 186.19 (*on* 5(7).81); आम्नायस्य ··· स्वतःसिद्धप्रमाणभावस्य स्वकार्ये प्रमितावनपेक्षत्वात् Bhām. 5.10 (*on* i. 1.1); अनर्थकेष्वप्रतिपादितार्थेषु प्रथमश्रवणादौ वर्णवदपेक्षाभावादिति। इतश्चानपेक्षत्वमित्याह NyāyRa. 849.17 (*on* 7.11); 480.9 (*on* 5(8).21); हेतुनिषेधे भवनस्यानपेक्षत्वेन सर्वदा भवनम्, अविशेषात् NyāyKuA. i. 9.5; i. 86.1; ii(2).10.3; अनपेक्षत्वात् सार्वत्रिकत्वम् (प्रथमप्रमाणत्व) इति चेत् एवं तर्हि द्वितीयस्यापि स्वफलेऽनपेक्षत्वमेव NyāyVārPari. 149.2; न हि स्वयंप्रकाशाया ज्ञप्तेर्विषयभावो दृष्टः। सापेक्षत्वानपेक्षत्वयोरेकत्र विरोधात् NyāyKu. 60.3; 82.20; प्रधानं न जगत्कारणं, कुतः, तद्व्यतिरिक्तस्य सहकार्यन्तरस्यानवस्थितेर्यतस्तव तदनपेक्षत्वात् VedāntPāSau. 179.23 (*on* ii. 2.4); VedāntKau. 180.6 (*on* ii. 2.4); चमसैश्चमसाध्वर्युभिर्होत्रध्वर्युरिव

वा । संज्ञाविशेषादायोऽस्तु नैवमध्वर्युसंज्ञया । विशेषस्यानपेक्षत्वात् तेनान्यस्या अपेक्षणात् NyāyMāVi. 203. 10 (*on* iii. 7. 22); इतो हि सिद्धस्यापि साधनं घटते। किं तु कश्चिदनपेक्षत्वमित्येव NyāySu.(Ja.) 378B. 2 (*on* ii. 2. 6); 447A. 13 (*on* ii. 3. 14); प्रमाणान्तरस्यानपेक्षत्वात् स्वयं प्रमाणत्वाच्च BhaktiSū.(Nā.) 4.59; प्रत्यक्षं श्रुतिरनपेक्षत्वात् ManvaMu. 11. 15 (*on* 1. 21); वेदप्रामाण्यं त्वनपेक्षत्वादेव सिद्धम् TantrRaha. 7. 11; न हि भोक्तृहीना भुजिक्रिया भवति, न च अनादित्वेन क्रियारूपत्वाभावात् अनपेक्षत्वमिति वाच्यम् AdvaiSi. 303. 3; अश्वमेधज्ञानस्य तु गर्गत्रिरात्रब्राह्मणज्ञानवत् कर्तृसंस्कारकत्वादेव प्रयोजनानपेक्षत्वम्। अतश्चानपेक्षत्वादेवैतेषां फलकल्पकत्वासंभवः MīmāKau. iii(1). 12. 9 (*on* i 2. 4); iii(2). 70. 10 (*on* ii. 1. 9); परमते विचारस्यावैधत्वेनाधिकारपरिच्छेदानपेक्षत्वादथातश्शब्दयोरेवानर्थक्यम् SiddhāSi. i. 15. 9; कल्पसूत्रस्य तु ··· कात्यायनीयस्येव — निष्प्रत्यूहतया समग्रप्रधानभूततन्त्रान्तरसापेक्षत्वाभावमात्रेणानपेक्षत्वस्याप्युपपत्तेरेतत् तन्त्रेऽपि तदुक्तार्थस्य यावदपेक्षमविरुद्धं ग्रहणमनपोद्य(ह्य)म् SetuBa. 6. 29; **A** indifference अनपेक्षत्वं च तथा वपुषो विरतावपेक्षणं चान्ते KandaCū. ii. 1. 40; **B** the state of being disregarded (i. e. refuted) द्वितीयेऽध्याये ··· परपक्षाणां च अनपेक्षत्वं प्रपञ्चितम् BrahmSūBh.(Śaṅ.) 527. 3 (*on* iii. 1. 1); **C** the state of not having syntactic or semantic expectancy भावाभावाख्यपदयोः सामर्थ्यं चेत् समासता । घटादिनानपेक्षत्वान्न समासः प्रसिध्यति BṛĀraUBhVā. (Sambandha.) 945.

अनपेक्षत्वकारण (anapekṣatva–kāraṇa) *n.* cause of independence or self-validity पौरुषेयत्वापौरुषेयत्वे सापेक्षत्वानपेक्षत्वकारणे न्यायविद्भिर्दर्शिते पौरुषेयत्वनिराकरणप्रयत्नेन BrahmSi. 84. 1.

अनपेक्षत्वपक्ष (anapekṣatva–pakṣa) *m.* (alternative) view regarding non-requirement तदद्दृष्टं विपाकानपेक्षमायं कर्म जनयति तदपेक्षं वा। उभयथापि तत्ततो भवितुं नार्हति।··· तत्रानपेक्षत्वपक्षे कर्मासंभवमुपपादयति Śivārka-MaDī. ii. 68. 31 (*on* ii. 2. 11)

अनपेक्षत्वप्रतिक्षेप (anapekṣatva–pratikṣepa) *m.* rejection of non-requirement अनुकूलश्च द्वितीयः।··· एवं तृतीयोऽपि। अनपेक्षत्वप्रतिक्षेपस्य सापेक्षत्वोपलम्भानुग्राहकत्वात् ĀtmaTaVi. 559. 6.

अनपेक्षत्वप्रसङ्ग (anapekṣatva–prasaṅga) *m.* undesired contingency of non-requirement न द्दृष्टौ भेदाभावौ धर्मौ। नापि स्वरूपम्, अनपेक्षत्वप्रसङ्गात्। न चैकस्या द्वे रूपे। न च तयोरपि भेदः। स्वयंप्रभत्वे अनपेक्षत्वप्रसङ्गात् IṣṭaSi. 4. 10; प्रमाणानामनपेक्षत्वप्रसङ्गः, प्रदीपे प्रदीपान्तरानपेक्षया प्रकाशकत्वदर्शनात् TātpaṬ.(Vā.) 371. 9 (*on* ii. 1. 19)

अनपेक्षत्वलक्षण (anapekṣatva–lakṣaṇa) *adj.* characterised by independence or self-validity अनपेक्षत्वलक्षणप्रामाण्यपक्षेऽपि ··· त्रय्येव यथा प्रमाणभावभागिनी भवितुमर्हति NyāyMañ. i. 231. 18; न खलु लौकिकानि वाक्यानि ··· स्वतः प्रमाणम्, एवं वेदान्ता अपीत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत Bhām. 75. 21 (*on* i. 1. 4); प्रत्यक्षादीनामनपेक्षत्वलक्षणं प्रामाण्यं न स्यात् NyāyRa. 477. 21 (*on* 5(8). 15); इन्द्रादिशब्दानां पुरुषान्तरबुद्धिसापेक्षप्रवृत्तित्वाद् वेदस्यानपेक्षत्वलक्षणं प्र(?प्रा)माण्यं न स्यात् ŚrutaPra. ii. 63. 12 (*on* i. 3. 27); देहव्यतिरिक्तात्मतत्त्वस्य विधिभिरनपेक्षितत्वेन जैमिनिना मुखतोऽसूत्रणेऽपि सिद्धसाध्यविषयकृत्स्नवेदस्यानपेक्षत्वलक्षणप्रामाण्यसूत्रणेनार्थात् सूत्रितत्वात् VivaPraSaṁ. 112. 6.

अनपेक्षत्ववर्जन (anapekṣatva–varjana) *n.* denial of independence or self-validity वेदवाक्यममानं स्यान्मानं वा नास्य मानता। पृथक्संगल-पेक्षायामनपेक्षत्ववर्जनात् NyāyMāVi. 20. 8 (*on* i. 1. 7)

अनपेक्षत्वविधि (anapekṣatva–vidhi) *m.* affirmation of independence अनपेक्षत्वविधेः सदातनत्वव्याप्तत्वात् ĀtmaTaVi. 559. 7.

अनपेक्षत्वव्याघात (anapekṣatva–vyāghāta) *m.* blow to or unjustifiability of independence नन्वेवं स्वव्यवहारे प्रकाशान्तरानपेक्षत्वे परेणापि व्यवह्रियेत। तेन तज्ज्ञानमेव व्यवहर्तव्यं चेत्,अनपेक्षत्वव्याघातः NyāyKu. 76.13.

अनपेक्षत्वसाधकत्व (anapekṣatvasādhaka–tva) *n.* the state of being the proof for independence क्षैप्रयस्यैवानपेक्षत्वसाधकत्वेनोपपादितत्वात् VedāntKa. 538. 21 (*on* iv. 3. 1)

अनपेक्षत्वसिद्धि (anapekṣatva–siddhi) *f.* establishment of independence यदि त्विहापि हेतोरनपेक्षत्वसिद्ध्यर्थं गृहाभावमात्रमविशेषितं जीवनेन हेतुरिष्यते TātpaṬ.(U.) 392. 22 (*on* 5(7). 21)

अनपेक्षत्वसूत्र (anapekṣatva–sūtra) *n.* aphorism dealing with independence or self-validity (MīmāSū. i. 1. 21) तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति। अनपेक्षत्वसूत्रेण तच्चैतत साधयिष्यते ŚlokaVār. 6. 366 (823. 6); अनपेक्षत्वसूत्रे या रूपात् कृतकतोदिता। वेदे सा दृश्यते स्पष्टा ŚlokaVār. 8. 2 (951. 1)

अनपेक्षत्वहानतस् (anapekṣatvahāna–tas) *adv.* due to the loss of independence or self-validity नैतावतापरार्थेन युक्तयो मानकारणम्। शब्दमात्रादसंसिद्धेरनपेक्षत्वहानतः BṛĀraUBhVā.(Sambandha.) 854.

अनपेक्षत्वहानि (anapekṣatva–hāni) *f.* loss of independence नन्वेवं तर्कसापेक्षं स्वमर्थं साधयतोऽनपेक्षत्वहानेरप्रामाण्यं स्यात् PañcPā. 39. 17 (*on* i. 1. 1)

अनपेक्षत्वापत्ति (anapekṣatvāpatti) *f.* undesired contingency of non-expectation (of each other) न च — भेदस्य स्वरूपत्वे अनपेक्षत्वापत्त्या-धर्मत्वम्, तथा चानवस्था ··· अन्योन्याश्रयश्च, एवं च भेदासिद्धिरिति — वाच्यम् AdvaiSi. 787. 5.

अनपेक्षत्वाभिप्राय (anapekṣatvābhiprāya) *m.* intention of (conveying) non-requirement (of anything else) (प्रत्यक्षया विशेषश्रुत्या) प्रत्यक्षयेति। अनपेक्षत्वाभिप्रायः MayūMāli. 831. 16 (*on* xi. 4. 3)

अनपेक्षत्वाविशिष्टत्व (anapekṣatvāviśiṣṭa–tva) *n.* sameness or identity of independence or self-validity व्रीहिभिर्यजेत यवैर्यजेत इति, न हि तत्रान्यतरदपहर्तुं शक्यं उभयोरप्यनपेक्षत्वाविशिष्टत्वात् ĀgaPrā. 61. 14.

अनपेक्षत्वाविशेष (anapekṣatvāviśeṣa) *m.* non-difference in independence or non-requirement (of anything else) अनपेक्षस्यापि कालातिक्रमोऽकारणत्वे पर्यवस्यतीत्यर्थः। नन्वेवमपि उत्तरसंयोगमपि न कुर्यादनपेक्षत्वाविशेषात् Kiraṇā. 238. 15.

अनपेक्षत्वाशङ्का (anapekṣatvāśaṅkā) *f.* objection to non-requirement or independence तस्य फलं स्वपक्षस्य जगतो ब्रह्मकारणत्वस्यानपेक्षत्वाशङ्कानिवृत्तिः Bhām. 468. 21 (*on* ii. 3. 1)

अनपेक्षत्वासिद्धि (anapekṣatvāsiddhi) *f.* non-establishment of independence or self-validity न चानपेक्षत्वासिद्धिः, शीक्षाक्षरैः 'वायुरापद्यते शब्दताम्' इत्येवंविधैरित्याह सूत्रम् NayaVi. 251. 1 (*on* i. 1. 8)

अनपेक्षदृष्टि (anapekṣa–dṛṣṭi) *f.* sight not requiring any external factor दृश्यते हि प्रादेशमात्रपरिमाणवस्तुनोऽनपेक्षदृष्टिद्रष्टुस्य ह्रस्वं दीर्घमिति सविकल्पके व्यवहारे न्यूनाधिकपरिमाणवस्तुग्रहसापेक्षता TattvPradī.(Ci.) 166. 3.

अनपेक्षप्रमाणत्व (anapekṣapramāṇa–tva) *n.* the state of being a valid means (of knowledge) without dependence (on anything else) बाधकप्रत्ययस्तावदर्थान्यत्वावधारणम्। सोऽनपेक्षप्रमाणत्वात् पूर्वज्ञानमपोहते TattvSaṁ. 2866; वेदः अपौरुषेयः, अनपेक्षप्रमाणत्वात् प्रत्यक्षवत् PrakaVi. 49. 18.

अनपेक्षप्रवृत्ति (anapekṣa–pravṛtti) *adj.* usage of which does not require anything (as a cause for its employment) संज्ञाशब्दश्चानपेक्षप्रवृत्तिर्लवानिति, तत्रैव गेयमित्यूहलक्षणे निरूपितम् VaiyāBhū. 67. 23 (*on* 17)

अनपेक्षप्रवृत्तित्व (anapekṣapravṛtti–tva) *n.* the state of being employed without requirement (of external control), unqualified employment अन्यत्रापि पञ्चाग्निविद्याधिकारेऽभिधीयते। य एवमेतद् विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासत इति। सत्यशब्दस्य ब्रह्मण्येवानपेक्षप्रवृत्तित्वात् Bhām. 635. 19 (*on* iii. 3. 31)

अनपेक्षम् (ánapekṣam) (anapekṣám, ŚatBr. XII. v. 2. 15) *adv.* **A** impartially सर्वा ह वा एनं देवताः संप्रदायमनपेक्षं गोपायन्ति MaiS. i. 5. 7 (i. 75. 13); **B** without looking back एतामाहुतिं जुहोति। पुत्रो वा भ्राता वा यो वान्यो ब्राह्मणः स्यात् ··· स्वाहेत्यनपेक्षमेत्याप उपस्पृशन्ति ŚatBr. XII. v. 2.15; चात्वाले मार्जयन्ते। ··· अथ ··· उदङ्ङुत्क्रामति। ··· अनपेक्षमेत्याहवनीये समिधमभ्यादधाति ŚatBr. XIV. iii. 1. 28; अनपेक्षमेत्योपस्पृशन्त्यपः KātyŚS. v. 10. 23; xv. 1. 11; xv. 2. 8; xvii. 2. 6; xviii. 2. 9; शूलगवे च ···। ह(हि)-यमाणानुगच्छेत् ··· निहितेष्वप उपस्पृश्यानपेक्षं प्रत्याव्रजेत् LāṭyāŚS. iv. 9. 4; v. 3. 13; v. 8. 3; **Ci** without any desire or wish पुरुषान्तरसंघर्षप्रोत्सादितचित्तवृत्तिरनपेक्षम्। वसु विसृजति यो रभसात् तस्य न वार्ता त्वया पृष्टा Kuṭṭa-Ma. 534 (comm. निःस्पृहं यथा स्यात् तथा); ये तप्यन्तेऽनपेक्षं जिनगदिततपोमुक्तये मुक्तसङ्गास्ते मुक्तिम् ··· साधवो नो दिशन्तु SubhāRaSaṁ. 909; **Cii** without requirement (of anything else) इदं तु विज्ञानानपेक्षम्। कस्मात्, विज्ञानस्वरूपत्वात्। — न च स्वत एव वापेक्षा, अनपेक्षमेव सिद्धत्वात् Ken-UVāBh. 73. 20 (*on* 1. 4)

अनपेक्षमाण (án–apekṣamāṇa) *adj.* [*f.*–ā] **A** not looking back अनपेक्षमाणा आयन्ति MaiS. i. 10. 13 (i. 153. 14)=i. 10. 20 (i. 161. 1)= iii. 2.4 (iii. 20. 10)=iv. 8. 5 (iv. 113. 14); KāṭhS. 36. 7 (iii. 75. 8); 36. 14 (iii. 81. 15); KāṭhGS. iv. 12. 11; उत्तरनारायणेनादित्यमुपस्थायानपेक्षमाणोऽरण्यमभिप्रेयात् ŚatBr. XIII. vi. 2. 20; XIII. viii. 3.4; ŚatBr. (K.) I. vi. 2. 8; अध्वानमभ्युत्थित आमन्द्रैरिति वर्गं गीत्वानपेक्षमाणो व्रजेत् SāmaViBr. ii. 4. 6; अनपेक्षमाणाः प्रत्यायन्ति MānŚS. 46. 7 = 92. 18 = ··· ii. 1. 12 = ii. 17. 6; दक्षिणाग्नेरोल्मुकं धूपायद् प्राचीनं

हरन्त्यनपेक्षमाणाः MānŚS. 49.2; सूर्यमुपस्थायाद्भ्यः ··· इत्यनुवाकेनानपेक्षमाणोऽरण्यं गत्वा न प्रत्येयात् KātyŚS. xxi. 1.17; AVPari. 18(3).11; **Bi** not requiring, not depending upon सर्वे हि संबन्धिशब्दाः पदान्तरमनपेक्षमाणा न कंचिदप्यर्थमाहुः ŚābaBh. 1711.12 (*on* ix. 2.23); न प्रयोजनमन्तरा (v. l. अनपेक्षमाणः) चाणक्यः स्वप्नेऽपि चेष्टते MudrāRā. 3.19(15); अपेक्षायामनपेक्षायां च द्रव्ययोरभेदः। यावती द्रव्ये अपेक्षमाणे तावती एवानपेक्षमाणे NyāyBh. 266.8 (*on* iv. 1.40); NyāyVār. 484.15 (*on* iv. 1.40); वस्तुनस्तथात्वमनपेक्षमाणोऽध्यवसायः स विकल्प इत्युच्यते RājMār. 5.15; रेवत्यश्च (ऋचः) सप्तमीनिर्देशाद् वारवन्तीयशेषभूतत्वात् प्रयोजनान्तरमनपेक्षमाणा न फलेन संबध्यन्ते TantrVā. 556.15 (*on* ii. 2.27); पदार्थानां संबन्धग्रहणं समयं चानपेक्षमाणानामेव वाक्यार्थे प्रामाण्यं संभवति ŚāstrDī. 19.8 (*on* i. 1.2); अथ तर्कमनपेक्षमाणस्य किं स्यादित्यत आह NyāyVārPari. 354.3; **Bii** not caring for, indifferent to (नागरकाः केचित् ···। कुर्वन्ति रूढविश्वासाः परस्परपरिग्रहम्) युगपद् वा देहव्यत्यासेन रागात् कालमनपेक्षमाणौ JayaMa. 174.8 (*on* 2.9); गां सर्वप्राणैर्विमोक्षयेत्। स्वप्राणाननपेक्षमाण इत्यर्थः Aparā. 1101.24 (*on* 3.265)

अनपेक्षलक्षण (anapekṣa-lakṣaṇa) *adj.* characterised as independent यदा च पौरुषेयः संबन्धो न भवति तदा पुरुषबुध्य(? द्ध्य)पेक्षाभावादनपेक्षलक्षणं प्रामाण्यं स्थापितम् PrakaVi. 273.17.

अनपेक्षवर्णविभागम् (anapekṣavarṇavibhāgam) *adv.* without taking into consideration the division into castes (गेहानाम्) पूर्वोक्तानां वेदयज्ञैरहीनानामसंभवे सर्वं ग्राममनपेक्षवर्णविभागं विचरेत् ManuBh. i. 172.1 (*on* 2.185)

अनपेक्षवृत्ति (anapekṣa-vṛtti) *adj.* having the denotation not depending (upon the elements of derivation etc.) न चाश्वत्वे निरूढत्वादनपेक्षवृत्ति वाजिपदं कथंचिद्यौगिकं सापेक्षवृत्तिविश्वेदेवशब्दां देवतां वैश्वदेवीपदादामिक्षाद्रव्यं प्रत्युपसर्जनीभूतामवगतामुपलक्षयिष्यति Bhām. 584.2 (*on* iii. 3.1)

अनपेक्षवेदक (anapekṣa-vedaka) *adj.* conveying (something new) independently यद्यपि हि विनियोगापेक्षं मन्त्रवाक्यं न विधायकवदनपेक्षवेदकं तथापि तावद्वेदयति तावच्च वेदशब्दप्रवृत्तौ निमित्तमित्यविशेषः ŚāstrDī. 233.6 (*on* iii. 3.1)

अनपेक्षवेदगम्य (anapekṣaveda-gamya) *adj.* to be known through the independent (i. e. self-valid) Vedas अनपेक्षवेदगम्यकार्यस्य हेत्वन्वयायोग्यत्वादेव हि तदन्वयो निराकार्यः MayūMāli. 8.25 (*on* i. 2.1)

अनपेक्षवेदान्तवाक्य (anapekṣa-vedāntavākya) *n.* independent (i. e. self-valid) Upaniṣadic statement अनपेक्षवेदान्तवाक्यस्वरससिद्धसमन्वयलक्षणस्य ··· अनेन लक्षणेनास्ति विषयविषयिभावः संबन्धः Bhām. 327.13 (*on* ii. 1.1)

अनपेक्षशास्त्र (anapekṣa-śāstra) *n.* independent (i. e. self-valid) scripture अथानपेक्षशास्त्रावगम्यसाध्यानुबन्धभेदहेतुकशास्त्रभेदात्तदर्थभेदधीरिति प्रामाण्यहेत्वनपेक्षत्वावसरोऽयम् NayaVi. 64.3 (*on* i. 1.3)

अनपेक्षश्रुति (anapekṣa-śruti) *f.* independent (i. e. self-valid) Vedic statement एवमनपेक्षश्रुत्या तद्विरुद्धकापिलवचसः सापेक्षत्वेन विलम्बिनः प्रामाण्यमपह्रियते VedāntKa. 231.1 (*on* ii. 1.2)

अनपेक्षसाध्यभेद (anapekṣa-sādhyabheda) *m.* difference in aim or end not depending (on any other injunctive statement) व्रीहिशास्त्रस्यावहननशास्त्रमनपेक्ष्य स्वसाध्यप्रतिपादकतयानपेक्षसाध्यभेदलक्षणस्य शास्त्रभेदहेतोस्तत्र सद्भावात् MayūMāli. 182.20 (*on* iii. 1.1)

अनपेक्षस्वभाव (anapekṣa-svabhāva) *adj.* having an independent nature न ह्यनपेक्षस्वभावाः कूटस्थाश्चास्माभिर्गुणा अभ्युपगम्यन्ते BrahmSūBh.(Śaṅ.) 359.12 (*on* ii. 2.9)

अनपेक्षस्वभावत्व (anapekṣasvabhāva-tva) *n.* the state of having an independent nature अनुमा हि पूर्वधीविषयताविशिष्टे, न तु वेद्यतावधृते, अनपेक्षस्वभावत्वात् NayaVi. 79.1 (*on* i. 1.4); गुणानामनपेक्षस्वभावत्वात् स्वत एव वैषम्यं न संभवतीत्युक्तम् PrakaVi. 483.17.

अनपेक्षस्वरूप (anapekṣa-svarūpa) *adj.* of an independent nature तस्यामवस्थायामनपेक्षस्वरूपाणां (सत्त्वरजस्तमसाम्) स्वरूपप्रणाशभयात्परस्परं प्रत्यङ्गाङ्गिभावानुपपत्तेः BrahmSūBh.(Śaṅ.) 359.5 (*on* ii. 2.8)

अनपेक्षहरणीय (anapekṣa-haraṇīya) *adj.* (load) to be carried without the aid of anything कथमतिचपलभावानां क्षीणबलमांसशोणितानां यान्तृ(तृ)वशाच्चातिप्रमाणमनपेक्षहरणीयभञ्जनीयमर्दनीयप्लवनीयेषु हस्तियुद्धविमर्दापगमा(ता)नां च ··· नानाविधलिङ्गवेदना विकाराः संभवन्ति HastyāyUr. 618.26 (4.7)

अनपेक्षा (an-apekṣā) *f.* **A** non-dependence on or non-requirement of (external factors) प्रतीच्छामि साधुष्ठान(स्थान)मनपेक्षया महान्तं तेजस्कायं सर्वत्र निहितं प्रभुम् HirŚS. xxvi. 6.6 (88.18); ĀpaDS. i(8).22.6; अपेक्षायामनपेक्षायां च द्रव्ययोरभेदः NyāyBh. 266.7 (*on* iv. 1.40); NyāyVār. 484.14 (*on* iv. 1.40); परैः कृतकानामन्तेऽवश्यं हेतुनिबन्धनविनाशोपगमात् तद्धेत्वयोगप्रतिपादनेनानपेक्षा विनाशं प्रति विपर्यये बाधकं प्रमाणं तादात्म्यप्रसाधकमुक्तम् HetuBiṬ. 76.25; 83.11; 108.22; न चाम्बुनोऽप्यत्यन्तमनपेक्षा, निम्नभूम्याद्यपेक्षत्वात् स्यन्दनस्य BrahmSūBh.(Śaṅ.) 355.3 (*on* ii. 2.3); केषुचिद् व्यक्तिविशेषेषु गोचरेषु शब्देषु अनुमानेषु चानपेक्षापि वक्तुम् [शक्यते] NyāyKu. 155.21; 12.2; किमपेक्षेतेति न किंचिदित्यर्थः। अनपेक्षायां वा सर्वाभावः स्यादित्याह तस्मादिति NyāySu.(So.) 46.25 (*on* i. 2.7); तस्याः (ईश्वरेच्छायाः) कार्यत्वेन निमित्तमपेक्षितं स्यात्। न च तदस्ति। तदुत्पत्तावीश्वरेच्छायाः अनपेक्षायामन्यत्रापि तत्प्रसङ्गः TattvPrakā. 98B.2 (*on* ii. 2.12); 92B.7 (*on* ii. 1.37); 122A.5 (*on* ii. 3.42); मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते SāhiDa. 622.9; शुकस्य वैराग्यातिशयादुपनयनादेरप्यनपेक्षोच्यते AṇuBh. 275.7 (*on* iii. 4.13); 285.16 (*on* iii. 4.24); **B** disregard, neglect, absence of caring for अपरिग्रहाच्चात्यन्तमनपेक्षा BrahmSū. ii. 2.17; BrahmSūBh. (Śaṅ.) 381.4 (*on* ii. 2.17); यदा तु चोदनागम्यः कार्याकार्यानपेक्षया। धर्मः प्रीतिनिमित्तं स्यात् तदा श्येनेऽपि धर्मता ŚlokaVār. 2.271 (126.10); काणादपक्षस्य ··· अत्यन्तमनपेक्षैव निःश्रेयसार्थिभिः कार्या BrahmSūBh.(Rā.) 483.13 (*on* ii. 2.16); VedāntSā.(Rā.) 174.3 (*on* ii. 2.16); VedāntDī. 104.14 (*on* ii. 2.17); VedāntKau. 190.20 (*on* ii. 2.17); BrahmSūBh.(Śrī.) ii.77.9 (*on* ii. 2.16); अतिव्ययोऽनपेक्षा च ··· कोषव्यसनमुच्यते Hitopa. 2.84; (इयं स्यादंशकल्पना) पित्रादेरनिच्छया अनपेक्षया वक्ष्यमाणा ManvaVi. 1173.16 (*on* 9.116); वैशेषिकेषु काव्येषु ···। अनपेक्षया च संसर्गे स्यातामुत्कृष्टमन्दते AlaṅkāŚe. 19.12(14); केवलानुमानस्य मुख्यतयैवोपन्यासो न त्वागमस्यानपेक्षा SāṁkhyaPraBh. 29.26 (*on* 1.60); **C** absence of desire कपाले वृक्षमूलानि कुचेलमसहायता। अनपेक्षा ब्रह्मचर्यं नयन्ति परमां गतिम् PadmP. v. 19.346; तदेतद् भरतक्षेत्रवैभवं भरतेशितुः। हृतमेव मया विश्वोपेक्षितं ह्यनपेक्षया TriṣaŚaPuC. i. 5.507.

अनपेक्षाकल्प (anapekṣā-kalpa) *m.* theory or view of independence यदुपाधिकोऽनपेक्षाकल्पः (इति चेत्) तर्हि तस्य यावत्समस्तं प्रकाशस्स्यात् NyāyKu. 72.14.

अनपेक्षाकृत (anapekṣā-kṛta) *adj.* made regardless of anything else ग्रामाणां हि न किंचिदपेक्षाकृतं ग्रामत्वम्। भागानां त्वेकस्यैव मुख्यं मूलत्वमग्रत्वं चानपेक्षाकृतम् Nyās. ii. 906.18 (*on* viii. 1.12)

अनपेक्षागम (anapekṣāgama) *m.* independent (i. e. self-valid) scripture अथानपेक्षागमावगतसाधनभावानामाग्नेयादीनाम् ··· उत्पत्त्यपूर्वाणि व्यापार इत्यभिधीयेत, तुल्यमिदमन्यत्रापि NyāyMa. 214.3; नियन्तृत्वे न कार्यकारणत्वं प्रयोजकम्, किंतु चिच्छक्तिमत्त्वम्। तच्चेश्वरस्यानपेक्षागमादेव सिद्धम् PrakaVi. 193.13.

अनपेक्षाजुष् (anapekṣā-juṣ) *adj.* enjoying independently or freely उत्पन्ना च तव श्रीतिर्यशोदामेभ्यमार्यया। ··· अनपेक्षाजुषा प्रेक्ष्य, पितृभ्यां वारितासि च SamarāSaṁ. 8.400.

अनपेक्षाद्योतनार्थ (anapekṣādyotanārtha) *adj.* meant to indicate non-requirement (लोकवत्तु लीलाकैवल्यम्) कैवल्यशब्दः क्रियतोऽप्यायासस्यानपेक्षाद्योतनार्थः ŚivārkaMaDī. ii. 44.30 (*on* ii. 1.33)

अनपेक्षाद्वारक (anapekṣādvāra-ka) *adj.* having the medium of independence or non-requirement विरोधमाहेति। अनपेक्षाद्वारकं भास्यभासकत्वविरोधमाहेत्यर्थः VedāntKa. 164.11 (*on* i. 3.22)

अनपेक्षानुपपत्ति (anapekṣānupapatti) *f.* untenability of absence of requirement (of something) न तावदेकस्मादनपेक्षादनेकम्, अक्रमात् क्रमवत् कार्यानुपपत्तेः। ··· यौगपद्यवदिति चेद् — अयमपि च क्षणभङ्गे परिहारो न तु सहकारिवादे। ··· क्रमनियमे त्वनपेक्षानुपपत्तेः NyāyKuA. i. 20.13.

अनपेक्षापरोक्षताक (anapekṣāparo'kṣatā-ka) *adj.* whose perceptibility is not dependent (on anything else) अनपेक्षापरोक्षताकत्वस्य ब्रह्मणि सत्त्वात् साक्षादपरोक्षात् स्वविलक्षणचिदनपेक्षा(? क्ष)परोक्षताकमनपेक्षापरोक्षताकं (sic.) वा अविद्योपहितचिद्रूपमविद्याद्यपरोक्षत्वं शुद्धचित्सापेक्षमेव GuruCandr. i. 141.18.

अनपेक्षापरोक्षताकत्व (anapekṣāparo'kṣatāka-tva) *n.* the state of having perceptibility not depending (on anything else) अनपेक्षापरोक्षताकत्वस्य ब्रह्मणि सत्त्वात् GuruCandr. i. 141.16.

अनपेक्षापविद्धा (anapekṣāpaviddhā) *adj.* (*f.*) thrown down without caring for तां तु रोषादनपेक्षापविद्धामनरत्नमञ्जरीमिवान्तरिक्षात्पतन्तीमुन्मुखप्रसारितोभयकरः कराभ्यां सदयमग्रहीषम् DaśKuC. 118.16 (comm. एवं त्यक्त्वा वेत्तस्येदित्यपेक्षाया अभावेन त्यक्ताम्)

अनपेक्षाम्नाय (anapekṣāmnāya) *m.* independent (i. e. self-

valid) scripture धर्मवद् ब्रह्मणोऽपि मानान्तराविषयतयातत्र्यत्वेनानपेक्षाम्नायैकगोचरत्वात् Bhām. 334.21 (*on* ii. 1. 4)

अनपेक्षालक्षण (anapekṣā-lakṣaṇa) *adj.* characterised by independence or self-validity न ह्यकार्यार्थं वचः प्रामाण्यमर्हति । अनपेक्षालक्षणं हि तत् Kāśi. i. 67.19 (*on* 2. 20); iii. 220. 8 (*on* 5(10). 1)

अनपेक्षावगतसाधनभावा (anapekṣāvagata-sādhanabhāvā) *adj.* (*f.*) whose causality is known independently पूर्वपक्षे हि विकल्पः समुच्चयो वा वक्तव्यः स चायुक्तः नित्यवदवगतसाधनभावाया आमिक्षाया विकल्पायोगात् । अनपेक्षावगतसाधनभावायाश्च तस्याः समुच्चयायोगात् VedāntKa. 397.8 (*on* iii. 3. 1)

अनपेक्षावगति (anapekṣāvagati) *f.* [Abl.] because of the knowledge of independence प्रयोक्तृत्वाप्रयोक्तृत्वयोः प्रयोक्तृत्वं श्रौतम्, अनपेक्षावगतेः Bṛha. 40.10 (*on* i. 1. 2)

अनपेक्षाहेतु (anapekṣā-hetu) *m.* cause of non-requirement अत्र परिमाणमात्रग्रहणे कर्तव्ये प्रथिमेति महत्त्वमिति चोक्तिर्विसदृशपरिमाणत्वस्यानपेक्षाहेतोर्निराकरणं स्यादित्युचितमिति NyāySu.(Ja.) 368A. 6 (*on* ii. 2. 6)

अनपेक्षित (an-apekṣita) *adj.* [*f.* -ā] **AI** disregarding, indifferent **II** not expected, not desired **BI** not required, not necessary **II** not depending on, independent **C** not required (syntactically or semantically) **D** not intended **E** not considered

AI disregarding, indifferent वैरूपाष्टकं नित्यं प्रयुञ्जानो लक्ष्मीं नुदते । भक्त्यं वा जानुदघ्न उदके तिष्ठन् । नाभिदघ्ने धान्यं कक्षदघ्ने पशून्नासदघ्ने पुत्रान् ग्रामं च । अनपेक्षितो वासकृद् गीत्वोत्तीर्णः सहस्रं लभते SāmaViBr. iii. 2.10 (comm. जानुदघ्नत्वविशेषणनिरपेक्षः); **Aii** not expected, not desired दत्तानि येन हि धनान्यनपेक्षितानि । स श्रेयसां कथमिवैकनिधिर्महात्मा पापं करिष्यति धनार्थमवीरजुष्टम् Mṛcch. 9. 22; अन्यथा हि सुखस्य साधनं सर्वमेतदनपेक्षितं कृतम् । दुःसहेन शिशिरेण निर्भरं पीडिते व्यजनमारुता इव NāgaSa. 14. 13 (comm. अनपेक्षितं विपरीतम्); लक्ष्मणोऽचिन्तयत् ··· अन्यायमीदृशं कर्तुं कथं तातेन वाञ्छितम् । स्वार्थसंसक्तनिलयां धिक् स्त्रैणमनपेक्षितम् PadmP.(Ra.) 31. 193; क्षेत्रात्लूनस्य व्रीह्यादेर्गृहं खलं वा नीयमानस्य यः पुलाकः पतितः स्वामिनोऽनपेक्षितस्तस्योच्चयनमुञ्छः ManuBh. i. 329. 2 (*on* 4. 5); अनर्थकप्रयोगश्चानपेक्षितः शिष्यैः TātpaṬ.(Va.) 320. 25 (*on* i. 2. 1); हविषा वाक्यान्तरेणैवासंसर्गार्थोपस्तरणाभिधारणविधानादनपेक्षितः संस्कारो न भवितुमर्हति TantrRa. 94. 17; क्रतावेवोपकारकल्पनावसरोऽनर्थस्य त्वनपेक्षितस्यावसर एव नास्ति NyāyRa. 124. 18 (*on* 2. 263); न च मुमुक्षुणानपेक्षिते स्वर्गे यागादिकं तत्साधनतया नानुभूयते NyāySu. (Ja.) 11A. 3 (*on* i. 1. 1); TattvPrakā. 221A. 6 (*on* iv. 4. 9); अपेक्षित एव भोगो नानपेक्षितः AṇuBh. 56. 24 (*on* i. 2. 8); न केवलमनपेक्षितः कामोपबन्धः किंत्वसंभावितश्च MayūMāli. 269. 8 (*on* iii. 4. 10); **BI** not required, not necessary वर्णानुक्रमोपकारे ह्यनपेक्षिते यथाकथंचित्प्रयोगेऽपि तेषां कस्यचिद्वाक्यस्य प्रतीतिप्रसङ्गात् SphoṭSi. 219. 1; धात्वर्थसंबन्धस्त्वनपेक्षितः क्रियेत विध्यानर्थक्याच्च बाध्येततरां श्रुतिः TantrVā. 353. 20 (*on* ii. 1. 1); न चानपेक्षिताः (अर्थाः) प्रकरणेन ग्रहीतुं शक्यन्ते TantrVā. 1100. 15 (*on* iii. 6. 25); यस्तु वदति न वयं ज्ञानेच्छामपह्नुमहे ··· । स वक्तव्यः किमिदानीं नैमित्तिकवाक्यार्थज्ञानमनपेक्षितमेव NyāyRaMā. 6. 13; विष्णुदेशापेक्षितो विशेषो वाक्यशेषाद् गृह्यते नानपेक्षितः ŚāstrDī. 168. 11 (*on* ii. 3. 7); विनतेत्यादिपदेन स्थेमान्तभूतस्वर्गादिसांसारिकफलप्रदत्वस्य पृथग्युक्तिरनपेक्षिता ŚrutaPra. 1A. 4. 17 (*on* i. 1. 1); वाक्ये ···। अनुविधेयंवरणं तु सर्वदानपेक्षितमेव NyāyPari. 170. 5; अश्वे गोत्वं कदाचिदपि नास्तीत्यादौ तत्संसर्ग एव निषिध्यत इति मते देशपदमनपेक्षितम् Nyāyāmṛ. 97A. 6; चैत्रस्य मैत्र इति प्रतीत्यभावेऽपि चैत्रस्य पिता मैत्र इति प्रतीतिवद् आक्षेप्यमत्र प्रमाणाविरुद्धमेव ···। आक्षेपके च प्रमितत्वमनपेक्षितमेव AdvaiSi. 471. 5; पूर्वाधिकरणे ··· साध्यान्तरनिर्देशादनपेक्षितोऽपि प्रथमसूत्रादनुवृत्तो ब्रह्मशब्दः ··· मण्डूकप्लुत्यानुवर्तते ŚivārkaMaDī. i. 212. 31 (*on* i. 1. 13); VidhiRa. 29 (162. 15); श्रुतस्य कालान्तरेऽप्यसंभावनाविपरीतभावनानिवृत्त्यर्थं पूर्वस्थितानामज्ञानामनपेक्षितानामुद्दापेनान्येषामपेक्षितानामावापेन तस्यैवार्थस्य निर्धारणे मननं भवति AṇuBh. 52. 6 (*on* i. 2. 1); परस्य व्यापकत्वेन देशविशेषगमयित्रोरनपेक्षितयोक्तेः कार्यरूप एव स ब्रह्मपदेनोच्यते AṇuBh. 338. 10 (*on* iv. 3. 8); सर्वत्र विध्यपेक्षित एवार्थोऽर्थवादोन्नीतविधिना विधीयते, न त्वनपेक्षितः MīmāKau. ii. 53. 11 (*on* ii. 3. 18); प्रायश्चित्तादौ ··· प्रयाजाद्यंशेऽतिदेशं चानपेक्षितं च प्रकल्प्यानलभ्यैत्वकल्पने तु तत्रैव गौरवम् BhāṭṭDī. iii. 226. 24 (*on* x. 2. 15); **BII** not depending on, independent (हेतोः) अनपेक्षितस्य नित्यं सत्त्वमसत्त्वं वेत्यस्य नियमस्य प्रमाणाभावेनानवक्लृप्तेः PrakaPañ. 200. 14; ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुर्न बाधकत्वे, रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात् Bhām. 5. 20 (*on* i. 1. 1); अनपेक्षितमेव पौर्वापर्यं विधीयतां को दोषः TantrRa. 239. 18; ततो नैव गुणसिद्धौ लक्षणान्तरमनपेक्षितमापद्येत TarkSam.(Ā.) 57. 3; **C** not required (syntactically or semantically) एकस्मिन्नपि वाक्ये तदवयवभूतस्यानपेक्षितस्य नैव भवति संबन्धः, यथा, अश्वेन व्रजति, श्वेतेन पटेनावृत इति, नानपेक्षितस्याश्वस्य श्वैत्यं विशेषणं भवति ŚābaBh. 1443. 5 (*on* vi. 4. 23); **D** not intended न ह्यनपेक्षिता स्तुतिरर्थवादानामर्थो भवितुमर्हति Kāśi. ii. 25. 12 (*on* 5(2). 3); अनपेक्षितमेवाचेतनवादिमतम् BrahmSūBh.(Ma.) 28B. 6 (*on* ii. 2. 4); प्राधान्यात्तद्गुणवृत्तेरेकत्वमनपेक्षितम् NyāyMāVi. 114. 10 (*on* iii. 1. 7); अतः प्रमाणविरुद्धं निष्प्रमाणकं च स्वतोऽचेतनप्रवृत्तिमतमनपेक्षितमेव प्रेक्षावताम् TattvPrakā. 95A. 5 (*on* ii. 2. 4); ननु यदि सूत्रकारस्यानपेक्षितमिदं किंच पित्र भवतीति PariVṛ.(Si.) 131. 9; मन्त्रप्रकाश्यस्यानपेक्षितस्यापि क्रियासंबन्धकल्पनम् BhāṭṭDī. iii. 81. 3 (*on* ix. 1. 14); पवमानेष्टिषु श्रुतस्य द्रव्यदेवतासंबन्धस्य प्रक्षेपं विनापि त्यागमात्रेणोपपन्नतया प्रक्षेपापेक्षाविरहेण अनपेक्षितस्य ग्रहणानुपपत्तेः MayūMāli. 205. 14 (*on* iii. 1. 12); 614. 2 (*on* ix. 2. 13); संप्रति पुनरस्या अनपेक्षितमप्यनुलेपनादिकमखिलजनाचारविषयतया करणीयमेव RasSa. 34(2); **E** not considered कथमनपेक्षिते गवि तत्सादृश्यविशिष्टोऽवगम्यते Kāśi. iii. 143.25 (*on* 5(6).17)

अनपेक्षितकण्ठोक्ति (anapekṣita-kaṇṭhokti) *f.* statement of that (viz. *vidyā* as a means) which is not intended तद्धेतोरनभिप्रेता इति चेत् — अनपेक्षितकण्ठोक्तिः अपेक्षितस्यावचनं सूत्रास्वारस्यं च स्यात् । अतो यथाभाष्यमेवार्थः ŚrutaPra. ii. 531.28 (*on* iii. 3. 58)

अनपेक्षितकलत्रपार्ष्णिग्राहासाराक्रन्द (anapekṣita-kalatrapārṣṇigrāhāsārākranda) *adj.* (kingship) for which a royal citadel, an enemy in the rear, an ally in war and a defending king are not necessary अथ पिङ्गलकः ··· अप्रहरणाभरणम् ··· अनपेक्षितकलत्रपार्ष्णिग्राहासाराक्रन्दम् ··· राजत्वम् अनुबभूव Pañcā. 4. 32.

अनपेक्षितकालक्रम (anapekṣita-kālakrama) *adj.* who has neglected the (proper) course of time एवं नामायम् ··· कुसुमायुधो यदनेनाभिभूता महान्तोऽप्येवमनपेक्षितकालक्रमाः समुत्सारितधैर्याः सद्यो जीवितं जहति Kād. 176. 20.

अनपेक्षितकीटादिज्ञानवत् (anapekṣitakīṭādijñāna-va(n)t) *adj.* possessing unnecessary knowledge of (even the smallest) insects etc. कर्मनिमित्तमेव जगद्वैचित्र्यमस्तु किंतीश्वरेणानपेक्षितकीटादिज्ञानवता कर्मनिरपेक्षत्वे चैकदैव सदा च सर्गप्रलयौ स्यातां ज्ञानादीनां नित्यत्वात् TattvCin. ii(2). 83. 9.

अनपेक्षितक्रत्वङ्गता (anapekṣitakratvaṅga-tā) *f.* the state of being an unnecessary subsidiary to a sacrifice सिद्धरूपस्यानारभ्याधीतस्याग्नेः स्वतः फलार्थत्वासंभवेनाग्निहोत्रादिवाक्यानां तदपेक्षिताश्रयक्रियासमर्पकतयानपेक्षितक्रत्वङ्गतापरत्वायोगात् VidhiRa. 32(176. 7)

अनपेक्षितक्रमम् (anapekṣitakramam) *adv.* regardless of the (usual or customary) procedure स (कृष्णः) न यावदाप शिरसा महीतलम् । क्षितिपेन तावदनपेक्षितक्रमं भुजपञ्जरेण रभसादगृह्यत ŚiśuVa. 13. 9 (comm. अनपेक्षितः क्रमः परिपाटी यस्मिन्कर्मणि तत्तथा)

अनपेक्षितगण्डूषमदिरानेकदौहृद (anapekṣita-gaṇḍūṣamadirānekadauhṛda) *adj.* which has neglected the great longing for a mouthful of wine अनपेक्षितगण्डूषमदिरानेकदौहृदः । ववृषे बकुलैः (v. l. वकुलः, JPMJGM. 26) प्रावृड् नभोभवकुलैरिव PadmP.(Ra.) 122. 34.

अनपेक्षितगात्रसंचारम् (anapekṣitagātrasañcāram) *adv.* in such a way that the movements of the limbs are not required श्वापदगजतुरगरथोद्भवं तु पशुयानपतनजं वापि । शस्त्रक्षतवत् कुर्यादनवे(v. l. पे)क्षितगात्रसंचारम् । मरणम् NāṭyaŚā. 7.139.

अनपेक्षितगीतार्थ (anapekṣita-gītārtha) *adj.* not depending on the meaning of the song त्रिविधं गीते कार्यं वाद्यम् ···। तत्त्वं ह्यनुगतमोघः ···। अनपेक्षितगीतार्थं वाद्यं त्वोघे विधातव्यम् NāṭyaŚā. 29. 78.

अनपेक्षितगुण (anapekṣita-guṇa) *adj.* not requiring (any) good quality or virtue (in the object of love or admiration) अधिक[तर]प्रियमेतन्ममेति बुद्धिर्न वस्तुसौन्दर्यात् । नूनमनपेक्षितगुणो मोहधनः स्नेह एवैह BhartṛNi. 3. 11.

अनपेक्षितगुणदोष (anapekṣita-guṇadoṣa) *adj.* in which merits and demerits are disregarded अनपेक्षितगुणदोषः परोपकारः सतां व्यसनम् HarṣaC. 70. 4 = SūktiRa. 31. 25.

अनपेक्षितगुरुवचना (anapekṣita-guruvacanā) *adj.* (*f.*) not depending on the instructions from the teacher अनपेक्षितगुरुवचना सर्वान् ग्रन्थीन् विभेदयति सम्यक् । ··· विमर्शशक्तिर्निजा जयति Subhāṣi. 2.

अनपेक्षितगौरव (anapekṣita-gaurava) *n.* undesired complexity (of argument) वाक्यस्योपपत्तौ नानपेक्षितगौरवापादकविद्वद्वाक्यविहितकर्मविधिपरत्वम् BhāṭṭDī. i. 114. 3 (*on* ii. 2. 3)

अनपेक्षितचोदन (anapekṣita-codana) *n.* injunction about un-

desired thing अपेक्षितविधिर्न्यायाननपेक्षितचोदनात्। तेन क्रत्वङ्गमेवेष्टिः फलं नैवं न कल्प्यते ŚāstrDī. 276.18 (on iii. 4. 16)

अनपेक्षितजातिशब्द (anapekṣita-jātiśabda) *adj.* not requiring any generic word जातिगुणशब्दयोरिव गुणशब्दयोरपि अनपेक्षितजातिशब्दयोरेव सामानाधिकरण्यं स्यात् NyāyRa. 598. 18 (on 5(13). 121)

अनपेक्षितजीवित (anapekṣita-jīvita) *adj.* [f. -ā] **i** in which life is not cared for तद् भटानामभूद् युद्धम् ··· अनपेक्षितजीवितम् PadmP. (Ra.) 60. 75; **ii** not caring for (one's own) life तस्य दृष्ट्वा तामनपेक्षितजीविताम्। प्रीतिं काष्ठागतस्नेहा सा भद्रा तमभाषत KathāSaSāg. iii. 4. 374.

अनपेक्षितज्ञानान्तर (anapekṣita-jñānāntara) *adj.* not requiring (any) other cognition यदि त्वनपेक्षितज्ञानान्तरमेव तत्प्रमाणम्, एवं सति प्रथममर्थज्ञानमेव किमनपेक्षं न प्रमाणमिष्यते Kāśi. i 102. 4 (on 2. 76)

अनपेक्षितज्ञानान्तरव्यापार (anapekṣita-jñānāntaravyāpāra) *adj.* not requiring the operation of another cognition यज्ज्ञानं तदात्मबोधं प्रत्यनपेक्षितज्ञानान्तरव्यापारम् SyādvāMañ. 12(99)

अनपेक्षितज्वाल (anapekṣita-jvāla) *adj.* not requiring flames यत्तु तात्पर्यात् पदानामेव साक्षादन्वितप्रतिपादकत्वं युक्तमित्युक्तं तत् काष्ठानामनपेक्षितज्वालानां पाकसाधनत्वम् ··· आपादयेत् NyāyRaMā. 85. 21.

अनपेक्षिततत्त्वदृष्टिचेष्ट (anapekṣita-tattvadṛṣṭiceṣṭa) *adj.* who has not cared for behaviour in accordance with the knowledge of the right faith ते न समर्था गदितुं स्वपक्षमेकम्। अनपेक्षिततत्त्वदृष्टिचेष्टाः परिपप्रच्छुरथावनीन्द्रमित्थम् VarāṅgaC. 24. 18.

अनपेक्षिततत्त्वमार्गदृष्टि (anapekṣitatattvamārga-dṛṣṭi) *f.* view based on the discredited philosophical doctrine घटपिण्डवदेव जीवराशिः क्रियते चेत् परमेष्ठिनेति यस्य। अनपेक्षिततत्त्वमार्गदृष्टिर्ननु नित्येतरतामुपैति तस्य VarāṅgaC. 24. 51.

अनपेक्षिततदुपनीतसहाय (anapekṣita-tadupanītasahāya) *adj.* not requiring the help or assistance offered by him समरकेतुः ···। प्रभाते च तम् (हरिवाहनम्) ··· सुदूरं कृतानुव्रजनमनपेक्षिततदुपनीतसहायः पुनरचलद् TilaMañ. 201. 11.

अनपेक्षिततद्व्यापारम् (anapekṣitatadvyāpāram) *adv.* regardless of its operation पुरुषवाक्यमपि प्रमाणं न हि तदपि वक्तृप्रामाण्योत्थापनेनार्थं प्रतिपादयति किं त्वनपेक्षिततद्व्यापारं स्वयमेव उत्पत्तिमात्र एव तदपेक्षणात् NyāyKa. 4. 22.

अनपेक्षितता (anapekṣita-tā) *f.* [Inst.] without dependence or requirement पृथगनुमानस्य कामगामित्वेनादृष्टार्थविषयेऽनपेक्षिततयोक्तबाधकत्वायोगात् TattvPrakā. 21A. 6 (on i. 1. 18); 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामश्चित्रया यजेत पशुकाम' इत्यादिपृथग्विधिभिर्भिन्नानां फलेषु विनियोगेन युगपच्चिकीर्षाविरहादनपेक्षिततया इष्ट्यादिशब्दैस्तन्त्राभिधानलब्धसाहित्यं न विवक्षितम् MayūMāli. 805. 22 (on xi. 2. 1)

अनपेक्षितत्व (anapekṣita-tva) *n.* **A** the state of being heedless चुम्बननखदशनच्छेद्यानां न पौर्वापर्यमस्ति।··· रागस्यानपेक्षितत्वात् KāmSū. 105. 7 (2. 3); **Bi** the state of not being desired उक्तेऽपि च प्राशस्त्ये कस्मादिलनपेक्षितत्वात् ··· कर्तव्यताबुद्धिर्नैव स्यात् TantrVā. 21. 1 (on i. 2. 7); एकदेशिनां तु फलस्यानपेक्षितत्वात् ··· न फलविशेषचिन्ता युक्ता TantrRa. 175. 13; स्वर्दृक्शब्दस्य वीक्षणाङ्गत्वविधावनपेक्षितत्वमुपपादयति MayūMāli. 741. 18 (on x. 6. 2); **Bii** the state of not being intended द्रव्यं चापूर्वसाधनम् ··· तदभिधानं तु द्रव्यनियमार्थं प्रतिपत्तव्यं न स्वार्थं जातेरनपेक्षितत्वात् TantrVā. 278. 19 (on i. 3. 26); प्रयोजनं च विघ्नोपशमः, तस्यैव ग्रन्थारम्भेऽपेक्षितत्वात्, न तु स्वर्गः, अनपेक्षितत्वात् TātpaṬ.(U.) 1.14 (on 1. 1); यत् तेषां पुनरुच्चारणं पुरस्तादुपसदां सौम्येन चरन्तीति तत् कालार्थम्। कुतः। इतरस्याङ्गित्वादस्य स्वाराज्यं प्रति पूर्वविगतत्वादनपेक्षितत्वात् TantrRa. 208. 17; अवधिविधिरयमपेक्षितत्वात् नाप्लवनमात्रविधानमनपेक्षितत्वात् NyāyRa. 33. 11 (on 1. 93); गुणोपसंहारानुपसंहारौ ···। कर्तव्यौ न वेति संदेहः।··· न कर्तव्याविति पूर्वः पक्षः।··· अनुपसंहारेऽपि मोक्षप्राप्तेरुक्तत्वात्। फलान्तरस्य चानपेक्षितत्वात् TattvPrakā. 167B. 11 (on iii. 3. 15); ब्रह्मविचारस्त्वनधीतवेदेन न कर्तव्यः। तस्याध्ययनकाले अवश्यकर्तव्येष्वनपेक्षितत्वेन नियमविध्युल्लङ्घने कारणाभावात् ŚivārkaMaDī. i. 32. 34 (on i. 1. 1); i. 115. 2 (on i. 1. 2); i. 457. 16 (on i. 3. 25); **C** the state of not being required अथ दधिसद्भावमात्रापेक्षिणीन्द्रियकामवाक्ये सत्यपि तण्डुलादीन्यनपेक्षितत्वादसत्तुल्यान्यनाश्रित्य केवलं दधि ग्रहीष्यते TantrVā. 543. 7 (on ii. 2. 25); हविःसंस्कारस्य त्वनपेक्षितत्वाददृष्टं कल्प्यम् ṬupṬ. 14. 2 (on iv. 1. 34); यः प्रतिषेधं दृष्ट्वा तदतिक्रमेण प्रवर्तते ··· तं प्रति प्रायश्चित्तं पापक्षपणार्थत्वेनानपेक्षितत्वाददृष्टार्थं स्यात् BālaKrī. ii. 80. 22 (on 3. 212(? 222)); किमेकप्रमाणावसिते प्रमाणान्तरवैयर्थ्यं फलाभावात् पुरुषेणानपेक्षितत्वाद् वा NyāyKa. 61. 8; 235. 6; साध्यसाधनांशप्रतिपादकभागावनपेक्षितत्वादनादृत्य यस्तृतीयोंऽश इत्थंभावः ··· परिकल्पितस्तस्य वाचको यः शब्दः ··· स वाक्यशेषत्वेन कल्प्यते ŚāstrDī. 81. 5 (on i. 1. 5); किंनिबन्धनश्चाधिगतविषये प्रद्वेषः। किं तत्राधिगत्यन्तरानुत्पत्तेः उत्पत्तावपि वानपेक्षितत्वात् TārkiRa. 42. 4; स्वरूपमात्रप्रकाशदशायामप्यज्ञानाभावादेव तन्निवर्तनस्यानपेक्षितत्वात् ŚatDū. 169. 14; 132. 27; 139. 8; भवति हि पर्वतोऽयमग्निमानिति शब्दश्रवणानन्तरं धूमं परामृशतोऽपि तादृशी बुद्धिः।··· अनपेक्षितत्वादिकमपि श्रुतविषयानुमानादौ समम् NyāyPari. 490. 12; वैराग्यादेर्मुमुक्षूणामनपेक्षितत्वे शास्त्रवैयर्थ्यापत्तेः TattvPrakā. 141A. 2 (on iii. 1. 8); न हि सर्वत्रार्थवादस्समाम्नायते।··· ननूपकारमुखेन पदार्थप्राप्तिवत् प्राशस्त्यमुखेन तत्प्राप्तिरिति चेत्, न, अनपेक्षितत्वात् TantrRahs. 44. 22; न तावत् सिद्धप्रकाशलोपोऽसिद्धप्रकाशानुत्पत्तिर्वा। स्वरूपप्रकाशस्य नित्यसिद्धत्वात्। तदन्यस्य च स्वप्रकाशे तस्मिन्ननपेक्षितत्वात् NyāyāmṛT. 354B. 7; 485A. 9; उपमाया यत्र कश्चित् स्थितैरपि नक्षत्रैः सह वक्तुं शक्यतया वसन्तनायकसमागतवनस्थलीसंबन्धित्वस्य विशेषणस्यानपेक्षितत्वादिह ··· इवशब्दमवस्थापयति Kuval. 35(42); 'तज्जलानिदं सर्व'मिति प्रथमं हेतुवाक्योपन्यासः। प्रतिज्ञावाक्यगतस्येदंशब्दस्य तत्र प्रयोजनाभावेनानपेक्षितत्वात् हेतुवाक्ये विशेष्यवाचकपदापेक्षणाच्च ··· हेतुवाक्येऽन्वयः ŚivārkaMaDī. i. 312. 19 (on i. 2. 1); i. 475.17 (on i. 3. 33); प्रातयोर्विधानस्यानपेक्षितत्वेन ··· परिसंख्यारूपत्वकल्पनाप्रसङ्गात् PūrvottaVāNaMā. 22. 6; यत्रापि स (कालः) उत्पत्तौ श्रुतस्तत्रापि कर्मस्वरूपे तस्यानपेक्षितत्वात् प्रमाणान्तरावगम्यप्रयोगद्वारकत्वेनैव विधेयतेति तदधीनत्वम् MīmāKau. i. 35. 25 (on i. 3. 7); ii. 77. 24 (on ii. 3. 24); iii(1). 53. 16 (on i. 2.27); देशकालकर्तृस्वरादेस्तु वाग्गतकृतिसाध्यत्वज्ञानं विनानपेक्षितत्वात् प्रयोगान्वयित्वमेव BhāṭṭDī. iv. 151.9 (on xi. 2. 1); न च संसर्गविशेषानुपस्थितौ ··· वृत्तिज्ञानमपेक्षितमिति वाच्यम्, उद्बोधकान्तरोपस्थितेऽपि ··· तत्र वृत्तिज्ञानस्यानपेक्षितत्वात् ŚaktiVā. 39. 16; स्मृतिवाक्यादर्थं जानानो हि पुरुषः ··· ज्ञेयभूतार्थमेवानुमिनोति न तु श्रुतिं तज्ज्ञाने वानपेक्षितत्वात् MayūMāli. 20. 3 (on i. 3. 1); 220. 3 (on iii. 2. 8); 321. 4 (on iii. 7. 7); अस्य तन्त्रस्य तादृशाधिकारित्वात् तं प्रति पञ्चपञ्चिकादिपूजाविस्तारस्यानपेक्षितत्वादिहाकथनम् SetuBa. 201. 14; **D** the state of not being dependent, self-validity एवं सत्यपकारकोऽपि दोषः प्राप्नोति। लोके तावत् प्राप्नोतु नाम वेदे पुनरनपेक्षितत्वान्न भविष्यति TantrVā. 688. 16 (on iii. 1. 2); न च सर्वं खल्विदमिति वाक्यम् ··· मानापेक्षिततया स्वीक्रियत इति युक्तम्। मनोमयत्वादिभिर्धर्मैर्ब्रह्मणि सुप्रसिद्धैर्जीवविषयसमर्पणेनानपेक्षितत्वात् Bhām. 162. 21 (on i. 2. 1); अनपेक्षितत्वादप्रयोजकमधिकज्ञानं न वेदकर्तृत्वेन सिध्येत् ŚivārkaMaDī. i. 159. 11 (on i. 1. 3); **E** the state of not being (syntactically or semantically) required (due to the lack of expectancy, contiguity, compatibility etc.) यदनधिकमननुगुणं वा तदनपेक्षितत्वात् नैव तस्मिन् वाक्येऽस्ति TantrVā. 819. 13 (on iii. 3. 2); नन्वेकमात्रगोचरस्मृतेस्तच्छाब्दबुद्धावनपेक्षितत्वे 'विशेषस्मृतिहेतवः' इति प्राचां ग्रन्थः कथं संगच्छते RasGaṅ. 137. 15; सूत्रार्थस्तु — आयुराशिषो जीवत्यपि यजमाने अवचनं स्यादायुरर्थत्वात् तस्य, प्रकृते च यजमानस्य मरणार्थतयायुषोऽनपेक्षितत्वादिति MayūMāli. 673. 21 (on x. 2. 25); **F** the state of not being acceptable विप्रतिषेधाच्च परपक्षाणामनपेक्षितत्वं स्थापितम्, तद्वत् स्वपक्षस्यापि विप्रतिषेधादेवानपेक्षितत्वमाशङ्क्येत BrahmSūBh.(Śaṅ.) 421. 7 (on ii. 3 0)

अनपेक्षितत्वप्रसङ्ग (anapekṣitatva-prasaṅga) *m.* undesired contingency of being not required अत्र 'गुरुप्रसादस्य बलीयस्त्वसमर्थनादस्ति शास्त्रादिसंगतिः। अन्यथा क्वचिदनपेक्षितत्वप्रसङ्गेनोक्तायुक्तेस्तत्समर्थनीयम् TattvPrakā. 177B. 9 (on iii. 3. 45)

अनपेक्षितदयित (anapekṣita-dayita) *adj.* [f. -ā] not caring for (i. e. neglecting) the beloved रणति हरे तव वेणौ नार्यो दनुजाश्च कम्पिताः खिन्नाः। वनमनपेक्षितदयिताः करवालान् प्रोज्झ्य धावन्ति StavMā. 129. 24 (comm. प्र(प)त्यपेक्षारहिता नार्यः। पत्न्यपेक्षारहिता दैत्याः)

अनपेक्षितदृढमुष्टिनिपीडित (anapekṣita-dṛḍhamuṣṭinipīḍita) *adj.* carelessly pressed (i. e. held) with a strong fist न ह्यनपेक्षितदृढमुष्टिनिपीडितो जाल्मकरपञ्जरोदरे विलुठन्नपि कठोरधारः कुठारः प्रतिदिशति निष्ठुरस्यापि काष्ठस्य छेदाय NyāyKa. 173.15.

अनपेक्षितदेशकाल (anapekṣita-deśakāla) *adj.* not having concern for the (opportune) place and time तेजस्विनो ननु विवेकमिदं विनष्टि दुष्टात्मनां यदनपेक्षितदेशकालः। दैवानुभाववशतो वनगोचरोऽपि किं श्रीफलं कलयतारया न मुक्ते HarVi. 13.25.

अनपेक्षितदेहार्ति (anapekṣita-dehārti) *adj.* not caring for (i. e. neglecting) physical strain or afflictions बभ्राम च विचिन्वानः क्षेत्राश्रमवनानि सः। अनपेक्षितदेहार्तिर्गुर्वी ह्याज्ञा मनोभुवः KathāSaSāg. xii. 4. 246.

अनपेक्षितधनलाभा (anapekṣita-dhanalābhā) *adj.* (f.) not desiring or expecting acquisition of wealth अनपेक्षितधनलाभां स्नेहैकनिबद्धमानसां दयिताम्। दैवाकृष्टो मुञ्चति KuṭṭaMa. 448.

अनपेक्षितधातुगत (anapekṣitadhātu-gata) *adj.* belonging to the verbal base which is not relevant or required न च वाच्यं विधेय इति विधिप्रत्ययः ··· भवतु वा विधिप्रत्ययः, तथाप्यनपेक्षिते ज्ञाने न तु यजतौ। अथ निर्वपत्यालभतिवदनपेक्षितधातुगतोऽपि विधिरिष्टमर्थं विधत्ते CaturCin. iii(2). 336.7.

अनपेक्षितनाट्य (anapekṣita-nāṭya) *adj.* in which (presentation of) dramatic element is not expected तेषां (सहृदयानाम्) काव्यमेव प्रीतिव्युत्पत्तिकृदनपेक्षितनाट्यमपि AbhinBhā. i. 287. 11 (*on* 6. 31)

अनपेक्षितनिमित्तविशेष (anapekṣita-nimittaviśeṣa) *adj.* not requiring specific cause (for superseding) (अभ्यासविकारेषु बाधका न बाधन्ते) बाधकत्वमनपेक्षितनिमित्तविशेषमाश्रयणीयम् PradI. vi. 261. 17 (*on* vii. 4.82)

अनपेक्षितनिमित्तान्तरा (anapekṣita-nimittāntarā) *adj.* (*f.*) not requiring any other cause अपि चेश्वरेच्छापि कार्या चेन्नानपेक्षितनिमित्तान्तरा संभवति NyāyRa. 658. 18 (*on* 5(15).72)

अनपेक्षितनिषेधशास्त्र (anapekṣita-niṣedhaśāstra) *adj.* not caring for the scripture prescribing prohibition अनुमानप्रधानस्यास्य वादिनोऽनपेक्षितनिषेधशास्त्रस्य हृदयक्रोशनेऽपि न कारणमुपलभामहे Kāśi. i. 186.19 (*on* 2. 245½)

अनपेक्षितपक्षधर्मादिक (anapekṣitapakṣadharmādi-ka) *adj.* not requiring the property of the minor term (i. e. the presence of the *hetu* on the *pakṣa*) etc. न चानुमानिकमिदं ज्ञानमनपेक्षितपक्षादि(? पक्ष)धर्मादिकस्य (ज्ञानस्य) भावात् NyāyMañ. i. 132.27.

अनपेक्षितपक्षपाता (anapekṣita-pakṣapātā) *adj.* (*f.*) not intending any partiality towards anyone मुक्तां सहस्रकरसंपदमम्बरश्रीः कृत्वा जनस्मरणमात्रदशावशेषाम्। वेश्येव काममनपेक्षितपक्षपाता क्षिप्रं शशाङ्कविभवाभरणा बभूव SamaMā. 3.9.

अनपेक्षितपक्षादिधर्मादिक (anapekṣitapakṣādidharmādi-ka) *adj.* [w. r. for अनपेक्षितपक्षधर्मादिक] NyāyMañ. i. 132. 27.

अनपेक्षितपदार्थ (anapekṣita-padārtha) *adj.* independent of the word-meaning न ह्यनपेक्षितपदार्थस्य वाक्यान्त्यवर्णस्य पूर्ववर्णजनितसंस्काररहितस्य शक्तिरस्ति पदार्थेभ्योऽर्थान्तरे वर्तितुम् ŚābaBh. 96.1 (*on* i. 1.25); न हि भवतामनपेक्षितपदार्थ एव वैयाकरणानामिव वाक्यार्थप्रत्ययः NyāyMañ. i. 369. 20.

अनपेक्षितपरकलत्र (anapekṣita-parakalatra) *adj.* not desiring for other's fort पिङ्गलकः ··· अनपेक्षितपरकलत्रमकापुरुषगम्यम् ·· वनान्तरे निःसाध्वसमुच्चैः शिरो वहन् राजवमनुभवन्नास्ते Tantrākhyā. 4.18.

अनपेक्षितपरव्यापार (anapekṣita-paravyāpāra) *adj.* I not requiring the activity of any other (agent) सुखितदुःखितशब्दयोस्त्वपेक्षितापरकर्तृव्यापारः सुखादिसंवित्तिमांश्चैत्रादिः प्रतीयते। इतप्रत्यये त्वनपेक्षितपरव्यापारः सुखाद्यनुभवयुक्त इति GanRa. 7.391 (416); II not requiring any other activity यत् ज्ञानं तत् आत्मबोधं प्रत्यनपेक्षितपरव्यापारम् PramāMI. 4. 5 (*on* i. 1. 2)

अनपेक्षितपरस्पर (anapekṣita-paraspara) *adj.* I indifferent to each other अस्वस्थताकारणं चावयोः ··· अनपत्यतादुःखम्। ··· अशक्यप्रतिकारेण ··· अनेन ··· एकशयनवर्तिनोरपि प्रवासगतयोरिवानपेक्षितपरस्परयोः ··· शलभसङ्घाः प्रलघवोऽपि शतयामा इव प्रयान्ति नो विभावर्यः TilaMañ. 28.10; II independent of each other प्रथमद्वितीययोरनपेक्षितपरस्परापेक्षयो (v. l. °परस्परयोः, Uddyota) र्द्वयोरपि परापेक्षं प्राथम्यं मुख्यमेव PradI. v. 109A.11 (*on* vi. 1.102)

अनपेक्षितपरस्परापेक्ष (anapekṣita-parasparāpekṣa) *adj.* independent of mutual requirement अन्ये त्वाहुः — द्वितीयस्य तु प्रथमापेक्षया द्वितीयत्वं नान्यथा। ततः प्रथमद्वितीययोरनपेक्षितपरस्परापेक्षयोर्द्वयोरपि परापेक्षं प्राथम्यं मुख्यमेव PradI. v. 109A.11 (*on* vi. 1. 102)

अनपेक्षितपरिच्छेदत्व (anapekṣitaparicchedа-tva) *n.* the state of being that which does not require any delimitation लिङ्गं तु प्रातिपदिकार्थोऽप्युद्देश्यविशेषणत्वादविवक्षितं वाक्यभेदप्रसङ्गात्। अनपेक्षितपरिच्छेदत्वाच्चोद्दिश्यमानस्य ŚāstrDI. 449. 20 (*on* vi. 1. 3)

अनपेक्षितपरिजन (anapekṣita-parijana) *adj.* not requiring attendants तत्र व्याधिजं नाम (मरणम्) ··· हिक्काश्वासोपेतमनवेक्षित(v. l. अनपेक्षित)परिजनमव्यक्ताक्षरकथनादिभिरनुभावैरभिनयेत् NāṭyaŚā. 7.134.

अनपेक्षितपरिजनानुसरणा (anapekṣita-parijanānusaraṇā) *adj.* (*f.*) not caring for the escorting by the attendants एषा खलु···माधवसेना नाम अनपेक्षितपरिजनानुसरणा ··· त्वरिततरपदविन्यासा इत एवाभिवर्तते Ubhayābhi. 4.21.

अनपेक्षितपरोपकारा (anapekṣita-paropakārā) *adj.* (*f.*) not requiring any help from others (for its existence) न जातेर्नित्यायाः काचिद्व्यक्तिरिति निषिद्धमेतत्। तस्मान्नित्यमनपेक्षितपरोपकारा ···

तस्मिन् स्वभावे व्यवस्थापनात् PramāVāSvopVṛ. 51. 2.

अनपेक्षितपर्जन्य (anapekṣita-parjanya) *adj.* not requiring (the presence of) the rain-cloud गृहे मम मयूरोऽस्ति योऽस्तं भानौ गते सदा। अनपेक्षितपर्जन्यो नृत्यति BṛKathāMañ. ix. 1. 251.

अनपेक्षितपाक (anapekṣita-pāka) *adj.* not requiring (another) heating पाकजो हि गुणः पाकान्तरेणैव निवर्तते। जलगतस्यौष्ण्यस्यानपेक्षितपाकस्यैवाग्निसंयोगविच्छेदेनैव निवृत्तिः PrakaPañ. 127. 10.

अनपेक्षितपुरुषसंबन्ध (anapekṣita-puruṣasambandha) *adj.* not depending upon any connection with the person (i. e. not requiring conventions established by persons) न तावदयं शब्दमात्रस्यानपेक्षितपुरुषसंबन्धासंबन्धस्य शक्तिप्रविभागः BrahmSi. 82. 20.

अनपेक्षितपूर्वाधिगम (anapekṣita-pūrvādhigama) *adj.* not requiring prior knowledge पुरुषबुद्धिप्रभवं भूतार्थमभूतार्थं वा वचो भवति सापेक्षम्, ततो हि तत्संभिन्न एवार्थे प्रत्ययः, न त्वनपेक्षितपूर्वाधिगमः स्वातन्त्र्येणार्थे BrahmSi. 80. 2.

अनपेक्षितप्रकाशान्तर (anapekṣita-prakāśāntara) *adj.* not requiring any other revelation or illumination ज्ञानं तु प्रकाशस्वभावमनपेक्षितप्रकाशान्तरमेव साक्षात्कारि प्रकाशत इति नानुपपन्नम् Kāśi. ii. 95.19 (*on* 5(3). 11)

अनपेक्षितप्रतिपत्तितुषोपवापार्थ (anapekṣitapratipattituṣopavāpārtha) *adj.* meant for the unhusking of the grains not requiring disposal प्रयाजशब्देनाधिष्ठानविशेषलक्षणार्थो भवति पुरोडाशकपालं त्वनपेक्षितप्रतिपत्तितुषोपवापार्थम् TantrRa. 95. 3.

अनपेक्षितप्रतियोगिभेदम् (an-apekṣitapratiyogibhedam) *adv.* without requiring the specification of the counter-relative (in the relation of similarity) सन्ति खलु तान्येकत्र समाहृतानि वस्तूनि, न च सादृश्यबुद्ध्या गृह्यन्ते, न ह्यनपेक्षितप्रतियोगिभेदं सदृशोऽयमिति गां जानाति Kāśi. iii. 143. 4 (*on* 5(6). 17)

अनपेक्षितप्रतिसमाधान (anapekṣita-pratisamādhāna) *adj.* not requiring a remedy यत् तु दक्षिणालाभात्मकमृत्विजां फलं तत् ··· अनपेक्षितप्रतिसमाधानं नेष्टिं गृह्णाति TantrVā. 1014. 9 (*on* iii. 4. 41(? 35))

अनपेक्षितप्रत्युपकार (anapekṣita-pratyupakāra) *adj.* not expecting any return of favour यदिदमुपकृत्यानपेक्षितप्रत्युपकाराणां गमनम् ··· तत् ·· प्रत्यनीकन्यासो भवति SaraKaṇṭhā. 503. 20.

अनपेक्षितप्रमाणान्तर (anapekṣita-pramāṇāntara) *adj.* not requiring any other valid means of knowledge यस्त्वनपेक्षितप्रमाणान्तर एव पौरुषेयाद् व्यवहरति, स प्रतिहन्येत Kāśi. i. 75. 24 (*on* 2. 23)

अनपेक्षितप्रमाणान्तरप्रवृत्ति (anapekṣita-pramāṇāntarapravṛtti) *adj.* not requiring the operation of any other valid means of knowledge स्वतन्त्रस्य त्वाम्नायस्यानपेक्षितप्रमाणान्तरप्रवृत्तेस्तद्विरोधेऽपि कस्मादप्रमाणत्वम् BrahmSi. 39.7.

अनपेक्षितप्रमेय (anapekṣita-prameya) *adj.* not requiring the object to be proved (i. e the *sādhya*) अनुमाने त्वनपेक्षितप्रमेयमेव धूमादिलिङ्गस्य स्वरूपं सिद्धमवगम्यते TātpaṬ.(U.) 392. 21 (*on* 5(7). 20) = Kāśi. iii. 167. 22 (*on* 5(7). 20)

अनपेक्षितप्रयोजन (anapekṣita-prayojana) *adj.* not requiring any purpose क्षेत्रज्ञो हि चेतनः स्वप्रयोजनमुद्दिश्य प्रवर्तते। स (अधिष्ठाता) च क्षेत्रज्ञविलक्षणोऽनपेक्षितप्रयोजन एव स्वतन्त्रः प्रवर्तते PrakaPañ. 303. 17.

अनपेक्षितप्रयोजनत्व (anapekṣitaprayojana-tva) *n.* the state of having no regard for any purpose विधिरहितो हि धात्वर्थः ··· अनपेक्षितप्रयोजनत्वान्न शक्यते ··· ग्रहीतुम् TantrVā. 978. 7 (*on* iii. 4. 13)

अनपेक्षितप्रवृत्तिनिमित्त (anapekṣita-pravṛttinimitta) *adj.* [*f.* -ā] not requiring any cause or ground for the employment (of a term) यत एवं पञ्चाला वरणा इति संबन्धो न प्रख्यायतेऽत एव नैतदुपलभामहे वृक्षयोगान्नगरे वरणा इति। किं तर्हि। संज्ञा एता अनपेक्षितप्रवृत्तिनिमित्ताः Nyās. i. 196. 14 (*on* i. 2. 54); ननु युवशब्दोऽनपेक्षितप्रवृत्तिनिमित्त एव संज्ञा PradI. iv. 153A. 35 (*on* iv. 1. 163); PadMañ. *on* KāśiVṛ. *on* P. i. 2. 54.

अनपेक्षितप्रसङ्ग (anapekṣita-prasaṅga) *adj.* not requiring or caring for (a proper) occasion अनपेक्षितप्रसङ्गः पुनः पुनः पठति सोन्नतभ्रूकः KuṭṭaMa. 71 (comm. अनालोकितावसरः अप्रस्तुतं इति यावत्)

अनपेक्षितप्रीति (anapekṣita-prīti) *adj.* I disregarding the friendship (of Rājyavardhana) कथमिवात्युग्रस्यास्यार्यजीवितहरणे निदाघरवेरिव कमलाकरसलिलशोषणेऽनपेक्षितप्रीतयः प्रसृताः कराः HarṣaC. 256.11; II neglecting the love or attraction (of the lotuses), HarṣaC. 256. 11.

अनपेक्षितफलत्व (anapekṣitaphala-tva) *n.* I the state of

yielding unwanted or undesired fruit पिष्टपेषणे निष्फलत्वं वा स्यात्, अविशिष्टफलत्वं वा अनपेक्षितफलत्वं वा NyāyVārPari. 146.12; ‖ the state of being that the fruit of which is not desired दृढविद्यायाः स्साक्षात्कारपर्यन्ताया निष्पत्तौ न तद् (अग्निहोत्रादिकम्) अनुष्ठेयमनपेक्षितफलत्वात् कृतस्याप्यपेक्षापत्तेः ŚivārkaMaDī. ii. 443. 11 (*on* iv. 1. 16)

अनपेक्षितबलवाहन (anapekṣita-balavāhana) *adj.* not waiting for the army and the vehicles विन्ध्यकेतुरनपेक्षितबलवाहनः।… अस्मानभियोद्धुं प्रवृत्तः PriyDa. 1. 8(21)

अनपेक्षितबहिर्भाव (anapekṣita-bahirbhāva) *m.* outside existence which is not expected ननु च निश्चितसद्भावस्य चैत्रस्य गृहाभावो बहिर्भावमन्तर्भाव्य सिध्येत्। संदिग्धसद्भावस्य त्वनपेक्षितबहिर्भाव एव तं गमयिष्यति Kāśi. iii. 168. 17 (*on* 5(7). 24)

अनपेक्षितबाह्यकरण (anapekṣita-bāhyakaraṇa) *adj.* not requiring any external sense-organ अपगतसंसारस्य जीवस्य स्वरूपानन्दानुभवसाधनं मनोरूपमन्तःकरणमनपेक्षितबाह्यकरणमस्तीति गम्यते BrahmSūBh.(Śrī.) ii. 142. 14 (*on* ii 3. 19); मन इति ज्ञानमन्तःकरणमुच्यते, येनानपेक्षितबाह्यकरणेन … प्रमाविशेषेण सर्वज्ञं ब्रह्मोच्यते BrahmSūBh.(Śrī.) ii. 248. 11 (*on* iii. 2. 17)

अनपेक्षितबाह्यतत्त्व (anapekṣita-bāhyatattva) *adj.* (unique entity) not requiring any external reality तत्रानपेक्षितबाह्यतत्त्वो बुद्धिप्रतिभासवशादेकोऽनेकव्यावृत्तः शब्दैर्विषयीक्रियते PramāVāSvopVṛ. 22. 24.

अनपेक्षितबाह्यसत्त्व (anapekṣita-bāhyasattva) *adj.* (*vibhāva* etc.) not depending on external reality विभावादिभावानामनपेक्षितबाह्यसत्त्वानां शब्दोपादानादेवासादितसद्भावानाम् … काव्ये नाट्ये च … साक्षाद्भावकचेतसि … अनौचित्यादिविप्लवरहितः स्थायी निर्भरानन्दविश्रान्तिस्वभावेन भोगेन भावकैर्भुज्यते RasāSu. 173.19 (2. 165)

अनपेक्षितबाह्यार्थ (anapekṣita-bāhyārtha) *adj.* [*f.* -ā] not depending on external objects यद्यथा वाचकत्वेन वक्तृभिर्विनियम्यते। अनपेक्षितबाह्यार्थं तत्तथा वाचकं वचः PramāVār. 1. 67; अनपेक्षितबाह्यार्था योजना समयस्मृतेः PramāVār. 3. 185; नीलज्ञानजनिता वासना अनपेक्षितबाह्यार्था स्वप्नावस्थायामिव जाग्रदवस्थायामपि नीलज्ञानं जनयति TātpaṬ.(U.) 255. 20 (*on* 5(3).61); 253. 23 (*on* 5(3). 52); 288. 16 (*on* 5(3). 204)

अनपेक्षितबाह्यार्थोपनिधि (anapekṣita-bāhyārthopanidhi) *adj.* not requiring the presence of external objects ते (शब्दाः) हि यथास्वमान्तरात् विकल्पवासनाप्रबोधादनपेक्षितबाह्यार्थोपनिधयो भवन्ति PramāVāSvopVṛ. 107. 12.

अनपेक्षितभक्तजना (anapekṣita-bhaktajanā) *adj.* (*f.*) not caring for the devoted or loyal people अनपेक्षितभक्तजना स्वार्थैकनिष्पादननिष्ठुरा नासीदियमार्यस्येदृशी प्रभविष्णुता HarṣaC. 250. 2.

अनपेक्षितभावान्तरसंसर्ग (anapekṣita-bhāvāntarasaṁsarga) *adj.* not requiring contact or connection with any other positive entity 'भावप्रतिषेधे'त्यादि। अयमभिप्रायः — यद्यनपेक्षितभावान्तरसंसर्गश्च्युतिमात्रमेव तुच्छरूपं ध्वंसः तदा तत्र कारकव्यापारो नैव संभवति HetuBiṬ. 80. 17; 82. 11; अनपेक्षितभावान्तरसंसर्गः प्रसज्यप्रतिषेधः शून्यविकल्पप्रतिभासी प्रतिषेध्येन तुच्छरूपः तद्रूपविरहात् HetuBiṬ. 179. 17.

अनपेक्षितभूषण (anapekṣita-bhūṣaṇa) *adj.* not requiring ornaments तेनाङ्गनाजनस्तस्यामनपेक्षितभूषणः। स्वरूपशोभयाक्रान्तः शक्रहस्त इवेक्षितः HarVi. 32.26.

अनपेक्षितभेदाग्रह (anapekṣitabhedāgraha) *m.* non-cognition of difference (of silver from the conch-shell) which is not desired (by the cognizer who wants to cognize silver only) अस्मन्नये अपेक्षिताभेदग्रहस्यानपेक्षिताभेदग्रहसाहचर्यनियमवत्त्वापि नये अपेक्षितानपेक्षितभेदाग्रहस्य युगनद्धवाहित्वात् Kiraṇā. 268. 19; अरजतात्मनस्तदनात्मनावभासमानत्वात् भेदाग्रहमात्रेण निवृत्तेरप्यापत्तिः अनपेक्षितभेदाग्रहस्य निवृत्तिकारणत्वेनाभ्युपगमात् Kiraṇā. 268. 23.

अनपेक्षितमर्याद (anapekṣita-maryāda) *adj.* not caring for (i.e. transgressing) the limits अनपेक्षितमर्यादं नास्तिकं विप्रलुम्पकम्। अरक्षितारमत्तारं नृपं विद्यादधोगतिन् ManuSm. 8.309 (ManvaMu. लङ्घितशास्त्रमर्यादम्); जडानां गतसंख्यानां कल्लोलानां विलासिनाम्। अनपेक्षितमर्यादो वारिधिर्नवयौवनम् YogVā. i. 20. 26.

अनपेक्षितमातृ (anapekṣita-mātṛ) *adj.* not requiring any cognizer एकं तावदिदं रूपं ब्रह्मणः …। न प्रमाणान्तरैर्गम्यं पराग्वेत्वसमन्वयात्। अनपेक्षितमात्रादि तदविद्यासमन्वयात् BṛĀraUBhVā. ii. 3. 13.

अनपेक्षितमात्रादिसेवित (anapekṣitamātrādi-sevita) *adj.* practised without considering the (due) proportion etc. अनपेक्षितमात्रादिसेविते कुरुतस्तु ते। अतिस्थौल्यातिकार्श्यादीन् … अतिबृंहितलङ्घिते AṣṭāSaṁ. i. 125. 9 (1. 24) = AṣṭāHṛ. i. 14. 18.

अनपेक्षितयोगक्षेम (anapekṣita-yogakṣema) *adj.* not caring for preservation and prosperity यथा खल्वयं प्रवर्तितोऽप्यनपेक्षितयोगक्षेमो न प्रवर्तते, एवं वारितोऽपि न तावच्चिकीर्षितान्निवर्तते यावद् दुःखहेतुरयमिति न प्रतिपद्यते Kāśi. i. 166. 1 (*on* 2. 203)

अनपेक्षितराजराज (anapekṣita-rājarāja) *adj.* who has disregarded even Kubera (*lit.* the king of kings), exceedingly wealthy नन्दैर्वियुक्तमनपेक्षितराजराजैरध्यासितं च वृषलेन वृषेण राज्ञाम्। सिंहासनम् MudrāRā. 3. 18 (comm. तृणीकृतकुबेरैः)

अनपेक्षितराजवृत्त (anapekṣita-rājavṛtta) *adj.* who has neglected the (true) conduct of kings नन्दैर्वियुक्तमनपेक्षितराजराजैः (v. l. °राजवृत्तैः) अध्यासितं च वृषलेन वृषेण राज्ञाम्। सिंहासनम् MudrāRā. 3. 18.

अनपेक्षितलक्षणभेद (anapekṣita-lakṣaṇabheda) *adj.* not depending on difference in rules वृक्षाणामिति। नुडागममात्रमनपेक्षितलक्षणभेदमाश्रित्य विप्रतिषेधोपन्यासः PradI. v. 104A. 1 (*on* vi. 1. 91)

अनपेक्षितवचन (anapekṣita-vacana) *n.* statement of what is not required अर्थान्तरस्वीकारे अपेक्षितावचनमनपेक्षितवचनं च स्यात् ŚrutaPra. iA. 232.7 (*on* i. 1.1); *adj.* not requiring any (special) statement अत्र तन्त्ररत्ने कथं तर्हि दाशमिकमनपेक्षितवचनं न्यायमात्रं तदित्युक्तम् MayūMāli. 495. 5 (*on* vi. 5. 2)

अनपेक्षितवपुःखेद (anapekṣita-vapuḥkheda) *adj.* in which physical pain or suffering is not considered अनपेक्षितवपुःखेदमपुनर्लभ्यमिवापश्चिमं तया सह संविशसुखमनुभूय … निद्रामिवाहमकरवम् YaśasCam. ii. 37. 2 (comm. अगणितशरीरकष्टम्)

अनपेक्षितवयोविशेष (anapekṣita-vayoviśeṣa) *adj.* independent of any particular age आश्रमविशेषनिरपेक्षेण श्रूयमाणेषु 'ब्राह्मणो न हन्तव्यः' 'तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत' इत्येवमादिष्वनपेक्षितवयोविशेषस्यैवाधिकारात् Mitā. 421. 19 (*on* 3. 243)

अनपेक्षितवारिदा (anapekṣita-vāridā) *adj.* (*f.*) not requiring (i. e. not depending upon) clouds जीवन्ति क्षेत्रिणो यस्यां न(दी ? द)नद्या-दिवारिभिः। तां देव(? नदी)मातृकेत्याहुरनपेक्षितवारिदाम् SamarāSū. 8. 22.

अनपेक्षितविगम (anapekṣita-vigama) *adj.* not desiring separation रागान्धावनपेक्षितविगमौ वपुषो यदा स्फुटं कुरुतः। आलिङ्गनं तदुक्तं क्षीरजलं कामशास्त्रेषु KandaCū. ii. 2. 19.

अनपेक्षितविग्रहापगम (anapekṣita-vigrahāpagama) *adj.* not desiring separation of the (two) bodies यत्रोद्भटतररागावनपेक्षितविग्रहापगमौ। अन्योऽन्यं विशत इव क्षीरजलम् (आलिङ्गनम्) तन्निगद्यते विबुधैः KandaCū. ii. 2. 20.

अनपेक्षितविधान (anapekṣita-vidhāna) *n.* injunction of what is not required or wanted प्राशनभक्षणादिप्रतिपत्तिविशेषनियमविधिर्युक्त एवान्यथानपेक्षितविधानप्रसङ्गात् TantrRa 143. 12; प्रकरणान्तरोक्तस्य साक्षात्कारत्वस्येहापि वक्तुमपेक्षितत्वात् अपेक्षितविधेरनपेक्षितविधानदौर्बल्याच्च ŚrutaPra. iA. 56. 22 (*on* i. 1. 1); iA. 211. 25 (*on* i. 1. 1); ii. 25. 22 (*on* i. 3. 11); व्रीहियवाभ्यां वैतुष्यार्थं अवघातोऽपेक्षितः नान्यसांनाय्याभ्यामित्यपेक्षितविधेरनपेक्षितविधानदौर्बल्यन्यायेनाप्यवघातस्य औषधद्रव्यमात्रशेषत्वं दर्शितम् UpaParā 32. 29; अपूर्वभावनाप्रकारविशेषत्वेन समिदादिविधानमपेक्षादिबलादुक्तं न यागार्थतयानपेक्षितविधानापत्तेरित्यर्थः MayūMāli. 526. 10 (*on* vii. 1. 1); पक्षद्वयेऽप्यनपेक्षितविधानमुपपाद्य वाक्यभेदप्रसङ्गं विवृणोति MayūMāli. 741.26 (*on* x. 6. 2); 794. 12 (*on* xi. 1. 1); 794.23 (*on* xi. 1.1)

अनपेक्षितविशेष (anapekṣita-viśeṣa) *adj.* not depending on any specific rule अथ 'मध्येऽपवादा' इत्याश्रीयते तथापि 'सर्वनामस्थाने चासंबुद्धौ' इत्यस्यैव व्यावृत्तिप्रसङ्ग इत्यनपेक्षितविशेषं दीर्घत्वमात्रं निवर्त्यते PradI. v. 277B. 6 (*on* vi. 4. 13)

अनपेक्षितविशेषकारणत्व (anapekṣitaviśeṣa-kāraṇatva) *n.* causality not depending on any specific feature अनपेक्षितविशेषकारणत्वाध्यासाद् भेदेनैकमात्रमेवोच्छिद्येत KhaṇḍanKhā. 1222. 8 (comm. अनपेक्षितविशेषयोर्विशेषानुपहितयोः सामान्यतः कारणत्वाकारणत्वयोरेकधर्मिसंसर्गाद् विरुद्धधर्माध्यासस्य भेदहेतुत्वात्)

अनपेक्षितविशेषान्तर (anapekṣita-viśeṣāntara) *adj.* (particularity) not requiring any other particularity पृथक्त्वाख्यो वा गुणः … विशेषो भविष्यति। स एवानपेक्षितविशेषान्तरो न सिध्यतीति चेत्। विशेषा वा कथमनपेक्षितविशेषान्तराः सेत्स्यन्ति Kāśi. iii. 292. 21 (*on* 5(10). 28½)

अनपेक्षितविषयनिषेध्य (anapekṣita-viṣayaniṣedhya) *adj.* independent of the thing to be negated and the object (i. e. the locus of negation) अनपेक्षितविषयनिषेध्ये व्यवच्छेदे शून्यता प्रमाणार्थः स्यात्, न

भेदः BrahmSi 45. 3; नानपेक्षितविषयनिषेध्यो निषेधोऽस्ति BrahmSi. 57. 6.

अनपेक्षितविषयभेद (anapekṣita-viṣayabheda) *adj.* not requiring the difference in the domain (of application) यद्यपि विषयभेदेन टिलोपो भिन्नस्तथाप्यनपेक्षितविषयभेदं टिलोपशास्त्रं 'येन नाप्राप्ति' न्यायेन लुका बाध्यते PradI. v. 367B. 16 (*on* vi. 4. 163)

अनपेक्षितवृत्तान्त (anapekṣita-vṛttānta) *adj.* whose conduct is not of the expected (standard) ये भवन्त्यनयप्रायाः ··· वृद्धानां शासनातिगाः। अनपेक्षितवृत्तान्ताः ··· हन्ति तं जातहारिणी KāśyaS. 191A. 37.

अनपेक्षितवेतन (anapekṣita-vetana) *adj.* not expecting or requiring any wages स्वयमुपेतसमीरकृताशनैः ···। फणधरैरनपेक्षितवेतनैः प्रभुरवर्तत यत्र स वासुकिः Gaṅgāva. 8. 36.

अनपेक्षितव्यतिरेकनिश्चय (anapekṣita-vyatirekaniścaya) *adj.* not requiring the ascertainment through the negative concomitance अन्ये पुनः ··· अनपेक्षितव्यतिरेकनिश्चयमेव लिङ्गं गमकमभ्युपागमन् NyāyMañ. i. 111. 15.

अनपेक्षितव्यावृत्ति (anapekṣita-vyāvṛtti) *f.* exclusion of what is not required कर्मान्यत्वे सतीति तु प्रक्रियामात्रम् अनपेक्षितव्यावृत्तेरतिप्रसञ्जकत्वात् Kiraṇā. 160. 4.

अनपेक्षितशरीर (anapekṣita-śarīra) *adj.* not caring for the body अहो मे ·· अनपेक्षितशरीराणि साहसानि CaṇḍaKau. 2. 4(2)

अनपेक्षितशरीरव्यापार (anapekṣita-śarīravyāpāra) *adj.* not requiring the physical activity लब्धात्मकयोरिच्छाप्रयत्नयोः प्रेरणाकरणकाले तु तदनुपायभूतमेव शरीरं कर्मेत्वादिति व्यभिचारः अनपेक्षितशरीरव्यापारस्येच्छाप्रयत्नमात्रसचिवस्यैव चेतनस्य कदाचिदचेतनव्यापारं प्रति सामर्थ्यदर्शनात् NyāyKa. 56. 20.

अनपेक्षितशास्त्र (anapekṣita-śāstra) *adj.* not requiring the *śāstras* भोजनादावनपेक्षितशास्त्रस्यैव भवति प्रवृत्तिः, न हि मलिनः स्नायाद् बुभुक्षितो वाश्नीयादिति शास्त्रमुपयुज्यते NyāyMañ. i. 2. 11.

अनपेक्षितशास्त्राचार्यप्रसाद (anapekṣita-śāstrācāryaprasāda) *adj.* not depending on the favour of the teacher and scriptural statements सोऽयं न्यायोऽपि वेदान्तार्थः शास्त्राचार्यप्रसादलभ्योऽप्यनपेक्षितशास्त्राचार्यप्रसादः — कैश्चिच्छ्रद्धानैर्न प्रतीयते NaiṣkaSi. 184. 2.

अनपेक्षितसंस्कार (anapekṣita-saṁskāra) *m.* refinement (of the substance) which is not required प्रकृत्युपादानलक्षकविध्यभावे हि प्रकृतिद्रव्यानपेक्षणेनानपेक्षितसंस्कारायोगात् निर्वापादीन्यर्थकर्माणि स्युः VidhiRa. 9(61.14)

अनपेक्षितसंकेत (anapekṣita-saṅketa) *adj.* not requiring any convention (established by a speech-community) संकेतानपेक्षैरेव पदैः पदार्थाः प्रतिपाद्यन्ते तैरप्यनपेक्षितसंकेतैर्वाक्यार्थः ŚāstrDI. 161. 7 (*on* i. 1. 8)

अनपेक्षितसंकेतग्रहा (anapekṣita-saṅketagrahā) *adj.* (*f.*) not depending on the knowledge of convention न च वर्णमालैव पदार्थप्रतिपादनावान्तरव्यापारानपेक्षा वाक्यार्थबोधिनीति युक्तम्। अनपेक्षितसंकेतग्रहायास्तदवबोधने प्रथमश्राविणोऽविदितसंकेतस्य वाक्यार्थबोधप्रसङ्गः TātpaṬ.(Vā.) 474. 10 (*on* ii. 2. 57)

अनपेक्षितसंख्याविधायित्व (anapekṣitasaṅkhyāvidhāyi-tva) *n.* the state of being that which enjoins an irrelevant grammatical number अवगतसंख्यत्वेन च बहुवचनस्यानपेक्षितसंख्याविधायित्वायोगादपेक्षितधात्वर्थविशेषविधायित्वाख्यातो यथाप्राप्तप्रचयशिष्टसंख्यानुवादिबहुवचनप्रयोगोपपत्तेर्न प्राकृतैककर्तृकत्वबाधो युक्तः NyāySu.(So.) 48. 1 (*on* i. 2. 7)

अनपेक्षितसत्क्रिय (anapekṣita-satkriya) *adj.* which does not expect any praise or appreciation पूजा विरचिता रम्या शंभोः ···। ततस्ताण्डवमारब्धमनपेक्षितसत्क्रियम्। शिवस्य पुरतः SkandP. i(2).11. 9.

अनपेक्षितसदृशत्व (anapekṣitasadṛśa-tva) *n.* the state of not depending on any similar thing (as a substitute) सदृशोपाद(?दा)ने तु न यतितव्यं सदृशादपि फलप्राप्तेः, कर्मणश्चाविहितसाधनविशेषस्यानपेक्षितसदृशत्वाद् येन केनचित् सिद्धेः TantrVā. 382. 20 (*on* ii. 1. 5)

अनपेक्षितसमवायिकारण (anapekṣita-samavāyikāraṇa) *adj.* which does not require an intimate or inherent cause न ह्यनपेक्षितसमवायिकारणमसमवायिकारणमारभत इति चेत्। तदेतदेकत्रापि तुल्यम् Kiraṇā. 59.7.

अनपेक्षितसंबन्ध (anapekṣita-sambandha) *adj.* not requiring any (invariable) relation or connection न चानपेक्षितसंबन्धमनुमानं भवति Kāśi. iii. 188. 20 (*on* 5(7). 87); iii. 176. 25 (*on* 5(7). 48); *m.* relation which is not needed स्वर्द्दकृशब्दो वा वीक्षणाङ्गम् ··· वीक्षणं वा — स्वर्द्दकृशब्दमुच्चारयेन्नान्यथेति प्राप्ते ब्रूमः — अनपेक्षितसंबन्धाद् वाक्यभेदप्रसङ्गतः। न युक्तोऽङ्गाङ्गिसंबन्धः ŚāstrDI. 741. 11 (*on* x. 6. 2); 794. 12 (*on* xi. 1. 1)

अनपेक्षितसंबन्धसामान्य (anapekṣita-sambandhasāmānya) *n.* general relation (i.e. other than the *kāraka*-relation) which is irrelevant लक्षणावश्यंभावे चापेक्षितकरणत्वादिविशेष एव तदाश्रयणं युक्तं न त्वनपेक्षितसंबन्धसामान्य इत्याहुः MayūMāli. 72. 1 (*on* i. 4. 6)

अनपेक्षितसाधन (anapekṣita-sādhana) *adj.* not requiring any means अविप्रकृष्टदेशादिरनपेक्षितसाधनः। दीपयेत् किं न संतानः संतानान्तरमञ्जसा NyāyVi 2. 80.

अनपेक्षितसाधर्म्यदृश् (anapekṣita-sādharmyadṛś) *f.* knowledge not requiring similarity दोषोद्भवा प्रकृत्या सा (भ्रान्तिः) वितथप्रतिभासिनी। अनपेक्षितसाधर्म्यदृगादिस्तैमिरादिवत् PramāVār. 3. 363.

अनपेक्षितस्तुति (anapekṣita-stuti) *f.* unnecessary praise अवकानां तु ··· अद्भिः संबन्धानभिधानेऽपि अत्राविधानादनपेक्षितस्तुत्यप्रतीतेः ··· अद्भिः संबन्धो भाष्यकृता कथितः NyāySu.(So.) 80. 7 (*on* i. 2. 23)

अनपेक्षितस्मृति (anapekṣita-smṛti) *adj.* remembrance of which is not needed न हि चिरध्वस्तस्यानपेक्षितस्मृतेः संकेतग्रहस्यास्ति कश्चिदुपयोगः TātpaṬ.(Vā.) 469. 22 (*on* ii. 2. 57)

अनपेक्षितस्वर्ग (anapekṣita-svarga) *m.* heaven which is not desired नापि मुमुक्षुणानपेक्षितस्वर्गे यागादिकं तत्साधनतया नानुभूयते NyāyVārPari. 37. 11.

अनपेक्षितहेतु (anapekṣita-hetu) *adj.* not requiring any cause संतापसंततिमहाव्यसनाय तस्यामासक्तमेतदनपेक्षितहेतु चेतः MālaMā. 1. 224 (comm. अनपेक्षितनिमित्तम्), *m.* unnecessary cause न च शूर्पसंभवेऽनुकल्पत्वेनान्वयः शक्यः ··· अनपेक्षितहेतुपरत्वकल्पने प्रामाण्याभावेन ··· गौरवात् MīmāKau. iii(1). 53. 12 (*on* i. 2.27); अपेक्षितप्राशस्त्यपरत्वे संभवति नानपेक्षितहेतुपरत्वाङ्गीकारो युक्तः BhāṭṭDI. i. 28. 16 (*on* i. 2. 3)

अनपेक्षितहेत्वन्तर (anapekṣita-hetvantara) *adj.* not requiring any other cause यौवने क्रमादुपचीयमाने स्वात्मेन्द्रियमनःस्वास्थ्ये ··· हेलातो भावयुक्तो भावते(?हावते?)रेति नानपेक्षितहेत्वन्तरा यौवनकृताः शरीरविकारा अपि प्राधान्येन वक्त्रगात्रगता गुणा इव AbhinBhā. iii. 151. 13 (*on* 22. 2)

अनपेक्षितहेत्वन्तरप्रवृत्ति (anapekṣita-hetvantarapravṛtti) *adj.* not requiring the operation of another cause बीजादीनां हि क्षणपरंपरापरिणामेन तादृशः क्षणः संजायते। यतोऽनपेक्षितहेत्वन्तरप्रवृत्तेरनन्तरमङ्कुरं प्रादुर्भवति PrakaPañ. 368. 21.

अनपेक्षितांश (anapekṣitāṁśa) *m.* unwanted portion or part ऋत्विजोऽश्वमेधादिष्वनेकपशुप्रभवहविःशेषमध्येऽनपेक्षितांशं विहायापेक्षितांशं भक्षयन्ति ŚivārkaMaDI. i. 470. 15 (*on* i. 3. 32)

अनपेक्षिताक्षव्यापार (anapekṣitākṣavyāpāra) *adj.* independent of the functioning of the visual sense-organ ये त्वनपेक्षिताक्षव्यापारा एव गौरयमित्यादिस्मरणविकल्पाः तेऽस्माभिरपि स्मृतिमात्रहेतुत्वान्न प्रत्यक्षतयेष्यन्ते Kāśi. i. 255. 20 (*on* 4. 124)

अनपेक्षिताख्यात (anapekṣitākhyāta) *adj.* not requiring a finite verb-form वाक्यं दशधा। एकाख्यातम्, अनेकाख्यातम् ··· अनपेक्षिताख्यातमिति KavyMI. 23. 11; अनपेक्षिताख्यातम् — 'कियन्मात्रं जलं विप्र जानुदघ्नं नराधिप। तथापीयमवस्था ते न सर्वत्र भवादृशाः' KāvyMI. 24. 24.

अनपेक्षिताङ्गाङ्गिभाव (anapekṣitāṅgāṅgibhāva) *m.* unrequired subordinate-principal relationship सतिसप्तम्यर्थलक्षणया कालिकसंबन्धेनोपलक्षणार्थत्वोपपत्तौ नावश्यं करणत्वलक्षणयानपेक्षिताङ्गाङ्गिभावपरत्वं युक्तमाश्रयितुम् MīmāKau. ii. 240. 16 (*on* iii. 2. 10)

अनपेक्षितात्मकार्य (anapekṣitātmakārya) *adj.* disregarding one's own interest मन्दयितुं वियद्दयति पुरुहूतधनुर्विनैव फलवाञ्छाम्। अनपेक्षितात्मकार्यः परहितकरणग्रहः सतां सहजः KuṭṭaMa. 1032 (comm. अनभिलषितस्वार्थकृत्यः निष्कामः इति यावत्)

अनपेक्षितात्मशक्तिप्रतिपक्ष (anapekṣitātmaśakti-pratipakṣa) *m.* opponent not considering his own strength (out of vanity) अनपेक्षितात्मशक्तिप्रतिपक्षे रक्षसां पक्षे। व्यवसितमिदमेतस्य क्षेमाय न KamVa. 5. 5.

अनपेक्षितानुमान (anapekṣitānumāna) *n.* inference of that which is not desired (to be proved) स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेनानपेक्षितानुमानदर्शनात् TattvCin. ii(1). 428. 1.

अनपेक्षितानुमिति (anapekṣitānumiti) *f.* inference of that which is not desired (to be proved) तत्र पक्षान्यत्वं सिसाधयिषितसाध्यान्वयं यदि तदानपेक्षितानुमितिर्न स्यात् TattvCin. ii(2). 23. 3.

अनपेक्षितानेकार्थविधि (anapekṣitānekārtha-vidhi) *m.* injunction having many unrequired meanings सर्वत्रैवाकाङ्क्षापूर्वकः संबन्धो भवत्याज्यभागौ च प्रज्ञाताग्नीषोमदेवत्यौ तदभिधानसमर्थमन्त्राकाङ्क्षित्वात् अयत्नेन मन्त्रान् गृह्णीत, लक्ष्यं ··· कर्मणोऽज्ञातदेवतत्वान्न मन्त्रापेक्षा, ततश्च मन्त्रतद्विशेषद्वितादि-

कल्पनादनपेक्षितानेकार्थविधिप्रसङ्गः TantrVā. 467. 12 (*on* ii. 2. 3)

अनपेक्षितान्तर्गतावयवपौर्वापर्य (anapekṣitāntargatāvayavapaurvāparya) *adj.* not depending on the sequential order of the internal constituent rules वक्ष्यमाणत्रिपादीलक्षणात् समुदायाच्च पूर्वं तत्र स एव समुदायः सपादसप्ताध्याय्यपेक्षालब्धपरव्यपदेशोऽनपेक्षितान्तर्गतावयवपौर्वापर्योऽसिद्धो भवति Pradī. vii. 78. 12 (*on* viii. 2. 1)

अनपेक्षितान्यपदार्थ (anapekṣitānyapadārtha) *adj.* not depending on the meaning ('possession') which is denoted by the element outside (the constituents of construction) अनपेक्षितान्यपदार्थे स्वपदार्थे कर्मधारयं कृत्वा मत्वर्थीयोऽर्थान्तरे विधास्यते Pradī. ii. 409B. 10 (*on* ii. 1. 68) (Uddyota अन्यपदार्थरूपे मत्वर्थे इत्यर्थः); अनपेक्षितान्यपदार्थस्वपदार्थमात्रविवक्षायां भवतु कर्मधारयः Pradī. ii. 410A. 26 (*on* ii. 1. 68)

अनपेक्षितान्वय (anapekṣitānvaya) *adj.* not depending on the positive concomitance अनपेक्षितान्वयस्यैव शब्दस्यार्थप्रत्यायनसामर्थ्यान्नानुमानत्वम् NyāyRa. 429. 14 (*on* 5(5). 95)

अनपेक्षितापत्यप्रीति (anapekṣitāpatyapriti) *adj.* not caring for the affection for one's own child यदि ··· अनपेक्षितापत्यप्रीतिरेनाममुष्मै प्रयच्छामि ततो नियतमेषा ··· जीवितं मुञ्चति TilaMañ. 327. 13.

अनपेक्षिताप्रसिद्धद्रव्यान्तर (anapekṣitāprasiddha-dravyāntara) *n.* another substance which is not required and notknown न त्वनपेक्षिताप्रसिद्धद्रव्यान्तरसंयोगाभ्युपगमेन तस्यासमवायिकारणत्वाश्रयणं कारणान्तरानुपलब्धेः ĀtmaSi. 15. 16.

अनपेक्षिताभिधान (anapekṣitābhidhāna) *n.* statement of what is not required शिष्याकाङ्क्षाक्रमेण हि शास्त्रं प्रवृत्तम् । अनपेक्षिताभिधानेऽनवधेयत्वप्रसङ्गात् NyāyVārPari. 62. 1.

अनपेक्षिताभिधाना (anapekṣitābhidhānā) *adj.* (*f.*) conveying what is not required (in the situation) यथार्यान् प्रति म्लेच्छभाषा प्रतिपत्तिवन्ध्या निष्प्रयोजना वा स्यादिति यथानपेक्षिताभिधाना वाक् TattvVai. 104. 18 (*on* 2. 30)

अनपेक्षिताभेदग्रह (anapekṣitābhedagraha) *m.* cognition of the identity (of silver with the conch-shell) which is not desired अस्मन्नये अपेक्षिताभेदग्रहस्यानपेक्षिताभेदग्रहसाहचर्यनियमवत् तथापि नये अपेक्षितानपेक्षितभेदाग्रहस्य युगनद्धवाहित्वात् Kiraṇā. 268. 18.

अनपेक्षिताभेदाग्रह (anapekṣitābhedāgraha) *m.* non-cognition of the identity (of silver with the conch-shell) which is not required नेदं रजतमित्यनपेक्षिताभेदाग्रहो नञर्थः Kiraṇā. 268. 24; भेदाग्रहस्तावत्तत्र कण्ठगतैरपि प्राणैरपरिहेयः । तथाप्यनपेक्षिताभेदाग्रहान्न निवर्तते Kiraṇā. 269. 4.

अनपेक्षितार्थ (anapekṣitārtha) *adj.* **A1** not depending on (the existence of) the object अतोऽनपेक्षितार्थज्ञानजननस्वभावत्वादर्थासंस्पर्शिनः शब्दाः TātpaṬ.(U.) 60. 9 (*on* 2. 61); स्मरणं तु निर्दग्धपित्रादिविषयमनपेक्षितार्थमेव जायमानं दृष्टम् NyāyMañ. i. 21. 24; इतरथा त्वनपेक्षितार्था एवासंनिहितरजतादिविभ्रमा भवेयुः Kāśi. i. 121. 10 (*on* 2. 115); **A11** concerning the objects which are not desired अग्निरिव प्रदीप्तः । भावी सुतः स च भविष्यति तावकीनः स्वप्नाः सतां न हि भवन्त्यनपेक्षितार्थाः NemiNir. 3. 43; **B** not depending on (the recollection of) the object किमिदानीं वाक्यमनपेक्षितार्थमेव Kāśi. ii. 74. 20 (*on* 5(2). 139); *m.* unrequired thing अपूर्वनिषेधपक्षे त्वनपेक्षितार्थवचनमपूर्वान्तरकल्पनाक्लेशश्चेति दोषद्वयम् VīraMī. (Saṁskāra.) 696. 21 = BālamBha. i. 173. 21 (*on* 1. 52)

अनपेक्षितार्थत्व (anapekṣitārtha-tva) *n.* the state of having an unwanted thing उत्तरस्य संदर्भस्य गौणत्वे तु प्रतिज्ञातार्थानुगुण्याभावेनानपेक्षितार्थत्वप्रसङ्गात् प्राणा अपि नभोवद् ब्रह्मणो विकाराः Bhām. 506. 18 (*on* ii. 4. 1); प्राप्तकालत्वार्थकत्वे तु अनपेक्षितार्थत्वमदृष्टार्थत्वं च स्यात् MayūMāli. 115. 14 (*on* ii. 1. 13); 108. 15 (*on* ii. 1. 4)

अनपेक्षितार्थवादक (anapekṣitārthavāda-ka) *adj.* not expecting any eulogistic statement त्र्यंशभावनावचनमप्यवान्तरवाक्यमनपेक्षितार्थवादकं न प्रवृत्तौ समर्थम् Kāśi. iii. 103. 26 (*on* 5(5). 6)

अनपेक्षितार्थविशेष (anapekṣitārthaviśeṣa) *adj.* not requiring any specific thing (i. e. the element in the form of a substitute) यदा 'अङ्गस्य' इति शब्दस्वरूपमनपेक्षितार्थविशेषमधिक्रियते तदा 'षष्ठी स्थानेयोगा' इत्यस्याः परिभाषाया उपस्थानं नास्ति Pradī. v. 268A. 5 (*on* vi. 4. 1)

अनपेक्षितार्थसंनिधान (anapekṣitārthasannidhāna) *adj.* not requiring the presence of a thing (i.e. grammatical operation to be applied) तत्रानपेक्षितार्थसंनिधानस्तत्तन्निमित्तरूपकार्यव्यवहार एवानेन । कार्यं तु स्वशास्त्रेणैवेति LaŚabdeŚe. i. 74. 3.

अनपेक्षितार्थान्तरपरत्व (anapekṣitārthāntarapara-tva) *n.* the state of being intended to refer to another unrequired meaning प्रतिज्ञानिगमनवाक्यमध्यगतस्य स्वाप्ययवाक्यस्यानपेक्षितार्थान्तरपरत्वेऽन्वयवैघट्यं स्फुटम् ŚrutaPra. iB. 184. 13 (*on* i. 1. 10)

अनपेक्षितावयवार्थ (anapekṣitāvayavārtha) *adj.* the meaning of which is not dependent on the elements of derivation यदि वा यथानपेक्षितावयवार्था वृक्षश्रोत्रियशक्रगोपादयः स्वसामर्थ्यनियतमर्थमाचक्षते तथा संपाता एवैते प्रथमानुरागानन्तरादयो राजपुरुषादयश्चानपेक्षितावयवार्था यथासामर्थ्यमर्थेषु निविशन्ते SaraKaṇṭhā. 662. 16; *m.* meaning not dependent on the elements of derivation (तत्राक्षमक्षं प्रतीत्योत्पद्यते इति प्रत्यक्षम्) किमनपेक्षितावयवार्थाज्ञानेनेत्याह तत्राक्षमक्षमिति Kiraṇā. 276. 8.

अनपेक्षिताविकलकारणान्तर (anapekṣitāvikalakāraṇāntara) *adj.* not depending on another strong reason अनपेक्षिताविकलकारणान्तरं भविनामुज्झन्ति भव जन्म केवलम् । अपरेऽपवर्गद निसर्गवादिनः शिखिपिच्छसंस्थितिविदास्तविदुषः HarVi. 6. 91.

अनपेक्षिताश्रमकर्मन् (anapekṣitāśramakarman) *adj.* not caring for religious duties of the orders of life संवर्तप्रभृतीनां च नग्नचर्यादियोगाद् अनपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यते BrahmSūBh.(Śaṅ.) 746. 8 (*on* iii. 4. 37)

अनपेक्षिताश्रय (anapekṣitāśraya) *adj.* not depending on a substratum अदृष्टे आत्मनिष्ठत्वेन प्रयाजादिजन्यादृष्टवदनपेक्षिताश्रये व्रीह्याश्रयत्वकल्पनापेक्षया अवघात एव द्रव्यापेक्षे व्रीहिरूपद्रव्यविधिप्रतीतेः MīmāKau. iii(2). 64. 6 (*on* ii. 1. 7)

अनपेक्षिताश्रयविशेषगुणा (anapekṣitāśraya-viśeṣaguṇā) *adj.* (*f.*) having the specific qualities not depending on the supporters (i. e. inmates) विभवैः समन्तसुलभातिभरैरनपेक्षिताश्रयविशेषगुणाम् ··· ददृशुर्दशाननपुरीं हरयः RāmC. 26. 63.

अनपेक्षितासु (anapekṣitāsu) *adj.* not caring for (one's own) life रणे सैनिकेषु कतिचिन्मदारयाः । संप्रबोध्य मलयध्वजात्मजां संनिपेतुरनपेक्षितासवः ŚivLī. 10. 11.

अनपेक्षितास्थिभङ्गदोष (anapekṣitāsthibhaṅgadoṣa) *adj.* not caring for the danger of the breaking of the bones (स्त्रीपुंसौ) रागान्धत्वादनपेक्षितास्थिभङ्गदोषौ परिष्वजमानौ परस्परमनुप्रविशत इव JayaMa. 101. 9 (*on* 2. 2)

अनपेक्षितास्मदवस्थ (anapekṣitāsmadavastha) *adj.* not caring for our condition नूनमस्यायमभिनवजीमूतजलबिन्दुवाहिनः प्रभञ्जनस्यानपेक्षितास्मदवस्थो व्यापारः MālaMā. 9. 275.

अनपेक्षितेतरेतर (anapekṣitetaretara) *adj.* not depending on each other तस्यापि नानपेक्षितेतरेतरा वर्णा ध्वनयो वा तमवद्योतयन्ति SphoṭSi. 91. 4.

अनपेक्षितोपदेश्यत्व (anapekṣitopadeśya-tva) *n.* the state of being an object not required for instruction तादृशमुपदेश्यत्वं प्रतिज्ञावाक्येन, प्रष्टव्यत्वोक्त्या चार्थसिद्धमित्यनपेक्षितोपदेश्यत्वकथनादप्यपेक्षितं प्रश्नासितृत्वमेव वाच्यमिति युक्तम् ŚrutaPra. iA. 187. 6 (*on* i. 1. 1)

अनपेक्षितोपादानान्तर (anapekṣitopādānāntara) *adj.* not depending on any other material cause निरुपादानमर्थजातं प्रकाशयेद् इति । निरुपादानमिति अनपेक्षितोपादानान्तरं स्वयमुपादानं भूत्वेत्यर्थः BrahmSūBh.(Śrī.) ii. 29. 12 (*on* ii. 1. 18)

अनपेक्षितोपायान्तर (anapekṣitopāyāntara) *adj.* not depending on any other means सर्वस्यानपेक्षितोपायान्तरो मनोमात्रनिबन्धनः प्रसज्जन् सर्वबोधः केनाप्रवर्तयितुं शक्यते Kāśi. i. 122. 12 (*on* 2. 115)

अनपेक्षित्व (anapekṣi-tva) *n.* the state of not being dependent (on something else) दहने चानपेक्षित्वमश्म्यादेः Bṛha. 141. 8 (*on* i. 1. 5)

अनपेक्षिन् (an-apekṣin) *adj.* [*f.* -ṇī] **I** not caring for, indifferent to मन्त्रिषु न्यस्तकार्यं च मन्त्रिणामनवेक्षकम् (v. l. अनपेक्षिणम्) ।··· हरीश्वरमुपागम्य हनुमान्वाक्यमब्रवीत् Rāmā. iv. 28. 5; क्षयी रोगी ··· मानापमानयोरनपेक्षी द्रव्यैरप्यर्थहार्यो विलज्ज इत्यगम्याः KāmSū. 310. 25 (6. 1); मुमुक्षुः प्रतिकारे च विपाके चानपेक्षिणः । पञ्चभिः कर्मभिः सत्त्वाचार्यकल्पा जिनात्मजाः MaYānaSū. 163. 22 (19. 21); तत्र तु मदनानपेक्षी विकारो भावः येनाकामयमानापि तरुणी कामयमानेव लक्ष्यते AbhinBhā. iii. 151. 9 (*on* 22. 3); **II** not depending on, independent (स्वभावोऽयम्) एतावत्तु स्यात् – कुतोऽयं स्वभाव इति । निर्हेतुकत्वेऽनपेक्षिणो नियमाभावेनातिप्रसङ्गात् PramāVāSvopVṛ. 55. 18; लौकिकी प्रतिमा यद्वत्प्रत्यक्षाद्यनपेक्षिणी । न निश्चयाय पर्याप्ता ŚlokaVār. 4. 32 (143. 1) (comm. प्रतिमा ··· प्रत्यक्षादिकमनपेक्ष्य स्वातन्त्र्येणार्थमनिश्चाययन्ती); निष्क्रियस्य स्वसङ्गस्य चिन्मात्रस्यात्मनः खलु । स्वतो न व्यवहारोऽयं संभवत्यनपेक्षिणः SarvaSiSaṁ. 12. 41.

अनपेक्षोपायभावोपगम (anapekṣopāyabhāvopagama) *m.* acceptance of independent expediency अनपेक्षोपायभावोपगमात् प्रत्येकमेकैककरणोपकारसंपादकत्वात् विकल्पः समिदादीनां स्यात् PrakaPañ. 475.4.

अनपेक्ष्य (an-apekṣya) *ger.* 1 not having depended on, not being connected with 2 not having desired, not having expected 3 not having regarded, having disregarded, not having cared for, having become indifferent to 4 not having required or needed 5 not having concern for, not having any consideration for 6 not having intended 1 not having depended on, not being connected with प्रवृत्तिर्हुभयत्रानपेक्ष्य Vār. 14 *on* P. iii. 1.26; प्रवृत्तिर्हुभयत्रानपेक्ष्यैव किंचिद्भवति देवदत्ते चादित्ये च MahāBh. ii. 35.25 (*on* iii. 1.26); एकेनापि तत्रापच्छेदः क्रियतेऽनपेक्ष्यापरमपरेणापि ŚābaBh. 1475.20 (*on* vi. 5.50); नानपेक्ष्य प्रतियोगिनं भेदः प्रतीयते BrahmSi. 49.20; यो दिवा प्रैति, स रश्मीनपेक्ष्योर्ध्वमाक्रमते, यस्तु रात्रौ सोऽनपेक्ष्यैवेति BrahmSūBh.(Śaṅ.) 816.9 (*on* iv. 2.19); कर्मसंन्यासात् कर्मयोगः विशिष्यते इति ज्ञानमनपेक्ष्य GītāBh.(Śaṅ.) 160.6 (*on* 5.5); तत्रापि क्त्वावशेन विधिप्रतिषेधावनपेक्ष्य क्रियामात्राक्षेपाद् विधित्वमाश्रितम् TantrVā. 22.4 (*on* i. 2.7); नियोगस्यापि मानत्वं नानपेक्ष्य प्रमामिमाम्। पश्येदात्मानमित्यादि वाक्यम् BṛĀraUBhVā. i. 4.875 = TaiUBhāVā 167.19 (2); अन्यस्य विभ्रमकरी पुरुषस्य शक्तिराकारमन्यमनपेक्ष्य मनीषिता चेत्। वाच्या Saṁkṣ. Śā. 3.92 (ii. 202.4); 3.188 (ii. 261.19); तत्त्वान्तरे हि सादृश्ये गामनपेक्ष्यापि गवयं सदृशमिति जानीयुः Kāśi. iii. 143.23 (*on* 5(6).17); प्रत्यक्षं लक्षणमनपेक्ष्यैव लौकिका मन्यन्ते NyāyRa. 207.12 (*on* 4.254); रागालसिस्तु सा या स्यादनपेक्ष्यैव रूपकम् SaṁgīRa. ii. 192.2 (3.190); द्वितीये पूर्वप्रकृतमथशब्दमपेक्ष्य किं निरन्तरानन्तर्यार्थत्वपक्षादानन्तर्यं ब्रूयाद् द्वितीयोऽथशब्दोऽधिकारार्थत्वपक्षस्य, उतानपेक्ष्यैव VedāntKa. 26.9 (*on* i. 1.1); धर्मविशेषाणां धर्म्यन्तरमनपेक्ष्यैव स्वस्मिन्नन्यतादात्म्याध्यासविरोधित्वात् ŚatDū. 92.3; ज्ञानस्य… संयोगमनपेक्ष्य विषयविषयिभावेन प्रकाशकत्वम् NyāySiA.245.27; न च परस्पराश्रयप्रसङ्गः। परानानपेक्ष्य प्रभेदशालिनो वस्तुनो ग्रहणे सति धर्मभेदभानसंभवात् SarvaDaSaṁ. 5.50; क्रियार्थेन पदेन समाम्नायः समुच्चारणं नानपेक्ष्य पदार्थान् पार्थगर्थ्येन वाक्यार्थम्। … अर्थस्य पदार्थस्य तन्निमित्तत्वात् YuktiSneha. 160.11 (*on* i. 1.1); विषयावच्छेदमनपेक्ष्य स्वत एव सर्पज्ञानस्यासर्पज्ञानाद्व्यावृत्तेः Nyāyāmṛ. 182A.5; तत्त्वमनपेक्ष्यारोपितविषयतया मनःसंकल्पप्रवाहरूपं ध्यानं किं वा परोक्षफलं ज्ञानान्तरम् Nyāyāmṛ. 626A.6; फलोपायसिद्ध्यर्थायत्नान्मध्ये उपायसिद्धिमनपेक्ष्यापि साक्षात् फलस्यैव लाभोऽपि प्रहर्षणम् Kuval. 131(1); अर्थवादवाक्य इव स्तुतिमनपेक्ष्यैव विधिसिद्धेः इमां स्पृष्ट्वोद्गायेत् UpaParā. 8.21; करणानि तदूर्ध्वगतेस्ते ताननपेक्ष्य कथं फललाभः NayaMañ. IV. ii. 10.19; विध्यन्तरस्यासिद्धवद्भावमनपेक्ष्यैव नियमसद्भावादिति चेन्नैवम् ŚivārkaMaDī. i. 62.6 (*on* i. 1.1); i. 161.18 (*on* i. 1.3); स्वेनैवार्थेन नित्यं प्रमाणान्तरमनपेक्ष्य मन्त्राणां संयोगात् MīmāKau. ii. 227.8 (*on* iii. 2.1); भारतादीनां तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम् VedāntPari. 232.2; SiddhāSi. i. 14.15; व्रीहिशास्त्रस्यावहननशास्त्रमनपेक्ष्य स्वसाध्यप्रतिपादकतया … शास्त्रभेदहेतोः … सद्भावाच्छास्त्रभेदस्य हेतुत्वं संभवति MayūMāli. 182.20 (*on* iii. 1.1); 526.1 (*on* vii. 1.1); प्रमातारमनपेक्ष्य स्वप्रकाशस्य दीपस्येव घटप्रकाशत्वादर्शनात् Bhāsk. i. 104.20 (*on* i. 2.7); i. 63.25 (*on* i. 1.3); 2 not having desired, not having expected यथानपेक्ष्याग्र्यमपीप्सितं सुखं प्रबाधते दुःखमुपेतमण्वपि। तथानपेक्ष्यात्मनि दुःखमागतं न विद्यते किंचन कस्यचित्सुखम् Saund. 9.41; अयं किंचिदनपेक्ष्य करोति तद्वदन्यत्रापि प्रसङ्गः। अथायं सर्वमनपेक्ष्य करोति एवमपि पुरुषकर्माफलं भवेत् NyāyVār. 465.13 (*on* iv. 1.21); सत्कारमैत्र्यवनभैषजसंश्रयादीन् वक्तानपेक्ष्य … श्रोता(? त्रा)त्मनोरुपचिनोति फलम् VarāṅgaC. 1.11; सुहृत् इति प्रत्युपकारमनपेक्ष्य उपकर्ता GītāBh.(Śaṅ.) 189.12 (*on* 6.9); अनपेक्ष्य तत्फलपरित्यजनं परमात्मनिश्चयफलं तदिति SaṁkṣeŚā. 3.354 (ii. 347.5); अनपेक्ष्य फलं वेदसिद्धेत्येपेष्यते यदि। त्रिवृत्कृतिः श्रुता VedāntKa. 105.7 (*on* i. 1.5); 3 not having regarded, having disregarded, not having cared for, having become indifferent to अनपेक्ष्य गुणान् यत्र …। कुर्वीत धनलोभेन पतिं सापत्नकेष्वपि। तत्र युक्तगुणम् … अर्थिनम् … कन्या न प्रतिलोभयेत् KāmSū. 225.5 (3.4); भयशीतोष्णवर्षाण्यनपेक्ष्य तदभिगमनम् KāmSū. 320.2 (6.2); तदानपेक्ष्य स्वशरीरमार्दवं तपो महत् सा चरितुं प्रचक्रमे KumāSaṁ. 5.18; स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यम् PadārthaSaṁ. 261.12; कालेन गोचरगतानपेक्ष्य भक्षान् मन्दक्रमोऽप्यजगरः समुपैति सिद्धिम् YogYā. 1.21; लघुपतनकोऽप्याहारचिन्तां उत्सृज्य कौतुकात् (v. l. कौतुकाद् आहारमनपेक्ष्य) कपोतवृन्दम् (एवा)नुगतश्चिन्तयति PañcT. 2.2(3) (186.3); अनपेक्ष्य गुणागुणौ जनः स्वरुचिं निश्चयतोऽनुधावति ŚiśuVa. 16.44; ततोऽहमनपेक्ष्यैव तत्कृतानुकृतक्रमम्। अशरीरस्य कस्यापि गतो भूतस्य वश्यताम् BṛKathāŚloSaṁ. 11.74; परस्मैपदे प्रयोक्तव्ये व्याकरणमनपेक्ष्यात्मनेपदं प्रयुक्तम् TantrVā. 199.19 (*on* i. 3.18); अनपेक्ष्य भवादृशां पुरो यल्लघुवाग्मित्वमभिव्यनक्ति मादृक् HarVi. 15.18; 22.54; 23.32; 26.49; (स्त्रियाः …पन्था देयः) अनपेक्ष्य जातिगुणभर्तृसंबन्धान् स्त्रीत्वमात्रेणैव ManuBh. i. 147.23 (*on* 2.138); i. 195.16 (*on* 2.240); यस्य च यो विहितः स तद्विवाहाभावमनपेक्ष्य प्रथमत एव यदि विहितप्रतिषिद्धेषु प्रवर्तेत ManuBh. i. 218.6 (*on* 3.24); पूजाचारिकैः पात्रापात्रमनपेक्ष्यैव प्रेक्षणमवश्यं ते दर्शयितव्याः JayaMa. 52.8 (*on* 1.4); अतुल्यकक्ष्यतामनपेक्ष्यैव समुच्चयनं समुच्चय इति सामान्येन व्युत्पत्तिः करणीया Kāvyānu.(He.) 342.15; स्निग्धश्च जनः स्वसत्तामनपेक्ष्य पुत्रादिदुःखनिवृत्त्यर्थं प्रवर्तमानो दृश्यते ŚrutaPra. iB. 96.19 (*on* i. 1.1); सहसैव शरीरमनपेक्ष्य कार्ये प्रवृत्तिः साहसं सहसा जातम् NāṭaLaRaK. 954; जात्यादिमहत्त्वमनपेक्ष्यातिमन्दैरप्यमायया संश्लेषभाक्त्वं सुशीलत्वम् VedāntRaMañ. 1.4 (44.23); अर्घ्यमर्घ्यमितिवादिनं नृपं सोऽनपेक्ष्य भरताग्रजो यतः। क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् SāhiDa. 147.8; अनपेक्ष्य पुरातनोपकारानुपकारेषु समुद्यमः परेषाम् Nalābhyu. 2.24; अनुबन्धाद्यनपेक्ष्य दण्डनमिह लोके यशोनाशनम् मृतस्य च कीर्तिनाशनं परलोके ManvaMu. 312.15 (*on* 8.127); 384.1 (*on* 9.113); प्रायः परोपकृतये कृतिनोऽनपेक्ष्य स्वार्थं विपत्कवलिता अपि संघटन्ते KaṁVa. 3.10; PadyaVe. 553; उपक्रमाधिकरणे उपक्रमप्राबल्यमनपेक्ष्य न्यायान्तरेण स्वराणां वेदधर्मत्वनिर्णय इत्युक्तम् UpaParā. 12.4; भगवान् सूत्रकारो बादरायणः … मङ्गलमनपेक्ष्य शास्त्रारम्भे प्रवृत्तः ŚivārkaMaDī. i. 23.6 (*on* i. 1.1); (कन्या) अनपेक्ष्य गुणसमूहम् …। पतिमाचरति KandaCū. iii. 4.39; अभिगमनं च विरचयेदनपेक्ष्यैवातपप्रभृति KandaCū. vi. 2.28; तृणीकृत्य जीवितानि … मनागप्यनपेक्ष्य जयश्रियमनुपतन्तीमिव मित्रवरूथिनीम् …अप्रतिभटाः …साफल्यमनैषुः NīlaVi. 18.19; 4 not having required or needed अयोनिजमनपेक्ष्य शुक्रशोणितं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते PadārthaSaṁ. 27.23; किंचिदनपेक्ष्यैवापूर्वसंबन्धं स्वरूपेणैव कारणेन संबध्यते ŚābaBh. 1642.12 (ix. 1.2); न प्रयोजनमन्तरा(v. l. °मनपेक्ष्य) चाणक्यः स्वप्नेऽपि चेष्टते MudrāRā. 3.19(15); रूपमप्रतिविधानमनोज्ञं प्रेम कार्यमनपेक्ष्य विकासि। चाटु चाकृतकसंभ्रममासां कार्मणत्वमगमन् रमणेषु ŚiśuVa. 10.37; SaraKaṇṭhā. 487.18; न ह्यविद्या प्रयोजनमनपेक्ष्य प्रवर्तते BrahmSi. 10.19; अथ समवायः स्वयं संबन्धरूपत्वादनपेक्ष्यैवापरं संबन्धं संबध्येत, संयोगोऽपि तर्हि स्वयं संबन्धरूपत्वादनपेक्ष्यैवापरं समवायं संबध्येत BrahmSūBh.(Śaṅ.) 320.18 (*on* ii. 1.18); 330.13 (*on* ii. 1.24); न केवला शक्तिः कार्यमारभते अनपेक्ष्य अन्यानि निमित्तानि BrahmSūBh.(Śaṅ.) 839.8 (*on* iv. 3.14); नूनं प्रयोजनमनपेक्ष्यैव क्रोधवशादुक्तवान् पिता KāṭhUBh. 105.6 (*on* 1.5); कर्म … नियतनिमित्तविशेषापेक्षं कर्तुः फलं जनयिष्यतीति न युक्तमनपेक्ष्यान्यदात्मनः प्रयोक्तृ KenUVāBh. 87.11 (*on* 3.1-12); ऊर्णनाभिः लूताकीटः किंचित्कारणान्तरमनपेक्ष्य स्वयमेव सृजते MuṇḍUBh. 310.17 (*on* i. 1.7); तस्य (हरिकेशस्य) सखी प्रयोजनमनपेक्ष्योपकारिणीत्यर्थः LalitāTriBh. 292.19 (*on* 23); देवा महर्षयः बाह्यसाधनमनपेक्ष्य विचित्राणि कार्याणि वितन्वते BrahmSūBh.(Bhā.) 104.15 (*on* ii. 1.25); उद्देश्या ह्यन्योऽन्यमनपेक्ष्य क्रियां वशीकुर्वन्तो युक्तं यन्मिथो न संबध्यन्ते NyāyRa. 501.9 (*on* 5(10).13); 914.13 (*on* 7.247); अतो विशेषमनपेक्ष्य सामान्येन कारणपदमेवेह निर्दिष्टम् AlaṅkāSa. 125.4; न ह्यालोकमनपेक्ष्य जलगतं वस्तु द्रष्टुं शक्यम्, तमसि तद्दर्शनाभावात् ŚrutaPra. ii. 430.13 (*on* iii. 2.6); स (अश्वबलीवर्दादिः) यथा सारथिना मार्गस्याचरणे प्रेरितः पुनः पुनः सारथिप्रयत्नमनपेक्ष्य स्वयमेव रथशकटादिकं पुरोवर्तिग्रामं नयति JīvanVi. 126.6; देवाः पितरः ऋषयो नागाद्या बाह्यसाधनमनपेक्ष्य संकल्पमात्रेण स्वापेक्षितानि वस्तूनि … सृजन्ति VedāntKau. 167.19 (*on* ii. 1.24); कुशलपदं विवेचकत्वसारूप्यात् प्रवीणे प्रवर्तमानम् … प्रयोजनमनपेक्ष्य प्रवर्तते SarvaDaSaṁ. 15.431; किमसौ प्रयोजनमपेक्ष्य सृष्ट्यादिकं करोति प्रयोजनमनपेक्ष्यैव वा TattvPrakā. 91B.9 (*on* ii. 1.33); रूप्यरूपकभावः … स्फुटसादृश्यतया परसाचिव्यमनपेक्ष्यापि स्वमात्रविश्रान्तः SāhiDa. 564.11; अभिधायकत्वंवेषमनपेक्ष्य केवलमर्थप्रतिसंबन्धिशब्दमात्रादप्रमाणभूतादप्यर्थस्मरणं युज्यते TantrRaha. 35.14; यस्संबन्धान्तरमनपेक्ष्य यज्ज्ञानावच्छेदकः … स तस्य विषयः Nyāyāmṛ. 209A.9; उदाहरणगतेषु … शब्देषु परस्परविलक्षणं पदभङ्गमनपेक्ष्यानेकार्थक्रोडीकारादभङ्गश्लेषः Kuval. 65(47); सोमचमसेन केवलं ब्रह्मणे दत्तेन लौकिकोपायान्तरमनपेक्ष्य ऋत्विजामानतेरसंभवेऽपि … द्वादशशतदक्षिणाया निवृत्तिः ŚivārkaMaDī. i. 77.8 (*on* i. 1.1); i. 504.13 (*on* i. 3.42); क्षीरं कर्तारमनपेक्ष्य दधिभवनसमये दधि भवति AṇuBh. 126.21 (*on* ii. 1.24); 5 not having concern for, not having any consideration for तस्मादेवमादीनामनपेक्ष्यार्थमध्ययनमात्रादेव फलं कल्प्यम् TantrVā. 10.4 (*on* i. 2.6); समासवृत्तेरुपकार्योपकारकभावमनपेक्ष्य विशेषणविशेष्यभावरूपगुणप्राधान्याश्रयणेन प्रवृत्तेः TātpaṬ.(U.) 304.19 (*on* 5(4).2); रूढिषु च्युतं रूढिमनपेक्ष्य यौगिकार्थमात्रोपादानादन्यार्थं पदम् KāvyālaṅSū. ii. 1.11; प्रजापतिः … न पूर्वकल्पकृतानि कर्माण्यनपेक्ष्य प्राणिनः सृजति ManuBh. i. 22.14 (*on* 1.28); i. 202.23 (*on* 3.1); अनपेक्ष्य स्वशक्तिं यदर्थेक्षयकरं च यत्।… कर्म तामसमीरितम् GaṇeP. ii. 148.16; द्रव्यस्य क्रतुसंबन्धमनपेक्ष्यैव पुरुषे फलवत्त्वात् TantrRa. 27.7; शब्दहेतुकार्थान्तरन्यासप्रभृतयः … वाच्यालंकारमध्ये वस्तुस्थितिः

-मनपेक्ष्यैव लक्षिताः KāvyPra. 768.3; Kāvyānu.(He.) 351.12; (विज्ञानम्) पूर्वोक्तसमस्तपरद्रव्यमनपेक्ष्य केवलाच्छुद्धबुद्धैकस्वभावात्परमात्मनः सकाशात्समुत्पद्यते TātpaVṛ 76.18 (on 1.58); तच्च (अविज्ञातार्थम्) त्रिविधम् ।... रूढिमनपेक्ष्य योगापेक्षया प्रवृत्तम् TārkiRa. 335.10: नापि विरुद्धविशेषणान्यनपेक्ष्याद्वयबोधकता तेन (प्रधानेन) तदाहृतिरिष्यते NayaMañ. III. iii. 6.12; वाक्यविरचना ... अर्थोपलम्भमनपेक्ष्य वर्णावलिज्ञानमात्रेण न संभवति ŚivārkaMaDī. i. 154.20 (on i. 1.3); i. 435.26 (on i. 3.13): अनपेक्ष्यैव च समयान् ... विबुधः ।-- सेवेतार्थादिकान् वर्गान् KandaCū. i. 2.3; स तादृश एव प्राचीनसुकृतसंपदासादितविवेकादिः प्रथममेवानुपयोगादनपेक्ष्य धर्मजिज्ञासां ब्रह्मजिज्ञासामेवारभते SiddhāSi. i. 5.27; यत्राधिष्ठानमनपेक्ष्य स्वयमेव शुद्धं साकारं ब्रह्माविर्भवति AṇuBh. 213.1 (on iii. 3.3); स्वप्रयोजनमनपेक्ष्य परदुःखनिराचिकीर्षा दया परदुःखदुःखित्वं वा YatīndraDī. 61.3; यत्तु जितचित्तानामत्र स्तोकं स्वातन्त्र्यं वर्तते तदनपेक्ष्यैवमुक्तम् Bhāsk. i. 338.20 (on i. 6.10); यत्र पुरुषे एकाग्रता तत्र देशादिविशेषमनपेक्ष्य सिद्धिरित्यर्थः BālamBha. i. 12.9 (on 1.8); अनपेक्ष्य चरित्रमङ्गनानाम् ... । अनुरागमकृत्रिमं वहन्तीम् ... । काञ्चीपुरीमधिवसन् VasaTi. 47.9; 6 not having intended स्वरूपप्रकाशनमनपेक्ष्य मात्रचः प्रयोगः Bhāsk. i. 138.13 (on i. 3.6)

अनपेक्ष्य (an-apekṣya) *adj.* [*f.* -ā] 1 not to be cared for, to be disregarded श्रुत्यनुसारिण्यः स्मृतयः प्रमाणम्, अनपेक्ष्या इतराः BrahmSūBh. (Śaṅ.) 284.8 (on ii. 1.1); BṛĀraUBh. 577.2 (on iv. 3.22); अत्यन्तमनपेक्ष्यं वैशेषिकमतं श्रेयस्कामैः BrahmSūBh.(Bhā.) 116.15 (on ii. 2.17); प्रत्यक्षश्रुतिविरुद्धं स्मृतिवचनमनपेक्ष्यम् — अनादरणीयम् ŚrutaPra. ii. 206.11 (on ii. 1.1); मीमांसा चानपेक्ष्या TattvMu. 4.108; श्रुतिविरोधे स्मृतिवाक्यमनपेक्ष्यमप्रमाणमनादरणीयम् ManvaMu. 35.30 (on 2.13); अनपेक्ष्यम् इति पाठे अनादरणीयमित्यर्थः MīmāKau. i. 6.11 (on i. 3.1); स्मृतिपादे ... प्रत्यक्षश्रुतिविरुद्धस्मृतिप्रामाण्यमनपेक्ष्यमिति व्यवस्थाप्यते VīraMi. 10.19 (on 1.3); मूलभूतवेदरहितं स्मृत्यादिकं धर्मप्रमाणत्वेनानपेक्ष्यम् MayūMāli. 21.12 (on i. 3.1); 2 not to be depended on सहकारिणो ह्यकिंचित्करा अनपेक्ष्याः किंचित्कराश्चेयत्तैः क्रियते तदेव कार्यसाधनं स्यात् ŚāstrDī. 143.19 (on i. 1.6); 3 not to be expected नामक्षेराश्यादिकमानुकूल्यं मन्त्रेषु सप्तस्वनपेक्ष्यमेषु ĪśānŚiPa. i. 4.24.

अनपेक्ष्यता (anapekṣya-tā) *f.* the state of being one which is not fit to be considered (as basis for something else) नापेक्ष्य कर्माभावो वक्तव्यः । पूर्वकर्मणः सत्त्वात् । न च वाच्यं तस्यापि भगवन्निमित्तत्वेनानपेक्ष्यतेति TattvPrakā. 92B.2 (on ii. 1.36)

अनपेक्ष्यत्व (anapekṣya-tva) *n.* the state of being what is not fit to be expected or desired न च वृक्षाश्रयं बहुत्वं वहाश्रयं वा वृक्षत्वं वनशब्दप्रवृत्तिनिमित्तमित्यैकार्थ्यं शङ्क्यम् ।...एकदेशावच्छेदस्य चापेक्षायाम् उक्तस्यानपेक्ष्यत्वात् SiddhāSi. i. 28.18; एतेनात्रैव संगतोऽपि धर्मविचारः पृथक् क्रियते, बाहुल्यादिति प्रत्युक्तम् । जैमिनीयविचारस्य विरोधेनानपेक्ष्यत्वात् SiddhāSi. i. 40.3.

अनपेक्ष्यप्रकारत्व (anapekṣyaprakāra-tva) *n.* the state of not having requirement for any mode or procedure तद्रूद्रावेन संबन्धो धर्माणामेव चेद्भवेत् । अनपेक्ष्यप्रकारत्वात्तदा बाधो न सिध्यति PrakaPañ. 493.21.

अनपेक्ष्यमाणत्व (anapekṣyamāṇa-tva) *n.* the state of not being considered or expected 'मृताः स्युः साक्षिणो यत्र ... । तदप्यनर्थं लिखितं न चेदाधिः स्थिराश्रयः' आश्रयो भुक्तिरप्रमाणतयानपेक्ष्यमाणत्वात् Aparā. 692.22 (on 2.92)

अनपेक्ष्यरूढिक (anapekṣyarūḍhi-ka) *adj.* in respect of which conventional meaning or usage is not fit to be considered (i. e. not requiring convention) किंचित्पदमनपेक्ष्यरूढिकम्, यथा 'सिंहादवाप द्विपदं नृसिंहः' इत्यादौ AlaṅkāŚe. 3.1c (10)

अनपेत (án-apeta) *adj.* [*f.*-ā] 1 not discontinuous, not lost, still existing, continuous, persistent य॒त्र धारा॒ अन॑पेता॒ मधो॑र्घृ॒तस्य॑ च॒ याः TaiS. V. vii. 7.3; VājaS. 18.65; ŚatBr. IX. v. 1.50; अनपेतं हि कारणम् ŚāṅkhāŚS. ii. 14.8; अस्यां च सत्तायामैश्वर्यमनपेतम् ParāTri. 133.11; 'सुश्रोणि' इत्यामन्त्रणम् — अशोभनमायात्मकतायामपि अनपेतं शुद्धचिन्मयं यदेतत् श्रोण्यां हृदयं योनिरूपमुक्तम् ParāTri. 221.6; येषां पुनः स्वाभाविकी शक्तिरनपेता तेषामधिकारो भवत्येव PrakaPañ. 483.7; अनपेतश्चाधिकारो यावदुपसंहरणीयाङ्गसंपाद्यतामेव तदानीमवगमयति PrakaPañ. 483.17; नो खल्वेकस्यापेतं नीलमन्यस्यानपेतम् NyāyMa. 285.8; न च अनपेतमपि सामानाधिकरण्यं क्रियान्वये वाक्यार्थप्रतीत्यनुपयोगि जातमित्ययं दोषः PūrvottaVāNaMā. 136.17; 2 not deviating, not moving away, not different, not leaving, faithful तेन बृहतीभ्योऽनपेतं भवतीत्यनपेतं भवतीति NidāSū. 61.1 (3.12); वेदा यस्माच्च (द्रोणात्) चत्वारः सर्वास्त्राणि च केशव । अनपेतानि वै शश्वद्वैवादौ प्रजापतेः MahāBhā. xi. 23.32; देवः पिण्डोऽनपेताद भर्तव्यौ वृद्धदुर्बलौ MahāBhā. xii. 60.34; धर्मपथ्यर्थन्यायादनपेते P. iv. 4.92 = JaineVyā. iii. 3.198; पथ्यं पथोऽनपेतं यत् CaraS. i. 25.45 (1941 Ed.); पथ्यर्थन्यायाचारादनपेते CāndraVyā. iii. 4.94; धर्मादनपेतं धर्म्यम् KāśiVṛ. on iv. 4.92 = KāṭhUBh. 130.5 (on 2.13) = Prasā. i. 835.7 = SiddhāKau. 276A.6 (on iv. 4.92); धर्मादनपेतमिति । अनुगतमित्यर्थः Nyās. ii. 359.18 (on vi. 2.65); शास्त्रादनपेतं वदति BṛĀraUBh. 148.13 (on i. 4.15); धर्मादनपेतं परं धर्म्यम् GītāBh.(Śaṅ.) 45.12 (on 2.31); 353.14 (on 12.20); न्यायार्थादनपेते ŚākaṭāVyā. iii. 2.193 (comm. न्यायार्थाभ्यां पञ्चम्यन्ताभ्यां अनपेतेऽर्थे यो भवति न्यायादनपेतं न्याय्यम्) = SiddhaHe. vii. 1.13; धर्मादनपेतो धर्म्यः ManuBh. ii. 179.3 (on 8.228); सप्तसमुद्रीवादिनस्तु शास्त्रादनपेता एव KāvyMī. 91.21; यत्र यस्मिन् रते न्यायादनपेतो योगः । ... समरत इत्यर्थः JayaMa. 135.23 (on 2.6); प्रकाशमानस्यैव बोधस्य विषयप्रकाशकत्वमिति न्यायादनपेतम् NyāyKa. 125.22; धर्मार्थाभ्यामनपेतं यशः प्रयोजनमस्य (नाट्यस्य) AbhinBhā. i. 12.22 (on 1.14); ब्राह्मादीन् गान्धर्वान्तान् ब्राह्मणस्य धर्म्यान् धर्मादनपेतान् विजानीयात् SmṛtiCan. i. 231.3; iii. 59.8; ManvaVi. 292.12 (on 3.22); 292.25 (on 3.23); तस्योक्तस्य कुलादिकं ज्ञात्वा धर्मादनपेतां वृत्तिं राजा प्रकल्पयेत् DīpKa. 80.25 (on 3.43); VīraMi. 823.17 (on 3.44); यो मैदहरिपूनहन् कविबुधोपेतोऽनपेतो रणात् EI. i. 364.15; अन्येषामपि ... धर्मादनपेतं शुल्कं कल्पयेत् DaṇḍaVi. 95.1; पूर्वपदं तु सर्वार्थितायां अनपेतमेव Prasā. i. 143.12; न्यायादनपेते क्लीबे (सारशब्दः) Prasā. i.569.15; आम्नानसिद्धमखिलं न ग्राह्यं किं तु न्यायादनपेतमेव MayūMāli. 601.8 (on ix. 2.1); न्याय्यम् न्यायादनपेतम् Bhāsk. ii. 23.20 (on ii. 1.7); धर्मः अनुवृत्त आचारस्ततोऽनपेतमित्यर्थः LaŚabdeŚe. ii. 288.4; 3 not devoid of, endowed with, possessed of ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते MudrāRā. 1.14; कन्याहेमपुरो लेभे मार्धी यायात्र कादरे । शुद्धवानपेतो यामायानयं यातोऽयमक्षत RāghPāṇ.(Dha.) 18.121; इहच्छन्ति ... । प्रश्रयोऽत्र स्वतेजोभिरनपेतास्तपोमयैः DvyāśraKā. 1.14; अगर्हितमनपेतगन्धवर्णरसं तच्चेत्स्नेहसंयुक्तं सत्पर्युषितं तदा भक्षणीयम् CaturCin. iii(1). 616.22; 4 (time) not lapsed अनपेतश्च लक्षणापाये कालः ŚābaBh. 2187.1 (on xi. 3.48); यत्राग्निहोत्रं नास्ति तत्राप्यनपेता वेला ŚābaBh. 2187.2 (on xi. 3.48); उक्थ्योपलक्षितो हि कालः -- अनपेत एव TantrRa. 297.2; तस्माद्यदि कालोऽनपेतः MayūMāli. 419.20 (on v. 1.18); 792.1 (on x. 8.19)

अनपेतकालम् (an-apetakālam) *adv.* without lapse of time, without delay वनचराः ... । अनपेतकालमभिरामकथाः कथयांबभूवुः Kirātā. 6.30 (comm. अनतिक्रान्तकालं यथा तथा)

अनपेतजीवा (anapeta-jīvā) *adj.* (*f.*) who has not lost life, still living एवंविधे प्रियतमेऽप्यनपेतजीवां मां राक्षसीति रघुपुंगव साधु बुद्ध्वा । बाणं विमुञ्च मयि संप्रति RāmāCam. 4.15.

अनपेतत्व (anapeta-tva) *n.* I the state of being what has not disappeared, the state of being persistent (प्रकृतिः) विवेकख्यातौ कृतायामपि पुनस्तदर्थं प्रवर्तिष्यते । प्रवृत्तिलक्षणस्य स्वभावस्यानपेतत्वात् SyādvāMañ. 15(150): II the state of being that which does not deviate धर्म्यमिति धर्मादनपेतत्वमेव सावधानेनोक्तम् ŚatDū. 237.21; III the state of being that which has not lapsed पुरोडाशे पृथक्त्वहविष्कृदाह्वानाभावेऽप्युक्थ्यानपायादेव तत्कालस्यानपेतत्वेन तदधिकरणोपपत्तेरिति भावः MayūMāli. 860.7 (on xii. 2.3)

अनपेतराक्षस (an-apetarākṣasa) *adj.* not free from demons अनपेतराक्षसमिदं वनमप्रमादेन गन्तव्यम् MadhyaVyā. 1.9(2)

अनपेतव्रतकाम (anapeta-vratakāma) *adj.* who has not lost his desire for vows अनपेतव्रतकामोऽत्र ब्रह्मचर्यं चरामि SkandP. i(2). 42.168.

अनपेतसत्त्व (anapeta-sattva) *adj.* who has not lost courage, courageous उपेन्द्रसेनाभिहतप्रतापं प्रमद्यसेनं विजयं निरीक्ष्य । कश्चिद् भटस्तूर्णमुपेत्य तस्य स्थितः पुरस्तादनपेतसत्त्वः VarāṅgaC. 18.25.

अनपेतार्ति (anapetārti) *adj.* who has not lost the evil intention (to harm) नलं प्रत्यनपेतार्ति तार्तीयीकतुरीययोः । युगयोर्युगलं बुद्ध्वा दिवि देवा धियं दधुः NaiṣC. 17.158 (comm. 'सर्वथा नलः पीडनीयः' इति नलेऽनिवृत्तापकारवाञ्छम्)

अनपेतार्थ (anapetārtha) *adj.* I from whom wealth has not gone away, wealthy अर्थ्यस्तु विभवेऽपि च । आत्मवाननपेतार्थेऽशिक्षास्तु पुंस्ययम् NānārthaMa. 1314; II not devoid of meaning, significant, NānārthaMa. 1314.

अनपेया (an-apeyā) *adj.* (*f.*) which cannot be removed भुवने लब्धपदा दुष्कीर्तिरनपेया भविष्यति PuruṣPa. 56.19.

अनपेयिवस् (an-apeyivas) *adj.* [KāśīVṛ. *on* iii. 2. 109] who has not gone away or deviated from क्षत्रधर्मे स्थितो ह्यस्मि स्वधर्मादनपेयिवान् MahāBhā. v. 48. 29.

अनपोढ (an-apoḍha) *adj.* not given up सिन्धुषु संतेरुरथाश्वाः क्षोभक्षिप्यत्संकुलशैवालसरोजैः । ··· अनपोढक्रीडालोलालंकृतिखण्डैरिव गात्रैः Kapphiṇā. 7. 32; संरम्भिणः क्षितिसुतस्य कठोरकोपरागारुणच्छवि विलोक्य वपुस्तदानीम् । दैत्याधिपाः क्षणमशङ्किषतानपोढगाढोरुगर्भशयनक्षतजच्छटार्द्रम् HarVi. 34. 19.

[1]अनपोढकरटस्थिति (anapoḍha-karaṭasthiti) *adj.* which has not given up the practice of the crows (i. e. behaving like the crows) यश्च ··· । धत्तेऽनपोढकरटस्थितिमन्यपुष्टनारीमिवाविलरुचिं मधुपायिपङ्क्तिम् HarVi. 31. 27 (comm. करटाश्च काकाः । स्थितिराचारोऽपि । कोकिला हि काकैः समानाकृतयो धूर्ततया तदाचारमाश्रित्य तत्कुलायेषु तैरेव पोष्यमाणाः सुचिरमवतिष्ठन्ते)

[2]अनपोढकरटस्थिति (anapoḍha-karaṭasthiti) *adj.* which has not given up remaining at the temples (of the elephant), continuing to stay at the temples (of the elephant), HarVi. 31. 27 (comm. करटौ गण्डौ)

अनपोढस्थिति (anapoḍha-sthiti) *adj.* I who has not given up the limits (of virtue) पञ्चवट्यां ततो रामः शासनात् कुम्भजन्मनः । अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव RaghuVa. 12.31 (comm. अनतिक्रान्तमर्यादः); II who has not given up the normal condition, remaining in normal condition, RaghuVa. 12.31.

अनपोढार्गल (anapoḍhārgala) *adj.* the bar (of the doors) of which has not been removed, unbolted अथानपोढार्गलमप्यगारम् ··· प्रविष्टाम् । ··· दाशरथेस्तनूजः प्रोवाच RaghuVa. 16. 6 (comm. अनुद्घाटितविष्कम्भम्)

अनपोत (anapota) *m.* name of a king तस्याग्रजन्मा भुवि ··· अनपोतसंज्ञाम् । ख्यातां दधाति स्म यथार्थभूताम् RasāSu. 3. 12 (1. 17); cf. **अनपोतशिङ्ग.**

अनपोतनायकीय (anapotanāyak-īya) *adj.* (a composition) in which (King) Anapota is the hero अन्यप्रसङ्गादन्यस्य सिद्ध्यावलगितं यथाभिरामराघवे अनपोतनायकीये RasāSu. 273.17 (3. 168)

अनपोतशिङ्ग (anapota-śiṅga) *m.* name of a king अरिव्रजानामनपोतशिङ्गखड्गप्रहारैरवनिं गतानाम् RasāSu. 143. 13 (2. 101); मानोद्रेकतरुः प्रतिक्षितिभुजामामूलमुन्मूल्यते वाहिन्यामनपोतशिङ्गनृपतेरालोकितायामपि RasāSu. 144. 9 (2.102); 145. 4 (2. 102); 303. 20 (3. 340); cf. **अनपोत.**

अनपोदित (an-apodita) *adj.* [*f.* -ā] not set aside or rejected, free from exception or contradiction तस्माद्दोषेभ्यो गुणानामभावस्तदभावतः । प्रमाणरूपनास्तित्वं तेनोत्सर्गोऽनपोदितः TattvSaṁ. 3067; तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः । अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः ŚlokaVār. 2. 65 (66.2); NyāyKu. 36. 6; यावत् तु तादृग्बाधकविज्ञानं नास्ति तावदनपोदितमौत्सर्गिकं भेदज्ञानमास्ते TantrVā. 528. 10 (*on* ii. 2.22); औत्सर्गिकं यद् विज्ञानोत्पादकत्वं तदपि कुतोऽनपोदितम् TātpaṬ.(U.) 62. 21 (*on* 2. 65); यत्र पुनरिदमपवादद्वयमपि न दृश्यते तत्र तदौत्सर्गिकं प्रामाण्यमनपोदितमास्ते NyāyMañ. i. 153. 1; अतो जात्याद्यस्तित्वबोधादनपोदितो निर्णयो युक्तः Kāśi. ii. 23. 22 (*on* 5(1). 26); i. 88.18 (*on* 2. 44); ii. 4. 17 (*on* 5(1).10); भागवतानाम् ···ब्राह्मण्यमनपोदितमास्ते ĀgaPrā. 71. 1; वेदेऽपि स्वतस्तावत्प्रामाण्यं दोषाभावादनपोदितं स्थितम् NyāyRaMā. 38. 4; ŚāstrDī. 20.4 (*on* i. 1. 2); चोदनाया धर्मज्ञानजनकत्वादुत्सर्गतः प्राप्तं प्रामाण्यमपवादभूतदोषाभावादनपोदितं भवति NyāyRa. 47. 9 (*on* 2. 6); 210. 19 (*on* 5(1). 10); वेदान्तवाक्यानां प्रामाण्यमनपोदितम् NītiMā. 12. 16; कर्मकर्त्रोरुत्सर्गतो भिदा । अभेदोऽपि विशेषे स्याद्बली सोऽप्यनपोदितः AnuVyā. 11A. 4 (*on* 1. 2); अत्र तु वाक्ये ब्रह्मलिङ्गं नोपलभ्यते प्रत्युत तेजोलिङ्गमेवोपलभ्यते अत उत्सर्गोऽनपोदित इत्यर्थः VedāntKa. 122.10 (*on* i. 1. 24); कर्माधीनदेहसंगतिरित्युत्सर्गसिद्धम् । तच्च ब्रह्मशिवयोरनपोदितम् ŚrutaPra. iB. 137. 10 (*on* i. 1. 4); iA. 168. 12 (*on* i. 1. 1); न केवलं शासनप्रकर्षादनपोदितात् प्रकृतेः प्रशासनकर्मत्वसिद्धिः ŚrutaPra. ii. 23.21 (*on* i. 3. 10); ii. 479. 27 (*on* iii. 3. 17); ननु आनुमानिकेश्वरपक्षेऽपि शास्त्रस्य स्वतःप्रामाण्यमनपोदितमेव धर्मादिषु प्रसिद्ध्येत् NyāyKu. 87. 4; मन्वाद्युपदिष्टसोदककमण्डलुधारणादिकं भगवद्योगिनोऽप्यनपोदितमिति ज्ञापनाय 'कमण्डलुस्थितेनैव' इत्युक्तम् PāñcRāRa. 83. 6; तदभावाच्चोभयप्रामाण्यं यथार्थरूपं स्वतः प्रतीयमानमनपोदितम् ŚatDū. 201.28; आप्तकर्तृकत्वाभावेऽप्यौत्सर्गिकं प्रामाण्यमनपोदितमिति NyāyPari. 385. 5; अपौरुषेये तु शब्दे ··· प्रमाणतैवानपोदिता सेत्स्यति YuktiSneha. 20. 18 (*on* i. 1. 2); 21. 35 (*on* i. 1. 2); मिथ्यात्वस्य व्यावहारिकत्वे ··· अनपोदितस्वतःप्रामाण्यप्रत्यक्षादिसिद्धस्य च विश्वसत्यत्वस्य पारमार्थिकत्वापातात् Nyāyāmṛ. 47B. 7; एवमात्मब्रह्मपुरुषश्रुतिभिः ··· अनपोदितस्यौत्सर्गिकस्य साक्षात्त्वस्य त्यागायोगात् ŚivārkaMaDī. i. 389. 22 (*on* i. 2. 27); यकारतकारानन्तर्यकृतदोषापवादेऽपि तकारयकारानन्तर्यकृतमश्रव्यत्वमनपोदितमेव RasGaṅ. 84.6.

अनपोदितत्व (anapodita-tva) *n.* the state of not being set aside or rejected अनपोदितसिद्धं चेति । अनपोदितत्वात् सिद्धम्, उत्सर्गस्यापवादविरहे निसर्गसिद्धत्वात् TattvSaṁPañ. 764. 11 (*on* 2894); मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति BrahmSūBh.(Śaṅ.) 300.15 (*on* ii. 1. 9); वरलाभवचनस्य 'पराशरो न लब्धवरः' इति बाधकप्रत्ययाभावेन स्वतस्सिद्धप्रामाण्यस्यानपोदितत्वात् ŚrutaPra. iA. 229. 16 (*on* i. 1. 1); iB. 349. 27 (*on* i. 2. 33); चोदकप्राप्तस्यानपोदितत्वेन यथापूर्वमवस्थानमनूद्यते NyāyMāVi. 467. 29 (*on* ix. 4. 2); असतः कारणताया अनपोदितत्वात् GuruCandr. ii. 22. 10.

अनपोदितप्रामाण्य (anapodita-prāmāṇya) *adj.* validity of which is not set aside असद्व्यावृत्तेर्व्यावहारिकत्वेऽनपोदितप्रामाण्येन 'असद्वा इदमग्र आसीदि'ति वाक्येनासत्त्वस्य पारमार्थिकत्वापत्तेश्च Nyāyāmṛ. 455B. 7; AdvaiSi. 694.5.

अनपोदितसामान्यरूप (anapodita-sāmānyarūpa) *adj.* the general feature of which is not set aside विशेपत्वं नाम ··· उक्तप्रकारेणानपोदितसामान्यरूपमेव ततो विरुद्धम् NyāyKu. 36. 12.

अनपोदितसिद्ध (anapodita-siddha) *adj.* established because of not being set aside or contradicted दोषैश्चाज्ञायमानत्वान्न प्रामाण्यमपोद्यते । अनपोदितसिद्धं च तदिहापि स्वतः स्थितम् TattvSaṁ. 2894 (comm. अनपोदितत्वात् सिद्धम्); अप्रामाण्यं त्वनपोदितसिद्धं स्वाभाविकमास्त एव TātpaṬ.(U.) 47. 16 (*on* 2. 43)

अनपोद्धार्या (an-apoddhāryā́) *adj.* (*f.*) [DEBRU. 793] of which nothing is to be taken off, from which nothing is to be omitted ता वाऽएताः । अनपोद्धार्या आहुतयो भवन्ति ŚatBr. XI. i. 6. 35.

अनपोद्धृत (an-apoddhṛta) *adj.* not separated यावद्धि विधिसामर्थ्यं धात्वर्थादनपोद्धृतम् । तावद्यः फलसंबन्धः स धात्वर्थस्य गम्यते TantrVā. 549. 5 (*on* ii. 2. 26)

अनपोद्य (an-apodya) *ger.* not having set aside, not having removed हेतुफलभाववादवैरिणमनपोद्य तत्र प्रवेष्टुमशक्यत्वात् ĀtmaTaVi. 138.10.

अनपोद्य (an-apodya) *adj.* [*f.* -ā] which is not to be set aside or rejected अतोऽनपोद्यैव तु तत्त्वसंविदुत्पादनेऽध्यक्षमितेः पुरस्तात् SaṁkṣeŚā. 2.94 (ii. 59. 24); अग्निहोत्रस्येवोत्पत्तिविधिफलविधिपरत्वेनोभयसार्थक्येऽपि प्राकरणिकाभ्यां विधिभ्यां क्रत्वर्थत्वमनपोद्यमेव BhāṭṭCan. 92. 25 (*on* xv. 3. 15); श्रीविद्योपासक ईदृशं पापनाशनोपायमनादृत्य स्मार्तानि प्रायश्चित्तानि चिकीर्षति तस्यैतदनादरणजन्यः पापराशिस्तैरप्यनपोद्य आपतति LalitāSaBh. 205. 33 (*on* 250); एतत् तन्त्रेऽपि तदुक्तार्थस्य यावदपेक्षमविरुद्धं ग्रहणमनपोद्यम् SetuBa. 6. 30.

अनपोद्यत्व (anapodya-tva) *n.* the state of being that which cannot be set aside or contradicted कस्मिंश्चिदर्थे प्रमाणमेवेदमिति सामान्यतः प्रामाण्यनिश्चयस्यानपोद्यत्वात् ŚrutaPra. iB. 339. 16 (*on* i. 2. 25)

अनपोद्यत्वसिद्धि (anapodyatva-siddhi) *f.* establishment of the state of being that which cannot be set aside वक्ष्यमाणशङ्काप्रतिक्षेपानन्तरमेव स्वारस्यस्यानपोद्यत्वसिद्धिः ŚrutaPra. ii. 41. 25 (*on* i. 3. 17)

अनपोब्ध (án-apobdha) *adj.* unbound, unfettered यद्वा एषोऽनपोब्धो जायेत वृत्रान् प्र श्रेरेत् TaiS. II. iv. 13. 1; KāṭhS. 11.4 (i. 148. 7); BaudhŚS. ii. 149.15; (राजन्यः) सोऽनपोब्धो वीर्याय प्रस्त्रियते KāṭhS. 11. 4 (i. 148. 9)

अनपोऽशानम् (an-apo'śānam) *adv.* without sipping water (before and after eating) प्रातर्वा यदि वा सायं नाद्यादन्नमनर्चितम् । ना(? अ)नाद्यमनपोऽशानं शुभप्रेप्सुर्द्विजन्मना BṛParāSm. 6. 174.

अनपोषित (an-apoṣita) *adj.* not driven away तयानपोषितोऽप्यौज्झि शङ्केरो नैव शङ्कया RājTa.(Jo.) 335.

अनपोह (an-apoha) *m.* non-exclusion, non-removal (of difference) तेनांशेनानपोहश्च स्वरूपेणाप्यपोहनम् । कल्प्यते चेद्विरोधः स्यात् सममाक्षेपवारणे ŚlokaVār. 5(13). 7 (568. 1); 5(13).149 (606. 5); 5(13). 156 (609. 2); अनपोहो न भवतीत्यपोहः कश्चायमनपोहः कथं वासौ न भवति NyāyMañ. i. 279. 14.

अनपोहकत्व (anapohaka-tva) *n.* the state of being that which does not exclude or differentiate (one thing from the other) पर्यायाणां च तरुवृक्षादीनामविरोधेनानपोहकत्वमुक्तम् NyāyRa. 606. 18 (*on* 5(13). 149); 611.22 (*on* 5(13). 166)

अनपोहकारण (anapoha-kāraṇa) *n.* cause of non-exclusion तदिदमनपोहकारणमविरोधात् Śarka. 70.2.

अनपोहत् (an-apohat) *adj.* not pushing away or removing (i. e. not extinguishing) उल्मुकेनाभिताप्य ··· उल्मुकमवसृज्य दर्भैस्त्वचं ग्राहयति ··· अनपोहन् ज्वालान् VārāŚS. I. iii. 1.26.

अनपोहत्व (anapoha-tva) *n.* the state of not being (mutually) exclusive ततो द्रव्यगुणयोरेकत्वमशून्यत्वमनपोहत्वं चेच्छता यथोदित एवातद्भावोऽभ्युपगन्तव्यः TattvPradī.(A.) 152. 1 (*on* 2. 16)

अनपोहन (an-apohana) *n.* absence of exclusion, non-removal चादीनामपि नञ्योगो नैवास्तीत्यनपोहनम्। वाक्यार्थो(?र्थे)ऽन्यनिवृत्तिश्च व्यपदेष्टुं न शक्यते ŚlokaVār. 5(13).143(604. 9); TattvSaṁ. 978; (जीवप्राज्ञयोः) एकत्वेऽपि … देहव्यतिरिक्तास्तित्वमात्रविचिकित्सनात् कर्तृत्वादिसंसारस्वभावानपोहनाच्च पूर्वस्य पर्यायस्य जीवविषयत्वमुत्प्रेक्ष्यते BrahmSūBh.(Śaṅ.) 239. 15 (*on* i. 4. 6)

अनपोहव्युदास (anapoha-vyudāsa) *m.* rejection of non-exclusion अथानपोहव्युदासरूपेणाभिधीयते अपोहस्तस्याप्यन्य इत्यनवस्था NyāyVār. 333. 19 (*on* ii. 2. 67)

अनपोहाधार (an-apohādhāra) *m.* non-substratum of exclusion न ह्यसति विशेषे केचिद्भिन्नजातीयत्वेनापोह्याः केचित् समानजातित्वेनानपोहाधारा इति ग्रहीतुं शक्यते NyāyRa. 584. 7 (*on* 5(13). 70)

अनपोहितत्व (anapohita-tva) *n.* the state of not being removed चिदात्मन्यारोपितस्य कर्तृत्वस्य विषयापोहितत्वेऽपि चिच्छायोपेतेऽन्तःकरणोपाधौ विक्रियासहस्रयुक्ते स्वतःसिद्धस्य कर्तृत्वस्य यावद्द्रव्यभावितयानपोहितत्वात् JīvanVi. 146. 5.

अनपोह्य (an-apohya) *adj.* 1 not fit to be carried away प्रयास्यन् … अनपोह्यान्यपोद्धृत्योर्ध्वं प्रातराहुतेः … स्रुक्ष्वमीवहा … आहुतिं जुहोति MānŚS. 37. 10; 2 not fit to be excluded कथं सच्छब्देन सदेव ज्ञेयशब्देन च ज्ञेयमेवापोह्यते, अज्ञातं तु नितरामनपोह्यम् NyāyMañ. i. 279. 12; i. 80. 26.

अनपोह्यत्व (anapohya-tva) *n.* the state of not being fit to be excluded or rejected वृक्षस्तरुरिति पर्यायाणां च परस्परमनपोह्यत्वम् Śarka. 69. 28; ज्ञानाभावस्यानपोह्यत्वादज्ञाननिवृत्तौ ज्ञाने इष्यमाणे ज्ञानादन्यदज्ञानमर्थ एव ते प्रसज्यते Kāśi. ii. 152. 14 (*on* 5(3). 138); शुद्धेऽहंप्रत्यवमर्शे प्रतियोगी न कश्चिदपोहितव्यः संभवति घटादेरपि प्रकाशसारत्वेनाप्रतियोगित्वेनानपोह्यत्वात् PratyabhiVi. i. 314. 1 (*on* i. 6. 5)

अनप्त (án-apta) *adj.* not made watery अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज ṚV. ix. 16. 3 (*but* Sāy. शत्रुभिरनाप्तम्)

अनप्नस् (an-apnás) *adj.* i denying rewards या नो दूरे तडितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ṚV. ii. 23. 9 (*but* Sāy. अनप्नसः कर्महीनान्); ii formless जम्भय ता अनप्नसः। अप्न इति रूपनाम। आप्नोतीति सतः Nir. 3. 11 (65. 12)

अनप्रगल्भ (an-apragalbha) *adj.* not non-bold, not timid (i. e. bold) अनप्रगल्भो ह्यस्माज्जायते BaudhŚS. i. 99. 11.

अनप्रतिष्ठा (ana-pratiṣṭhā) *f.* support or abode of the vital breath अन्नस्य परिणामेऽनः स्थितः …। अनप्रतिष्ठा देहोऽतः श्रुत्येह प्रतिपाद्यते BṛĀraUBhVā. i. 3. 343.

अनप्रत्ययान्त (ana-pratyayānta) *adj.* ending in the primary suffix *ana* (= *lyuṭ*, P. iii. 3. 115-116) (अनो भावकर्मवचनः) कारकात्परमनप्रत्ययान्तं भाववचनं कर्मवचनं चान्तोदात्तम्। पयःपानं सुखम् SiddhāKau. 651A. 13 (*on* vi. 2. 150)

अनप्रधाना (ana-pradhānā) *adj.* (*f.*) having vital breath as the principal matter यदितोऽनप्रधानाया वाचो ह्यन्येन केनचित्। देवान्तरेण सोऽगायद्यास्यः प्राणविग्रहः BṛĀraUBhVā. i. 3. 326.

अनप्रवृत्त (an-apravṛtta) *adj.* [w. r. for **अनपवृक्त**] HirŚS. xv. 8. 30 (342. 1)

अनप्लव (an-aplava) *adj.* not non-floating (i. e. not sinking) एकवर्णमदुर्गन्धमविदग्धमनप्लवम्। पुरीषं दृश्यते यस्य स नागो रोगवर्जितः Hastyāyur. 551. 3 (4. 1)

अनप्सुमज्जन (an-apsumajjana) *n.* [P. vi. 3. 14] not sinking under water लोहादेरपुनर्भावो गुणाधिक्यं ततोऽग्रता। अनप्सुमज्जनं रेखापूर्णता युक्तो भवेत् RasRaSa. 10. 51.

अनफ (anapha) *m.* (Astrol.) a particular configuration of the planets स्यात् सुतः पुमान् …। वाग्मी … सुखशस्तचित्तो योगे निशाकरकृते त्वनफे सुवेषः Sārā. 13. 5.

अनफा (anaphā) *f.* (Astrol.) [MAYR. I. 33] a particular configuration of the planets (resulting from the planets other than the sun occupying the twelfth position from the moon) चन्द्राद्व्यये वापि तथैवोभयतो ग्रहाः। सुनफाप्यनफा चैव योगा दुरुधुराः शुभाः BṛhaspaSm. 260. 199; विषयसुखसुवेषो निर्वृतश्चानफायाम् Bṛhajjā. 13. 5; 13. 3; रविवर्ज्यं द्वादशगैरनफा चन्द्रात् LaJāta. 10(1). 1; 10(1). 2; HorāSā. 19. 1; सुनफानफादुरुधरा भवन्ति योगाः क्रमेण रविरहितैः। वित्तान्त्योभयसंस्थैः कैरवबान्धवाद्विहगैः Sārā. 13. 1; JātaPā. 7. 72.

अनबलामुख (an-abalāmukha) *n.* not the face of a young woman पापीयसी चेयं जरा नाम … अनबलामुखं तिलकालकप्रसाधनममोघमेतदन्तकायुधम् AvantiKa. 42. 10.

अनबोध (ana-bodha) *m.* knowledge of or meditation on the vital breath इहैव देवभूतत्वादाशङ्का किन्निबन्धना। जपकर्मानबोधाभ्यां लोकप्राप्तौ हि शङ्कयते। ज्ञानादेव भवेन्नेति तद्धैतदिति हि श्रुतिः BṛĀraUBhVā. i. 3. 372.

अनब्ज (an-abja) *adj.* not grown in water अनब्जं दृष्टनीलोत्पलदलम् … तदस्यास्तारुण्यं भुवनविपरीतं घटयति SaduktiKa. 69. 18.

अनब्दा (an-abdā) *adj.* (*f.*) not accompanied by (*lit.* not having) clouds अनब्दां विद्युतं पश्येत् … जन्तोर्भवति मासेन, तदा मृत्युर्न संशयः YogŚā. 5. 160.

अनब्धिगा (an-abdhigā) *adj.* (*f.*) not reaching the ocean (नद्यः) तासां समुद्रगाः पुण्याः स्वल्पपुण्या ह्यनब्धिगाः DevīBhāP. vi. 12. 6.

अनभस्तन्त्र (anabhastantra) [w. r. for अनवस् तन्त्रम्, cf. KASHIKAR. Ed. I. i. 1. 29] VārāŚS. I. i. 1. 28.

अनभःसद् (a-nabhassad) *m.* one who does not dwell in the heaven (i. e. a human being) स सागरावर्तधनुर्धरो नरोऽनभःसदां कामविमानसंहतिम्। अयत्नसंवर्धनबाणपद्धति चकार शातैर्विशिखैर्विहायसि RāghPāṇ.(Dha.) 6. 23.

अनभाव (an-abhāva) *m.* absence of the secondary suffix *an* [P. v. 3. 48] अर्धवदिति। प्रतिपदोक्तस्येत्यपि बोध्यं तेनान्नन्ते आद्युदात्तस्य 'द्वितीयाय भागाय' इत्येव, अनभावे तु स्मै भवत्येव LaŚabdeŚe. i. 223. 12.

अनभिकाङ्क्षत् (an-abhikāṅkṣat) *adj.* not wishing अवाहनं च सवाहनो हन्तुमनभि(क्षां? काङ्)क्षन् 'आरोह … वाहनम्' इति द्विपन्तमाभाष्य … बभ्राम AvantiKa. 109. 11.

अनभिकाङ्क्ष्य (an-abhikāṅkṣya) *ger.* not having expected or desired (any reward) निष्कामं नाम किंचिदनभिकाङ्क्ष्य यथाविहितानुष्ठानमिति VaikhāDS. i. 9. 11.

अनभिक्रम्य (án-abhikramya) *ger.* not having moved यतो मन्येतानभिक्रम्य होष्यामीति तत्तिष्ठन्नाश्रावयेत् TaiS. III. i. 2. 3; BaudhŚS. ii. 153. 20; ĀpaŚS. xii. 20. 22.

अनभिक्रुष्ट (an-abhikruṣṭa) *n.* absence of shouting (for alerting) (चतुष्पादकृते (भये) दोषो नापेहीति प्रभाषतः। काष्ठलोष्टेषुपाषाणबाहुयुक्ते तथा)। तथाशब्दादनभिक्रुष्टे सदोषतैवेति गम्यते BālaKrī. i. 297. 6 (*on* 2. 301)

अनभिख्यात (an-abhikhyāta) *adj.* 1 not known ये केचिद्भूमिपतयस्तान्सर्वानन्ववेक्षयेत्। सुहृद्भिरनभिख्यातैस्तेन राजा न रिष्यते MahāBhā. xii. 94. 19 (BhārBhāDī. अनभिख्यातैः स्वेषां परेषां चाविदितैः); 11 not declared (to others) कर्तृव्यतिरिक्तैरनभिख्यातो दोषो यस्यासौ रहस्यमप्रकाशं प्रायश्चित्तमनुतिष्ठेत् Mitā. 506. 1 (*on* 3. 300)

अनभिख्यातदोष (an-abhikhyātadoṣa) *adj.* whose sin is not declared (to others) अनभिख्यातदोषस्तु रहस्यव्रतमाचरेत् BṛhaspaSm. 380. 50 = VṛHārīSm. 9. 351; अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् YājñaSm. 3. 300.

अनभिगच्छन्ती (an-abhigacchantī) *adj.* (*f.*) not approaching (for sexual intercourse) राजाज्ञया पुरुषमनभिगच्छन्ती गणिका शिफासहस्रं लभेत। पञ्चसहस्रं वा दण्डः ArthŚā. i. 304. 5 (2. 27)

अनभिगत (án-abhigata) *adj.* 1 not known, not understood ते खलु वै किं चन वाचो नानभिगतमस्ति MaiS. ii. 2. 7 (ii. 21. 1); मनोऽब्रवीत्त्वैव मया किं चनानभिगतं क्रियता इति MaiS. iv. 6. 4 (iv. 84. 5); तद् मन उवाच। … न वै मया त्वं किं चनानभिगतं वदसि ŚatBr. I. iv. 5. 9; नो ह्यनभिगतं मनसा वाग्वदति ŚatBr. IV. vi. 7. 19; ŚatBr.(K.) V. viii. 4. 15; 2 not approached (for sexual intercourse) (अनभिगमने च सक्तादर्धः) अनभिगमने च सक्तादिति अनभिगताद् सक्तादित्यर्थः। यः सक्तो वशी सोऽनभिगत एव दास्यति JayaMa. 359. 17 (*on* 6. 6)

अनभिगतचारित्रार्य (anabhigata-cāritrārya) *m.* Jaina monk who has not attained righteous conduct on one's own (but on instruction from others) चारित्रार्या द्वेधा अधिगतचारित्रार्याः अनधिगम(v. l. अनभिगत)चारित्रार्याश्चेति …। अन्तश्चारित्रमोहक्षयोपशमसद्भावे सति बाह्योपदेशनिमित्तविरतिपरिणामा अनधिगमचारित्रार्याः (v. l. अनभिगतचारित्रार्याः) TattvārāVār. iii. 36. 2.

अनभिगमन (an-abhigamana) *n.* A not going, not visiting भर्तरि प्रवसिते …। परगृहेष्वनभिगमनम् ViṣṇuSm. 25. 10; ज्ञातिकुलस्यानभिगमनमन्यत्र

व्यसनोत्सवाभ्याम् KāmSū. 241. 5 (4. 1); सुहृत्कार्येष्वनभिगमनमनभिहारहेतोः KāmSū. 324. 22 (6. 3); सुहृत्कार्येष्विति नायकमित्रोत्सवादिष्वनभिगमनं कार्यं आहूयमाना न यामि (इति वक्तव्यम्) JayaMa. 326. 18 (on 6. 3); अभवदस्य ··· त्वदनभिगमनेन रिक्तं मनः RāghPāṇ.(Dha.) 13. 40; **B** not approaching (for sexual intercourse) यत्राभिगमनेऽनभिगमने च सक्तादर्थः स उभयतोऽर्थः KāmSū. 359. 9 (6. 6); 359. 10 (6. 6); अनभिगमनेऽनर्थसंक्रमश्च महान् KandaCū. vi. 6. 31; vi. 6. 32.

अनभिगमनीय (an-abhigamanīya) *adj.* [*f.* -ā] **A** inaccessible (i.e. not liable to be exposed) दृढं निवातम् ··· धूमातपजलरजसामनभिगमनीयम् ··· गृहमेव तावद् पूर्वमुपकल्पयेत् CaraS. i. 15. 6; **B** unapproachable (for sexual intercourse) काकः शुच्यशुचौ मुखं निक्षिपति एवं निर्विचारं स्त्रीः कामयते स तासामनभिगमनीयः स्यात् JayaMa. 311. 6 (on 6. 1); (व्याधिम् ··· अजुगुप्सितम् ·· ख्यापयेत्) अनिन्द्यमजुगुप्सितम्। निन्दिते (व्याधौ) ह्यनभिगमनीया स्यात् JayaMa. 315. 26 (on 6. 2)

अनभिगमयत् (an-abhigamayat) *adj.* not causing to come out (i. e. to flow) औदुम्बरेण दत्तो धावते लोहितमनभिगमयन् ĀpaŚS. x. 5. 14.

अनभिगम्य (an-abhigamya) *ger.* **i** not having approached or gone to अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च। अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते MahāBhā. iii. 80. 39; VṛGautaSm. 556. 9(7); AgniP. 109. 3; SkandP. iv. 6. 46; किमनभिगम्यैव मुनिभिर्योगीन्द्रः पृष्टः। ··· न हि मिथिलास्थं योगीन्द्रमनभिगम्यैव मुनयः प्रष्टुं क्षमाः BālaKrī. i. 7. 7 (on 1. 2); **ii** not having found or got (नारदः) छेत्तारं संशयस्यास्य दुर्विदस्य सुरर्षिभिः। देवादनभिगम्यान्यं सर्वज्ञाचन्द्रशेखरात्। ··· शंकरं द्रष्टुमाययौ AhirbuS. 1. 23.

अनभिगम्य (an-abhigamya) *adj.* [*f.* -ā] **AI** not fit to be approached (for sexual intercourse) साथि चात्र प्रोषितयौवना कान्तारशुष्कनदीव कस्यचिदनभिगम्या विश्वलकं किलानुवर्तते DhūrtaViSaṁ. 13. 6; **AII** not worthy of approach, DhūrtaViSaṁ. 13. 6; **B** irresistible हेलया चाम्रवीदहो को भवान् किमेवमस्याः क्रुते त्रिदशैरप्यनभिगम्यविक्रमं वि(नि)ग्रहीतुमागतोऽसि माम् UdaySuKa. 78. 5.

अनभिगम्यतमा (anabhigamya-tamā) *adj.* (*f.*) most difficult to enter into, most inaccessible अनभिगम्यतमाः पुनरुत्कटस्पुटगतैर्गुहागहना भुवः RāmC. 7. 18.

अनभिगम्यता (anabhigamya-tā) *f.* inaccessibility, unapproachability अथ वा विवृतेऽप्यस्य न काप्यनभिगम्यता। लक्ष्मीप्रणयिनो येन कृताः प्रणयिनां गृहाः RājTa.(Ka.) 3. 195; विषवृक्षो नियोगी च यदेवाश्रित्य वर्धते। चित्रं करोति तस्यैव स्थानस्यानभिगम्यताम् RājTa.(Ka.) 8. 91.

अनभिगीत (an-abhigīta) *adj.* not chanted in the *abhigīta* manner (which begins with the *dvitīya svara* and ends with the *prathama svara*) अभिगीतेष्वनभिगीतानि सर्वत्र SaṁhiUBr. 2. 9 (comm. आर्चिकसंहितायां सर्वत्र अनभिगीतान्यक्षराणि पठितानि। अत्र गानविधौ कानिचिद् अभिगीतस्वरेण गेयानि। ··· अभिगीते द्विमात्रा द्वितीये प्रथमेऽध्यर्धा मात्रा)

अनभिगृहीत (an-abhigṛhīta) *adj.* [*f.* -ā] **1** not taken into account अनभिगृहीतम् — अनिश्चितमशिवादिभिर्निर्गममभावाद् SthānT. 309B. 9; **2** not properly understood, wrongly perceived अतो विपरीता मिथ्यात्वक्रिया तत्त्वार्थाश्रद्धानलक्षणा। सा ··· अनभिगृहीता Ṭīkā on TattvāBh. on 6.6; **3** non-discriminative (view which regards all religious teachings as valid) अन्यदृष्टिः ··· द्विधा — अभिगृहीता चानभिगृहीता च TattvāBh. on 7. 18.

अनभिग्रह (an-abhigraha) *m.* not capturing अग्राह्याणामुपग्राहैर्ग्राह्याणां चानभिग्रहैः। ··· प्रकृतीनां क्षयो लोभो वैराग्यं चोपजायते ArthŚā. ii. 263. 11 (7. 5); *adj.* [*f.*-ā] **1** (socially) unchecked or uncontrolled नराणां कामवृत्तानां या नार्यो निरवग्रहाः। ··· ता मे कथय नारद। ··· नारी किराती शबरी नर्तकी चानभिग्रहा MahāBhā. xiii. App. I. 7A(241); **2** (Jaina ascetic) who does not have adherence to or inclination towards (wrong concepts) आज्ञाप्रवचने जैने कुदृष्टावनभिग्रहः। यः स्याद् भद्रकभावेन तं संक्षेपरुचिं विदुः PārśvC. 1. 618; **3** (word or phrase) not properly understood अनभिग्रहा यत्र न प्रतिनियतार्थावधारणम् JainaL.

अनभिग्रहिक (anabhigrah-ika) *adj.* not discriminative (as to correct or incorrect views) अभिग्रहः — कुमतपरिग्रहः स यत्रास्ति तदभिग्रहिकं तद्विपरीतम् — अनभिग्रहिकम् SthānT. 49A. 6; 27A. 5.

अनभिग्राह्य (an-abhigrāhya) *adj.* [*f.* -ā] **1** (socially) uncontrollable माहिष्मत्याम् ···। बभूवुरनभिग्राह्या योषितश्छन्दतः किल MahāBhā. ii. 28. 23 (JñānDī. अनेतव्या); **2** unchallengeable, unimpeachable परवाक्यमनभिग्राह्यमभिग्राह्यावतिष्ठते ArthŚā. ii. 6. 2 (3. 1)

अनभिग्लान (an-abhiglāna) *m.* [listed in *śivādigaṇa*, P. iv. 1. 112] name of the chief of a *gotra* शिव प्रोष्ठ ··· अनभिम्ला(v.l ग्ला)न GaṇPā. 228. 10; CāndraVṛ. on ii. 4. 41; JaineVyā. 167. 30 (on iii. 1. 101); cf. **अनभिम्लान**

अनभिघात (an-abhighāta) *m.* non-obstruction (*lit.* non-destruction) ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च YogSū. 3. 45.

अनभिघातज (an-abhighātaja) *adj.* not caused by an attack मृत्युना सर्वदेह विषवेगेनानभिघातजेन मूर्च्छान्धकारेण ··· महानिद्राव्रेगेन युगपदभिभूयमाने वैरिसैन्ये सवीरवर्गाग्रेसरो राजकुमारः ··· अतिरंहसा समापतन्तं सेनापतिमवलोक्य TilaMañ. 92. 20.

अनभिघारण (an-abhighāraṇa) *n.* absence of pouring of or sprinkling with (ghee etc.) वपानां चानभिघारणस्य दर्शनात् MīmāSū. xi. 2. 53; त्रैयम्बकवाक्ये यदभिघारयेत् तद् रुद्रायास्ये पशून् निदध्यादिति स्तुतमप्यनभिघारणं नाश्रयिष्यते TantrVā. 16. 3 (on i. 2. 7); दोषोऽप्येवंविधोऽनभिघारणस्य च गुणो न गण्यते हविःसंपादकत्वेन गुणवत्तरत्वात् NyāySu.(So.) 38. 33 (on i. 2. 7); अन्तिमस्यैव विवेस्स्वर्दोऽयं शेषः। न तु होमतदभावयोरभिघारणानभिघारणयोश्च BhāṭṭDī. iv. 105. 5 (on x. 8. 5)

अनभिघारणदर्शन (anabhighāraṇa-darśana) *n.* observance of non-pouring प्रयाजाः पुनरिज्यन्ते। तेषां शेषोऽस्ति। तेनाभिघारणं स्यात्। अनभिघारणदर्शनं नोपपद्येत ŚābaBh. 2156. 9 (on xi. 2. 53)

अनभिघारित (án-abhighārita) *adj.* [*f.* -ā] not poured on, not sprinkled with प्रच्युतं वा एतद्स्माल्लोकादगतं देवलोकं यच्छृतं हविरनभिघारितम-भिघार्योद्वासयति TaiS. II. vi. 3. 5; TaiBr. II. i. 3. 3; प्रतिप्रस्थाता प्रतिपूरुषं त्रैयम्बकानेककपालानेकातिरिक्तान् गार्हपत्ये श्रपयित्वानभिघारितानुद्वास्य सते वा शरावे वा ··· समुप्योपास्ते BaudhŚS. i. 151. 6; सप्तमी हविषामभिघीयते। ··· प्रतिक्रम्यैनामग्रेण दक्षिणेन हवींष्यनभिघारितामुद्वासयेत् BaudhŚS. iii. 229. 5; iii. 258. 11; अनभिघारिताभिर्वपाभिः प्रचरति ĀpaŚS. xviii. 6. 8; HirŚS. xiii. 2. 23 (147. 1); काठके च — संस्थितयजुर्हुत्वा जुह्वा स्वरुं जुहोत्यनुपस्तीर्णमनभिघारितम् KāṭhakaŚrautaSūtraSaṅkalana 71; अनभिघारितमवदानवद् धृत्वा दक्षिणतो मेधं निदधाति KātyŚS. xxv. 10. 7; उत्क्ष्यस्य मध्यमे पर्याये ··· प्राजापत्येष्वालब्धेष्वनभिघारिताभिश्चरति VaikhāŚS. 17. 16.

अनभिघार्य (an-abhighārya) *ger.* not having sprinkled with अन्वाहार्यपचने महान्तमोदनं पक्त्वाभिघार्यानभिघार्य वोद्वास्यान्तर्वेद्यन्वाहार्यमासन्नं यजमानोऽभिमृशति BhārŚS. iii. 3. 11; ĀpaŚS. iii. 3. 14; viii. 17. 5; HirŚS. ii. 3. 8 (212. 3); v. 5. 5 (487. 19); वाजिनमानयति। अनभिघार्याल्याक्रम्याश्राव्याह वाजिनो यज इति BhārŚS. viii. 3. 14; काठके च ··· यदि बहवः पशवः पशुपुरोडाशा वा स्युर्जुहूपभृतोरुपस्तीर्य जुह्वामवदाय ··· अनभिघार्योत्तमस्याभिघारणमनु सौविष्टकृतमभिघारयेत् KāṭhakaŚrautaSūtraSaṅkalana 63.

अनभिघार्य (an-abhighārya) *adj.* not to be sprinkled with दशमे त्वैयम्बकान् पुरोडाशान् प्रकृत्य पठितमभिघार्यास्त्र्यम्बका नाभिघार्याः ···। किमभिघार्या नभिघार्या इति विधिप्रतिषेधार्थता उत नेति NyāySu.(So.) 38. 23 (on i. 2. 7)

अनभिघृत (án-abhighṛta) *adj.* [*f.* -ā] not sprinkled with न हि हविरनभिघृतमस्ति MaiS. i. 10. 20 (i. 159. 19); iii. 10. 5 (iii. 137. 2); हविर्वै दीक्षितो न हविरनभिघृतं मेधमश्नुते KāṭhS. 23. 1 (ii. 73. 1); 25. 8 (ii. 113. 20); 36. 14 (iii. 80. 19); अभावं खल्वप्यभिघारणस्य दर्शयति, सव्या वा एतर्हि वपा यर्हि अनभिघृता ŚābaBh. 1217. 15 (on iv. 1. 36); वपानां चानभिघृतानामत्रैगुण्याद् धारणम् TantrRa. 93. 13.

अनभिघृतता (anabhighṛta-tā) *f.* the state of being what is not sprinkled with अभावं खल्वप्यभिघारणस्य दर्शयति ···। सव्या वपा, इत्यनभिघृततां दर्शयति ŚābaBh. 1217. 16 (on iv. 1. 36)

अनभिघृतत्व (anabhighṛta-tva) *n.* the state of being what is not sprinkled with सव्या वा एतर्हि वपा ··· तदभावादनभिघृतत्वं युज्यते ŚābaBh. 2156. 7 (on xi. 2. 53); BhāṭṭDī. iv. 167. 15 (on xi. 2. 11)

अनभिघृतत्वदर्शन (anabhighṛtatva-darśana) *n.* observance of not being sprinkled with (वपानां चानभिघारणस्य दर्शनात्) कर्मान्तरत्वे तु तदर्थं पुनः प्रयाजकरणात् तेनैव तदुपाभिघारणोपपत्तेरनभिघृतत्वदर्शनं न युक्तम् BhāṭṭDī. iv. 167. 17 (on xi. 2. 11)

अनभिघ्नत् (an-abhighnat) *adj.* not touching, not striking against वेदेनाभस्मानं करोत्यनभिघ्नन् पाणिना वेदशिरसा च MānŚS. 18. 22; हवींष्युद्वासयति ···। अनभिघ्नन्नपर्यावर्तयन् वेदेन प्रमृज्य पात्र्यामवदधाति VārāŚS. I. iii. 3. 26; शनैरपोऽभ्यवेयादनभिघ्नन्नभिमुखमादित्यमुदकमुपस्पृशेत् ĀpaDS. ii(9). 22.13; आरम्भकत्वं शब्दस्य निष्क्रियस्याप्रमाणकम्। देशान्तरगतं कार्यं नामूर्तस्यानभिघ्नतः ŚlokaVār. 6. 92 (754. 1); उदकं हस्तादिनानभिघ्नन्नताडयन्नुपस्पृशेत् स्नायात् BālaKrī. 342(1322), 27 (on 1. 100)

अनभिचरणीय (an–abhicaraṇiya) *adj.* not to be exorcised, not to be charmed with spells (त्रीन् कृच्छ्रानाचरेद् व्रात्ययाजकोऽभिचरन्नपि) अभिचारोऽनभिचरणीयस्य BālamBha. iii. 171. 19 (*on* 3. 289); cf. **अनभिचारणीय.**

अनभिचरत् (án–abhicarat) *adj.* not practising exorcism प्राणाय त्वैत्यनभिचरन्त्सादयेत् MaiS. iv. 5. 5 (iv. 71. 14); यं द्विष्यात् तस्य नाम गृह्णीयात् तूष्णीमनभिचरन् MānŚS. 28. 7 = 110. 9 = 112. 5; स्तम्बं दारु वापिदध्यात् तूष्णीमनभिचरतः MānŚS. 53. 23; यूपाग्रं स्वरुणाभिनिदधाति । तूष्णीमनभिचरतः VārāŚS. III. ii. 6. 24.

अनभिचारणीय (an–abhicāraṇiya) *adj.* not to be exorcised, not to be charmed with spells (कृत्वा ··· । अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति) अभिचारं च श्येनादिकम् । अभिचारोऽनभिचारणीयस्य ManvaMu. 490. 2 (*on* 11. 197)

अनभिचुम्बिता (an–abhicumbitā) *adj.* (*f.*) not kissed रक्ता विविक्तवसतिं प्रियेण सह वाञ्छति । ··· सुप्ते च पश्चात् स्वपिति चुम्बत्यनभिचुम्बिता BhāvPra.(Śā.) 115. 6(5)

अनभिजल्पित (an–abhijalpita) *adj.* not declared (with kind words) दानमेव हि सर्वत्र सान्त्वेनानभिजल्पितम् । न प्रीणयति भूतानि MahāBhā. xii. 85. 7.

अनभिजात (an–abhijāta) *adj.* [*f.* –ā] **A** not born of high (caste), not of noble birth, low-born मन्त्री ··· । धर्मार्थकामयुक्तोऽपि नालं मन्त्रं परीक्षितुम् । तथैवानभिजातोऽपि MahāBhā. xii. 84. 25; व्याधितो नवो वा राजेति । ··· नवेऽप्यभिजातोऽनभिजात इति । दुर्बलोऽभिजातो बलवाननभिजातो राजेति । ··· प्रकृतयः कृच्छ्रेणोपगच्छन्ति । बलवतश्चानभिजातस्य बलापेक्षाः सुखेन इत्याचार्याः ArthŚā. iii. 15. 6-8 (8. 2); भगवति कमलालये ··· । अपि च अनभिजाते । पृथिव्यां किं दग्धाः प्रथितकुलजा भूमिपतयः MudrāRā. 2. 6(1); दुर्वचनमनभिजाताः स्वजनं प्रत्युत्सृजन्त्युपेत्यापि SūktiMu. 8. 20; **B** improper जरारोपणं पुण्यवतीति फलविपरीतं भवतीति सर्वसाधारणमपि च कासील्यनभिजातम् HarṣaC. 325. 4; **C** roguish वत्स, ज्वलितं जगज्जीवितमनेन ··· दुर्जातेन जठरजातवेदसा । न जातु कोऽपि जन्तुरनेनानभिजातेनागोचरीकृतो जीवति AmṛUda. 3.1(2)

अनभिजातजिह्मता (anabhijāta-jihmatā) *f.* crookedness of an undignified person त्वमुच्यसे सुभटकुलैकचन्द्रमाः ··· । समुल्लसन् भरनिममुद्गहस्व भोः प्रपद्यसे किमनभिजातजिह्मताम् RāmC. 15. 7.

अनभिजातभ्रम (anabhijāta-bhrama) *m.* wrong notion about (the Scripture as) being not produced भगवति ··· शशाम किलानुमितिकल्पितेन श्रौतप्रमितेः पिशाचावेशः, पुरुषस्य च श्रुतावनभिजातभ्रमः AmṛUda. 3. 8(17)

अनभिजातवत् (anabhijāta-vat) *adv.* like a low-born person or commoner सः (दुर्योधनः) दृष्ट्वा पर्यतप्यत । यत्रावहसितश्चासीत् प्रस्कन्दन्निव संभ्रमात् । प्रत्यक्षं वासुदेवस्य भीमेनानभिजातवत् MahāBhā. i. 1. 90.

अनभिजातवंश्या (an–abhijātavaṁśyā) *adj.* (*f.*) not belonging to noble lineage (i.e. source) अपरिचिततातजन्मा श्रुतिरभिजातिं न चेद् भजते । कथमनभिजातवंश्यां प्रमितिं पुरुषः प्रमाणयतु AmṛUda. 3. 8.

अनभिजातेश्वर (anabhijāteśvra) *m.* master from an ignoble family (i.e. low-born master) अक्षाश्च नामानभिजातेश्वरा इव न सर्वकालसुमुखा भवन्ति DhūrtaViSaṁ. 3. 13.

अनभिजातेह (anabhijāteha) *adj.* whose desires are not noble राजन् याचे(? च)नमात्रेण मत्तो नाप्नोषि भोजनम् । ग्राम्यादनभिजातेहात् सौजन्यमिव सुन्दरम् YogVā. iii. 106. 47 (*but* comm. अनभिजातेहादसंपन्नाभिलाषात्)

अनभिजानत् (an–abhijānat) *adj.* **A** not perceiving, not recognizing यागोऽयमिति विज्ञानं यजिश्रुत्योपजन्यते । ··· शब्दे संनिधिकृतामभेदबुद्धिमनभिजानतां श्रुतिनिमित्ता प्रत्यभिज्ञानभ्रान्तिः TantrVā. 455. 9 (*on* ii. 2. 2); यजिश्रुतिकृतैवेयं प्रत्यभिज्ञा न यागोऽयमिति ···तदभिधायिन्यां श्रुतौ संनिधिकृतामभेदबुद्धिमनभिजानन्तः श्रुतिकृतां मन्यन्ते ŚāstrDī. 124. 8 (*on* ii. 2. 2); **B** not knowing वेषमाचारं वानभिज्ञातं न (v. l. वेषं समाचारं वानभिजानन् न तं) भजेत् NītiVā. 17. 31; सीतान्वेषणे तद्वृत्तमनभिजानतो हनूमतः परिदेवनम् MahāN. 5. 26(1)

अनभिजित (án–abhijita) *adj.* [*f.* -ā] not conquered, not gained or acquired, not won over or assailed यः कामयेतानभिजितमभिजयेयमिति TaiS. III. iv. 3. 4; V. iv. 6. 4; आजिं धावन्त्यनभिजितस्याभिजित्यै TaiS. VII. v. 9. 2; वसोर्धारां जुहोति ··· अनभिजितस्याभिजित्यै MaiS. iii. 4. 1 (iii. 45. 1); KāṭhS. 21. 11 (ii. 51. 9); यदनतिक्रम्याश्रावयेदनभिजितोऽस्य यज्ञः स्यात् MaiS. iii. 8. 1 (iii. 93. 2); दक्षिणतो वै देवानसुरा यज्ञमजयन् ··· तमाग्नीध्रात् पुनरभ्यजयन्नेतद् वा अनभिजितम् MaiS. iii. 8. 10 (iii. 110. 5); iv. 5. 1 (iv. 63. 16); एतद् वै देवानां सत्यमनभिजितं यदामन्त्रणम् KāṭhS. 8. 7 (i. 90. 20); अथैताः पत्न्यो दक्षिणतो वै देवानामसुरा यज्ञमभ्यजयंस्तेषामाग्नीध्रमनभिजितमासीत् KāṭhS. 9. 15 (i. 118. 7); इन्द्रो वै वृत्रं हत्वा स इमांल्लोकानभ्यजयत् तस्यासौ लोकोऽनभिजित आसीत् KāṭhS. 30. 5 (ii. 187. 13); अनभिजिता वा एषोद्गातॄणां दिग् यत् प्राची PañcBr. vi. 5. 20; xvi. 4. 6; इन्द्रो वृत्रꣳ हत्वा । ··· स इमान् लोकानभ्यजयत् । तस्यासौ लोकोऽनभिजित आसीत् TaiBr. I. ii. 3. 3; यस्य तत्पुरुषमनभिजितꣳ स्यात् । स देवानाꣳ साम्येके । ··· उद्भवेद् TaiBr. I. ii. 6. 5; स्वयं कृत इध्मः । अनभिजितस्याभिजित्यै TaiBr. I. vii. 3. 8; III. ix. 9. 3; इन्द्रस्याभिजिदग्निष्टोमोऽनभिजितस्याभिजित्यै ĀpaŚS. xxii. 1. 12; MānŚS. 197. 8; HirŚS. xvii. 1. 15 (398. 11)

अनभिजुह्वत् (an–abhijuhvat) *adj.* not offering अमावास्यायामुत्तरपूर्वामुत्तरपूर्वामाहुतिं जुहोत्यनभिजुह्वदाहुत्याहुतिं प्रत्यक् JaimiGS. 1. 3 (4. 4)

अनभिज्ञ (an–abhijña) *adj.* [*f.* -ā] **1** unaware of, ignorant in the matter of, not acquainted or conversant or familiar with, not accustomed to, not experienced or skilled in, not recognizing एका बालानभिज्ञा च मार्गाणामतथोचिता । क्षुत्पिपासापरीता च दुष्करं यदि जीवति MahāBhā. iii. 64. 17; ऋष्यशृङ्गं मुनिसुतमानयस्व ··· । वानेयमनभिज्ञं च नारीणामार्जवे रतम् MahāBhā. iii. 110. 25; Rāmā. i. 9. 3; दुर्योधन ··· । उत्पथं मन्यसे मार्गमनभिज्ञ इवाध्वगः MahāBhā. v. 63. 1; विषयेष्वनभिज्ञोऽहम् MahāBhā. xiii. 20. 62; अनभिज्ञा इदं देवि त्वयैव कथितं पुरा Rāmā. ii. 9. 14; (स्त्रियः) अनभिज्ञाश्च सुन्दर्यः मृत्योः BuddhaC. 4. 58; 5. 31; स प्रेक्ष्यैव हि जीर्णमातुरं च मृतं च विमृशन् जगदनभिज्ञमार्तचित्तः । ··· न विषयरतिमगमत् Saund. 2. 64; अनभिज्ञो यथा जात्यं दहेद् गुरु काष्ठवत् Saund. 15. 26; अनभिज्ञश्चिकित्सायां शास्त्राणां पठनेन किम् HārīS. iii. 2. 1; दुःखानामनभिज्ञो यो ममाङ्कशयनोचितः ŪruBh. 42; रहोजितोऽनभिज्ञश्च कूटाक्षैः कपटेन वा । ··· सर्वं न दाप्यते BṛhaspaSm. 223. 6; यत्रौषधिप्रकाशेन नक्तं दर्शितसंचराः । अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः KumāSaṁ. 6. 43; बालानभिज्ञा वाक्यानां ततः प्रोक्तमिदं मया MārkP. 74. 34; (पिङ्गलकः) अनभिज्ञमितरजनसेवितानाम् ··· पुरुषाणाम् ··· राजत्वमनुभवन्नास्ते Tantrākhyā. 4. 13; Pañcā. 4. 27; अनभिज्ञो भवान् सेवाधर्मस्य Tantrākhyā. 7. 1; PañcT. 1. 18(3) (22. 7); Pañcā. 7. 13; कोऽस्य कालः । अनभिज्ञोऽहमपरिचितत्वात् Tantrākhyā. 26. 5; PañcT. 1. 86(29) (96. 12); तात । बालभावादनभिज्ञोऽस्मि Tantrākhyā. 95. 29 = PañcT. 3. 32(6) (285. 5); नष्टं कृतमकृतज्ञे नष्टं दाक्षिण्यमगुणज्ञे (v. l. °मनभिज्ञे) PañcT. 1. 103(105. 12); Pañcā. 60. 21; अनभिज्ञो भवान् बाध्यबाधकभावस्य Bṛha. 24. 13 (*on* i. 1. 2); 383. 5 (*on* i. 1. 25); अहन् ··· स्नेहरसस्यानभिज्ञः ··· तमालविटपिनो मूलदेशमविशन् Kād. 34. 12; अविकारागमोद्भवानभिज्ञाभिः ··· वेशविलासिनीभिः AvantiKa. 7. 3; 20. 11; 166. 17; ये निर्वृतानामुपमां वदन्ति हीनोपमास्ते नृपतेऽनभिज्ञाः VarāṅgaC. 10. 55; 19. 46; 24. 44; अत्यन्तं यानभिज्ञा क्षणमपि तमसा साकमेकत्र वस्तुं ब्रध्नस्यैषा रुचिः SūryaŚ. 24; अहमनभिज्ञः परमेश्वरगृहाचारस्य MahāvīC. 2. 50B(1); 6. 17(4); सर्वेषामनभिज्ञानां पूर्वपूर्वप्रसिद्धितः । सिद्धः संबन्ध इत्येवं संबन्धादिर्न विद्यते ŚlokaVār. 5(14). 41 (649. 5) = TattvSaṁ. 2273; किं पुनरनभिज्ञोऽसि वीरव्यवहारस्य AnargharRā. 4. 40(5); MahāP. 1. 80; हृदयं सदैव येषामनभिज्ञं गुणवियोगदुःखस्य Kāvyālaṅ.(Ru.) 7. 102; यत्तु कर्मस्वभावपर्यालोचनया चित्रादिरनन्तरफलत्वं कम् ··· तदेतदत्यन्तमनभिज्ञस्याभिधानम् NyāyMañ. i. 251. 4; i. 37. 7; पशूनामनभिज्ञानां कुलधर्मो विगर्हितः KulārT. 2. 91; 9. 59; अनभिज्ञं गुरुं प्राप्य ··· गुर्वन्तरं तु गत्वा नैतद्दोषेण लिप्यते KulārT. 13. 131; मन्त्रानधिकृतस्यानभिज्ञस्य वा यमेवार्थः पर्यायवचनैर्वाच्यः BālaKrī. i. 239. 3 (*on* 2. 115); अनभिज्ञे वाक्यं स्याद् बधिरेष्विव गायनम् NaiṣkaSi. 185. 7; शब्दशक्तिः ···शक्या ग्रहीतुमुदितेन यथानभिज्ञैः SaṁkṣeŚā. 1. 289 (i. 217. 16) = 1. 360 (i. 266. 9); 2. 183 (ii. 111. 23); अनभिज्ञोऽस्मि दूतोक्तीनाम् NalaCam. 5. 54(31); (श्रीहर्षः) पापालापेऽनभिज्ञः ··· (स्तु)वते EI. i. 126. 12; xv. 60. 52; YaśasCam. i. 9. 2; मूर्खे चैवानभिज्ञे च न च स्वप्नं प्रकाशयेत् BrahmVaiP. iv. 82. 56; iv. 61. 31; अनभिज्ञोऽस्म्यहं विप्रो कार्याकार्यविचारणे SkandP. i(1). 29. 64; अनभिज्ञास्तमिस्रस्य यस्य सानुनिवासिनः SkandP. vi. 33. 8; अन्यतोऽनभिज्ञांस्तु प्रति सूत्राणि प्रणीतानि Kāśi. i. 18. 23 (*on* 1. 42½); i. 34. 25 (*on* 1. 77½); अतोऽनभिज्ञस्य परार्थानुमानप्रयोगानुपपत्तिः इत्यभिप्रायेणाह Kāśi. ii. 77. 11 (*on* 5(2). 149); iii. 72. 20 (*on* 5(4). 113½); उपायतद्व्यापाराणामनभिज्ञो हि चिकीर्षन्नपि न कर्ता TātpaṬ.(Vā.) 509. 14 (*on* iii. 1. 6); अनभिज्ञस्य स्मृतेरभावात्सुखाभिज्ञस्येत्युक्तम् TattvVai. 64. 30 (*on* 2. 7); प्रावृड्विलासलास्यानामनभिज्ञाः कलापिनः NavaSāC. 11. 55; न चानभिज्ञोऽयमस्ति नागरस्तव वल्लभः । तवार्थं गोपवेषेण क्रीडते विपिने महान् ĀdiP. 14. 5; समस्य सर्वभूतेषु सर्वज्ञस्य तवाप्यतः । अनभिज्ञेन मूढेन किं वक्तव्यं दयानिधे GaṇeP. i. 29. 24; आयत्वेऽनभिज्ञान् प्रति संबन्धे कथ्यमानेऽभिज्ञानां संबन्धबुद्धयार्थबुद्धिः NyāyRa. 649. 15 (*on* 5(15). 41); ऋष्यशृङ्गो नृपकन्यानामनभिज्ञो मुनिसुतः RāmāMañ. 5. 6; ब्रह्मचारी ···। अभिलाषोचितं वक्तुमनभिज्ञोऽप्युवाच ताम् DarpDa. 3. 83; अनभिज्ञो हि भवान् शारीरकशास्त्रविज्ञानस्य BrahmSūBh.(Ra.) 5. 4 (*on* i. 1. 1); 213. 6 (*on* i. 1. 21); तदपि देहातिरिक्तात्मानभिज्ञस्य न संभवति

BrahmSūBh.(Rā.) 248. 8 (*on* i. 2. 12); 322. 14 (*on* i. 3. 33); रत्नादिष्वनभिज्ञस्य प्रमाणं मे भवान् KathāSaSāg. v. 1. 188; देशान्तरिणो वयमनभिज्ञा अत्रत्यवृत्तान्तस्य KaumuMi. 1. 13(16); धूमानभिज्ञोऽपि रतेरजस्रमश्रुस्तुतेर्योऽजनि सूत्रधारः ŚrīKaC. 1.2=AlaṅkāRa. 53(14); श्रवणपुटतटाभिघातमक्ष्णोर्मलयमरुद्घनमोहतन्त्रवायः। रथहरिणमपत्रपानभिज्ञं रचयितुमिच्छुरिवोच्छिनत्ति तस्याः ŚrīKaC. 7. 33; सोऽयमनभिज्ञः पराजयकिंवदन्त्याः कुमुदचन्द्रवादीन्द्राः MudriKu. 2.15(1); (सगरस्य) यूयमस्यानभिज्ञाः स्थ TriṣaŚaPuC. ii. 4.216; क्षीरकण्ठावनभिज्ञौ कृत्याकृत्येषु कर्मसु TriṣaŚaPuC. iv. 1. 360; अनभिज्ञो गुणानां यो न भृत्यः सोऽनुगम्यते Pañcā. 10. 31; अयोगेनानभिज्ञेन यो गजो वाहितो भृशः।... लभते चाग्निदौर्बल्यम् Hastyāyur. 322. 12(2. 67); 530. 7 (3. 29); भद्र नवागमनत्वादनभिज्ञो भवान् KarpūC. 17(3); नूनमेषा (त्रिपुरी) ... अनभिज्ञैरेभिर्दृष्टैरुच्छिद्यते TripuDi. 4.13(3); अभिनयमपि दिव्यस्यानभिज्ञो विधातुम् SamudraMa. 3. 8; कृत्तद्धितसमासानाम् ... लक्षणं त्वनभिज्ञानां तदभिज्ञानसूचकम् MugdhaBo. 26. 219 (175.10); अनभिज्ञा भवन्तो भाष्यहृदयस्य ŚrutaPra. ii. 62. 23 (*on* i. 4. 27); स्वादुस्वादानभिज्ञश्चेद् द्राक्षासु करभो मुखम्। वक्रीकुर्यात् PārśvC. 1. 184; 2.752; मुनीन्द्रः सिद्धसेनः ...। प्राकृते केवलज्ञानिभाषितेऽपि निरादरः। तत्प्रभावगरीयस्त्वानभिज्ञस्तत्र मोहितः। संघप्रधानैरूचे PrabhāC. 58. 13; 204. 22; श्वश्रूः ... वधूमाद्रियते काचित् ...। जिनधर्मानभिज्ञेव विद्वेष्टि महतीं पुनः ŚāliC. 4. 37; मूर्धाभिषिक्ता महिषी ...। अनभिज्ञा सपत्नीनां सहधर्मचरी भवेत् BhāvPra.(Śā.) 290. 16(10); सहासमैक्षन्त जनाः समन्तात् आलानितं नागमिवानभिज्ञाः Yādavā. 4.36; 20. 48; अनभिज्ञो भगवान् (? भवान्) भागवतसंप्रदायस्य NyāySu.(Ja.) 427B.6 (*on* ii. 2. 12); अनभिज्ञेव पृच्छसि MahNirvāT. 1. 16; अनभिज्ञा[ः] प्रलापानामीदृशां मम वंशजाः UnmaRā.(Vi.) 19; यत्रानभिज्ञः प्राजकः सारथ्यादिः स्वामिना कृतः, तदज्ञानाच्च युग्यं तुरगाद्यतिवर्तते ... तत्र ... स्वामी ... दण्ड्यः DaṇḍaVi. 225. 10; अनभिज्ञे गुरौ तत्त्वं कथं वीक्षेत शैक्षकः Bharat. 17A. 6; कितवो यः स्वयं देवितुमनभिज्ञः स्वार्थं परान् देवयति न स्वयं देविता ManvaMu. 119. 4 (*on* 3. 159); अद्यापि घासकवलग्रसनानभिज्ञो मन्मार्गवीक्षणपरस्तनयो मदीयः Subhāṣi. 660; प्रकृतिरपि ... अन्याननभिज्ञान् प्रति तु दुःखात्मिका भवत्येवेति नियमो व्यवस्था SāṁkhyaPraBh. 76. 16 (*on* 2. 7); आः कथमनेकधाध्यक्षयन्नप्यमीषां प्रेमबन्धपरिपाकमनभिज्ञ इव पृच्छसि KaṁVa. 4. 9(5); गन्धवाह ...। प्राणान् गृहाणाशु यतो भवेयममीकविश्लेषकथानभिज्ञा YātrāPra. 4. 102; 4. 147; 6. 63; '... तत्त्वं ब्रूहि मदीय जीव' ... प्रश्नविषयस्यात्र ... तज्ज्ञं प्रत्येव प्रष्टुमौचित्येनानभिज्ञं स्वजीवं प्रति प्रष्टुमयोग्यत्वात् प्रश्नान्यथानुपपत्त्या आक्षिप्ता ... अतिशयोक्तिः RasGaṅ. 167. 5; 680. 13; जानन्त्याप्यनभिज्ञयेव कपटव्यामीलिताक्ष्या सखि ... वक्षसि तया पाणिर्समासज्जितः BhāmiVi. 2. 83; अनभिज्ञोऽसि शास्त्रतत्त्वस्य Jīvāu. 406. 5; हन्त, हन्त। किमिदं प्रतिज्ञातमनभिज्ञेन JānaPa. 4. 47(1); सती सद्विद्या, तद्विषये अज्ञा अनभिज्ञाः LalitāSaBh. 161. 11 (*on* 202); न चेति। अनभिज्ञस्य शङ्केयम् BālamBha. iii. 159(?151). 30 (*on* 3. 258); II not knowing very well, knowing very little, not an expert भिषक्त्वमनादीनि प्रयुञ्जानः कालमात्रावयोव्याधिबलाबलानामनभिज्ञो बालविनाशाय ... संपद्यते KāśyaS. 153B. 3; अवस्थितं लोहितमङ्गनाया वातेन गर्भं ब्रुवतेऽनभिज्ञाः AṣṭāHṛ. ii. 2. 61; त्वमद्याप्यनभिज्ञोऽसि राजनीतेः कुमारक TriṣaŚaPuC. iv. 5. 159; मन्त्रतदर्थाभिज्ञमनभिज्ञं चोभावपि वाचयेत् NyāyMāVi. 209. 10 (*on* iii. 8. 9); III foolish अनभिज्ञैरलैर्हंश्च संगमं नैव कारयेत् KulārT. 8. 17; सखे, अनभिज्ञोऽसि। स्वयं प्रयोगादन्तेवासिभिर्विहितः प्रयोगो महिमानमाचार्याणामुपचिनोति AnarghaRā. 2. 8(21); अनभिज्ञो देवानां प्रियः AbhinBhā. ii. 339. 9 (*on* 16. 103); विवेकस्तत् कुतो न विरज्यते। अनभिज्ञोऽसि। कथ्यते। पश्य KarṇaSu. 1. 33(3); स दोर्वीर्यगर्वज्वरितमानसः। अनभिज्ञस्तदन्यानि सैन्यानि समवर्तयत् PāṇḍaC. 5. 178; कार्तिकेय किमनभिज्ञः प्रलपसि TripuDi. 1.41(1); 'हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः लेढि...' अत्र मर्कटवृत्तान्तेनाप्रस्तुतेन प्रस्तुतमनभिज्ञेषु रमणीयवस्तुसमर्पणं नाशाय भवतीति सामान्यं गम्यते RasGaṅ. 542. 8; कमलिनि मलिनीकरोषि चेतः किमिति बकैरवहेलितानभिज्ञैः BhāmiVi. 1. 8.

अनभिज्ञक (anabhijña-ka) *adj.* ignorant त्वं देव सर्वमप्येतद् वेत्सि नाभेऽनभिज्ञकाः। पृच्छामो वयम् MahāP. 3. 198; चक्रोत्पत्तिक्षणे भद्र यन्नायामोऽनभिज्ञकाः। महान्तमपराधं नः त्वं क्षमस्वार्थितो मुहुः MahāP. 28. 160.

अनभिज्ञतत्त्व (anabhijña-tattva) *adj.* ignorant of the truth, not knowing the truth त्रिलोकमूल्यं नरदेववृत्तमवाप्य ये कोद्रवतण्डुलार्थम्। विक्रीय च स्वाननभिज्ञतत्त्वा मूर्खाः परप्रेष्यकरा भवन्ति VarāṅgaC. 8. 18.

अनभिज्ञता (anabhijña-tā) *f.* ignorance, non-recognition, unawareness असाधौ तु साधने य आसां प्रयोगः सोऽनभिज्ञतया साधनदोषस्य तद्दोषप्रदर्शनार्थं वा प्रसङ्गव्याजेन NyāyVār. 536. 6 (*on* v. 1. 1); अहं चोर्ध्वगतेरनभिज्ञतयाऽस्या गत्या निष्पतितः PañcT. 2. 79(19) (256. 13); Pañcā. 168. 28; रात्रौ सुरतसंभोगलालसा शयने [र]ता। विपक्षप्रेष्ययत्नानां मुक्तवाचानभिज्ञता ViṭVṛ. 37; चत्वारि शृङ्गेत्यविद्यमानार्थवचनमाशङ्कितम्, तदप्यनभिज्ञतया यज्ञस्य वैष गुणवादेन संस्तवः NyāyMañ. i. 263. 14; बीजाङ्कुरादयस्तु पक्षान्तर्भूता इति तैर्व्यभिचारवचनमनभिज्ञतयैव श्रोत्रियाणाम् ĪśvaSi.(Yā.) 76. 20; यत्तु वाक्यभेदः स्यादिति केनचिदुक्तम्, तदनभिज्ञतया Loc. 57. 25 (*on* 1.21); अनभिज्ञान् प्रति संबन्धे कथ्यमानेऽभिज्ञानां संबन्धबुद्ध्यार्थबुद्धिः, एवं तेषामपि यदानभिज्ञता तदापि ततः पूर्वेषां प्रसिद्धिरस्ति NyāyRa. 649. 16 (*on* 5(15). 41); न च जीवानामुपादानाद्यनभिज्ञतया कर्तृत्वासंभवः BrahmSūBh.(Rā.) 138. 11 (*on* i. 1. 3); 140. 16 (*on* i. 1. 3); सुखदुःखाविवेकित्वमिष्टानिष्टानभिज्ञता।... एतैर्जाड्यं निरूप्यते BhāvPra.(Śā.) 21. 16(1); 23. 15(1); देयस्य चापरिच्छित्तिर्दत्तस्यैवानभिज्ञता। ददतो हर्षवृद्धिर्यत्स त्याग इति कीर्तितः BhāvPra.(Śā.) 75. 11(3); प्रमिमीमहे न वयमेव मुनेर्हृदयं यथावदनभिज्ञतया ŚaṅkaDigVi.(Mā.) 9. 4; क्षुधा दुर्लभलाभेच्छा मौखर्यं कटुभाषणा। पञ्च दोषा दरिद्रस्य प्रस्तावे चानभिज्ञता PuruṣPa. 184. 8; अनभिज्ञतया तेन तव किं किं न हारितम् RājTa.(Śrī.) 2. 194; अनभिज्ञतया राज्ञः पृष्टोऽहं तस्य लक्षणम् RājTa.(Śrī.) 3.259; 4. 127; अनभिज्ञतया युद्धे स्फुरन्तं वीक्ष्य तं (तुरगम्) द्रुतम् RājTa.(Śrī.) 4. 270; अनभिज्ञता परिचितेष्वभिज्ञता विदितेतरेषु विललास सुभ्रुवः Acyutarā. 9.63; मोहोऽनभिज्ञता, मदो मद्यादिभिः VīraMi. 689. 2 (*on* 2. 214)

अनभिज्ञत्व (anabhijña-tva) *n.* the state of being ignorant, ignorance, the state of not knowing, non-acquaintance, inexperience वाजि° ... °विमानयानानाम्। आरोहणावतरणेष्वनभिज्ञत्वं विहस्तत्वम् NāṭyaŚā. 27.36; पुरुषप्रतीतेश्चानभिज्ञत्वात् कथं ते सुखमिति प्रष्टुमशक्यत्वात् KāmSū. 78. 8 (2. 1); सर्वेषामनभिज्ञत्वात् पूर्वपूर्वाप्रसिद्धितः। न सिद्धो योग इत्येवं किमसौ परिकल्प्यते TattvSaṁ. 2666; उक्तानुक्तानभिज्ञत्वदिङ्मोहाद्या यथार्थतः। एवं रसाः सानुभावविभावाः सम्यगीरिताः BhāvPra.(Śā.) 64. 1(3); गोविन्दराजस्तु ... 'आयुष्मान् भव सौम्य भद्र' इति निरुपपदोदाहरणसोपपदोदाहरणानभिज्ञत्वमेव निजं ज्ञापयति ManvaMu. 60.18 (*on* 2. 125); यदि वा कथितासूया काले देशेऽनभिज्ञत्वात् KandaCū. v. 1. 28; तदन्वयसमर्थने अग्नीनामनृतवादित्वस्यानभिज्ञत्वस्य वा प्रसङ्गात् ŚivārkaMaDī. i. 355.21 (*on* i. 2. 13)

अनभिज्ञदोष (anabhijña-doṣa) *adj.* having no experience of danger, unused to danger भद्रापयानेष्वनभिज्ञदोषस्तारुण्यभावेन विलम्बमानः। ... कलभः PañcRā. 3. 3.

अनभिज्ञनिषादाधिकारा (anabhijñaniṣādādhikārā) *adj.* (*f.*) (a rite) for which an ignorant outcaste has eligibility सा (इष्टिः) ह्यनभिज्ञनिषादाधिकारापि ... स्वाधिकारप्रयुक्तैव NyāyRaMā. 18. 8.

अनभिज्ञपूरुषपरिष्वङ्ग (anabhijñapūruṣa-pariṣvaṅga) *m.* embrace of an inexperienced person अस्माकं पुनरुग्रपूरुषशताश्लेषप्रगल्भात्मनामेतादृश्यनभिज्ञपूरुषपरिष्वङ्गे कुतः साध्वसम् SaduktiKa. 294. 24.

अनभिज्ञभाव (anabhijña-bhāva) *m.* the state of being ignorant, ignorance मायामये मयसभाधितले महाम्बु त्यक्त्वा ततो व्रजति मध्यनभिज्ञभावात्। यत् कृष्णया विहसितम् ... तन्मे मनः ... लुनाति BālBhā. 2. 9.

अनभिज्ञभाषित (anabhijña-bhāṣita) *n.* statement of the ignorant यदपि लिप्यक्षराणामसत्यानां सत्यार्थप्रतिपादकत्वमुच्यते तदप्यनभिज्ञभाषितम् NyāyMañ. i. 355. 5.

अनभिज्ञवत् (anabhijña-vat) *adv.* like an ignorant person देवदेव जानीवः केनचिद् दृढभक्तिना। अतीवरम्यः प्रासादो निर्मितो वरणातटे। ... विज्ञातसर्ववृत्तान्तः सर्वज्ञोऽप्यनभिज्ञवत्। ... प्रासादविलोकने।... ईशः ... निरगात् SkandP. iv. 66. 133; राजा ...। पुनः पप्रच्छ कोऽप्यत्र स्थित इत्यनभिज्ञवत् BṛKathāMañ. ix. 2. 327.

अनभिज्ञव्यवहार (anabhijña-vyavahāra) *m.* activity of an ignorant person न च तूलाज्ञानमपि चिन्मात्रनिष्ठं जीवनिष्ठं वा, अभिज्ञानभिज्ञव्यवहारानुसारेण परिच्छिन्नत्वाङ्गीकारात् SiddhāTa. 55.14.

अनभिज्ञा (an-abhijñā) *f.* ignorance मया बदरलुब्धेन वृक्षाणामनभिज्ञया वने कण्टकसादृश्यात् खदिरः पर्युपासितः Subhāṣi. 787.

अनभिज्ञात (an-abhijñāta) *adj.* [*f.* -ā] not recognized, not known व्रतस्था च शरीरं त्वं यदि नाम विमोक्ष्यसि। नदी भविष्यसि शुभे ...। दुस्तीर्था चानभिज्ञेया (v. l. °ज्ञाता) वार्षिकी नाष्टमासिकी MahāBhā. v. 187.35; औषधं ह्यनभिज्ञातं नामरूपगुणैस्त्रिभिः। विज्ञातं चापि दुर्युक्तमनर्थायोपपद्यते CaraS. i. 1. 123 (1922 Ed.); वेषमाचारं वानभिज्ञातं न भजेत् NītiVā. 17. 31; अनभिज्ञाते लेखेऽपि नास्ति संप्रत्ययः NītiVā. 27. 61; गुणनिधिर्नाम -- सुतः। ... पित्रानभिज्ञातो द्यूतकर्मरतोऽभवत् ŚivaP. ii(1). 17. 8 (61A. 6); अनभिलक्षितो भिक्षादातृभिर्गुणित्वेनानभिज्ञातः।... भैक्ष्यं (क्षे) सायाह्ने...चरेत् Aparā. 962. 20 (*on* 3. 58)

अनभिज्ञातकैतव (anabhijñāta-kaitava) *adj.* who has not known deceit (i.e. very simple) तस्मिन्ननभिज्ञातकैतवे महापुरुषे मायाविनानेन राक्षसाधमेन किमप्यत्याहितं कृतं भवेत् JānaPa. 6. 37(4)

अनभिज्ञातता (anabhijñāta-tā) *f.* the state of being ignorant, ignorance ततः स्वस्थीभूय भूयः … असहायतया दुहितुरनभिज्ञाततया च व्याकुलीभवामि DaśKuC. 7.18.

अनभिज्ञातदैन्य (an-abhijñātadainya) *adj.* who has never known a wretched state अयमायात एवास्मि रणाय प्रगुणो भव। इत्युदीर्य स दोर्वीर्यगर्वज्वरितमानसः। अनभिज्ञस्तदन्यानि (v. l. अनभिज्ञातदैन्यानि Bhāvanagar Ed.) सैन्यानि समवर्तयत् PāṇḍaC. 5.178.

अनभिज्ञातमूल (anabhijñāta-mūla) *adj.* whose origin (i. e. parentage) is not known दृष्टाः पुरुषशार्दूलाः कलुषीकृतमानसाः। अविज्ञानविमूढाश्च (v. l. अनभिज्ञातमूलाश्च) MahāBhā. iii. 240.14.

अनभिज्ञातरूप (anabhijñāta-rūpa) *adj.* whose nature is not known, of unknown nature अनभिज्ञातरूपस्य (कर्मणः) फले विधातुमशक्यत्वात्। अतः प्रसिद्धरूपाण्येव तेन ग्रहीष्यन्ते TantrVā. 493.2 (*on* ii. 2.15)

अनभिज्ञातोपगूहनविशेष (anabhijñātopagūhanaviśeṣa) *adj.* ignorant about various types of embraces अज्ञातविविधचुम्बनमनभिज्ञातोपगूहनविशेषम्। … पतिमवाप्य हि रतेषु खिन्नेयम् ŚṛṅgāTi.(Rā.) 232.

अनभिज्ञान (an-abhijñāna) *n.* absence of knowledge, ignorance अपविद्धद्वये तत्त्वे सर्वदैवात्मरूपके। विपर्ययोऽनभिज्ञानात्ततः कामः क्रियास्ततः TaiUBhāVā. 4.22(1); गान्धर्वविवेको ध्रुवाध्याये … दर्शयिष्यते। इह इव तु दर्शितो वाचोयुक्त्यनभिज्ञानमधुनैव हि संमोहे हेतुः स्यात् AbhinBhā. iv. 6.14 (*on* 28.9); i. 170.9 (*on* 4.261); पदार्थानवज्ञानाद् वाक्यार्थो नावगम्यते (v. l. पदार्थानभिज्ञानादयं वाक्यार्थानवबोधः) PraboCan. 6.27 (114.14); BrahmSūBh.(Ma.) 14A 1 (*on* i. 2.28); किं किमस्तीति मे ब्रूतं मन्त्रिणेत्युदितौ पुनः। अभिज्ञानानभिज्ञानाच्चक्रतुर्मौनमेव तौ PārśvC. 8.134; TattvPrakā. 66A.3 (*on* i. 4.1)

अनभिज्ञाय (an-abhijñāya) *ger.* not having known or understood अनभिज्ञाय शास्त्रार्थान् पुरुषाः पशुबुद्धयः। प्रागल्भ्याद् वक्तुमिच्छन्ति मन्त्रेष्वभ्यन्तरीकृताः Rāmā. vi. 51.14; नाहमेकधर्ममप्यनभिज्ञायापरिज्ञाय दुःखस्यान्तक्रियां वदामि Sphuṭā. i. 4.24 (*on* 1.1); आत्मानमनभिज्ञाय विवेक्तुं योऽन्यदिच्छति। तेन भौतेन किं वाच्यं प्रश्नेऽस्मिन् को भवानिति PratyabhiVi. ii. 317.5 (*on* iv. 1.18); उपायभूतानि सूत्राण्यनभिज्ञाय कथं तैर्वेदवाक्यार्थो ज्ञायते NyāyRa. 14.12 (*on* 1.42)

अनभिज्ञायमाना (an-abhijñāyamānā) *adj.* (*f.*) who is not being recognized (सा) रजसा समवच्छन्ना सार्धेन शुचिस्मिता। अनभिज्ञायमानैव गच्छन्ती सुमहद् वनम्। आससाद सरो रम्यम् MahāBhā. iii. App. I. 10(5)

अनभिज्ञायमानाकृति (anabhijñāyamānākṛti) *adj.* whose form is not being recognized परिचिततमैरप्यनभिज्ञायमानाकृतौ … देवस्य नन्दस्य भवनं प्रविशति वैरोचके MudrāRā. 2.15(35)

अनभिज्ञीकृता (an-abhijñīkṛtā) *adj.* (*f.*) not made aware of अहं राधिकाविश्लेषवेदनानामनभिज्ञीकृता VidaMā. 7.59(3)

अनभिज्ञेय (an-abhijñeya) *adj.* [*f.* -ā] unrecognizable (ददर्श तं पिता … विहङ्गमम्) अचिन्त्यमनभिज्ञेयं सर्वभूतभयंकरम् MahāBhā. i. 26.7; नदी भविष्यसि …। दुस्तीर्था चानभिज्ञेया MahāBhā. v. 187.35; पाण्डुतया परिगृहीतम् … कृशिमानमागतम् … अनभिज्ञेयपूर्वाकारं तमहमद्राक्षम् Kād. 154.9; AvantiKa. 39.11.

अनभिज्ञेयरूप (anabhijñeya-rūpa) *adj.* [*f.* -ā] of unrecognizable form अनभिज्ञेयरूपाणि द्वारकोपवनानि च। दृष्ट्वा … अपृच्छं हृदिकात्मजम् MahāBhā. iii. 21.3; तत्राद्भुतमपश्याम कृत्स्नामक्षौहिणीं हताम्। अनभिज्ञेयरूपां च प्रदग्धामस्त्रमायया MahāBhā. vii. 172.34.

अनभिताप (an-abhitāpa) *adj.* free from hatred (साक्षिणः) स्युः … निष्प्रीत्यनभितापाश्चान्यतरस्मिन् GautDS. ii. 4.2 (comm. अनभितापा अकृतद्वेषाः)

अनभिदग्ध (an-abhidagdha) *adj.* not burnt यदि सदोहविर्धानान्यभिदहेरन् ग्रहानध्वर्युः स्पाशयेत्।…अनभिदग्धे सोमे पार्श्वतो देवयजनमध्यवसाय कृतान्तादेव प्रक्रामेयुः ĀpaŚS. xiv. 25.2; HirŚS. xv. 6.22 (325.28)

अनभिदधत् (an-abhidadhat) *adj.* not expressing or conveying न च पदजातं प्रथममर्थजातं स्वरूपेणानभिदधदेव यथास्वमभिधेयानि साहचर्यमात्रादर्थरूपाणि स्मारयति TattvBi. 94.4; न हि तीरे नदीत्वमनभिदधतो नदीपदस्यानदीत्वव्यावृत्तिः प्रयोजनं संभवति NyāySu.(Ja.) 105A.6 (*on* i. 1.2)

अनभिदधान (an-abhidadhāna) *adj.* not expressing or conveying परस्परविगानाच्च सूत्रकारो ह्यवश्यवक्तव्यं प्रयोजनमनभिदधानो निष्प्रयोजनतामेव शास्त्रस्य मन्यते ŚāstrDī. 45.2 (*on* i. 3.9); धातुप्रकृतिकाश्च … प्रत्ययाः केचिद्धात्वर्थान्वितमधिकं स्वार्थं ब्रुवते। अर्थान्तरमनभिदधानाश्च केचित् … स्वीयार्थबोधन एवोपकुर्वते VyutpaVā. 194.2.

अनभिदाह (an-abhidāha) *m.* absence of scorching or burning यजमान आत्मनोऽनभिदाहाय सवने वै यज्ञस्याशिर ईरते KāṭhS. 26.1 (ii. 121.15); वैश्वानरे वा एतदध्वर्युः सदस्यानभिमृशति यद् यज्ञायज्ञीयस्य स्तोत्रमुपावर्तयति प्राकृतेनोद्गेयं वैश्वानरेणानभिदाहाय PañcBr. viii. 7.6.

अनभिदृष्ट (an-abhidṛṣṭa) *adj.* not seen लोकगतिभिः … आभिरनभिदृष्ट … वहितखु भूरिषु परिपृष्ट … नन्दतनय सुन्दर जय वीर StavMā. 211.8.

अनभिद्रुग्धचित्त (anabhidrugdha-citta) *adj.* whose mind is not malicious स कारुण्याभ्यासादनभिद्रुग्धचित्तः सत्त्वेषु … तमरण्यप्रदेशमभ्यलंचकार JātaMā. 162.15 (25.1)

अनभिद्रुत (an-abhidruta) *adj.* I not infested देयसंपद् कतमा। अनभिद्रुतदेयवस्तुतः … शुचिदेयवस्तुतः धर्मार्जितदेयवस्तुतश्च AbhidhSa. 59.19; II not harassed, not troubled आत्मशरीरैकशेषः … सलिलमूलतलनिलीनोऽपि किमनभिद्रुतो दुर्योधनः पूर्वनिकारस्मरणदारुणेन रुधिरपूरितोदरेण वृकोदरेण AvantiKa. 49.10.

अनभिद्रुह् (án-abhidruh) *adj.* [P. iii. 2.61] not hating, not malicious राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते ṚV. ii. 41.5; JaimiBr. 3.63; प्रपित्सोः किं च ते मुक्तिं निःस्पृहस्य कलेवरे। महेषुधी धनुर्भीमं भूतानामनभिद्रुहः Kirātā. 11.16 (comm. अहिंसकस्य); विहरन्तो महीं कृत्स्नां ते कस्याप्यनभिद्रुहः। मातृकल्पा दयालुत्वात्पुत्रकल्पेषु देहिषु MahāP. 34.191; प्रवालपत्रपुष्पादेः पर्वणि व्यपरोपणम्। न कल्पतेऽत्र सत्त्वानां जन्तूनां नोऽनभिद्रुहाम् MahāP. 38.17.

अनभिद्रोग्धृ (an-abhidrogdhṛ) *adj.* not hating, not malicious आत्माभेददर्शनेन सर्वभूतः सर्वात्मभावाच्चानभिद्रोग्धा भवति BālaKrī. ii. 26.4 (*on* 3.58)

अनभिद्रोह (án-abhidroha) *m.* absence of malice or betrayal नो ना अश्न्योऽन्य … इति तौ वै समामेतामनभिद्रोहाय MaiS. iv. 3.4 (iv. 42.15); धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा। मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः MahāBhā. v. 38.35; ŚṛṅgāPra. 230.25; Loc. 123.21 (*on* 3.1); श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया। … सर्वान् कामानवाप्स्यथ MahāBhā. xiii. 35.10; v. 193.7; xii. 221.46; निक्षिप्तस्य च द्रविणस्यानभिद्रोहो भवत्यविसंवादकः BodhiBhū. 19.22; अहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः YogBh. 103.9 (*on* 2.30); Nāgojībhaṭṭa *on* YogSū. 2.30; सर्वेभ्योऽपकारिभ्योऽपि भूतेभ्योऽनभिद्रोहेण हितः सर्वभूतहितः BālaKrī. ii. 26.4 (*on* 3.58); अहिंसा भूतानामनभिद्रोहसंकल्पः NyāyKa. 275.23.

अनभिद्रोहिन् (an-abhidrohin) *adj.* not malicious परिव्राजकानां पुनराचारस्तथा।… भूतानां वाङ्मनःकर्मभिरनभिद्रोहिणः MahāBhā. xii. 185.3; राजभूतो बोधिसत्त्वः…पितृभूतश्च भवति प्रजानाम्।… अनभिद्रोही च भवति सत्यवादी च BodhiBhū. 249.21.

अनभिधर्ष (an-abhidharṣa) *m.* absence of violation तमीडिष्व यो अर्चिषेत्यनिरुक्तमैन्द्राग्नं देवतानामनभिधर्षाय PañcBr. xiv. 2.6; अनिरुक्तान्याज्यानि भवन्ति छन्दसामनभिधर्षाय JaimiBr. 3.282.

अनभिधा (an-abhidhā) *f.* non-denotation, non-expression अन्वयवत्तथैवाभिधेत्यन्वयोऽर्थाद् वाच्यांशः, न व्यक्तिमत्तथैव जातेरभिधेति न व्यक्तिर्वाच्यांशः, तथापि रूप्यन्तर्भावाद् रूपधीरित्येवं साम्यमुक्तम्। अर्थाद् वाच्यांशतया पृथगनभिधेति न व्यतिपङ्क्ताभिधोक्ता NayaVi. 268.2 (*on* i. 1.24)

अनभिधातृत्व (anabhidhātṛ-tva) *n.* the state of being non-denotative यथैवात्र क्रियाया अनैकान्तिकत्वादन्यत्रागमकत्वमापाद्यते तथैव शब्दस्यापि कर्मानभिधानात् ओदनः पच्यत इत्यत्राप्यनभिधातृत्वप्रसङ्गः TantrVā. 975.14 (*on* iii. 4.13); अर्थोऽप्यालोचितः स्वपदगोचरसंस्कारोद्बोधहेतुरिति सोऽपि पदस्याभिधाता स्यात्। तदिदमनभिधातृत्वमनधिगतान्वयबोध एव कल्प्यते पदानाम् TattvBi. 158.8.

अनभिधातृत्ववत् (anabhidhātṛtva-vat) *adv.* [w. r. for अभिधातृत्ववत्, cf. ASS. 97, 1984, p. 372, FN. +] TantrVā. 975.17 (*on* iii. 4.13)

अनभिधात्री (an-abhidhātrī) *adj.* (*f.*) not denotative शब्दः तावान्नस्य यावत्यभिधात्री शक्तिः, कियति च तस्याभिधात्री शक्तिः कियति तस्यानभिधात्री शक्तिः NyāyMañ. i. 369.25.

अनभिधान (an-abhidhāna) *n.* **A** I non-mention, non-specification यथार्थमुत्तरस्यां ततावर्थविकारस्योत्पत्तिलक्षणेनानभिधानाच्छब्दविकारमूहं कुर्वते ŚāṅkhāŚS. vi. 1.3; नास्त्यजः संयोगो नित्यपरिमण्डलवत् पृथगनभिधानात् PadārthaSaṁ. 140.20; ततश्चतुर्णामनभिधाने चतुर्णां क्रमोपदेशात् संशयः स्यात् NyāyVār. 30.2 (*on* i. 1.3); नास्य साध्यप्रतीतिं प्रति कश्चिदुपयोगः HetuBiṬ. 65.28; बीजयोन्यात्मकत्वेऽपि … तत्प्रत्यायनसमर्थस्यानभिधानात् ParāTri. 174.8; रेकिणः कस्यचिदप्यभावात्, श्रीपूर्वादिशास्त्रेषु चानभिधानात् … सत्यपि तत्रावचने मनुनैवायमर्थः स्मृतः … इत्यभिप्रायः। तत्रास्यानभिधाने दातुरनियमो यथा स्यादित्येवमर्थम् BālaKrī. ii. 107.4 (*on* 3.244 (? 250));

शास्त्रणानभिधाने तु नियोगेऽपि न युज्यते । प्रवेशः BṛĀraUBhVā. (Sambandha.) 782; संबन्धप्रयोजनयोरनभिधाने श्रोता न प्रवर्तते NyāyKa. 3.6; द्रव्येषु दिक्कालपरमाणूनामनभिधानात् TātpaṬ.(Vā.) 208.19 (*on* i. 1.9); सुषिरस्य स्वरात्मकत्वेऽपि तदनन्तरं तस्यानभिधानमिति चेन्न, वीणाया एव स्वरभागे प्राधान्यात् AbhinBhā. iv. 2.21 (*on* 28.2); ब्रह्मादीनां साक्षादनभिधानेन साकाङ्क्षोक्तिभङ्गिः SaraKaṇṭhā. 537.12; मतद्वयमुपन्यस्य तद्विरोध्येतदभिधानादन्यस्यानभिधानाच्च निश्चीयते VedāntSā.(Rā.) 133.3 (*on* i. 4.22); ĀtmaTaVi. 726.10; साध्यं प्रायशः साधनार्हमिति … व्यक्तमनभिधानम् Kiraṇā. 294.7; 227.11; Mitā. 137.6 (*on* 2.8); अनाम्नानात् अनभिधानात् । ये यजामह इति केवलप्रैषार्थप्रतिपत्तिः न तत्र देवतानामधेयं श्रूयते ŚaṅkarKāBh. 91.13 (*on* ii. 3.3); विधिनिषेधयोरनभिधाने … विधिः प्रतीयते Kāvyānu.(He.) 37.9; 165.16; शिखाया अनभिधानात् शिखाशून्यास्तारकामात्ररूपा एते (केतवः) बोद्धव्याः AdbhuSāg. 157.3; दुष्टान्तःकरणतया ज्ञातस्यापि न दण्डः … मुनिभिरनभिधानात् SmṛtiCan. iii. 112.7; जलभूम्योरर्थक्रियायाः प्रसिद्धत्वेनानभिधानम् ManvaVi. 64.15 (*on* 1.78); युगपत्तयोर्व्याघात इति चेन्न यौगपद्यस्यानभिधानादनाक्षेपाच्च NyāyPari. 377.16; केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् TattvCin. ii(1). 553.2; नेयं प्रथमापह्नुतिः अपह्नवकारिणो विषयस्यानभिधानात् SāhiDa. 615.6; 398.6; प्रमेयविभागसूत्रे सुखस्यानभिधानात् Upask. 416.6 (*on* x. 1.1); DaṇḍaVi. 206.10; यत्तु कार्योन्नेयत्वादनभिधानमुक्तं तन्न YuktiSneha. 47.35 (*on* i. 1.5); जिज्ञासान्यथानुपपत्त्या सामान्यतस्तदुक्तावपि विशिष्यानभिधानात् संदेहः AdvaiSi. 687.4; ŚivārkaMaDī. i. 550.22 (*on* i. 4.22); स्मृत्यन्तरोक्तेतिकर्तव्यताया अनभिधानेऽपि सर्वशाखाधिकरणन्यायेन तत्समुच्चयोऽवगन्तव्यः VīraMi. 295.29 (*on* 1.229); 4.17 (*on* 1.1); 272.21 (*on* 1.196); एतस्य वाक्यस्य पञ्चायतनपूजोपक्रमेऽनभिधानादेतासां देवतानां पूज्यत्वम् VīraMi.(Pūjā.) 239.3; MīmāNyāPra. 270.35; **AII** refraining from actually speaking out, non-disclosure अनियुक्तानां पुनरन्यथाभिधानेऽनभिधाने वा दोषो न तु राज्ञोऽनिवारणे Mitā. 126.23 (*on* 2.2); DaṇḍaVi. 19.19; अयं च (साक्षी) द्वेधा संभवति अनभिधानेऽपेक्षितानभिधाने च VīraMi. 510.22 (*on* 2.79); साक्ष्यमङ्गीकृत्यानभिधाने दण्डमाह VyavaMa. 43.8; **BI** non-denotation (of the primary meaning) सामान्याभिधाने हि विशेषानभिधानम् Vār. 6 *on* P. ii. 2.24; पुरुषस्य चाख्यातेनानभिधानात् ŚābaBh. 1383.5 (*on* vi. 1.42); व्रीहय इति च जातिवचने धर्मिणो रूपादीनां चानभिधानात् न किञ्चिदुत्तरम् HetuBiṬ. 99.13; अनभिधानेऽपि व्यापारभेदस्य द्रव्यपरित्यागसंकल्पमात्रस्याभिधानेऽपि यजतिना स्वातन्त्र्यविवक्षाभेदात् कर्तृभेदः BhāvanāVi. 109.5; 121.4; तद्वत्यपि वान्यजातीये अनभिधानं द्रविडानाम् TantrVā. 590.5 (*on* ii. 3.3); 693.9 (*on* iii. 1.12); अन्वितस्यानभिधानात् तत्राप्यन्वयः प्राप्नोति NyāyMañ. i. 365.28; i. 368.21; लिङ्गसंख्ययोस्तात्पर्यतः शब्देनानभिधानात् कुतो विवक्षा ManuBh. i. 465.4 (*on* 5.89); ii. 399.4 (*on* 11.93); ज्ञानभेदस्यार्थभेदात् तदनभिधानेऽभिधानाभावात् … स्वाभाविकः शब्दार्थयोः संबन्धः TattvBi. 151.4; यदि लोके लक्षणया सिद्धान्वयपरता, तदनभिधानं वाक्यस्य स्यात् NayaVi. 47.5 (*on* i. 1.2); उपमानावयविनश्चानभिधानात् इदमसमस्तम् SaraKaṇṭhā. 420.9; 407.1; ŚāstrDī. 408.5 (*on* v. 1.1); घटत्वशब्देन … घटगतिक्रियागुणादिधर्मान्तरस्य अनभिधानात् PūrvottaVāNaMā. 92.13; तेन च … यजिपदेन समुदायस्य शक्त्यानभिधानात् MīmāKau. iii(1). 156.5 (*on* ii. 2.3); ii. 302.10 (*on* iii. 2.39); **BII** non-denotation (of case-relation or *kāraka*-relation which implies that the same case-relation is not to be denoted twice and further indicates the selection of the case-ending for particular case-relation) न वान्यतरेणानभिधानात् Vār. 8 *on* P. ii. 3.1; भव्यादीनां कर्मणोऽनभिधानात् कृत्यानां कर्तृग्रहणम् Vār. *on* P. ii. 3.71; युज्यतेऽनभिधानं हि न पुनस्तद्विशेषणे TantrVā. 973.9 (*on* iii. 4.13); 975.13 (*on* iii. 4.13); कर्तव्यत्वादभीष्टत्वसिद्धौ कर्मार्थलाभतः । साक्षादनभिधानेऽपि न द्वितीया प्रसज्यते BṛĀraUBhVā.(Sambandha.) 513; कर्तुः (तिङा) अनभिधानात् कर्तरि तृतीया PrakriKau. ii. 427.1; न च कर्तुरनभिधानात् चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यं कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् SiddhāMu. 46.23 (*on* 81); अहं भुक्त्वा व्रजामि — इत्यादिप्रयोगविषयेऽपि मया भुक्त्वा — इत्यादिप्रयोगः स्यात्, भोजनादिक्रियाकर्तुः प्रत्ययान्तरेणानभिधानात् PūrvottaVāNaMā. 215.12; 'अहं भुक्त्वा व्रजामी'त्यत्राहमर्थस्य भोजनव्रजनक्रियाभ्यामुभाभ्यामपि न शाब्दोऽन्वयः किं तु व्रजनक्रिययैव ।… शब्दव्यापारापेक्षायामभिधानमेव । अनभिधानं न त्वार्थमपीति नाहमर्थे तृतीया प्रसज्यते ŚivārkaMaDī. ii. 188.22 (*on* ii. 4.17); देवदत्तनिष्ठकर्तृत्वस्य तिङानभिधानेऽपि कृतिनिरूपितकर्तृत्वस्य तिङभिहितत्वात् MīmāKau. iii(2). 35.2 (*on* ii. 1.5); कर्तृकर्मगतसंख्याया अनभिधाने … तयोरनुशासनात् VyutpaVā. 110.10; उक्तत्रयस्याभिधानमनभिधानं चेति तदतिरिक्तभेदाभावात् । अन्यथा त्रयाणामप्यभिधानानभिधानाभ्यां भेदषट्कापत्तिः VaiyāBhū. 108.25 (*on* 24); **BIII** (mostly in Abl.) non-denotation (by the words which are not to be used as they go against the accepted pattern of language although they could be derived by the rules of grammar) न वानभिधानादसमानाधिकरणे संज्ञाभावः Vār. 16 *on* P. ii. 2.24; अकर्मणो ह्यसमानकर्तृकाद् वानभिधानम् Vār. 7 *on* P. iii. 1.7; MahāBh. ii. 12.17 (*on* iii. 1.7); अनभिधानात् Vār. 5 *on* P. iii. 2.1; विकारावयवशब्दात् प्रसङ्ग इति चेन्न तेनानभिधानात् Vār. 3 *on* P. iv. 3.155; अनभिधानात्प्रत्ययः सवर्णान्न ग्रहीष्यति MahāBh. i. 177.25 (*on* i. 1.69); असमानाधिकरणानां बहुव्रीहिः कस्मान्न भवति । पञ्चभिर्भुक्तमस्येति । अनभिधानात् । तच्चावश्यमनभिधानमाश्रयितव्यम् MahāBh. i. 424.12 (*on* ii. 2.24); Nyās. i. 391.7 (*on* ii. 2.24); कस्मान्न भवति कीटो रोमन्थं वर्तयति । अनभिधानात् MahāBh. ii. 25.16 (*on* iii. 1.15); कस्मान्न भवति । आदित्यं पश्यति । हिमवन्तं शृणोति … अनभिधानादेव न भविष्यति MahāBh. ii. 94.15 (*on* iii. 2.1); KātanVṛ. *on* iv. 3 1; PrakriKau. ii. 509.2; SiddhāKau. 490B.17 (*on* iii. 2.1); अभिधानलक्षणाः कृत्तद्धितसमासाः । अनभिधानान्न भविष्यन्ति MahāBh. ii. 146.7 (*on* iii. 3.19); अनभिधानाज्जात्यादिभ्य उत्पत्तिर्न भविष्यति । तच्चावश्यमनभिधानमाश्रयितव्यम् MahāBh. ii. 250.23 (*on* iv. 1.93); कस्मान्न भवति पुत्रैः परिवृतो रथः … अनभिधानात् MahāBh. ii. 274.14 (*on* iv. 2.10); कस्मान्न भवति तत्रास्ते … अनभिधानात् MahāBh. ii. 307.11 (*on* iv. 3.25); अथ संभूत इत्युच्यमाने क्रिमौ कस्मान्न भवति …। अनभिधानात् MahāBh. ii. 309.8 (*on* iv. 3.42); अनभिधानादनन्तरादिषूत्पत्तिर्न भविष्यति MahāBh. ii. 319.13 (*on* iv. 3.120); ii. 354.6 (*on* v. 1.58); ii. 368.4 (*on* v. 1.119); iii. 141.21 (*on* vi. 3.1); (समानकर्तृकेषु तुमुन्) समानकर्तृकेष्विति किम् । देवदत्तं भुञ्जानमिच्छति यज्ञदत्तः । इह कस्मान्न भवति — इच्छन् करोति । अनभिधानात् KāśiVṛ. *on* iii. 3.158; *on* v. 2.119; संभवति हि सामान्यविशेषवाचिनां द्वन्द्वो यथा गोबलीवर्दमिति । न । अनभिधानात् Nyās. i. 448.24 (*on* ii. 4.12); PadMañ. *on* KāśiVṛ. *on* P. ii. 4.12; (नित्यं कौटिल्ये गतौ) नित्यग्रहणं किमर्थम् । यावतानभिधानादेवात्र वाक्यं न भविष्यति Nyās. i. 511.5 (*on* iii. 1.23); PadMañ. *on* KāśiVṛ. *on* P. iii. 1.23; गुप गोपनकुत्सनयोः ।… निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यत इति वचनान्निन्दायां सन् । जुगुप्सांचक्रे ।… अन्यत्राप्यर्थेऽस्मात् केवलादात्मनेपदं न भवति । अनभिधानात् DhātuPra. 1.978 (70.24); न च समीपार्थे बहुव्रीहिरस्ति । अनभिधानात् । न हि लम्बकर्ण इत्यनेन यस्य समीपौ लम्बौ कर्णौ सोऽभिधीयते PariVṛ. (Sī.) 88.3; 44.2; अभिधानतो न सिध्यति समासपदयोर्मध्ये केनापि पदेनानभिधानात् YuktiSneha. 154.26 (*on* i. 1.7); एकपाक इत्यत्र न भवत्यनभिधानात् Prasā. i. 943.6; PūrvottaVāNaMā. 122.2; हलि परे यणभावस्यानभिधानादुपपत्तेरिति VaiyāBhū. 152.24 (*on* 30); 69.26 (*on* 20); न हि प्रकृतिप्रत्ययसमूहरूपेण वचन्तीत्यादिवद् भाषाशब्दानां प्रयोगः । एतन्मूलकमेवानभिधानान्न भवति VaiyāBhū. 198.13 (*on* 37); LaŚabdeŚe. ii. 409.1; ii. 517.7; ii. 531.10; ii. 564.2; **C** absence of meaningful denotation धूमोऽयं ज्वलतीति न भवति । अनभिधानात् Kāśi. iii. 4.9 (*on* 5(4).2)

अनभिधानक्लेश (anabhidhāna-kleśa) *m.* trouble in assuming non-denotation (of case-relation) किमर्थं तर्हि पुरस्तादनभिधानक्लेशः कृतः TantrVā 976.3 (*on* iii. 4.13)

अनभिधानज्ञ (an-abhidhānajña) *adj.* ignorant of specific denotation or meaning अनभिधानज्ञो हि देवानां प्रियः BrahmSūBh.(Rā.) 19.20 (*on* i. 1.1); अनभिधानज्ञ इति । व्यधिकरणसमानाधिकरणवाक्ययोरभिधानविशेषानभिज्ञ इत्यर्थः ŚrutaPra. iA. 90.29 (*on* i. 1.1)

अनभिधानतस् (anabhidhāna-tas) *adv.* due to non-denotation सर्ववर्णसमूहोऽपि न संस्कार्यः कथंचन । न तस्यार्थप्रयुक्तत्वमस्ति ह्यनभिधानतः TantrVā. 219.8 (*on* i. 3.18)

अनभिधानत्व (anabhidhāna-tva) *n.* the state of being non-denotation (of meaning) यत्तु कार्योन्नेयत्वादनभिधानत्वमुक्तं तदप्ययुक्तम् Kāśi. ii. 14.18 (*on* 5(1).15)

अनभिधानदर्शन (an-abhidhānadarśana) *n.* observance of non-denotation (of case-relation) लौकिके प्रयोगे अधिकशब्देन विषयभेदेन कर्तृकर्मणोरनभिधानदर्शनात् PradI. iv. 336A.37 (*on* v. 2.73)

अनभिधानदशा (anabhidhāna-daśā) *f.* stage of non-denotation (of meaning) अनभिधानदशायां कुर्वतोऽप्यकर्तृत्वप्रसङ्गात् NyāyKuA. ii(2). 78.9; नापि विशेष्यसमानविभक्तिकत्वं विशेषणत्वम् … अनभिधानदशायामविशेषणत्वापाताच्च TattvCin. i(2). 825.6.

अनभिधाननिरास (anabhidhāna-nirāsa) *m.* avoiding non-disclosure योषितः … परस्परसंकोचेनानभिधाननिरासार्थं पृथक् … प्रष्टव्याः VīraMi. 730.29 (*on* 2.280)

अनभिधानप्रसङ्ग (anabhidhāna-prasaṅga) *m.* undesired contingency of non-denotation or non-explanation अभिधाने सपक्षत्वापत्तेः। असपक्षत्वेऽना(? न)भिधानप्रसङ्गात् NyāyVārPari. 736. 1.

अनभिधानभ्रान्ति (anabhidhāna-bhrānti) *f.* wrong knowledge caused by non-mention नानभिधानभ्रान्त्यानध्यवसायः कार्यः BālaKrī. i. 276. 8 (*on* 2. 217)

अनभिधानमात्र (anabhidhāna-mātra) *n.* **I** mere non-mention यदनभिधानमात्रेणैवार्थनाशः BālaKrī. i. 211. 16 (*on* 2.24); तद्युक्तं धर्मव्यवहारे छलस्य निरस्ततयानभिधानमात्रेण पराजयासंभवात् VīraMi. 510. 10 (*on* 2. 79); **II** mere non-denotation (by a word which is not accepted by the language) ठकोऽनभिधानमात्रे भाष्यस्वरसः LaŚabdeŚe. ii. 248. 4.

अनभिधानवश (anabhidhāna-vaśa) *m.* [Abl.] due to non-denotation (by a word not accepted by the language) घटेन पश्यतीत्याद्यनभिधानवशान्न प्रयोगः KhaṇḍanKhā. 470. 22.

अनभिधानव्यवस्था (anabhidhāna-vyavasthā) *f.* regulation regarding non-denotation (of the case-relation) यद्यप्येवं कृत्प्रत्यये प्रागुक्तरीत्यानभिधानव्यवस्था कर्तृवाच्यत्वसाधिका न भवति VaiyāBhū. 7. 21 (*on* 2)

अनभिधानसिद्धान्त (anabhidhāna-siddhānta) *m.* conclusion of non-denotation सर्वकामपदेन सर्वज्ञत्वाकाशगमनादिफलानामनभिधानसिद्धान्तात् SetuBa. 101. 13.

अनभिधानादिक (anabhidhānādi-ka) *adj.* non-denotation (by a word which is not accepted by the language) etc. अथानभिधानादिकमुत्सर्गानुत्पत्तौ हेतुरभिधीयते PradI. iv. 179A. 14 (*on* iv. 2. 66)

अनभिधाय (an-abhidhāya) *ger.* **i** not having denoted or expressed न ह्यनभिधाय मुख्यं, गौणमभिवदति शब्दः ŚābaBh. 750. 5 (*on* iii. 2. 1); यतो वाचोऽभिधानानि प्रयुक्तान्युपलब्धये। सर्वाण्यनभिधायैव निवर्तन्तेऽवबोध्य च BṛĀraUBhVā. i. 4. 857 = TaiUBhāVā. 163. 8(2); अन्वितशब्देन पदार्थानां स्वरूपमुपलक्ष्यते तच्चानभिधाय अन्वयमभिधातुं शक्यत इत्युच्यते न तर्हि शब्देनान्वयप्रतीतिसिद्धिः NyāyRaMā. 100. 13; गोशब्देनाप्यगामनभिधाय तन्निवृत्तिमभिधातुमशक्नुवता अवश्यमगौरभिधातव्यः NyāyRa. 588. 8 (*on* 5(13). 85); न हि कृतिमनभिधाय कार्यमभिधातुं शक्यते TantrRaha. 46.1; **ii** not having stated or mentioned or said यस्त्वनभिधायारम्भं परिसमाप्तिरेवोच्यते ŚābaBh. 1796. 22 (*on* ix. 4.57); विशेषणमनभिधाय तद्विशिष्टविशेष्याभिधानासंभवात् TantrVā. 253. 22 (*on* i. 3. 26); प्रधानं प्रयोगमनभिधायैव बाह्यतरदेशाभिधानमयुक्तम् BālaKrī. i. 8. 6 (*on* 1.2); विनियोगभङ्गेन प्रधानकर्मैवापूर्वविषयत्वान्न गुणकर्मेति स्वीयस्तयैतद्दूषणमनभिधाय सर्वपक्षसाधारणं दूषणमुक्तम् Bhām. 93. 14 (*on* i. 1.4); 231.4 (*on* i. 3. 25); इदं त्वतिस्फुटतयानभिधाय ··· मार्गान्तरं दर्शितम् TātpaṬ.(Vā.) 178. 11 (*on* i. 1. 5); NyāyRaMā. 52. 9; किंचिद्रूपमनभिधाय रूपान्तरमुच्यते Kiraṇā. 57. 17; पराशरेण त्वपसव्यमनभिधायारोहणेन चतुष्प्रकारत्वमुक्तम् (ग्रहयुद्धानाम्) AdbhuSāg. 208.12; KhaṇḍanKhā. 376. 4; स एवमाचरामीत्यनभिधाय यदा तदर्थं प्रयतते PramāMī. 51. 5 (*on* ii. 1.7); यस्तु कन्यादोषमनभिधाय प्रयच्छति स राजा दण्ड्यः SmṛtiCan. i. 122. 8; संपुटादि। तत्स्थं तदीयरूपसंख्यादिकमनभिधाय यत्परस्य हस्ते स्थाप्यते तदौपनिधिकम् DīpKa. 46. 10 (*on* 2. 65); YuktiSneha. 97.20 (*on* i. 1. 5); तद्भेदाननभिधायैव चक्रसाधनवर्णनम् SetuBa. 103. 7; **iii** not having referred to अपि च किंचिदपि प्रतिपादकं न हि यदा पदमस्ति जगन्मुखे। अनभिधाय पदं न (v. l. पदेन) तदा कथं समयमेव करिष्यति शंकरः SaṁkṣeŚā. 3. 259 (ii. 299. 24); यद्येष मन्त्रोऽनभिधाय जीवप्राज्ञौ वदेद्बुद्धिशरीरभाजौ। अत्तीति भोक्तृत्वमचेतनाया बुद्धेर्वदेत्तर्हि कथं प्रमाणम् ŚaṅkaDigVi.(Mā.) 8. 125.

अनभिधायक (an-abhidhāyaka) *adj.* not denotative, not expressive (of meaning) अनभिधायका अपि केचिन्मन्त्रा इत्युच्यन्ते ŚābaBh. 434. 9 (*on* ii. 1. 32); बाधस्तत्रार्थापत्तितो भवेत्। अग्नावदाहके साध्ये शब्दे चानभिधायके ŚlokaVār. 5(4). 67 (367. 6); Kāśi. ii. 54. 12 (*on* 5(2).69)

अनभिधायकता (anabhidhāyaka-tā) *f.* the state of not being expressive or denotative (of meaning) यदि वेदान्तेषु कार्यं योग्यम् ···लभ्यते, तदा कार्यार्थतैव वेदान्तवाक्यानामपि। अथ न, ततोऽनभिधायकतैव PrakaPañ. 241.15.

अनभिधायकत्व (anabhidhāyaka-tva) *n.* the state of not being denotative (of meaning) केचित् ··· अनभिधायकत्वेनावधार्यन्ते TantrVā. 254. 11 (*on* i. 3. 26); अननुयोज्यत्वे अनादेर्लोकप्रयोगस्य सर्वेषामेव शब्दानामनभिधायकत्वप्रसङ्गः TātpaṬ.(Vā.) 475. 24 (*on* ii. 2. 60); स्वाभाविक एव शब्दभेद इति चेन्न ··· अगृहीतसंबन्धस्यानभिधायकत्वात् NyāyRa. 593.10 (*on* 5(13). 102); धातोर्भावनानभिधायकत्व आख्यातस्य कर्तुरनभिधायकत्वं [illegible] Bhū. 70. 6 (*on* 20)

अनभिधावक (an-abhidhāvaka) *adj.* not rushing (for help) स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः YājñaSm. 2. 234; चौरादिभिरभिभूयमानेन जनेन विक्रुष्टेन धावत धावतेत्यार्तस्वने कृते विक्रोशारं प्रत्यनभिधावकः Aparā. 822. 25 (*on* 2. 234)

अनभिधावत् (an-abhidhāvat) *adj.* not rushing (for help) प्रदीप्तमनभिधावतो गृहस्वामिनो द्वादशपणो दण्डः ArthŚā. i. 354. 1(2. 36); प्रत्यासन्नमापद्यनभिधावतः···शत्यो दण्डः ArthŚā. ii. 114. 2 (3. 20); उत्क्रोशन्तमनभिधावतां तत्समीपवर्तिनां संसरतां च (दण्डः) ViṣṇuSm. 5. 74; इह विक्रुष्टस्यानभिधावतः शतदण्डः ··· उत्क्रोशन्तमनभिधावतां तत्समीपवर्तिनां च DaṇḍaVi. 302. 5.

अनभिधित्सितत्व (anabhidhitsita-tva) *n.* the state of not being intended to be stated expressly न च क्रियात्वप्रतिक्षेपस्तुरेतरायसूत्रेऽनभिधित्सितत्वम् ŚrutaPra. ii. 397. 21 (*on* ii. 4. 11)

अनभिधीयमान (an-abhidhīyamāna) *adj.* **I** not being stated यथाभूतोऽर्थोऽभिधीयमानः तथाभूत एवानभिधीयमानः NyāyVār. 117.18 (*on* i. 1. 33); अनभिधीयमानमपि काकनिलयनम् ··· चिह्नभूततां प्रतिपद्यते TantrVā. 277. 7 (*on* i. 3. 26); परार्थानुमानकाले यथा लिङ्गं परेणानभिधीयमानं न प्रत्येति HetuBiṬ. 67. 12; अर्थादिष्वभिधानशङ्का दूरापास्तैव। अनभिधीयमानस्याप्यवगत्युपायभावस्तत्र तत्र प्रकरणे चिन्तित एव PrakaPañ. 481. 10; **II** not being denoted यत्र न शास्त्रेण न न्यायेनाभिधेयत्वप्राप्तिस्तत्रानभिधेया विज्ञास्यन्ते। यत्र पुनः शास्त्रोक्तां विशेषणतामनभिधीयमानाः प्रतिपत्तुं न शक्ष्यन्ति तत्र न्यायलभ्याम् अनन्यगतित्वाद् अभिधेयतामपि प्रतिपत्स्यन्ते TantrVā. 960. 6 (*on* iii. 4. 13); यः काष्ठानां पाकसंबन्धस्तस्मिन् शब्देनानभिधीयमानेऽपि न किंचिदनुपपन्नम् NyāyRa. 928. 20 (*on* 7. 296); न चेन्दुमुखादिवदनभिधीयमानस्यापि तुल्यगुणस्य प्रत्ययो भवतीति वाच्यम् SaraKaṇṭhā. 736. 5.

अनभिधीयमानत्व (anabhidhīyamāna-tva) *n.* the state of not being denoted भूयःश्रुतिश्चोपरुध्येत, पर्यायान्तराभिहितस्य पर्यायान्तरेणानभिधीयमानत्वात् BrahmSūBh.(Śaṅ.) 178. 9 (*on* i. 3. 19); इच्छब्देन ··· नाघटादिव्यावृत्त्यंशोऽनभिधीयमानत्वाद् व्याप्यते NyāyRa. 598. 13 (*on* 5(13).120)

अनभिधून्वत् (an-abhidhūnvat) *adj.* [*f.*-tī] not fanning (the fire) ततोऽध्वर्युप्रथमाश्शिरनभिधून्वन्तः प्रतिपरियन्ति BhārŚS. xi. 8. 17; ĀpaŚS. xv. 8. 14; सव्यानुद्धृथ्य दक्षिणान् प्रस्रस्य सव्यानूरूनाघ्नाना अनभिधून्वन्तस्त्रिः प्रतिपरियन्ति ĀpaŚS. xiv. 22. 2; सव्यानूरूनाघ्नाना अनभिधून्वन्तस्त्रिः प्रतिपरियन्ति ĀpaŚS. xx. 17. 14.

अनभिधृष्णुवत् (án-abhidhṛṣṇuva(n)t) *adj.* [*f.* -ī] [AltGr. II. i. 77] not attacking, not overpowering वृत्रं इन्द्रोऽस्त्कम्भगृहीतोऽनभिधृष्णुवन्नतिष्ठत् MaiS. i. 10. 14 (i. 153. 29); KāṭhS. 36. 8 (iii. 75. 14); तं देवा अनभिधृष्णुवन्तः समन्तं परिण्यविशन्त ŚatBr. XIV. i. 1. 7; तं मृत्युं सर्वतोमुखं भूतमन्वागत्योपेक्षमाणा एवासत अनभिधृष्णुवतीः JaimiBr. 3. 344.

अनभिधेय (an-abhidheya) *adj.* [*f.* -ā] **A** not to be uttered or stated तद् किमिदानीमनित्यतेत्ययं शब्दोऽनभिधेय एव नानभिधेयः NyāyVār. 286.16 (*on* ii. 2.12); अन्यथा हि प्रत्यक्षवेदविहितं सर्वं विज्ञातमूलविशेषत्वादविज्ञातमूलत्वेनानभिधेयमेव स्यात् TantrVā. 126. 15 (*on* i. 3. 7); **B I** not to be denoted (by the primary function), not to be conveyed, not to be referred to वागादिदेवताः···अतः अनभिधेयाः BṛĀraUBh. 48. 10 (*on* i. 3. 6); न ह्यगत्यानभिधेयोऽर्थः शक्यः प्रत्येतुम्। न चात्र लक्षणयापि TantrVā. 703. 29 (*on* iii. 1. 8); (शब्दार्थः) अनभिधेयः कथं प्रतीयते NyāyMañ. i. 334. 11; कुतस्तर्हि गङ्गायां घोषः प्रतिवसतीत्यादौ तीरादीनामनभिधेयानां प्रतिवासान्वयः TattvBi. 101.7; सर्वथैवानभिधेयेनानेन भवितव्यं तावत् क्रमेणेत्युक्तम् Loc. 155. 8 (*on* 3. 33); अतः प्रैषस्य ··· अनभिधेयापि प्राप्तकालतावगम्यते TantrRa. 282. 10; कर्तव्यताप्यनभिधेया कथमनूद्यते NyāyRaMā. 54. 21; 88. 16; यो गोशब्दस्यानभिधेयः सोऽगौः स्यात् NyāyRa. 587. 17 (*on* 5(13). 81); नन्वेवमप्यनभिधेया भावना कथमर्थं इत्युच्यते NyāyRa. 943. 15 (*on* 7. 342); अभिधाया नियन्त्रणेनानभिधेयस्यार्थान्तरस्य तेन ··· व्यङ्ग्यत्वम् KāvyPra. 218. 2; PradI. ii. 93B. 21 (*on* i. 2. 64); Kāvyānu.(He.) 33.22; YuktiSneha. 160. 23 (*on* i. 1.7); यत्तु धर्मितावच्छेदकं घटत्वं न तदभिधेयमेव सत् धर्मिणमवच्छिनत्ति। किं तु अनभिधेयमेवोपलक्षणतयेति न जातिविशिष्टव्यक्त्यभिधानापत्तिः MīmāKau. i. 141. 26 (*on* i. 3. 30); अनभिधेयादविधेयाच्च पाप्मिकक्रमुदयम् ··· विलक्षणः MayūMāl. i. 291. 9 (*on* iii. 5.12); **B II** (Brahman, Ātman) not denotable (i. e. beyond the reach of words) तस्मात् ··· वाचः यस्मादप्रत्ययविषयादनभिधेयाद्दृश्यादिविशेषणात् सहैव मनसा ··· निवर्तन्ते TaiUBh. 280.3 (*on* 2. 9); कथं पुनरभिधानमभिधेयेनानभिसंबद्धं सदनभिधेयेऽर्थे प्रमां जनयति NaiṣkaSi. 167. 5; 169. 7; न केवलमिक्षुक्षीरादिरसविशेष एवानभिधेयः प्रतीयते अपि तु सर्ववाक्यार्थोऽपि। [illegible] अनभिधेयमेव VedāntKa. 75.13 (*on* i. 1. 4)

अनभिधेयता (anabhidheya-tā) *f.* the state of not being fit to be

denoted यदि परं स्वरूपस्यैवाभावः साध्यते, तदैवानभिधेयता Bṛha. 167.9 (*on* i. 1.5); व्यक्तीनां शब्दभावत्वे निबन्धनं तज्जातीयेषु सर्वेषु चाप्रयोगात् न स्वरूपमतस्तासामनभिधेयता NyāyRa. 823.13 (*on* 6.365); मङ्गलस्यानभिधेयतया न पदान्तरपरामर्शयोग्यता ŚrutaPra. iA. 11.21 (*on* i. 1.1); समासोक्त्यप्रस्तुतप्रशंसादौ द्वितीयार्थस्यानभिधेयतया नास्य (श्लेषस्य) गन्धोऽपि SāhiDa. 492.6 (comm. व्यञ्जनयैव … प्रतीतिः)

अनभिधेयत्व (anabhidheya-tva) *n.* **i** the state of not being fit to be denoted, the state of not being denotable स्त्रिया अनभिधेयत्वात्, अवश्यंभावित्वाच्च द्वितीयस्य अपरः सद्वितीयः पुमान् ŚābaBh. 1366.9 (*on* vi. 1.22); अनित्यः शब्दोऽनभिधेयत्वे सति प्रमेयत्वात् विशेषणासिद्धः NyāyVār. 169.8 (*on* i. 2.45); शक्तेरनभिधेयत्वात्तद्व्यापारोऽपि नेष्यते BṛĀraUBhVā. (Sambandha.) 636; यत्तु कृदन्तेष्वपि धातवो भावानां न व्यभिचरन्तीति। सत्यं धात्वर्था न व्यभिचरन्ति तैरेव तु गम्यमानत्वादनभिधेयत्वमपि शक्यं वक्तुम् TantrVā. 350.8 (*on* ii. 1.1); 443.15 (*on* ii. 2.1): चन्द्रशब्देन हि शशिविषयं विज्ञानं सर्वलोकप्रसिद्धमुपजायमानं तस्य तदभिधेयतां बोधयदनभिधेयत्वं बाधते NyāyRa. 367.9 (*on* 5(4).65); 545.14 (*on* 5(12).1); 812.11 (*on* 6.326); वृक्षं पश्येति मूलस्कन्धफलपलाशादीनां बहुत्वेऽपि तेषामनभिधेयत्वाद् बहुवचनाभावः PadMañ. *on* KāśiVṛ. *on* P. i. 4.21; नापि तत्त्वज्ञानचिख्यापयिषानन्तर्यमथशब्दार्थः। तस्य संभवेऽपि श्रोतृप्रतिपत्तिप्रवृत्त्योरनुपयोगेनानभिधेयत्वात् SarvaDaSam. 15.62; नन्वेकप्रतीतिविषयत्वेऽप्येकस्यानभिधेयत्वमन्यस्याभिधेयत्वं च कुतः TantrRaha. 33.8; समासे पदार्थसंसर्गस्य यौगिके प्रकृतिप्रत्ययार्थसंसर्गस्य चानभिधेयत्वेऽपि पदार्थस्य प्रत्ययार्थस्य च वाच्यत्वात् तदर्थस्य च ब्रह्मणः वाच्यत्वापरिहाराच्च Nyāyāmṛ. 536B.6; अनभिधेयत्वे त्वशब्दार्थस्य भावनासमभिव्याहारानुपपत्तिः YuktiSneha. 47.6 (*on* i. 1.5); 97.24 (*on* i. 1.5); **ii** the state of being that which cannot be expressed (by words) न चक्षुषा गृह्यते केनचिदप्यरूपत्वात्, नापि गृह्यते वाचा अनभिधेयत्वात् MuṇḍUBh. 350.12 (*on* iii. 1.8); भूतार्थानां द्रव्यगुणकर्मणामानर्थक्यमनभिधेयत्वं प्रसज्येत Bhām. 105.18 (*on* i. 1.4); तत्र केचिद् गोत्वादिषु विशेषत्वमङ्गीकृत्य सामान्यवाचिना शब्देनानभिधेयत्वात् … गोत्वादिविशेषव्यवच्छिन्नम् … वाच्यमिति मन्यन्ते TantrVā. 251.9 (*on* i. 3.26); 277.20 (*on* i. 3.26); **iii** non-denotability (of case-relation) लः कर्तरीति व्याकरणस्मृतिविरोधस्तु कर्तुरनभिधेयत्वे स्पष्ट एव MīmāNyāPra. 208.26.

अनभिधेयत्वप्रसङ्ग (anabhidheyatva-prasaṅga) *m.* undesired contingency of the state of not being fit to be denoted or expressed न च सर्वथावक्तव्यम्। अवक्तव्यशब्देनाप्यनभिधेयत्वप्रसङ्गात् SyādvāMañ. 23(153)

अनभिधेयत्वहानि (anabhidheyatva-hāni) *f.* loss of non-denotability तदेवाभ्युपगन्तव्यमित्यनभिधेयत्वहानिः TantrVā. 948.10 (*on* iii. 4.13)

अनभिधेयत्वानुमान (anabhidheyatvānumāna) *n.* reasoning (*lit.* inference) regarding non-denotability सर्वथा तावत्प्रत्ययार्थः कर्तेत्युक्तमाचार्यैस्तस्मादयुक्तमनभिधेयत्वानुमानम् TantrVā. 953.7 (*on* iii. 4.13)

अनभिधेयत्वासंभव (anabhidheyatvāsambhava) *m.* impossibility of non-denotability नान्तरीयकशब्दवाच्यस्यानभिधेयत्वासंभवात् TātpaṬ.(Vā.) 189.9 (*on* i. 1.5)

अनभिधेयप्रतियोगिभेद (anabhidheya-pratiyogibheda) *m.* specific counter-entity which is not to be conveyed अभिधेयानन्तर्येऽनभिधेयप्रतियोगिभेदस्य तदभिधानागौरवकरत्वात् SiddhāSi. i. 16.28.

अनभिधेयवचन (anabhidheya-vacana) *adj.* expressive of what cannot be denoted (i. e. which is beyond words) अत्रात्यर्थशब्दोऽनभिधेयवचनः।… सर्वशक्तिनाप्यभिधातुं न शक्य इत्यर्थः GītāBh.(Rā.) 390.4 (*on* 7.17)

अनभिधेयव्यापार (anabhidheya-vyāpāra) *adj.* whose activity is not fit to be denoted or referred to न तावन्माणवकस्य नयत्यर्थे कर्तृत्वम् …। अतोऽनभिधेयव्यापारः कथं नियुज्येत। … तस्मान्नैष माणवकस्य नियोगः PañcPā. 56.14 (*on* i. 1.1)

अनभिधेयाख्यानापत्ति (anabhidheyākhyānāpatti) *f.* undesired contingency of the explanation of what is not to be denoted सत्ताया एव … सिद्धरूपप्रतीतिः … न … सामान्यविशेषयोः साध्यसाधनभावायोगात् सामान्यस्यासाध्यत्वात् अनभिधेयाख्यानापत्तेः BhāvanāVi. 124.2.

अनभिध्या (an-abhidhyā) *f.* **1** not coveting, absence of covetousness (of the property of someone else) अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम् … मनसा चरेत् MahāBhā. xiii. 13.5; ŚārṅgaPa. 634; सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानीति BrahmSūBh.(Rā.) 11.25 (*on* i. 1.1); अभिध्या परकीये स्वत्वबुद्धिः, यद्वा निष्फलचिन्ता, अथवा परकृतापकारचिन्ता। तद्राहित्यमनभिध्या ŚrutaPra. iA. 65.6 (*on* i. 1.1); **2** not pondering (over ingratitude etc.) अपकारास्मृतिरनभिध्या SiddhāSi. i. 70.8; ŚrutaPra. iA. 65.6 (*on* i. 1.1)

अनभिध्यात (an-abhidhyāta) *adj.* not intended आभिमुख्येनापि … वैश्वानरशब्दस्य यौगिकेऽर्थे सति जाठरानलविशिष्टात्मोपासनमनभिध्यातं बादरायणस्यापि BrahmSūBh.(Bhā.) 49.11 (*on* i. 2.28)

अनभिध्यानतस् (anabhidhyāna-tas) *adv.* due to non-meditation (सुदर्शनमनाराधयतां राज्ञां प्रजानुरागाभावः) अनभिध्यानतो ह्यस्य विश्वे विषयवासिनः। अपरक्ताश्च जायन्ते महाराजे कृतागसि AhirbuS. 37.53.

अनभिध्येय (an-abhidhyeya) *adj.* **A** unthinkable, beyond imagination ददर्श तं पिता … विहङ्गमम्। … अचिन्त्यमनभिज्ञे(v. l. ध्ये)यं सर्वभूतभयंकरम् MahāBhā. i. 26.7; (ब्रह्म) इयत्तयानभिध्येयं ध्येयं वस्त्वस्ति वेदनात् BṛBrahmaS. ii. 2.69; **B** not to be pondered over, not to be questioned भवांश्च कर्ता लोकानां यद्ब्रवीत्यरिसूदन। तथा तदनभिध्येयं वाक्यं यादवनन्दन MahāBhā. xii. 46.27.

अनभिध्वंसयत् (an-abhidhvaṁsayat) *adj.* not strewing with अनभिध्वंसयन्नितराणि पात्राणि श्रीणीयात् KāṭhS. 27.8 (ii. 147.16); अस्याश्रीणीतादिशं गभस्ताविति सक्तुभिः श्रीणात्यनभिध्वंसयन्नात्मानम् ĀpaŚS. xii. 14.15; अनभिध्वंसयन् पात्राणि सक्तुभिः श्रीणाति MānŚS. 75.19; HirŚS. viii. 4.17 (836.24)

अनभिनन्दकत्व (anabhinandaka-tva) *n.* the state of being that which does not give delight, the state of being unpleasant यद्यपि दोषान्तराभावादेकाष्टकैव दीक्षायां प्रशस्ता, तथाप्यार्तत्वव्यस्तत्वा(? अन)भिनन्दकत्वरूपदोषत्रयात्तामतिक्रम्यापि चैत्र्येव परं प्रशस्ता BhāṭṭDī. ii. 297.10 (*on* vi. 5.10)

अनभिनन्दत् (an-abhinandat) *adj.* [*f.* -ntī] not taking delight in, not appreciating or liking तस्य सानिर्या यदपोऽनभिनन्दन्तोऽभ्यवयन्ति PañcBr. v. 9.3; सेव तु परिचक्षा यदपोऽनभिनन्दन्तश्शिशिरेऽवभृथमभ्यवयन्ति JaimiBr. 2.373; तेषामध्यापको बोधिसत्त्वमवेक्ष्य तं विधिमनभिनन्दन्तमप्रतिक्रोशन्तम् … उवाच JātaMā. 78.24 (12.10); (यस्य च … कीर्तिपतिंवरा) कुम्भीनसप्रभुं चानभिनन्दन्ती … न क्वचिदद्यापि बध्नाति स्थितिम् YaśasCam. i. 86.3; तदनभिनन्दन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामि BhāgP. v. 1.30.

अनभिनन्दन (an-abhinandana) *n.* **i** dislike, lack of taste प्रसेको हृदयोत्क्लेशो भक्तस्यानभिनन्दनम्। पूर्वरूपं मतं छर्द्याः SuśruS. vi. 49.8; कासमानं च हृदयं भक्तस्यानभिनन्दनम् … कफकासस्य लक्षणम् BhelaS. 193.15 (6.22); अथ चेत् … लक्ष्यते। स्वेदो विण्मूत्ररागश्च भक्तस्यानभिनन्दनम् KāśyaS. 237B.37; **ii** not responding, not appreciating सारं तु … उपायतोऽपवाहयेत् … श्रान्तमुपलभ्य चोदना। अशक्तौ हासः। शक्तावनभिनन्दनम् KāmSū. 331.1 (6.3); शक्तावनभिनन्दनं वैराग्यख्यापनार्थम् JayaMa. 331.13 (*on* 6.3); **iii** absence of praising or lauding, not welcoming एकस्यैव जन्मानभिनन्दनं नेतरस्य VyaktiVi. 129.10.

अनभिनन्दित (an-abhinandita) *adj.* [*f.* -ā] not welcomed, not liked, rejected ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनन्दिता। साभूद्रामाश्रया RaghuVa. 12.35 (comm नाङ्गीकृता); अभावचिन्ताकातराणामिव करितुरङ्गमाणामनभिनन्दितयवसपल्लवानामाननादगलन्नश्रुबिन्दवः AvantiKa. 53.4; तोयम् …। फेनिलं गुरु विच्छिन्नं खगैरनभिनन्दितम्।… ओदनः साधितस्तेन भुक्तमात्रो विदह्यते AṣṭāSam. i. 50.5 (1.8); मुमुक्षुमतिरिव मन्दमप्यनभिनन्दितदिव्यरसपानभोजना … मलयसुन्दरी … अवदत् TilaMañ. 355.11; 428.5.

अनभिनन्दित्व (anabhinandi-tva) *n.* the state of not taking delight in, lack of satisfaction अब्रह्मविरतेर्व्रतस्य भावना यथोक्ता इष्टस्पर्शरसगन्धविभूषानभिनन्दित्वं चेति TattvāBh. *on* 9.6 (Ṭīkā तत्प्राप्तावप्यपरितुष्टिर्मनसोऽप्रसादः)

अनभिनन्द्यजन्मता (anabhinandyajanma-tā) *f.* the state of having unlaudable (i. e. low) birth उभयोरप्यनभिनन्द्यजन्मताप्रतीतौ तुल्यायां यदेतदेकस्यैव जन्मानभिनन्दनं नेतरस्य तत्तस्य शोच्यतातिरेकलक्षणं व्यतिरेकमनुमापयति VyaktiVi. 129.9.

अनभिनन्द्यमानगमन (anabhinandyamāna-gamana) *adj.* whose departure is not being approved दुर्निमित्तैरनभिनन्द्यमानगमनश्च नितरामशङ्कत हृदयेन HarṣaC. 213.7.

अनभिनयवत्त्व (anabhinayavat-tva) *n.* the state of not having dramatic expression, undramatic nature गीतातोद्यरङ्गादिबलेनेदं व्यवस्थितं सामान्याभिनय इत्यभिधानात् अनभिनयवत्त्वे चास्य सत्त्वनिर्वर्त्यस्यापि को नाट्ये उपयोगः AbhinBhā. iii. 152.14 (*on* 22.3)

अनभिनवत्व (anabhinava-tva) *n.* the state of not being (quite) new, non-novelty यदपि वस्तु वाच्यमनूतनोल्लेखमनभिनवत्वेनोल्लिखितं तदपि यत्र यस्मिन्नलं [illegible] … उक्तिवैचित्र्यमात्रेण VakroJī. 62.2.

अनभिनवदशा (anabhinava-daśā) *f.* non-recent state (of deli-

vering a young one) गौतमोऽपि — 'नित्यमाविकमपेयमौष्ट्रमैकशफं च (क्षीरम्) इति नित्यमभिन्नवदशायामनभिन्नवदशायां चेत्यर्थः SmṛtiCan. v. 235. 19.

अनभिनिक्षिप्त (an-abhinikṣipta) *adj.* not merged together (i. e. distinctly pronounced) सर्वे स्पर्शाः लेशेन शनकैः अनभिनिहिताः अनभिनिक्षिप्ता वक्तव्याः ChāndoUBh. 120. 12 (*on* ii. 22. 5)

अनभिनिरुप्ता (an-abhiniruptā) *adj.* (*f.*) (deity) for whom (an offering) has not been apportioned or poured out षड्भिरभिजुहोति। यद्यनभिनिरुप्तामावाहयेद्यथावाहितमाज्येनोपांशु यजेत MānŚS. 96. 23.

अनभिनिर्वृत्त (an-abhinirvṛtta) *adj.* which has not come into effect, which has not been produced इह तावत् इतः इथ इति प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुम् MahāBh. i. 54. 9 (*on* i. 1. 5); केषुचित्संस्कारेषु कृतेष्वनभिनिर्वृत्ते प्रयोजने श्रुतमेवोपादातव्यम् TupT. 123. 14 (*on* vi 3. 36)

अनभिनिर्वृत्तत्व (anabhinirvṛtta-tva) *n.* the state of being that which has not come into effect गत्युपसर्गसंज्ञयोरनभिनिर्वृत्तत्वात् ते गत्युपसर्गसंज्ञका इति प्रत्यवमर्शो न युज्यते Nyās. i. 315. 7 (*on* i. 4. 80); सवर्णसंज्ञाप्रतिषेधवाक्ये सवर्णसंज्ञाया अनभिनिर्वृत्तत्वेन ग्रहणकशास्त्रस्यानभिनिर्वृत्तत्वात् PariVṛ (Sī.) 36.12.

अनभिनिर्वृत्ति (an-abhinirvṛtti) *f.* not coming into being, non-effectuation (of an action) अत्रान्नदानं फलं तद्धेतुभूतोऽतिथिलाभः तदनभिनिर्वृत्तिं प्रमाणादवगम्येदं वाक्यं प्रयुक्तम् JaineVyā. 132. 12 (*on* ii. 3.115); न केवलं साधनवैगुण्याद्देवेष्टेरनभिनिर्वृत्तिस्तथेष्टेः साधयितुः कर्मणश्चासाद्गुण्यात् NyāyVār. 268. 8 (*on* ii. 1. 57); कुतश्चिद्वैगुण्यात् क्रियाया अनिष्पत्तौ अनभिनिर्वृत्तौ गम्यायां सत्यामित्यर्थः Prasā. ii. 44. 17; अतिपत्तिः अनभिनिर्वृत्तिः LaŚabdeŚe. ii. 458. 3.

अनभिनिविष्ट (an-abhiniviṣṭa) *adj.* not intent on, not insisting सदानभिनिविष्टश्च पक्षपाती गुणेषु च।··· गृहिधर्माय कल्पते YogŚā. 1. 53.

अनभिनिवेश (an-abhiniveśa) *m.* A non-insistence, non-adherence यथायं तत्साधनसंभवेऽप्यस्य विशेषस्तथान्यस्यापि स्यादित्यनभिनिवेशो युक्तः PramāVāSvopVṛ. 111. 10; अनेनैव हेतुनान्यत्राप्यनभिनिवेश इत्यरुणानोयमेव TantrVā. 748. 10 (*on* iii. 1.19); B non-insistence (i. e. non-ascertainment), cf. अनभिनिवेशतस्.

अनभिनिवेशतस् (anabhiniveśa-tas) *adv.* due to non-insistence (i. e. due to non-ascertainment) प्रत्यक्षाभाप्रसङ्गश्चेत्तथानभिनिवेशतः। दूरदूरतरादिस्थैरेकं वस्तु समीक्ष्यते NyāyVi. 2. 182 (Vivaraṇa अनध्यवसायात्)

अनभिनिवेशिन् (an-abhiniveśin) *adj.* not intent upon किमपि स्फुटीकृतम् ···। समर्थपदसंश्रयाद्द्विगुणपुस्तकेभ्योऽपि यत्, परात्महितहेतवेऽनभिनिवेशिना चेतसा JñātāDhaṬ. 254A. 2.

अनभिनिहित (an-abhinihita) *adj.* not merged together (i. e. pronounced distinctly) सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्याः ChāndoU. ii. 22. 5.

अनभिनीत (an-abhinīta) *adj.* considered as improbable or unlikely आशंसा नाम प्रधारितोऽर्थोऽभिनीतश्चानभिनीतश्च MahāBh. ii. 159. 8 (*on* iii. 3. 132); अभिनीत इति। कारणयोग्यतावशाच्छत्रयप्राप्तिरित्यर्थः। ततोऽन्योऽनभिनीत इत्यर्थः PradI. iii. 240B. 20 (*on* iii. 3. 132)

अनभिनीतम् (anabhinītam) *adv.* without having made any gestures (while speaking or uttering words etc.) (पदपादश्लोकान्) अद्रुतमविलम्बितम् ··· सुव्यक्ताक्षरमपीडितवर्णमक्षिभ्रुवौष्ठहस्तैरनभिनीतं सुसंस्कृतं नात्युच्चैर्नातिनीचैश्च स्वरैः पठेत् SuśruS. i. 3. 54.

अनभिनेय (an-abhineya) *adj.* not to be enacted (as a play or drama) अनभिनेयात् भेदमादधानोऽभिनेयस्य रूपकस्य लक्षणं भवत्येव AbhinBhā. ii. 416. 6 (*on* 18. 14)

अनभिनेयरूपकांश (anabhineya-rūpakāṁśa) *m.* part of a drama which is not to be enacted (by gestures) रसाकारोदयप्ररोहो भवति। स चानभिनेयरूपकांशैरेव संपाद्यते AbhinBhā. ii. 416. 5 (*on* 18. 14)

अनभिनेयव्यापित्व (anabhineyavyāpi-tva) *n.* the state of being that which covers what is not to be enacted सूत्रकाराभिप्रायापेक्षं चैतत्, तेन रसभावनायकनायिकादिलक्षणस्य अभिनेयं प्रति प्रवृत्तस्य अनभिनेयव्यापित्वेऽपि न विरोधः NāṭyaDa. 25. 22(2)

अनभिनेयार्थ (an-abhineyārtha) *adj.* not having dramatically representable import वाच्यं च ··· अभिनेयार्थमनभिनेयार्थं वा Dhvanyā. 319.1 (*on* 3. 6); अन्यत्र चेति। अनभिनेयार्थेऽपि Loc. (KSS. Ed.) 321. 11 (*on* 3.6); अभिनेयार्थे अनभिनेयार्थे च काव्ये यदुत्तमप्रकृते र[···]तिः सह ग्राम्यसंभोगवर्णनं तदसभ्यम् Kāvyānu.(He.) 148.24.

अनभिनेयार्थत्व (anabhineyārtha-tva) *n.* the state of not having dramatically representable import कविव्यापारो हि ··· रसाभिव्यक्त्यव्यभिचारी काव्यमुच्यते। तच्चाभिनेयानभिनेयार्थत्वेन द्विविधम् VyaktiVi. 20. 17.

अनभिपरिहार (an-abhiparihāra) *m.* not passing through, absence of intervention औपयजैरङ्गारैरनभिपरिहारे प्रयतेरन् ĀśvaŚS. 1. iv. 12. 3 (comm. उपयड्होमार्था औपयजाः, तैरङ्गारैर्व्यवायपरिहारे यत्नः कर्तव्यः इत्यर्थः)

अनभिपरिहृत (an-abhiparihṛta) *adj.* not passed through, not intervened अथेमा अध्वर्योः प्रोक्षण्यो दक्षिणेन प्रतिप्रस्थातारं परिगृह्यासादयेदेवमेताभिरनभिपरिहृतो भवति BaudhŚS. iii. 229. 3.

अनभिपूज्य (an-abhipūjya) *ger.* not having honoured न ह्यागमिकेऽर्थे गुरुमनभिपूज्य स्वातन्त्र्येण किंचिद् वक्तव्यम् BālaKrī. ii. 180. 12 (*on* 3. 330 (↑ 337))

अनभिप्रथन (an-abhiprathana) *n.* not spreading over कपालकरणे ··· कपालानामनभिप्रथने व्याहृतीभिराहवनीये स्रुवाहुतीर्जुहुयात् BaudhŚS. iii. 325.6

अनभिप्रपाद (an-abhiprapāda) *m.* not reaching at उभयत एव परिस्तृणात्यनभिप्रपादाय KāṭhS. 29. 2 (ii. 170. 6) = KapiKaS. 45. 3 (270. 5)

अनभिप्रश्वसत् (an-abhipraśvasat) *adj.* not breathing over, not blowing अथ प्रवर्ग्यमादधेऽवनाम्य मुखास्यनभिप्रश्वसन्तो न प्रवर्ग्यं चादित्यं चान्तर्दधति BaudhŚS. i. 267. 18.

अनभिप्राणत् (an-abhiprāṇat) *adj.* not breathing over, not blowing अपहाय मुखमनभिप्राणन् वेणुना (प्रवर्ग्यपात्राणि) करोति BhārŚS. xi. 2. 19 = ĀpaŚS. xv. 2. 11 = HirŚS. xxiv. 1. 13 (853. 3)

अनभिप्राप (an-abhiprāpa) *m.* (place) out of reach आहरति गोरनभिप्रापाद् वनस्पतीनाम् KauśiSū. 7. 11 (Dārila यं प्रदेशं नाभिप्राप्नोति गौस्तस्मात् प्रदेशात्)

अनभिप्रापण (an-abhiprāpaṇa) *n.* not geting (the meaning) अर्थाभिप्रापणान्न्यूनीभावोऽर्थाभि(v. l. र्थानभि)प्रापणादतिरेकः NidāSū. 12. 8 (1. 7)

अनभिप्राप्त (an-abhiprāpta) *adj.* who has not arrived at or reached तदाहुर्य आहिताग्निरुपवसथे म्रियेत कथमस्य यज्ञः स्यादिति नैनं याजयेदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति AitBr. 32.1 (806); तदिदमहर्नान्तेवासिने प्रब्रूयात् ··· नानभिप्राप्तायैतं देशम् AitĀ. V. iii. 3. 7.

अनभिप्रायज्ञ (an-abhiprāyajña) *adj.* who does not know or understand the intention अनभिप्रायज्ञो देवानां प्रियः, यतो ब्रह्मण्यसावभेद उक्तः Bṛha. 156. 6 (*on* i. 1. 5); अनभिप्रायज्ञश्चोदयति भवान् ŚrutaPra. iA. 95. 6 (*on* i. 1. 1)

अनभिप्रायवेदिन् (an-abhiprāyavedin) *adj.* who does not know or understand the intention अतिलज्जान्वितेत्येवं यस्तु कन्यामुपेक्षते। सोऽनभिप्रायवेदीति पशुवत् परिभूयते KāmSū. 206. 25 (3. 2)

अनभिप्रीत (an-abhiprīta) *adj.* not pleased, not delighted अध्वर्युः ··· आह स्तोकेभ्योऽनुब्रूहीति तद् यत् स्तोकाश्चोतन्ति सर्वदेवत्या वै स्तोका नेन्म इमेऽनभिप्रीता देवान् गच्छानिति AitBr. 7. 2 (190); 40. 1(958)

अनभिप्रेक्षितपथ (anabhiprekṣita-patha) *m.* path (or manner) which is not observed or approved (by the elders) स्वच्छन्दाः संचरन्ते गुरुभिरनभिप्रेक्षितपथे यथेष्टं चेष्टन्ते स्फुटकुचतटाः पश्य कुलटाः ŚārṅgaPa. 3764.

अनभिप्रेत (an-abhipreta) *adj.* [*f.* -ā] 1 not agreeable, unpleasant, evil स्वस्ति नः शकुने अस्तु ··· इत्यनभिप्रेतं शकुनं प्रति जपति HirGS. i. 16.18; अनभिप्रेतं स्वप्नं दृष्ट्वा तिलैराज्यमिश्रैर्जुहोति HirGS. i. 17. 4; वत्से वत्स्यिके वत्स्यसि कथमनभिप्रेते प्रेतनगरे HarṣaC. 328. 6; यदनिष्टमनभिप्रेतं परस्य तत्र चिन्तनीयम् ManuBh. ii. 456. 14 (*on* 12. 5); लोकेऽपि चानभिप्रेतात् पथः साक्षान्निवारणम् BṛĀraUBhVā.(Sambandha.) 382; वियोगाद्ययोर्वानभिप्रेतेऽर्थप्रतीतिरेवंविधाप्यस्तीत्यत आह — आभिमानिकसुखानुविद्धेति JayaMa. 14. 20 (*on* 1. 3); 2 not desired, disliked यदा तु जरयापीतं रूपनाशं भविष्यति। आत्मनोऽप्यनभिप्रेतम् BuddhaC. 4. 88; किमिदं दुःखं नाम ···अनभिप्रेतं चेत्। अभिप्रेतं सुखमिति सिद्धम् AbhidhKoBh. 330. 22 (*on* 6. 3); अपत्यं चानभिप्रेतमुत्पद्येतेति शास्त्रकारेण दर्शितम् ManuBh. i. 218. 7 (*on* 3. 24); किमन्यदीयावासविहितस्थितिरनभिप्रेतमात्मनो दशान्तरमनुभविष्यामि TilaMañ. 280. 10; परच्छन्दं न विदुषा पुष्यमाणो जनेन सः। अनभिप्रेतमापन्नः प्रत्यास्यात्मनीश्वरः BhāgP. iii. 31.25; v. 9.4; प्रजार्थिनो धर्मपत्न्यामनभिप्रेतायामप्यभिगमनं धर्मोऽर्थानुबद्धः JayaMa. 10.10 (*on* 1.2); 10. 12 (*on* 1. 2); सुबाहुः ··· काकुत्स्थपत्रिणा। मुनीनामनभिप्रेतः प्रेतनाथातिथिः कृतः RāmāCam. 1. 51; अनभिप्रेतमपि कान्तिमत्स्थानं यदा प्रमुख एवाभ्युपगम्यमानं प्रतीयते AlaṅkāSa. 121. 9; शठ

स्वस्यानभिप्रेतां प्रियेति वदति स्त्रियम् BhāvPra.(Śā.) 271.14(9); SābiSā. 3.63; अनभिप्रेतमसौ कुर्वन् प्रतिलोमो भवति SiddhāKau. 658A.11 (*on* viii. 1.33); **3** not aimed at, not intended सकृत्त्वं त्वैकध्यं स्यादेकत्वात् त्वचोऽनभिप्रेतम् MīmāSū. ix. 3.31; x. 8.43; तत्प्रकृतावेकस्यां त्वच्यसंभवादनभिप्रेतम् ŚābaBh. 1760.3 (*on* ix. 3.31); निर्मन्थनं यथारण्योरस्यर्थमुपपादितम्। धूममप्यनभिप्रेतं जनयति VākyaP. 2.302; एवं चानभिप्रेतोऽर्थः समर्थितो भवति Bṛha. 253.7 (*on* i. 1.5); व्याख्यानान्तरं त्वनभिप्रेतमेव भाष्यगमनिकामात्रेणोक्तम् TātpaT.(U.) 108.19; आत्मनश्चेदुपास्यत्वमनभिप्रेतम्, प्राणनाद्येकैकक्रियाविशिष्टस्यात्मनोऽकृत्स्नत्ववचनमनर्थकं स्यात् BṛĀraUBh. 114.13 (*on* i. 4.7); फलं तत् संपरित्यज्य कस्माल्लक्षणया स्तुतिम्। अश्रुतामनभिप्रेतां कल्पयस्यबुधो यथा BṛĀraUBhVā. (Sambandha.) 202; जाठरानलविशिष्टात्मोपासनमनभिध्यातम् (v. l अनभिप्रेतम्) बादरायणस्यापि BrahmSūBh.(Bhā.) 49.11 (*on* i. 2.28); न ह्यनभिप्रेते धर्मादिभेदे तदुपदेशानुष्ठानमवकल्पते NyāyRa. 234.17 (*on* 5(2).71); अर्थान्तरविवक्षया वाक्यप्रयोगे वक्तुरनभिप्रेतमेवार्थं तदर्थत्वेनाध्यारोप्यारोपितार्थदूषणं छलम् TārkiRa. 240.3; SarvaDaKau. 76.17; न तु तदभिप्रेतमप्यनुक्तम् अनभिप्रेतं तु किं पुनः NyāyPari. 263.2; कुम्भकर्णस्तु दुष्टात्मा चिन्तयामास दुःखितः। अनभिप्रेतमेवास्यात् किं निर्गतमहो विधिः AdhyāRā. vii. 2.23; वार्तिककारस्य तु एतदनभिप्रेतम् Prasā. ii. 35.16; न च तथायुक्तमित्यनेन तद्भागितयानभिप्रेतस्यापि तदाश्रयस्य तत्संज्ञाविधानात् कर्मत्वं क्रियाजन्यफलशालित्वमेव न त्विच्छागर्भं संप्रदानत्वम् VyutpaVā. 168.16; चन्द्रादेर्नायकव्यवहाराश्रयत्वेन नायकसाम्यं सिध्येत्। तच्च ··· कवेरनभिप्रेतमेव RasGaṅ. 501.1; शतदानमिति ··· मनसोऽनभिप्रेतमप्युक्त्यनुसारेण यत् दीयते तदित्यर्थः BālamBha. ii. 287.29 (*on* 2.176); *n.* act or deed which is not pleasing or which is disliked न च गुरुणा सह विगृह्य कथाः कुर्यात्। न चैवास्य परीवादम्। न चानभिप्रेतम् ViṣṇuSm. 32.12.

अनभिप्रेतकन्या (anabhipreta–kanyā) *f.* unwanted young girl or maiden अपरिणीतस्य सवर्णादनभिप्रेतकन्यालाभोऽर्थो धर्मानुबद्धः JayaMa. 10.12 (*on* 1.2)

अनभिप्रेतत्याग (anabhipreta–tyāga) *adj.* disposal of which is not intended द्रव्यमनभिप्रेतत्यागमपि बलात् परित्यक्तव्यम् TantrVā. 1023.21 (*on* iii. 4.47 (? 41))

अनभिप्रेतत्व (anabhipreta–tva) *n.* **1** the state of being not intended or not aimed at तदयं गवादिशब्दप्रत्युपस्थापितमर्थम् ··· तत्र किमिति द्विमुखबुद्धिः क्रियते। तस्माद् योऽस्यात्मा ··· स एव स्वभावो यथास्वं शब्दचोदितः, ··· तच्चोदनया तदा प्राप्नुमनभिप्रेतत्वात् PramāVāSvopVṛ. 59.18; प्रतीतोऽप्यर्थो वक्तुरनभिप्रेतत्वादविवक्षां लभेत TantrVā. 714.19 (*on* iii. 1.13); अनभिप्रेतत्वादेव च — छिन्ननास्येन यानेन···। पश्चाच्चैवापसरता हिंसिते स्वाम्यदोषभाक् BālaKrī. i. 297.8 (*on* 2.302); केचित्तु कृत्रिमस्त्रे ··· अदृष्टरूपैकार्थत्वं परिकल्प्य तस्मिन् विभज्यमानसाकाङ्क्षत्वादेकवाक्यत्वं कथयन्तः ··· ईदृशैकवाक्यत्वस्य पूर्वसूत्रे अनभिप्रेतत्वाच्चोपेक्षितम् MīmāKau. iii(2). 126.18 (*on* ii. 1.48); 'दिनेन्द्र इव वासवः ··· ऽोऽपि भूमीपतिः।' अत्र···। न चोपमाया निष्पादकं तेषां (दिनेन्द्रादीनाम्) साधारण्यम् ··· उपमानिष्पादकत्वेन कवेरनभिप्रेतत्वात् RasGaṅ. 383.12; **ii** the state of not being desired or liked or approved किमिह वादिप्रतिवादिमध्यस्थानामन्यतमस्य अनभिप्रेतत्वम् TarkSaṁ.(Ā.) 103.12; 103.18; अभिप्रेतमपि रुचिरं नायकं परिचारकमात्मीयं वा क्षुद्रं निकृष्टं गत्वा तयोरनभिप्रेतत्वादज्ञातकामत्वाच्च कामः स्यात् न वेति संशयः JayaMa. 356.25 (*on* 6.6)

अनभिप्रेतनिद्र (anabhipreta–nidra) *adj.* not having desire or inclination for sleeping स्त्रीपुंसतामागतयोरनभिप्रेतनिद्रयोः। प्रदोष एव क्षणदा क्षीणा क्षणवदावयोः BṛKathāŚloSaṁ. 11.75.

अनभिप्रेतस्त्रीपुंस (anabhipreta–stripuṁsa) *m.* (du.) man and woman not desired (by each other) सुखेनानुविद्धेत्याभिमानिकसंस्कारोऽर्थप्रतीतिः प्राधान्यात् कामः, तेन वियोनावयोनौ वानभिप्रेतस्त्रीपुंसयोः फलवत्यर्थप्रतीतिर्न कामः आभिमानिकसुखाभावात् JayaMa. 14.24 (*on* 1.2)

अनभिप्रेताख्यान (anabhipretākhyāna) *n.* unpleasant communication असंख्यं वानभिप्रेताख्याने क्त्वा CāndraVyā. ii. 2.41 (Vṛtti असंख्यं सुबन्तं करोतिना क्त्वान्तेनैकार्थं वा भवति, अनभिप्रेतं चेदाख्यानं भवति। ··· उच्चैर्नाम प्रियमाख्येयम्। अनभिप्रेताख्यान इति किम्। उच्चैः कृत्वा); अव्ययेऽनभिप्रेताख्याने कृञः क्त्वा च SaraKaṇṭhā.(Gr.) ii. 4.274; [cf. P. iii. 4.59]

अनभिप्रेतार्थकल्पना (anabhipretārtha–kalpanā) *f.* assumption of unintended meaning अनभिप्रेतार्थकल्पनया शब्ददूषणं छलम् — इत्यपि न TarkSaṁ.(Ā.) 103.9; 103.14; 103.19.

अनभिप्रेतोपालम्भ (anabhipretopālambha) *m.* censure of what is not intended or aimed at दुःखरूपफलदर्शनेन सिद्धसाधनतेति चेन्न अनभिप्रेतोपालम्भात् NyāyPari. 385.11.

अनभिप्रेषित (án–abhipreṣita) *adj.* not commanded नानभिप्रेषितमध्वर्युणा किं चन क्रियते ŚatBr. IV. vi. 7.19.

अनभिप्रोक्षत् (an–abhiprokṣat) *adj.* not sprinkling over यथादैवतं हविष्यान् प्रोक्षत्यनभिप्रोक्षन्नपरम् MānŚS. 13.13.

अनभिप्लुतार्थगुर्वी (anabhiplutārtha–gurvī) *adj.* (*f.*) weighty (i.e. important) on account of profound meaning हरसंसदि तस्य चाभिधित्सोर्गिरमुच्चैरनभिप्लुतार्थगुर्वीम्। ककुभः समवलयन्निवैता दशनांशूत्करमिन्दुरश्मिगौरम् HarVi. 15.17 (comm. अनभिप्लुतो गभीरः)

अनभिभव (an–abhibhava) *m.* **i** absence of overpowering अनभिभवं च दर्शयति BrahmSū. iii. 4.35; BrahmSūBh.(Śaṅ.) 745.11 (*on* iii. 4.35); परिरक्षणं परिपालनम्। अपायपरिहारः, दुर्बलानां बलवद्भिरनभिभवः ManuBh. ii. 2.5 (*on* 7.2); VīraMi.(Rājanīti.) 12.6; (प्रत्यस्तमितप्रत्ययस्य) चित्तसत्त्वस्य स्वभावस्वच्छस्य रजस्तमोभ्यामनभिभव उक्तः TattvVai. 43.23 (*on* 1.41); तेजोराशिः समुत्पन्नस्तिष्ठति अनि(?न)भिभवात् Kiraṇā. 94.20; सत्त्वं प्रकाशसुखात्मकं तस्य शुद्धिः रजस्तमोभ्यामनभिभवः RājMār. 38.1; धर्मेण पापमपनुदति इत्यादिभिश्च तानेव यज्ञादिधर्मान् निर्दिश्य तैर्विद्याया अनभिभवम् पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति BrahmSūBh.(Rā.) 701.9 (*on* iii. 4.35); VedāntSā.(Rā.) 355.5 (*on* iii. 4.35); स्वभाव एव ह्यवतिष्ठत इति स्वभावानभिभवं च दर्शयति BrahmSūBh.(Ma.) 63B.5 (*on* iii. 4.35); यज्ञादिभिरेव विद्याभिभवहेतुभूतपापापनयनेन विद्याया अनभिभवं दर्शयति VedāntPāSau. 372.9 (*on* iii. 4.35); श्रुतिर्ब्रह्मचर्यादिनाश्रमकर्मणात्मज्ञानानभिभवं दर्शयति। आत्मा न नश्यति न विस्मृतो भवतीत्यर्थः VedāntKau. 372.12 (*on* iii. 4.35); BrahmSūBh.(Śrī.) ii. 404.8 (*on* iii. 4.35); भगवद्धर्मानुरोधेनाश्रमकर्माकरणजदोषैरनभिभवं च श्रुतिर्दर्शयति AṇuBh. 290.25 (*on* iii. 4.34); **ii** absence of predominance बुद्धिभेदस्तु पाकादिषु प्रत्ययोपात्तेन सिद्धभावेनाभिभवात्, अनभिभवाच्च पचत्यादौ BhāvanāVi. 101.2; **iii** absence of censure or condemnation, cf. **अनभिभवगन्धा.**

अनभिभवगन्धा (an–abhibhavagandhā) *adj.* (*f.*) not having even a trace of censure or condemnation अनभिभवगन्धाः परकथाः। ··· पुरुषमभिजातं प्रथयति Kuval. 116(6) (comm. अभिभवो निन्दा तद्गन्धशून्याः)

अनभिभवनीय (an–abhibhavanīya) *adj.* [*f.*–ā] **i** not fit to be overpowered, unassailable, undefeatable तत्र गुणाः (सांवत्सरस्य)। शुचिर्दक्षः प्रगल्भः ··· सहाध्यायिभिरनभिभवनीयः BṛSaṁ. 2.0(9); अहो दुर्निवारता व्यसनोपनिपातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीयां कुर्वन्ति Kād. 135.16; क्षेम्या आटविकादिभिरनभिभवनीया ManuBh. ii. 65.4 (*on* 7.212); सर्वाभिभाविकिमप्यनभिभवनीयं तेजस्तामुपरि तपोमयं ब्राह्मतेजः CaṇḍaKau. 2.15(3) (comm. अपराजेयम्); रुमाप्रक्षिप्तकाष्ठलावण्यवद् वा विश्वस्याप्यनभिभवनीयैश्वरस्वभावत्वापत्तिः ŚatDū. 202.19; **ii** not to be condemned, not to be treated with contempt अनभिभवनीयाः परकथाः। ··· पुरुषमभिजातं कथयति SūktiRa. 168.39; Subhāṣi. 281.

अनभिभवनीयता (anabhibhavanīya–tā) *f.* the state of not being liable to be overpowered, unassailability तेजः परैरनभिभवनीयता GītāBh.(Rā.) 683.5 (*on* 18.43)

अनभिभवनीयत्व (anabhibhavanīya–tva) *n.* the state of not being liable to be overpowered, unassailability तेजो दुर्जनैरनभिभवनीयत्वम् GītāBh.(Rā.) 608.10 (*on* 16.3); परतेजोभिरनभिभवनीयत्वादुग्रशब्दवाच्यत्वं ब्रह्मणः BrahmSūBh.(Śrī.) i. 127.5 (*on* i. 1.2)

अनभिभवनीयाकृति (anabhibhavanīyākṛti) *adj.* whose form is unassailable अनभिभवनीयाकृतिम् ··· शबरसेनापतिमपश्यम् Kād. 31.23.

अनभिभवसमर्थ (an–abhibhavasamartha) *adj.* **1** not capable of being rejected गुणवाचेव वानभिभवसमर्थं यागे गुणविधानमाश्रयति TantrVā. 290.19 (*on* i. 4.3); **2** not capable of being assailed, unassailable अनभिभवसमर्थं धर्मदुर्गं प्रविश्य प्रविभजति समर्थामर्थचिन्तामिदानीम् TantrVā. 333.1 (*on* i. 4.23)

अनभिभाव्य (an–abhibhāvya) *adj.* who cannot be conquered or defeated, unassailable ईश्वराः कामरूपिणः। अना(?न)भिभाव्या विक्रान्ताः सर्वलोकनमस्कृताः BrahmāṇḍP. ii. 7.165.

अनभिभाषण (an–abhibhāṣaṇa) *n.* absence of conversation or talk प्राणत्यागश्च वैदेह्या भवेदनभिभाषणे Rāmā. v. 28.36; मुमुक्षूणामुदयनानि व्याख्यास्यामः। तत्र ··· अनभिभाषणं च स्त्रीणाम् CaraS. iv. 5.13 (1922 Ed.); सततमनभिभाषणं मया ते परिगणितं (भवति) भवतीमनानयन्त्या ŚiśuVa. 7.9 = VyaktiVi. 58.12; *adj.* not talking पितरं ते स दृष्ट्वैव पप्रच्छानभिभाषिणम् (v. l. ···) ···Bhā. i. 37.6.

अनभिभाषमाण (an-abhibhāṣamāṇa) *adj.* not speaking or talking to सर्वरात्रं तिष्ठेत् स्त्रीशूद्रमनभिभाषमाणः MānŚS. 113.19; पतितामपि तु मातरं बिभृयादनभिभाषमाणः BaudhDS. ii. 2.43.

अनभिभाषित (an-abhibhāṣita) *adj.* not addressed नानभिभाषितो गुरुमभिभाषेत प्रियादन्यत् HirŚS. xxvi. 2.102 (38.19) = ĀpaDS. i(2).8.14.

अनभिभाषिन् (an-abhibhāṣin) *adj.* not talking (i.e. silent) पितरं ते स दृष्ट्वैव पश्चाच्छानभिभाषिणम् MahāBhā. i. 37.6.

अनभिभाष्य (an-abhibhāṣya) *ger.* not having talked to, not talking to स्त्रीशूद्राभ्यामनभिभाष्य ··· व्रतपारायणं विज्ञायते VaikhāGS. 2.11; अनभिभाष्यैनाम् ··· अतिक्रमिष्यामः Ubhayābhi. 8.21; का शक्तिरनभिभाष्यातिक्रमितुम् DhūrtaViSaṁ. 8.19; PādaTā. 12.5; PadmPrā. 12.20; 16.21; 20.17; वक्तव्यसमयेऽपि वचसा[न]भिभाष्य क्रियानुष्ठानं विहतम् SaraKaṇṭhā. 619.16

अनभिभुजत् (anabhibhujat) [w. r. for अनभिभुजम्] VārāŚS. I. ii. 4.61.

अनभिभुजम् (an-abhibhujam) *adv.* without folding (inside) तेन धर्मेणानभिभुजन् (अनभिभुज्म् Ed. KASHIKAR) कृष्णाजिनमास्तीर्य ··· दृषदमादधाति VārāŚS. I. ii. 4.61.

अनभिभूत (an-abhibhūta) *adj.* [*f.* -ā] **i** not overpowered, not affected स वा एष आत्मा ··· सितासितैः कर्मफलैरनभिभूत इव प्रतिशरीरेषु चरति MaitrīU 367.9(2); गन्धव्यञ्जकम् ··· जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम् PadārthaSaṁ. 28.6 (NyāyKa. अनभिभूतैरप्रतिहतसामर्थ्यैः); रसव्यञ्जकं विजात्यनभिभूतैर्जलावयवैरारब्धं रसनम् PadārthaSaṁ. 36.6; NyāyKa. 38.17; तच्चानभिभूतं रूपमन्यथाशक्यनिदर्शनं व्यापारान्तरसंस्पर्शेनैव निदर्शयन्ति BhāvanāVi. 101.2; यः कुर्याद् भूपतिः ···। तुलाभाराह्वयं कर्म ···। रोगैरनभिभूतश्च भविष्यति PāraS. 20.133; पृथक् प्राणं मृत्युना अनभिभूतं तमनुक्रामति BrahmSūBh.(Śaṅ.) 517.4 (*on* ii. 4.19); अत्रेन्द्रनीलभित्तिषु ···। अन्योऽन्यानभिभूते तेजस्तमसी प्रवर्तेते Kāvyālaṅ.(Ru.) 9.34; तमसानभिभूतस्य ··· विपश्चितः।··· शुद्धसत्त्वप्रसादस्य संततिस्तुर्यसंज्ञिता LakṣmīT. 22.25; क्लिष्टान्तरवर्तितया च क्लिष्टाभिरनभिभूता अक्लिष्टाः TattvVai. 10.25 (*on* 1.5); (सूक्ष्मा प्रज्ञा) उपजाता च तैरपरामृष्टानभिभूता नैव यावत्परामृश्यते TattvVai. 58.25 (*on* 2.2): उक्तलक्षणाः क्लेशाः। तेषु अनभिभूतेषु सत्सु कर्मणाम् ··· विपाकः फलं जात्यायुर्भोगा भवन्ति RājMār. 27.7; अहं च चषकचुम्बनमात्रपरो मदिरयानभिभूतः ··· निष्क्रान्तोऽस्मि KarpūC. 28(1); (सजातीयविजातीयैः) तैरतिरस्कृतोऽनभिभूतोऽविरुद्ध इति यावत्। एवंविधो भावः (स्थायी) ŚṛṅgāMañ.(A.) 52.24; **ii** not vitiated, not rendered impure पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरनभिभूतममूर्वहन्ति ŚiśuVa. 4.34; **iii** not obscured, not concealed प्रासमर्थम् ··· तैजसम् ··· अनभिभूतं तु मार्तण्डमण्डलं गृह्णात्येव TātpaṬ.(Vā.) 121.13 (*on* i. 1.4); निमीलिते तु नेत्रे प्रभारूपाग्रहणादनभिभूतानि (नीलरूपाणि) गृह्यन्ते NyāyRa. 741.8 (*on* 6.41); (महत्यनेकद्रव्यवत्त्वाद् रूपाच्चोपलब्धिः) रूपाच्चेति उद्भूतादनभिभूताद् Upask. 198.6 (*on* iv. 1.6); **iv** not restricted व्यवच्छेदकधर्मेणानभिभूतं सारूप्यमिहाभिप्रेतम् NyāyVārPari. 389.13.

अनभिभूतत्व (anabhibhūta-tva) *n.* **i** the state of not being overpowered महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेणोत्पन्नो महांस्तेजोराशिः केनचिदनभिभूतत्वाद्देदीप्यमानस्तिष्ठति PadārthaSaṁ. 49.6 = NyāyKa. 52.22; **ii** the state of not being obscured पचतिशब्दवदेव पच्यत इत्येवमाद्यभिहितापि संख्यानभिभूतत्वात्कर्तुरेव प्राप्नोति न कर्मणः TantrVā. 946.23 (*on* iii. 4.13); उत्तरस्य निरोधसंस्काररूपस्योद्भवोऽनभिभूतत्वेनावस्थानम् RājMār. 46.3; रूपविशेषः तच्चोद्भूतत्वमनभिभूतत्वं रूपत्वं च Upask. 201.3 (*on* iv. 1.8); **iii** the state of not being restricted व्यवच्छेदकधर्मेणानभिभूतं सारूप्यमिहाभिप्रेतम्, व्यवच्छेदकानभिभूतत्वं च तत्र नास्ति NyāyVārPari. 389.13.

अनभिभूतबुद्धिसत्त्व (anabhibhūta-buddhisattva) *adj.* whose *sattva* (goodness) of the thinking-substance is unsuppressed दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्त्वेन त्वया ··· सुखदुःखयोः किमधिकमुपलब्धम् YogBh. 148.9 (*on* 3.18)

अनभिव्यक्तकल्पन (an-abhivyaktakalpana) *adj.* not having the distinct formation (i.e. development into name and form) अस्त्याधारतया महान्ननभिव्यक्तकल्पनम् । सदेव सोम्येदमग्र आसीदिति श्रुतेर्बलात् BṛBrahmaS. ii. 2.58.

अनभिव्यक्तकार्य (anabhivyakta-kārya) *n.* effect or product which is (yet) unmanifest अनभिव्यक्तकार्यसंसृष्टा शक्तिः तदभिव्यक्तिं नियमयतीत्यर्थः PrakaVi. 436.19.

अनभिव्यक्तक्रियापदार्थक (anabhivyaktakriyāpadārtha-ka) *adj.* in which the general action and the meaning (i.e. case-relation, grammatical number and person) are not manifested भावयांबभूवेति । ··· किमर्थं पुनरिदमुच्यते । यावतामन्तमिदम् । अनभिव्यक्तक्रियापदार्थकम् । अतो हि क्रियाकालमात्रस्याभिव्यक्तिर्भवति । न साधनपुरुषसंख्यानाम् । न हि विना तिङन्तपदेन तासामभिव्यक्तिर्भवति Nyās. i. 532.9 (*on* iii. 1.40)

अनभिव्यक्तज्ञान (anabhivyakta-jñāna) *adj.* whose cognition has ceased to manifest जीवस्य ··· विशेषज्ञानाभाववत्त्वम् 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती'ति श्रुत्याविष्कृतम् । विनश्यत्यनभिव्यक्तज्ञानो भवति VedāntKau. 432.2 (*on* iv. 4.16)

अनभिव्यक्तता (anabhivyakta-tā) *f.* the state of not being manifest or clear अपरेऽपि ईश्वरसृष्टत्वात् सत्यत्वं पूर्वपक्षीकृत्य देशादिभिरनभिव्यक्ततया मिथ्यात्वमाहुः ŚrutaPra. ii. 430.18 (*on* iii. 2.6)

अनभिव्यक्तत्व (anabhivyakta-tva) *n.* 1 the state of being not (clearly) expressed लिङ्गस्य चानभिव्यक्तत्वादृषभस्येनुदात्तं च यथालिङ्गं योज्यम् BālaKrī. ii. 143.20 (*on* 3.260 (? 266)); 2 the state of being (yet) unmanifest प्रत्यक्षेण तु तदानीमनुपलम्भोऽनभिव्यक्तत्वादभिव्यक्तिसंपादन एव च कारकप्रयत्नसाफल्यं, कार्यं तु सदेवेति NyāyMañ. ii 64.2; प्रागजातत्वादनुपलब्धः प्रयत्नेन जनित उपलभ्यतामापद्यते अनभिव्यक्तत्वाद्वाभिव्यज्यत इति PrakaPañ. 354.7; यदि कारणव्यापारात् प्रागपि पटस्तन्तुषु सन्नेव किमित्युपलब्धिकारणेषु सत्सु सन्तमपि जिज्ञासायां नोपलभ्यते । अनभिव्यक्तत्वादिति चेत् NyāyKa. 143.26; चित्रगन्धादीनि विद्यमानान्येवानभिव्यक्तत्वान्नोपलभ्यन्ते NyāyRa. 443.9 (*on* 5(6).32); आहवनीयैकदेश एव आग्नीध्रीयः होमसंयोगात् यावदस्योद्धरणं तावत् अनभिव्यक्तत्वमेव शालामुखीयेऽस्य SaṅkarKāBh. 140.11 (*on* iii. 2.31); अनादिमनोगतान् संस्कारान् स्वेच्छामात्रेण प्रदर्शयति । नान्येन साधनेन । सम्यगनभिव्यक्तत्वात् BrahmSūBh.(Ma.) 48A. 7 (*on* iii. 2.3); अव्याकृतत्वं नामरूपविशिष्टतयानभिव्यक्तत्वमस्तु ŚrutaPra. ii. 128.27 (*on* i. 4.14); प्रागनभिव्यक्तत्वेनानुभवाभावसंभवात् TattvPrakā. 120A. 9 (*on* ii. 3.31); अनुभूतायां धानायामेव महान् न्यग्रोधस्तिष्ठति स त्वयानभिव्यक्तत्वात् न ज्ञायते AdvaiSi. 838.1.

अनभिव्यक्तदोष (anabhivyakta-doṣa) *m.* defect which is not clearly known पैशुन्यम्, अनभिव्यक्तदोषाविष्करणम् ViraMi.(Rājanīti.) 148.23.

अनभिव्यक्तनामरूप (anabhivyakta-nāmarūpa) *adj.* whose name and form are not (yet) manifest यदि जगदिदमनभिव्यक्तनामरूपम् ··· अव्यक्तशब्दार्हमभ्युपगम्येत BrahmSūBh.(Śaṅ.) 230.14 (*on* i. 4.3); 'असद्वा इदमग्र आसीत्' ··· असच्छब्दोऽनभिव्यक्तनामरूपभूतसूक्ष्मवस्तुवाचक इति गम्यते VedāntKau. 162.10 (*on* ii. 1.17)

अनभिव्यक्तनामरूपक (anabhivyaktanāmarūpa-ka) *adj.* whose name and form are not (yet) manifest इदं जगत् कारणावस्थापन्नम् अनुद्भूतम् अनभिव्यक्तनामरूपकम् असदादिशब्दैरभिधीयते VedāntRaMañ. 1.4 (68.10)

अनभिव्यक्तनामरूपता (anabhivyaktanāmarūpa-tā) *f.* the state of having unmanifest name and form (चिदचित्पदार्थजातम्) अन्तःस्थितमनभिव्यक्तनामरूपतया स्वात्मनि स्थितं बहिरभिव्यक्तनामरूपतया प्रकाशयेदित्यर्थः ŚivārkaMaDī. i. 341.14 (*on* i. 2.9)

अनभिव्यक्तनामरूपत्व (anabhivyaktanāmarūpa-tva) *n.* the state of having unmanifest name and form श्रुत्या शून्याच्छून्यस्य जन्म सद्रूपेण नोक्तम्, किं त्वनभिव्यक्तनामरूपत्वादशून्यमेवासदासीदित्युक्तम् IṣṭaSi. 190.11; सृष्टेः प्रागनभिव्यक्तनामरूपत्वादिदम्(? इव)त्वेनागृह्यमाणमपि विश्वं सदेव भवति VedāntKau. 163.19 (*on* ii.1.18)

अनभिव्यक्तपदार्थ (anabhivyakta-padārtha) *adj.* in which the meaning (viz. case-relation, grammatical number and person) is not manifested अभिव्यक्तपदार्थेन हि वाक्याध्याहारेति नमः सामर्थ्यम्, न त्वनभिव्यक्तपदार्थेनामन्तमात्रेण PadMañ. *on* KāśiVṛ. *on* P. ii.4.81

अनभिव्यक्तपदार्थक (anabhivyaktapadārtha-ka) *adj.* in which the meaning (viz. case-relation, grammatical number and person) is not manifested इहामन्तमेतदनभिव्यक्तपदार्थकम् PadMañ. *on* KāśiVṛ. *on* P. iii. 1.40.

अनभिव्यक्तपदार्थकत्व (anabhivyaktapadārthaka-tva) *n.* the state of being that in which the meaning (viz. case-relation, grammatical number and person) is not manifested ननु च द्विस्वान्तस्यानभिव्यक्तपदार्थकत्वाद्धातुसंबन्धे प्रत्ययविधानाभावानुप्रयोगः सिद्धः PadMañ. *on* KāśiVṛ. *on* P. iii. 4.5.

अनभिव्यक्तपदार्थत्व (anabhivyaktapadārtha-tva) *n.* the state of being that in which the meaning (viz. case-relation, grammatical number and person) is not manifested आमन्त्तस्यानभिव्यक्तपदार्थत्वाच्च स्व.भ.विक्रयेवानुवर्त्तिस्तत्रवादेर्लुग्द्वारेणान्वाख्यायते Pradī. ii. 570A. 2 (*on* ii. 4.81)

अनभिव्यक्तपर (anabhivyakta-para) *adj.* having reference to the unmanifested (into name and form) 'तद्धेदं तर्ह्यव्याकृतमासी'दिति वाक्येऽप्यव्याकृतशब्दस्तु साक्षादेवानभिव्यक्तपरः ŚivārkaMaDī. i. 530.27 (*on* i. 4.14)

अनभिव्यक्तपरत्व (anabhivyaktapara-tva) *n.* the state of having reference to the unmanifested (into name and form) 'असद्वा' इत्यत्रासच्छब्दस्यानभिव्यक्तपरत्वेनानिषेधत्वात् AdvaiSi. 734.20.

अनभिव्यक्तब्रह्मवर्चस (anabhivyakta-brahmavarcasa) *adj.* [P. v. 4.78] whose divine glory or splendour is not manifest शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः ··· स्थण्डिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः ··· अतज्ज्ञजनावमतो विचचार BhāgP. v. 9.10.

अनभिव्यक्तम् (anabhivyaktam) *adv.* indistinctly विरहोन्मादमूर्च्छायामीर्ष्यायां वाङ्गनाजनैः । ऊ इत्येवानभिव्यक्तं वक्तव्यं नाटकादिषु SāhiSā. 3.47.

अनभिव्यक्तमञ्जीरनादा (anabhivyakta-mañjīranādā) *adj.* (*f.*) the tinkling of whose anklets is indistinct सान्द्रैर्वेदध्वनिभिरनभिव्यक्तमञ्जीरनादा मौञ्जीबन्धात्प्रभृति वदने यस्य वाग्देवतासीद् VikraDeC. 18.81.

अनभिव्यक्तमुखपञ्चक (anabhivyakta-mukhapañcaka) *adj.* whose five faces (out of six) are invisible अनभिव्यक्तमुखपञ्चकमिव महासेनम् ··· आत्मजं ददर्श Kād. 72.8.

अनभिव्यक्तरत्नोत्पत्ति (anabhivyakta-ratnotpatti) *adj.* emergence of whose gems is not (yet) manifest अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः । प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः RaghuVa. 10.3.

अनभिव्यक्तरूप (anabhivyakta-rūpa) *adj.* the form of which is not clearly visible लाञ्छनादेषु मूर्तीनां प्रासादावयवेष्वपि । अनभिव्यक्तरूपेषु लक्षणादेः परीक्षणात् । स्वप्नादेश्चापि विप्रेन्द्र देशिकेन्द्रोऽप्रेरतः । यथावद् संपरीक्षेत PārmS. 10.83; *n.* A form which is (yet) unmanifest अनभिव्यक्तरूपेण सतोऽपि अभिव्यक्तरूपेण जन्मेति चेत्, तथाप्यभिव्यक्तरूपस्य प्रागसत्त्वादसत्यात्मता IṣṭaSi. 159.5; 'तद्धेदं तर्ह्यव्याकृतमासी'दित्यादिश्रुत्या तत्काले कार्यस्यानभिव्यक्तरूपेण स्थितिबोधनात् LaCandr. 161.28; B indistinct form अनभिव्यक्तरूपेण सुषुप्त्यादावप्यस्ति बुद्धिसंबन्धः PrakaVi. 631.21; ज्ञानस्य सुषुप्त्यादिषु सत एव, अनभिव्यक्तरूपेण विद्यमानस्यैव जागरादिषु अभिव्यक्तियोगात् VedāntKau. 229.17 (*on* ii. 3.30)

अनभिव्यक्तरूपक (anabhivyaktarūpa-ka) *adj.* of unmanifest form तथा वा शिवतत्त्वस्य संभूतेस्तथा तथा । एकैकशोऽस्ति चैतन्यमनभिव्यक्तरूपकम् ŚivDṛ. 5.21.

अनभिव्यक्तरूपता (anabhivyaktarūpa-tā) *f.* the state of having the form which is not distinct संयुगे रजसोद्रिक्ते तस्मिन् सत्त्व(? त्व)मनभिव्यक्तरूपता YādavL. 16.89 (comm. अनभिस्त्विषोः । अर्थिप्रत्यर्थिनोरासीदनभिव्यक्तरूपता अलक्षितरूपता)

अनभिव्यक्तरूपत्व (anabhivyaktarūpa-tva) *n.* the state of having the unmanifest form केनापि प्रमाणेनानभिव्यक्तरूपत्वादुभयोः 'द्वे वाव रूपे' ··· प्रकारतयोपदिष्टं जगदैश्वर्यं नेतीति न निषिध्यते किं तु महत्त्वेयत्तामात्रं निषिध्यते VedāntDī. 160.11 (*on* iii. 2.23)

अनभिव्यक्तलक्षण (anabhivyakta-lakṣaṇa) *adj.* [*f.* -ā] characteristics of which are not distinct स्वमन्त्रशक्तिव्यूहानां व्यक्त्ये परमेश्वरः। स्वेच्छया शब्दशक्ति स्वामनभिव्यक्तलक्षणाम्। प्रकाश्य PauṣkS. 33. 79; क्वचित् क्वचित् प्रदेशेषु भगवन्तं जगत्पतिम्। तदीयं कर्म च ज्ञानमप्रगाढया वदन्ति हि। तथा वदति संक्षिप्तमनभिव्यक्तलक्षणम् PāraS. 1. 48.

अनभिव्यक्तलिङ्गसंख्यत्व (anabhivyaktaliṅgasaṅkhya-tva) *n.* the state of being that (i. e. the constituents of the compound form) in which the grammatical gender and number are not evident (ब्राह्मक्षत्रिय-विट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः) अत्र वृत्तीनामनभिव्यक्तलिङ्गसंख्यत्वात् ब्राह्मणाश्च क्षत्रियाश्चेत्यादिविग्रहेऽपि प्रकृतसमासोपदेशाद्या इत्यनेन ब्राह्मणा एवोक्ता इति भ्रमनिरासाय त्रय इत्युक्तम् VīraMi. 26.9 (*on* 1. 10)

अनभिव्यक्तवचनभेद (anabhivyakta-vacanabheda) *adj.* in which the distinction in the grammatical number is not evident यदि किल समासः क्रियेत समासोऽनभिव्यक्तवचनभेदः तस्माद्वचनभेदव्यक्त(? क्ति)निमित्तासमासः NyāyVār. 156. 3 (*on* i. 2. 42)

अनभिव्यक्तवर्णत्व (anabhivyaktavarṇa-tva) *n.* the state of being that in which the sounds are not clear or distinct मण्डपे विप्रकृष्टे तु पाठ्यमुच्चरितस्वरम्। अनभिव्यक्तवर्णत्वादिस्वरत्वं भृशं व्रजेत् NāṭyaŚā. 2. 86 (? 88)

अनभिव्यक्तवाच् (anabhivyakta-vāc) *adj.* whose speech is inarticulate or unclear ततस्तानभिव्यक्तवाचः शापेन तत्क्षणम्। भेकान्कृत्वा तिरोभूय भूयोऽग्निर्नेन्दरं ययौ KathāSaSāg. iii. 6. 77.

अनभिव्यक्तविकृति (anabhivyakta-vikṛti) *adj.* in which no change is visible अनभिव्यक्तविकृतिः विषये सत्त्वभूयसी। यत्रापह्नियते दृष्टिर्विपर्ययैरपहारिभिः। तदेव स्थैर्यमित्युक्तं दृष्टेः सर्वत्र कोविदैः BhāvPra.(Śā.) 127. 4(5)

अनभिव्यक्तविशेषाकार (anabhivyakta-viśeṣākāra) *adj.* in which the distinctive feature is not clearly revealed (गकारादेर्वोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात्) एवकारेणैकलः शब्दो व्यावर्त्यते, न तु दुन्दुभिशब्दादिः। स त्वनभिव्यक्तविशेषाकारो गकारादिरेव ŚrutaPra. iA. 180. 28 (*on* i. 1. 1)

अनभिव्यक्तशब्द (anabhivyakta-śabda) *adj.* **I** not having the sounds clearly revealed (मन्त्राः) अनभिव्यक्तशब्दास्ते निराकारास्तथैव च। घण्टायां चाल्यमानायां निर्यान्ति च सहस्रशः JayāS. 13. 204 = PāraS. 6.101; **II** which does not clearly reveal a sound स्याच्छ्रोतुः फलसंबन्धो वक्ता हि व्यक्तिकारणम्। अनभिव्यक्तशब्दानां करणानां प्रयोजनम्। मनोजपो वा व्यर्थः स्यात् PramāVār. 1. 300; *m.* word which is not revealed, cf. अनभिव्यक्तशब्दग्रहण.

अनभिव्यक्तशब्दग्रहण (anabhivyaktaśabda-grahaṇa) *n.* comprehension of (the meaning of) a word which is not revealed न तावदनभिव्यक्तशब्दग्रहणसमर्थपुरुषसद्भावेऽनुमानं प्रमाणम् TātpaṬ.(U.) 80. 11 (*on* 2.144); नाध्यक्षमनभिव्यक्तशब्दग्रहणशक्तिमत् NyāyMañ. i. 36. 11.

अनभिव्यक्तश्रुतिविषय (anabhivyakta-śrutiviṣaya) *adj.* which does not clearly reveal a sound (*lit.* object of hearing) तत्र यदि शब्दात्मनां मन्त्राणामभिव्यक्तिहेतुः प्रयोक्ता, अनभिव्यक्तश्रुतिविषयाणां करणानां प्रयोक्ता जापी न मन्त्रफलेन युज्यते PramāVāSvopVṛ. 107. 3 (Karnakagomin श्रुतिविषयः शब्दः सोऽनभिव्यक्तो यैः कारणैरिति विग्रहः)

अनभिव्यक्तसंस्थानता (anabhivyaktasaṃsthāna-tā) *f.* the state of being that whose configuration is not clearly revealed दूरादनभिव्यक्तसंस्थानतया गोत्वाग्रहदशायां गवि गौरिति गोभिन्न इति वा व्यवहारः स्यात् RasGaṅ. 183. 10

अनभिव्यक्तसंबन्ध (anabhivyakta-sambandha) *adj.* whose relation is not made clear निगमनाभावे चानभिव्यक्तसंबन्धानां प्रतिज्ञादीनामेकार्थेन प्रवर्तनं तथेति प्रतिपादनं कस्येति NyāyBh. 51. 10 (*on* i. 1. 39); असति हि तस्मिन् (निगमने) अनभिव्यक्तसंबन्धानामर्थप्रतिपादकत्वं न स्यात् Kāśi. ii. 40. 10 (*on* 5(2). 26)

अनभिव्यक्तसादृश्य (anabhivyakta-sādṛśya) *n.* unmanifested similarity गवयदर्शनात्पूर्वमपि गव्यनभिव्यक्तसादृश्यग्रहणोपपत्तेः NyāyMañ. i. 134. 7.

अनभिव्यक्तसामान्यवाचिन् (anabhivyaktasāmānyavāc-in) *adj.* denotative of a thing in general which is not (yet) developed (into name and form) तत्रासदव्याकृतशब्दाभ्यामनभिव्यक्तसामान्यवाचिभ्यामाकाशादिषु कारणत्वेन विशेषवाक्यनिर्दिष्टस्यात्मन एवोक्तेः न तान्त्रिकाव्यक्तग्रहणम् ŚivārkaMaDī. i. 530. 28 (*on* i. 4. 14)

अनभिव्यक्तस्वरूप (anabhivyakta-svarūpa) *adj.* [*f.* -ā] whose essential nature is not clearly manifested (ह्रीम्) अव्यवहितपूर्वनाम्नानभिव्यक्तस्वरूपस्यापि शब्दजालस्य एतद्बीजमात्रात्मनैवाङ्कुरितबीजार्थवत्तया पूर्वमावित्वमुक्तम् LalitāTriBh. 319. 9 (*on* 38); NayaVi. 54. 3 (*on* i. 1.2); ये चाप्यक्षरं प्रत्यगात्मस्वरूपं तदेव चाव्यक्तं चक्षुरादिकरणेनानभिव्यक्तस्वरूपमुप[illegible] 561. 13 (*on* 12. 1); *n.* unmanifest form तत्र चासौ (वक्तुरभिप्रायः) सूक्ष्मतयानभिव्यक्तस्वरूपस्थित एव पदार्थबुद्धौ स्थूलतया केवलं व्यक्तोऽवभासते VyaktiVi. 67. 11.

अनभिव्यक्तस्वरूपत्व (anabhivyaktasvarūpa-tva) *n.* the state of being that whose essential nature is not clearly manifested मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् BrahmSū. iii. 2. 3; ग्राहकोऽपि अयम् ... विश्वशरीरशिवैकरूप एव, केवलं तन्मायाशक्त्या अनभिव्यक्तस्वरूपत्वात् संकुचित इव आभाति PratyabhiHṛ. 10. 2(4); तस्य सत्यसंकल्पादियुक्तस्यापि संसारदशायां कार्त्स्न्येनानभिव्यक्तस्वरूपत्वान्न जीवस्य तथाविधाश्चर्यसृष्टिरुपपद्यते BrahmSūBh.(Rā.) 584. 15 (*on* iii. 2. 3); VedāntDī. 152. 4 (*on* iii. 2. 3); VedāntPāSau. 273. 13 (*on* iii. 2. 3); VedāntKau. 273. 21 (*on* iii. 2. 3): स्वाप्नार्थमिथ्यात्वं प्रतिज्ञाय जागरितार्थानामनभिव्यक्तस्वरूपत्वं हेतुरुच्यत इति व्यधिकरणं स्यात् ŚatDū. 244. 21; 242. 4; कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् देशकालनिमित्तसंपत्तिरबाधश्च कार्त्स्न्यं तेनाभिव्यक्तस्वरूपत्वाभावात् NyāySu.(Ja.) 462B. 7 (*on* iii. 2. 1); 463A. 6 (*on* iii. 2. 1); AṇuBh. 184. 1 (*on* iii. 2. 3)

अनभिव्यक्ताकार (anabhivyaktākāra) *adj.* of indistinct form अनुल्लिखिताक्षमिति। अनभिव्यक्ताकारम् Kāvyānu.(He.) 230. 20.

अनभिव्यक्ताग्नि (anabhivyaktāgni) *m.* fire which is not clearly visible न ह्यनभिव्यक्ताग्न्यदाह्यत्वेऽपि तृणाद्युपारूढाग्निदाह्यस्य न मुख्यमग्निदाह्यत्वम् GuruCandr. ii. 169. 9.

अनभिव्यक्तार्थ (anabhivyaktārtha) *adj.* whose meaning (i. e. the case-relation, grammatical number and person) is not evident (आमन्त्रेन) अभिव्यक्तपदार्थेन नञः सामर्थ्यं न त्वनभिव्यक्तार्थेन PradI. ii. 571B. 33 (*on* ii. 4. 81)

अनभिव्यक्तार्थत्व (anabhivyaktārtha-tva) *n.* the state of being that of which the meaning is not clear 'विशिष्टकारणत्वा'दिति हेतोश्चानभिव्यक्तार्थत्वेन ततस्तत्तात्पर्यस्य निर्णेतुमशक्यत्वात् ŚivārkaMaDī. i. 7. 6 (*on* i. 1. 0)

अनभिव्यक्तासाधारणविशेष (anabhivyaktāsādhāraṇaviśeṣa) *adj.* distinct features of which are not clearly visible सुवर्णादीनां तु द्रव्यान्तरसंपर्कादभिभूतस्वरूपाणामनभिव्यक्तासाधारणविशेषाणां क्षारप्रक्षेपादिभिः शोध्यमानानां स्वरूपेणाभिनिष्पत्तिः स्यात् BrahmSūBh.(Śaṅ.) 175. 9 (*on* i. 3. 19)

अनभिव्यक्ति (an-abhivyakti) *f.* **I** non-revelation (to the senses, mind, intellect etc.) (i. e. concealment, obscurity, indistinctness, non-prominence), non-cognition (अपवर्गे) न सुखाभावो नानभिव्यक्तिरस्ति, उभयस्य नित्यत्वात् NyāyBh. 34. 3 (*on* i. 1. 22); व्यधिकरणस्यानभिव्यक्तेरधिकरणवचनम् NyāyBh. 105. 14 (*on* ii. 1. 37); अतीतस्यानभिव्यक्तौ कथमात्मसमर्पणम् NyāyVi. 2. 32; वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिः, न स्वरूपाभावात् BrahmSūBh.(Śaṅ.) 452. 1 (*on* ii. 3. 18); अनभिव्यक्तिः अज्ञानम् अभिव्यक्तिलक्षणेन ज्ञानेन विरुध्यते BṛĀraUBh. 388. 13 (*on* iii. 3. 1); उपलब्धिसमानाश्रयत्वे तु व्यवधानकल्पनानुपपत्तेः सर्वदा अभिव्यक्तिः अनभिव्यक्तिर्वा, न तु अन्तरालकल्पनायां प्रमाणमस्ति BṛĀraUBh. 621.3 (*on* iv. 4. 6); एवं केषांचित् स्वलक्षणानामभिव्यक्तौ स्वाभाविकीं शक्तिमुक्त्वेदानीमन्येषामनभिव्यक्तौ कार्यादर्शनात् स्वभाव एव शरणम् Śarka. 11. 4; स्वप्रकाशस्य चाभिभवावरणानभिव्यक्तीनामसंभवः PrakaPañ. 242. 13; अव्याकृतेऽनभिव्यक्तेर्न चेत्तत्त्वमीक्ष्यते BṛĀraUBhVā. i. 4. 711; अज्ञानमनभिव्यक्तिर्बोधोऽभिव्यक्तिरात्मनः BṛĀraUBhVā. iii. 3. 95; इन्द्रियाणामसामर्थ्यमात्रमत्र विनाशिता। असावेवानभिव्यक्तिः स प्रच्छन्नस्तदा स्थितः ŚivDṛ. 4. 58; मितिरेवेयम्, किं तु अस्यां दशायां मितिरूपानभिव्यक्तेर्न 'मितिः' इति व्यपदिश्यते NayaVi. 53. 5 (*on* i. 1. 2); दर्शितश्च विसंवादो भाष्यकृता कार्त्स्न्येनानभिव्यक्तिं विवृण्वता Bhām. 547. 13 (*on* iii. 2.3); स (मोक्षः) चाविद्यास्तमय एव। न ह्यविद्यातोऽन्या स्वसंवेदनस्य सुखस्यानभिव्यक्तिर्नाम PramāMā. 20. 5; न चायं भूतधर्मः। सत्त्वकठिनत्वादिवत् मद्याङ्गेषु भ्रम्यादिमदशक्तिवद्वा प्रत्येकमनुपलम्भात्। अनभिव्यक्तावात्मसिद्धिः SyādvāMañ. 20(60); घटादिषु असद्व्यवहारस्य ...। अनभिव्यक्त्या सविषयत्वमिति चेन्न, अभिव्यक्तेरपि सदा सत्त्वेन तत्रापि नन्वर्थासिद्धेः ŚatDū. 219. 16; कुतो नव कम्बला इत्यस्यां कक्षायामविवक्षितदूषणाभिमानस्यानभिव्यक्तेः NyāyPari. 224. 10; प्रसुप्तत्वं प्रबोधसहकार्यभावेनानभिव्यक्तिः SarvaDaSaṃ. 15. 274; संसारदशायां तस्यानभिव्यक्त्या मनुष्यादिशरीरमात्रे परिच्छिन्नो यः कल्पितोऽहंभावस्स्थितस्स विगलितो भवति ŚivārkaMaDī. i. 288. 29 (*on* i. 1. 31); अनुच्चारणदशायां वर्णानामनभिव्यक्तिः तदुच्चारणरूपव्यञ्जकाभावात् न विरुध्यते VedāntPari. 229. 7; व्यभिचारिणो बाध्यत्वं तु तदीयरसनिष्पत्तिप्रतिबन्धमात्रात्, न त्वनभिव्यक्त्या, अभिव्यक्तौ बाधकाभावात् RasGaṅ. 61. 9; GoviBh. 195. 15 (*on* iii. 2. 3); 220. 3 (*on* iii. 3. 1); **II** absence of manifestation (through evolution into perceptible or distinct name and form etc.), non-manifestation तयोरभेदात् सदाभिव्यक्तिरनभिव्यक्तिरुभयं नोभयं वा स्याद्

IṣṭaSi. 159. 12; अभ्युपेताप्यभिव्यक्तिर्नाभिव्यङ्ग्यस्य विक्रिया। यथा तथानभिव्यक्तिः सर्वेषामपि वादिनाम् BṛĀraUBhVā. (Sambandha.) 147; अथोपलब्धियोग्यस्यार्थ-क्रियानिवर्तनक्षमस्य रूपस्य विरहोऽनभिव्यक्तिः तदानीमसत्कार्यवादः तथाभूतस्य रूपस्य प्रागभावे पश्चाद्भावात् NyāyKa. 144. 2; असद्वा इदमग्र आसीदित्यादौ असद्वचो भक्त्या। अनभिव्यक्तिश्च भक्तिः VedāntKa. 210. 9 (*on* i. 4. 14); न किंचनेत्य-नभिव्यक्तिरणिम्न इति सूक्ष्मता चोक्ता VedāntKa. 228. 15 (*on* i. 4. 28)

अनभिव्यक्तिकृत (anabhivyakti-kṛta) *adj.* caused by non-manifestation (कार्यकारणयोः) अभिव्यक्त्यनभिव्यक्तिकृतो भेदव्यवहारः IṣṭaSi. 187. 23.

अनभिव्यक्तिज्ञ (an-abhivyaktijña) *adj.* who does not know what *abhivyakti* (i. e. manifestation) is ननु तदेवेदमुत्पादकत्वमुक्तम्, प्रतिज्ञातं चाभिव्यञ्जकत्वं संयोगविभागानाम्। तस्मादसंबद्धमेवेदं प्रतिभाति। किमिति भोः। उक्तमितीति। अनभिव्यक्तिज्ञो भवान् Bṛha. 303. 5 (*on* i. 1. 13)

अनभिव्यक्तिज्ञता (anabhivyaktijña-tā) *f.* the state of being one who does not know what *abhivyakti* (i. e. manifestation) is अनभि-व्यक्तिज्ञो भवान्। कात्रानभिव्यक्तिज्ञता? इयमनभिव्यक्तिज्ञता, अभिव्यक्तिर्हि तिर-स्कारापनयः Bṛha. 303. 5 (*on* i. 1. 13)

अनभिव्यक्तितस् (anabhivyakti-tas) *adv.* due to non-revelation बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः NyāySū. iii. 1. 42; न पुन-रेवं चाक्षुषो रश्मिर्निरनुमानः, कुड्यादेरावरणस्य सामर्थ्यादिति तस्य विद्यमानस्य बाह्य-प्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः NyāyVār. 383. 18 (*on* iii. 1. 40); तथार्थावगतिर्वाक्यात् पदाद्वा नोपपद्यते। क्षणिकत्वेन शब्दानामनभिव्यक्तितोऽपि वा ŚivDṛ. 4. 97.

अनभिव्यक्तित्व (anabhivyakti-tva) *n.* non-revelation अज्ञाननिवृत्त्या अनभिव्यक्तिनिवृत्त्या। तेन वृत्तेः प्रमातृचिदुपरागार्थत्वपक्षस्यापि संग्रहः। अनुपरागस्या-प्यनभिव्यक्तित्वात् LaCandr. 490. 25.

अनभिव्यक्तिनिरासस्रृति (anabhivyaktinirāsa-sṛti) *f.* [Inst.] by way of the removal of the non-manifestation (of the object) सतोऽविना-शादसतोऽजनेश्च वृथा ततः कारणमत्र पक्षे। तस्मादभिव्यक्तिकरी न हेतुप्रवृत्तिरत्रार्थवती घटेत। न चानभिव्यक्तिनिरासस्रुत्या तस्मान्न सत्कार्यवचः प्रशस्तम् SaṁkṣeŚā. 3.214 (ii. 275. 6)

अनभिव्यक्तिनिवृत्ति (anabhivyakti-nivṛtti) *f.* cessation or disappearance of non-revelation अज्ञाननिवृत्त्या अनभिव्यक्तिनिवृत्त्या LaCandr. 490.24.

अनभिव्यक्तिप्रसङ्ग (anabhivyakti-prasaṅga) *m.* undesired contingency of non-revelation (of words) विपर्यासप्रकाशनं च निमित्तापेक्षन्, न च तदिहास्ति। न नादाः, तेषां तत्त्वपरिच्छेदहेतुत्वात् ··· विपर्यासनिमित्तत्वे वा न ततस्तद्रूपोपलब्धिरित्यनभिव्यक्तिप्रसङ्गः SphoṭSi. 136. 3.

अनभिव्यक्तिमात्र (anabhivyakti-mātra) *n.* mere non-revelation अज्ञानमिति। अभाव एव। न त्वनभिव्यक्तिमात्रमिति भावः NyāySu.(Ja.) 99A. 13 (*on* i. 1. 2)

अनभिव्यक्तीभू (anabhivyaktī-bhū-) I. P. to be unmanifested सर्गमात्रे मृत्पिण्डं हेमपिण्डं वा विशन्तो घटकुण्डलादयोऽव्यक्तीभवन्ति कारणरूपेणाभि-व्यक्ता अपि कार्यरूपेणानभिव्यक्तीभवन्ति SāṁkhyaTaPra. 168. 17.

अनभिव्यक्तेष्टफल (anabhivyakteṣṭaphala) *n.* desired result which is not (yet) visible ह्रींकारास्थाननर्तकी। ··· ह्रींकारवाच्यार्थतया ··· अभिव्यक्ता-नभिव्यक्तेष्टफलसाधनतया स्वकीयपुण्यादितारतम्येन बुद्धिशुद्धिभेदात्प्रतिभाति LalitāTriBh. 349. 10 (*on* 56)

अनभिव्यक्तैश्वर्य (anabhivyaktaiśvarya) *adj.* having unrevealed power वस्तुतः स्वतःसिद्धैश्वर्योऽप्युपासक उपाधिनिकर्षादनभिव्यक्तैश्वर्यस्तं प्रत्या-विर्भूतैश्वर्यं विशुद्धोपाधिमद् ब्रह्मोपास्यम् VedāntKa. 109. 21 (*on* i. 1. 11)

अनभिव्यक्त्यभिप्राय (anabhivyakty-abhiprāya) *m.* intention to convey non-manifestation 'असद्वा इदमग्र आसी'दिति वाक्ये तावदनभि-व्यक्त्यभिप्रायेण सद्वस्तुपर एवासच्छब्दो वक्तव्यः ŚivārkaMaDī. i. 530. 25 (*on* i. 4. 14); *adj.* having the intention to convey non-manifestation अतस्तत्समाकर्षणानुरोधादसच्छब्दः सत्येवानभिव्यक्त्यभिप्रायो लाक्षणिकः कल्पनीयः ŚivārkaMaDī. i. 531.34 (*on* i. 4. 15)

अनभिव्यक्त्यभ्युपगम (anabhivyakty-abhyupagama) *m.* supposition of non-manifestation (ननु यद्यनभिव्यक्ते वस्तुनि अभिव्यक्तिस्सदा अस्ति तदनन्या च) अभिव्यक्तेश्चाभिव्यक्त्यनभिव्यक्त्यभ्युपगमेऽनवस्थाप्रसङ्गः IṣṭaSi. 191.3.

अनभिव्यक्त्ययोग (anabhivyakty-ayoga) *m.* impropriety of non-revelation एकरूपस्य स्वयंज्योतिषोऽनभिव्यक्त्ययोगात् नान्यदभिव्यञ्जकं समस्ति IṣṭaSi. 28. 14.

अनभिव्यक्त्यवस्था (anabhivyakty-avasthā) *f.* the state of non-manifestation कथं चिन्नाशे सिद्धसाधनमित्याह यथेति। अभिव्यक्त्यात्मना हि शब्दविनाशितास्त्येवानन्तरमेवानभिव्यक्त्यवस्थोपगमनादिति NyāyRa. 813. 11 (*on* 6. 327)

अनभिव्यक्त्यवस्थातस् (anabhivyaktyavasthā-tas) *adv.* from the state of non-manifestation यथा कथंचिदिष्टा चेदनित्यव्यपदेश्यता। अनभिव्यक्त्य-वस्थातः साऽभिव्यक्त्यात्मनेष्यते ŚlokaVār. 6. 327 (813.2); TattvSaṁ. 2316.

अनभिव्यङ्ग्यत्व (anabhivyaṅgya-tva) *n.* the state of being what is not to be revealed कथं पुनरनित्यत्वं शब्दस्य, प्रयत्नानभिव्यङ्ग्यत्वे सति तद-नन्तरमुपलब्धेर्घटादिवत्तज्जन्यत्वमध्यवसीयते। ··· न चासिद्धमनभिव्यङ्ग्यत्वम्, अभि-व्यक्त्ययोगात् ŚāstrDī. 133. 16 (*on* i. 1.6); प्रत्यभिज्ञाबाधेनानित्यत्वसिद्धिरिति चेद् - न, अनभिव्यङ्ग्यत्वस्यासिद्धतया हेतोरसिद्धेः। प्रयत्नाभिव्यङ्ग्यत्वस्यैवाङ्गीकाराद् BhāṭṭCin. i. 134. 2 (*on* i. 1. 6)

अनभिव्यञ्जक (an-abhivyañjaka) *adj.* which does not reveal ततश्च कार्यः शब्दः अनभिव्यञ्जकप्रयत्नानन्तरीयकत्वादिति हेत्वसिद्धिपरिहारः सूत्रार्थः TārkiRa. 309. 5; तस्मादनभिव्यञ्जकप्रयत्नाना(? न)न्तरीयकत्वात् कार्यः शब्दः इत्यत्र न कश्चिद् दोषः SarvaDaKau. 84. 12; अनित्यश्शब्दः, अनभिव्यञ्जकप्रयत्न-नान्तरीयकत्वात्, घटवत् TantrRaha. 23.8.

अनभिव्यञ्जकत्व (anabhivyañjaka-tva) *n.* the state of being what does not reveal यथा विदूरवर्तिवनस्पताविन्द्रियसंनिकर्ष एव विपर्यासस्य निमित्तम्, उपलब्धेरपि स एव प्रणिधानाभ्यासप्रसूतवासनाक्रमेणेति यत्किंचिदेतत् –विपर्यासनिमि-त्तत्वे वानभिव्यञ्जकत्वमिति SphoṭSi. 149. 2; अनभिव्यञ्जकत्वेऽपि स्वभाव एव हेतुरयं तेभ्यो निवृत्त्यर्थमपि स्वभावतोऽन्यो हेतुर्न मृग्यः NyāyRa. 554. 13 (*on* 5(12). 34)

अनभिव्यञ्जकत्वानुमा (anabhivyañjakatvānumā) *f.* inference of being what does not reveal परं शब्दं बोधयितुं वायवीयसंयोगविभागावारभ्येते। तयोश्च श्रोत्रसंस्कारद्वारा शब्दाभिव्यञ्जकता। तत्र दीपादेरिन्द्रियसंस्कारेण व्यञ्ज-कत्वादेकदेशस्थलव्यनिष्ठेस्तन्निवृत्त्यानभिव्यञ्जकत्वानुमा NayaVi. 235. 4 (*on* i. 1. 7)

अनभिव्यञ्जकत्वार्थम् (anabhivyañjakatvārtham) *adv.* for the sake of (proving) the non-revealing nature अनभिव्यञ्जकत्वार्थत्वामाहोस्वयोरपि। वायवीयविधेयोक्तं न नूनमिति चोत्तरम् ŚlokaVār. 6. 50 (743. 3)

अनभिव्यञ्जकविशेषण (anabhivyañjaka-viśeṣaṇa) *n.* qualification in the form of non-revealing (शब्दस्य) प्रयत्नाना(? न)न्तरीयकत्वमात्रं न कार्यत्वसाधकम्। किंतु अनभिव्यञ्जकविशेषणसहितम् SarvaDaKau. 84. 8

अनभिव्यञ्जयन्ती (an-abhivyañjayantī) *adj.* (*f.*) not revealing, not showing (कुवलयवती नाम गन्धर्वकन्या) बाल्येष्वालीष्वपि मनसिजं सानभि-व्यञ्जयन्ती पाण्डुक्षामा कतिचिदनयत् कातरा वासराणि PavaDū.(Dh.) 3.

अनभिव्यञ्जित (an-abhivyañjita) *adj.* not revealed लौकिकं कृष्यादि कर्म अकृतं स्वात्मना अनभिव्यञ्जितम् आत्मीयफलप्रदानेन न भुनक्ति BṛĀraUBh. 152. 2 (*on* i. 4. 15); एवमात्मा स्वो लोकः स्वेनैव नित्यात्मस्वरूपेणानभिव्यञ्जितः अविद्यादिप्रहाणेन न भुनक्त्येव BṛĀraUBh. 152. 4 (*on* i. 4.15)

अनभिशङ्क (an-abhiśaṅka) *adj.* having no apprehension or suspicion स खल्वहमनभिशङ्कस्तावन्तं समयमभिविहृत्य ··· त्वदन्याय पदोन्मन्नयामि DaśKuC. 99. 18.

अनभिशङ्कनीय (an-abhiśaṅkanīya) *adj.* which is not to be doubted or suspected तेषामृतंभराणि भगवतां परोरजांसि प्रज्ञानानि न कश्चिद्व्या-हन्यन्त इत्यनभिशङ्कनीयानि UttaRāC. 7. 1(13); अपौरुषेयं च वेदाख्यं पुरुषसंबन्धा-भावाददुष्टमनभिशङ्कनीयम् JayaMa. 20.1 (*on* 1.2); किं व्यसनमापतितं येन नायातः, भवन्तमुद्दिश्य तत्तदनभिशङ्कनीयमाशङ्कमानानामनुदिवसमस्माकमतिगताश्चत्वारोऽपि ते वर्षकल्पा वार्षिकमासाः TilaMañ. 223.20.

अनभिशङ्कित (an-abhiśaṅkita) *adj.* having no fear, carefree मनसस्तु क्षुरं गृह्य सुतीक्ष्णं बुद्धिनिर्मलम्। ··· ऊर्वोर्मध्ये तु संस्थाप्य मर्मप्राणविमोचनम्। चतुरभ्यासयोगेन छिन्देदनभिशङ्कितः KṣuriU. 12

अनभिशङ्कितम् (anabhiśaṅkitam) *adv.* without concern or worry [*nt.*]

अनभिशङ्क्य (an-abhiśaṅkya) *adj.* who is not to be doubted or suspected, who is above doubt or suspicion युद्धे वा विजितं पार्थ पुत्रवत्परि-रक्षसि। कच्चित्त्वमेव सर्वस्याः पृथिव्याः पृथिवीपते। समश्च नाभि (v. l. समश्चानभि)-शङ्क्यश्च यथा माता यथा पिता MahāBhā. ii. 5. 46.

अनभिशङ्क्यत्व (anabhiśaṅkya-tva) *n.* the state of being what is not fit to be doubted, the state of being above doubt शङ्क्यानभि-शङ्क्यत्वादभिचारानुव्याहारयोश्च कच्चित्कश्यदर्शनाद् ··· चरेदर्थानिति वात्स्यायनः

अनभिशस्त (án-abhiśasta) *adj.* [*f.* -ā] not blamed, blameless,

reputed शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् RV. ix. 88. 7; SV. II. vi(3).3. 13; ब्राह्मः सावित्रव्रतादूर्ध्वमनभिशस्तापतितानां गृहस्थानां गृहेषु भैक्षचरणम् ··· चरित्वा VaikhāDS. i. 3. 3; भिक्षामनभिशस्तेषु स्वाचारेषु द्विजेषु च। भिक्षेत BṛParāSm. 6. 161; 7. 25; Aparā. 59. 5 (*on* 1. 29); VīraMi. 90. 24 (*on* 1. 29)

अनभिशस्तवंशजा (anabhiśastavaṁśa-jā) *adj.* (*f.*) born in a blemishless (i. e. noble) family (कन्याम्) अव्यङ्गां कुलजातां तामनभिशस्तवंशजाम्। प्रस्वेदशुभगन्धां च शुभमिच्छन् समुद्वहेत BṛParāSm. 6. 36.

अनभिशस्ति (an-abhiśasti) (án-abhiśasti in VājaS.) *adj.* [DEBRU. 825] free from imprecation or blame, blameless, faultless अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि MaiS. i. 4. 3 (i. 51. 10); KāṭhS. 5. 4 (i. 47. 3) = 34. 19 (iii. 49. 22); ĀpaŚS. iii. 11. 2; KātyŚS. xxv. 1. 11; KauśiSū. 5. 13; 97. 4; MaiS. i. 4. 8 (i. 56. 18); KāṭhS. 32. 4 (iii. 22. 16); KapiKaS. 48. 1 (296. 13); VaikhāŚS. 20. 26; अनाधृष्टमस्यनाधृष्यं देवानामोजोऽनभिशस्ति VājaS. 5. 5; VājaS.(K.) 5. 2; AśvaŚS. I. iv. 5. 3; LāṭyāŚS. v. 6. 6; DrāhyŚS. xiv. 2. 3; ŚāṅkhāGS. i. 6. 5; KauṣīGS. i. 2. 3; देवानां वै जुष्टास्तन्वः प्रियाणि धामान्यनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमिति ŚatBr. III. iv. 2. 14; ŚatBr.(K.) IV. iv. 2. 8; अस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तिः(? स्ति) VaitāSū. 13. 18; अम्रेमा।··· अनभिशस्त्यः (v. l. अनभिशस्तिः)। ··· वयुनमिति प्रशस्यस्य नामानि Nigh. 3. 8; अनभिशस्तिः। ··· प्रशस्य(स्य) AVPari. 48. 62; cf. **अनभिशस्ती.**

अनभिशस्तिपावन् (anabhiśasti-pāvan) *adj.* protecting one who is free from blame जरां गच्छ परिधत्स्व वासोऽभूरापीवानभिशस्तिपावा KāṭhGS. iv 1. 7.

अनभिशस्ती (an-abhiśastí) *adj.* [AltGr. III. 145] free from imprecation or blame अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि ĀpaManPāṭha. i. 5. 18; AśvaŚS. I. i. 11. 13; HirGS. i. 26. 13; cf. **अनभिशस्ति.**

अनभिशस्तेन (an-abhiśastena) *adj.* [w. r. for **अनभिशस्तेन्य**] GopBr. ii. 2. 3 (167. 9)

अनभिशस्तेन्य (an-abhiśastenyá) *adj.* [DEBRU. 503] not fit for imprecation or blame, blameless अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेन्यम् TaiS. I. ii. 10. 2; VI. ii. 2. 4; MaiS. i. 2. 7 (i. 16. 14); KāṭhS. 2. 8 (i. 13. 18); KapiKaS. 2. 2 (15. 15); आ नो वीरो जायतां कर्मण्योऽभिशस्तिपा अनभिशस्तेन्यः MaiS. i. 2. 9 (i. 19. 3); अग्ने बलद सहा ओजः क्रममाणाय मे दा अभिशस्तिकृतेऽनभिशस्तेन्याय MaiS. i. 4. 14 (i. 64. 10); अनाधृष्टमस्यनाधृष्यम् ··· अनभिशस्तेन्यमञ्जसा सत्यमुपगेषम् VājaS. 5. 5 (*but* Mahīdhara अनभिशस्तेन्यम् अनभिशस्ते अनिन्दिते स्वर्गादौ नयतीत्यनभिशस्तेनीः। द्वितीया प्रथमार्थे। पुंस्त्वं व्यत्ययेन); ŚatBr. III. iv. 2. 14; ŚatBr.(K.) IV. iv. 2. 8; आनस्तं वीरं वहत यं वहव उपजीवामो अभिशस्तिकृतमनभिशस्तेन्यमन्यस्या भिशस्त्याः कर्तारमिति। आ हैवास्य वीरो जायतेऽभिशस्तिकृदनभिशस्तेन्यः JaimiBr. 1. 79; अभिशस्तिपा एतदनभिशस्तेन्यमित्याहानभिशस्तेनम्(? न्यम्) GopBr. ii. 2. 3 (167. 9); ŚāṅkhāŚS. v. 8. 2; BhārŚS. xii. 1. 2; ĀpaŚS. v. 24. 4; HirŚS. iii. 5. 13 (326. 30); LāṭyāŚS. v. 6. 6; DrāhyŚS. xiv. 2. 3.

अनभिशस्त्य (án-abhiśastya) *adj.* [DEBRU. 789; 825] not fit to be blamed, blameless (i. e. praiseworthy) आ नस्तं वीरं वहत यं वहव उपजीवामोऽभिशस्तिकृतमनभिशस्त्यम् JaimiŚS. 9; अम्रेमा।··· अनवद्यः। अनभिशस्त्यः।··· वयुनमिति प्रशस्यस्य नामानि Nigh. 3. 8.

अनभिशायिन् (an-abhiśāyin) *adj.* not lying down आसाद्यते चिरगतेष्वपि या न सातिर्निद्रावशादनभिशायिषु वल्लभेषु।··· लेभे क्षणादधिनिशं हरिणेक्षणाभिः Surath. 5. 54.

अनभिशोक (an-abhiśoka) *adj.* which does not cause discomfort, comfortable मामृषदेव बर्हिः स्वासस्थं त्वाध्यासदेयमूर्णम्रदमनभिशोकम् KauśiSū. 3. 7.

अनभिशोचन (an-abhiśocana) *n.* absence of intense grief मनेद्धृतिः।··· अप्राप्तातीतनष्टानामलाभेऽनभिशोचनम् BhāvPra.(Śā.) 20. 3(1)

अनभिश्रान्ता (an-abhiśrāntā) *adj.* (*f.*) for which no exertion has been made (प्रजापतिः) तामवारुरुत्सत। सैनमब्रवीन्न मानभिश्रान्तामवरोत्स्यस इति JaimiBr. 3. 2.

अनभिषङ्ग (an-abhiṣaṅga) *m.* absence of attachment गुणाः। सात्त्विकास्तु आनृशंस्यम् ··· बुद्धिर्मेधास्मृतिर्धृतिरनभिषङ्गश्च SuśruS. iii. 1. 18 (comm. फलनिरपेक्षया बुद्ध्या श्रेयःकर्मकरणमनभिषङ्गः)

अनभिषङ्गता (anabhiṣaṅga-tā) *f.* the state of not having attachment, indifference विरक्तिः सर्वविषया स्निग्धेष्वनभिषङ्गता। आकाशवोक्षगं चेति मानसः करुणः स्मृतः BhāvPra.(Śā.) 66. 22(3)

अनभिषङ्गिन् (an-abhiṣaṅgin) *adj.* having no attachment (for objects of the senses etc.) रतिं चारित(? चारति)मप्येष द्वितयं स्म तितिक्षते। न रत्यरतिबाधा हि विषयानभिषङ्गिणः MahāP. 36. 118.

अनभिषिक्त (an-abhiṣikta) *adj.* [*f.* -ā] 1 who has not bathed तीर्थं गत्वाप्रयतोऽभिषिक्तः प्रयतो वानभिषिक्तः प्रक्षालितपादपाणिरप आचम्य ··· आत्मानं प्रोक्ष्य प्रयतो भवति BaudhDS. ii. 4. 2; 2 not (ceremonially) anointed or consecrated (as a king or queen) न हि दीप्यमानेष्वग्न्यादिषु राजशब्दो विद्यते। न चानभिषिक्ते जनपदपरिपालनव्यापृतेऽप्यप्रयुक्तः TantrVā. 588 21 (*on* ii. 3. 3); 590. 4 (*on* ii. 3. 3); राजशब्देन चात्र ··· अभिषिक्तो वा अनभिषिक्तो वा प्रजापरिपालनादिराज्यकर्ता गौणवृत्त्या प्रतिपाद्यते SmṛtiCan. iii. 34. 9; नृपग्रहणसमभिव्याहारादनभिषिक्तेऽपि जनपदैश्वर्यवति···राजशब्दो वर्तते VīraMi.(Rājanīti.) 14. 19; यदा ज्येष्ठाया अनभिषिक्ताया वा पुत्रो ज्येष्ठस्तदा तस्यैव राज्यम् VīraMi.(Rājanīti.) 36. 21; नृपः स्वधर्मनिरतो भवेत् तेजःक्षयोऽन्यथा। अभिषिक्तोऽनभिषिक्तो नृपत्वं तु यदाप्नुयात ŚukraNī. 1. 26.

अनभिषिक्तक्षत्रिय (anabhiṣikta-kṣatriya) *m.* Kṣatriya who has not been (ceremonially) anointed or consecrated (as a king) राजन्यपदस्य अनुवादमात्रत्वे वैयर्थ्यापत्तेः तस्य चाभिषिक्तानभिषिक्तसाधारणक्षत्रियमात्रवाचित्वेनानभिषिक्तक्षत्रियस्य राजसूये अनाप्तस्यानुवादायोगात् MīmāKau. ii. 25. 3 (*on* ii. 3. 3)

अनभिषिक्तवत् (an-abhiṣiktava(n)t) *adj.* who has not anointed or consecrated (someone as a king) क्ष्मां संरक्ष्य स स्वर्गं ययौ किंचनभूपतिः। पुत्रं हेदरनामानं बाल्यादनभिषिक्तवान् RājTa.(Jo.) 255.

अनभिषिषेणयिषु (an-abhiṣiṣeṇayiṣu) *adj.* not desirous of marching against अभिषेणयद्भिरनभिषिषेणयिषुश्रिता। क्ष्माधितष्ठे सप्रतिष्ठैर्या प्रत्यष्ठायि वेत्रिभिः DvyāśraKā. 3. 126 (comm. अनभिषिषेणयिषवो वणिगादयः)

अनभिषुण्वत् (an-abhiṣuṇvat) *adj.* not bathing (with jets of water) ह्यानानभिषुण्वन्तोऽभ्यषुण्वन्केचिदम्भसि। घर्माभिसूयमाणांश्चाभ्यषुवन्सुहृदो मुहुः DvyāśraKā. 3. 122 (comm. अनभिषुण्वन्तो गाढजलप्रहारैरपीडयन्तः)

अनभिषुत (án-abhiṣuta) *adj.* (Soma-stalks) not pressed out (with stones etc.) जीवग्रहो वा एष यद्दाभ्योऽनभिषुतस्य गृह्णाति TaiS. VI. vi. 9. 2; जीवग्रहो वा एष सोमस्यांशुतस्य ह्यनभिषुतस्य गृह्यते MaiS. iv. 7. 7 (iv. 102. 10); यदंशूननभिषुतानपि सृजति यज्ञस्य संतत्या अविच्छेदाय KāṭhS. 27. 1 (ii. 138. 19); 30. 7 (ii. 189. 10); KapiKaS. 42. 1 (247. 9); न ह वा एषोऽनभिषुतो देवानामन्नम् JaimiBr. 1. 233; द्रवं हि पात्रेण गृह्यते। न च द्रवः अनभिषुते सोमे संभवति SaṅkarKāBh. 160. 1 (*on* iii. 3. 25)

अनभिषुतलता (anabhiṣuta-latā) *f.* (Soma-) plant which has not been pressed (with stones) अपि च सिद्धान्तेऽप्येतत्तुल्यमनभिषुतलतादानानभ्युपगमात् TantrVā. 510. 6 (*on* ii. 2. 17)

अनभिषुत्य (an-abhiṣutya) *adj.* not to be pressed out बभ्रुतूलान्येवाभिषुत्यानि मेध्यतराणि। असुर्यस्तेनानभिषुत्य इत्याहुः JaimiBr. 1. 354.

अनभिषेक्य (an-abhiṣekya) *adj.* not fit to be anointed or consecrated (as a king) राजन्यास्ते स्युस्तत ऊर्ध्वमनभिषेक्याः LāṭyāŚS. ix. 1. 22 = DrāhyŚS. (Ed. B. R. SHARMA) xxv. 1. 20.

अनभिषेचनीया (an-abhiṣecaniyā) [AltGr. II. I. 217; *but* VIŚVA., anabhiṣecanīyā́] *adj.* (*f.*) not fit to be anointed or consecrated (as a king) विशोऽनभिषेचनीयास्तस्मान्मा प्रमदत ŚatBr. XIII. iv. 2. 17.

अनभिषेचित (an-abhiṣecita) *adj.* not anointed or consecrated (as a king) अभ्यषेचयत्। ··· राज्ये वर्णटम् ···। शक्ये राज्यादपाकर्तुं शिशावनभिषेचिते। निराशाः समपद्यन्त तदा राज्यजिहीर्षवः RājTa.(Ka.) 6. 92.

अनभिष्टुता (an-abhiṣṭutā) *adj.* (*f.*) not praised तदु होवाच शाट्यायनिस्सामभिर्वा अहान्यभिष्टुतान्याभी रात्रयः। सैषां रात्रिरनभिष्टुता शून्या भवति JaimiBr. 2. 37.

अनभिष्टोभ (an-abhiṣṭobha) *adj.* not lethargic, alert, competent भृत्यांस्ताननभिष्टोभान्स्वामिनोऽभ्यष्टवन्मुदा DvyāśraKā. 3. 123 (comm. अभिष्टोभः स्तम्भो जाड्यं तेन रहितान् दक्षान्)

अनभिष्ठान (an-abhiṣṭhāna) *n.* not standing or treading upon भूम्यनभिष्ठानं च KātyŚS. (ChSS. Ed. 1939) xv. 8. 24; पुनर्यावज्जीवमेव भूम्यनभिष्ठानं संवत्सरं तु सोपानत्कस्यापि भूम्यनभिष्ठानमिति comm. *on* KātyŚS. xv. 8. 30; cf. **अनधिष्ठान.**

अनभिष्यन्दमाना (an-abhiṣyandamānā) *adj.* (*f.*) not manifesting (itself) (*lit.* not flowing) सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमनभिष्यन्दमानाम् VākyaP. (DCP(E)I. 1966) 8. 1 (*on* 1. 1) (comm. कस्यामवस्थायामि-

त्याह अनभिष्यन्दमानाम् [इति]। यदा नाभिष्यन्दते, न व्यज्यते)

अनभिष्यन्दिन् (an-abhiṣyandin) *adj.* which does not cause excessive (phlegmatic) discharge द्रवोष्णमनभिष्यन्दि भोज्यमन्नं प्रमाणतः। नातिस्निग्धमसंकीर्णं श्वः स्नेहं पातुमिच्छता CaraS. i. 13. 60; AṣṭāSaṁ. i. 130.2 (1.25); रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा। अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम् CaraS. i. 21.50 (comm. अनभिष्यन्दि अस्निग्धमित्यर्थः); AṣṭāHṛ. i. 7. 55; AṣṭāSaṁ. i. 58. 13 (1. 9); नातिशीतगुरुस्निग्धं मांसमाजमदोषलम्। शरीरधातुसामान्यादनभिष्यन्दि बृंहणम् CaraS. i. 27. 59 (1922 Ed.); AṣṭāHṛ. i. 6. 62; AṣṭāSaṁ. i. 35. 12 (1. 7); अरूक्षमनभिष्यन्दि सर्वं पानीयमुत्तमम् CaraS. i. 27. 198 (1922 Ed.); SuśruS. i. 45.62; AṣṭāHṛ. i. 5. 18; SiddhYo. 1. 136; दिवार्ककिरणैर्जुष्टं निशायामिन्दुरश्मिभिः। (जलम्) अरूक्षमनभिष्यन्दि तत्तुल्यं गगनाम्बुना SuśruS. i. 45. 25 (comm. दोषान् व्याधीन् झटिति यदभिष्यन्दते उत्पादयति तदभिष्यन्दि, विपर्ययेणानभिष्यन्दि); भोजयेदनभिष्यन्दि सर्वं चाचारमादिशेत् SuśruS. iv. 32.29 (comm. सद्यो व्याधिकरणीयामवस्थां स्यन्दयत्यापादयति यद्द्रव्यं तदभिष्यन्दि, ... तद्विपरीतम्); SiddhYo. 72. 13; ŚārṅgaS. iii. 8. 63; अनभिष्यन्दि यच्चान्नं लोध्रवल्कलसंयुतम्। मारुतं वर्जयेत् AgniP. 278. 11; ViṣṇuDhaP. ii. 56. 12; AgniP. 278. 53; ViṣṇuDhaP. ii. 56.21; SiddhYo. 41. 13; ŚārṅgaS. iii. 2. 35; मृगपक्षिणः। अनभिष्यन्दिनो ह्याः कायाग्नेश्चापि रोधिनः AśvaVai. 11. 40.

अनभिष्यन्द्यमान (an-abhiṣyandyamāna) *adj.* not being made wet (i. e. not being sprinkled) तत्रावजिते श्लेष्मण्यपि शरीरान्तर्गताः श्लेष्मविकाराः प्रशान्तिमापद्यन्ते, यथा भिन्ने केदारसेतौ शालियवषष्टिकादीन्यनभिष्यन्द्यमानान्यम्भसा प्रशोषमापद्यन्ते CaraS. i. 20. 19 (1941 Ed.)

अनभिष्वङ्ग (an-abhiṣvaṅga) *m.* absence of attachment, non-attachment असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु MahāBhā. vi. 35. 9; BhagGī. 13. 9; BrahmāṇḍP. iii. 41. 79; AgniP. 380. 25; वैराग्यं नाम शरीरभोगसंसारनिर्वेदोपशान्तस्य बाह्याभ्यन्तरेषूपधिष्वनभिष्वङ्ग इति TattvāBh. *on* 7.7; दिव्ये च मानुषे चैव विषये पञ्चलक्षणे। अप्रद्वेषोऽनभिष्वङ्गः कर्तव्यो दोषदर्शनात् VāyuP. ii. 40. 83 = BrahmāṇḍP. iii. 3.61; शुद्धसत्त्वजानि ... सक्तिरनभिष्वङ्गस्तमोगुणविपर्ययश्च AṣṭāSaṁ. i. 220.25 (2. 5); अनभिष्वङ्गः अभिष्वङ्गाभावः। अभिष्वङ्गो नाम आसक्तिविशेषः GītāBh.(Śaṅ.) 377. 8 (*on* 13. 9); विषयेष्वनभिष्वङ्गो नित्यस्वाध्यायशीलता। ... वृत्तिरिष्टा प्रशान्तता MahāP. 38. 149; विषयेष्वनभिष्वङ्गाच्छिशुः प्राणोऽभिधीयते BṛĀraUBhVā. ii. 2. 9; अनभिष्वङ्गः पुत्रदारगृहादिषु शास्त्रीयकर्मोपकरणत्वातिरेकेणाश्लेषरहितत्वम् GītāBh.(Rā.) 578. 7 (*on* 13. 9); कामानभिष्वङ्गो विमोकः NītiMā. 65.7; *adj.* free from attachment सज्जते येन दुर्मेधा मनोवाग्बुद्धिकर्मभिः। विषयेष्वनभिष्वङ्ग सोऽभिष्वङ्ग इति स्मृतः BuddhaC. 12. 31.

अनभिष्वङ्गवत् (an-abhiṣvaṅgava(n)t) *adj.* who does not have attachment (given as a synonym of *praṇāyya*) प्रणाय्योऽसंमतेऽपि स्यादनभिष्वङ्गवत्यपि Vaija. 255. 15.

अनभिसंवृता (an-abhisaṁvṛtā) *adj* (*f.*) not hidden शलाकाक्षिप्रविष्टा तु संनिकर्षान्न दृश्यते। सैव दूरस्थिता दृश्या भवत्यनभिसंवृता Rāmā. iv. 1343* (10)

अनभिसंस्कार (an-abhisaṁskāra) *adj.* [*f.* -ā] 1 having or characterised by no accumulation (of *karman*) कियद्रूपं तथागतेन धर्मचक्रं प्रवर्तितम्। ... तत्खलु पुनर्मैत्रेय धर्मचक्रं सर्वधर्मप्रकृतिस्वभावं संदर्शनविभवचक्रम् ... अनभिसंस्कारचक्रम् LaliVi. 26. 51(10); अनभिसंस्कारगतिर्बोधिसत्त्वानां सर्वतथागतपादमूलानुचलनतया GaṇḍVyū. 416.22; किमाकारं श्रुतं बोधिसत्त्वविनये प्रशस्तम्। ... अशीत्याकारप्रवेशं श्रुतम्। तद्यथा। ...शान्ताकारं शून्यतानिमित्ताप्रणिहिताकारमनभिसंस्काराकारम् ŚikṣāSa. 190. 16; अनभिसंस्काराः सर्वधर्माः MahāVyu. 10. 19; 2 without proper mental preparation अनभिसंस्कारपरिनिर्वायी कतमः। उपपन्नः अनभिसंस्कारेण यो मार्गं संमुखीकृत्य दुःखस्यान्तमनुप्राप्नोति AbhidhSa. 90. 15; ततश्च साभिसंस्कारां चित्ते स्वरसवाहिताम्। लभेतानभिसंस्कारान् (v. l. रां) तदभ्यासात्पुनर्धृतिः MaYānaSū. 92.10 (14. 14); स एवानागामी पुनः पञ्चधा भवति। ... अनभिसंस्कारपरिनिर्वायी AbhidhKoBh. 359. 4 (*on* 6. 37); सूत्रे त्वनभिसंस्कारपरिनिर्वायी पूर्वं पठ्यते AbhidhKoBh. 359. 6 (*on* 6. 37); MahāVyu. 46. 10; *m.* 1 non-accumulation (of *karman*) नास्ति दशदिग्बुद्धक्षेत्रेषु अशरीरस्फरणतासु सङ्गः, यदुत अभावप्रतिष्ठितानभिसंस्कारविप्रतिलम्भेन GaṇḍVyū. 56. 21; ज्ञानपूर्वंगमानभिसंस्कारनिरवद्यसर्वजन्माभिमुखप्रवृत्ताः MahāVyu. 29. 13; 2 absence of (deliberate) application of thought or proper mental preparation or effort अनभिसंस्कारपरिनिर्वायी कतमः। उपपन्नः अनभिसंस्कारेण यो मार्गं संमुखीकृत्य दुःखस्यान्तमनुप्राप्नोति AbhidhSa. 90. 15; अनेन चतुर्थेन तत्परिपाकप्रयोगनिमित्तत्वमनभिसंस्कारेण दर्शयति MaYānaSū. 43. 14 (9. 52); तत्र च गणना नाम आश्वासप्रश्वासेषु चित्तं दत्त्वानभिसंस्कारेण कायं चित्तं चाध्युपेक्ष्य स्मृतिमात्रेण गणयत्येकं द्वे यावद्दश AbhidhKoBh. 339. 19 (*on* 6. 12); वाह्यवाहिमार्गयोरनभिसंस्काराभिसंस्कारसाध्यत्वाद्यत्नप्रयत्नप्रासितः AbhidhKoBh. 359. 6 (*on* 6. 37) [DBHS.]

अनभिसंस्कारगोचर (an-abhisaṁskāragocara) *adj.* who is out of range of the accumulation (of *karman*) एवंरूपं मैत्रेय तथागतेन धर्मचक्रं प्रवर्तितं यस्य प्रवर्तनात्तथागत इत्युच्यते। ... सर्वप्रस्थानालिप्तत्वादनभिसंस्कारगोचर इत्युच्यते LaliVi. 26. 51(97) [DBHS.]

अनभिसंस्कारचारिन् (anabhisaṁskāra-cārin) *m.* name of a type of Bodhisattva (*lit.* whose course of behaviour is free from accumulation (of *karman*)) अनभिसंस्कारचारी बोधिसत्त्वः पुद्गलः कतमः। अचला साधुमतीधर्ममेघासु भूमिषु स्थितो यो बोधिसत्त्वः AbhidhSa. 92. 9; बोधिसत्त्वविभागे दशश्लोकाः। ... अनिमित्तचारी सतम्यात्। अनभिसंस्कारचारी परेन MaYānaSū. 172. 7 (19. 63)

अनभिसंस्कारपरिपाचन (anabhisaṁskāra-paripācana) *n.* causing of maturity without (deliberate) application of proper mental preparation or effort अनेन पञ्चमेनानभिसंस्कारपरिपाचनदृष्टान्तं दर्शयति MaYānaSū. 43. 20 (9. 53)

अनभिसंस्कारवाहित्व (anabhisaṁskāravāhi-tva) *n.* the state of being that which does not carry or bear (i. e. operate with) deliberate application of thought or proper mental preparation or effort ईर्यापथशिल्पाभिसंस्करणप्रवृत्तत्वात् दुर्बलानभिसंस्कारवाहित्वाच्चैतानि न प्रायोगिकानुकूलानि AbhidhKoBh. 108.2 (*on* 2. 72); 108. 6 (*on* 2. 72); Sphuṭā. ii. 182. 27 (*on* 2. 72); ii. 183. 6 (*on* 2. 72)

अनभिसंस्कारवाहिन् (an-abhisaṁskāravāhin) *adj.* which does not carry (i. e. operate with) the deliberate application of thought or proper mental preparation or effort अयत्नेन च प्रवृत्तेरनभिसंस्कारवाहीति Sphuṭā. ii. 183.2 (*on* 2. 72); ii. 183. 11 (*on* 2.72); ii. 183. 14 (*on* 2. 72)

अनभिसंस्कारिका (anabhisaṁskār-ikā) *adj.* (*f.*) [used as noun] a kind of magic potency characterised by non-accumulation (of *karman*) अस्याहं कुलपुत्र अनभिसंस्कारिकाया ऋद्धेरनुभावेन इह गगनतले चङ्क्रमामि GaṇḍVyū. 56.22; अहं कुलपुत्र ... बोधिसत्त्वचर्यायां स्थितः ... अभावप्रतिष्ठितया आर्यानभिसंस्कारिकया समन्तधर्मधातुतलभेदेन ... समन्वागतः GaṇḍVyū. 137. 21 [DBHS.]

अनभिसंस्कृत (an-abhisaṁskṛta) *adj.* 1 not affected (by some outside influence) बोधिसत्त्वः ... स्मितमुखोऽविकोपितैरिन्द्रियैरनभिसंस्कृतैर्गात्रैरजिह्मः ... तां मारदुहितॄन् गाथाभिः प्रत्यभाषत् LaliVi. 21. 99(2); 2 (food) not specially or properly prepared or seasoned महामते अन्नं भोक्तुं बालानां च कश्चिदनभिसंस्कृतं परिभोक्तुम्। अथ कश्चिदनभिसंस्कृतं परिभुञ्जीत, स उन्मत्त इति विकल्प्येत अनुपूर्वसंस्कारानवबोधादस्य LaṅkāSū. 3. 85(62) (79. 27); 3 achieved without deliberate application of thought or proper mental preparation or effort अनुत्पादोऽनिरोधो नानभिसंस्कृतः शोभते LaṅkāSū. 3. 85(64) (79. 29); आधिमोक्षिक एकश्च शुद्धाध्याशयिकोऽपरः। निमित्ते चानिमित्ते च चार्थप्यनभिसंस्कृते। बोधिसत्त्वा हि विज्ञेयाः पञ्चैते सर्वभूमिषु MaYānaSū. 172.4 (19. 63); 4 genuine [DBHS.]

अनभिसंस्कृतत्व (anabhisaṁskṛta-tva) *n.* the state of not being perfected with deliberate application of thought or mental preparation or effort न जायते न च व्येत्यनभिसंस्कृतत्वाद्धर्मधातोः MaYānaSū. 22. 17 (6. 1)

अनभिसंस्कृति (an-abhisaṁskṛti) *f.* non-accomplishment through proper mental preparation or effort अनुमोदे मनस्कारमावर्तेह विधीयते। स्वभावः श्रेष्ठता तस्य सर्वेष्वानभिसंस्कृतिः। नोपलम्भेन धर्माणामर्पणा च महार्थता AbhisaAlaṅ. 2. 25.

अनभिसंहित (an-abhisaṁhita) *adj.* AI not desired, not intended कर्म यज्ञात्मकं श्रेयः फलं स्वर्गादिलक्षणम्। श्रेयः प्रधानं च फले तदेवानभिसंहिते VisṇuP. ii. 14. 14; खड्गकारस्यानभिसंहितनरान्तरव्यापारद्वारा मरणसाधनत्वम् TattvCin. iv(2). 223. 1; AII not engrossed in (worldly activities) पितृत्वमस्थ्ये दिवि ये च मूर्ताः स्वधाभुजः काम्यफलाभिसंधौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेषु MārkP. 96. 29; AIII unexpected अनभिसंहितमीदृशमुत्तमम्। दयितजं तु समागमनोत्सवम्। भजति (जनः) PadmP.(Rā.) 103. 97; AIV not thought of, unknown तस्यार्थप्रतिचरितावेत्यानभिसंहितमपि प्रामाण्यावधारणं वस्तुसामर्थ्याद् भवति NyāyKa. 218. 24; AV not recognized or accepted चार्वाकादीनामनभिसंहितप्रत्यक्षानुमानादीनां देवत्वाभिमत ... AdvaiSi. 617. 15; B not adjacent, not having close proximity भैक्षाशीति स्मृत्यन्तरे समागारमनभिसंहितं च भैक्ष्य(?)मुक्तम् Manu-

Bh. ii. 391. 17 (*on* 11. 71)

अनभिसंहितकर्मविशेष (anabhisaṁhita-karmaviśeṣa) *adj.* not having any specific rite intended अनभिसंहितकर्मविशेषेण सर्वोद्देशेनाधाने कृते यद्यपि किंचित्कारणवशात् प्रथमं कर्मापतति तथापि न तादर्थ्यमेव भवति ŚāstrDī. 818. 12 (*on* xi. 3. 2)

अनभिसंहितत्व (anabhisaṁhita-tva) *n.* the state of not being intended or aimed at अन्यफलोऽपि न कर्मारम्भे नियमेनानुष्ठीयेत अविघ्नेन प्रारिप्सितपरिसमाप्तेस्तदानीमपेक्षितत्वात् फलान्तरस्यानभिसंहितत्वात् NyāyKa. 1. 14; नात्र वृक्षमूलानीप्सिततमानि पूर्वम् अनभिसंहितत्वात् PadMañ. *on* Kāśi-Vṛ. *on* P. i. 4. 50; विविदिषाया अपि तत्साध्यत्वेन फलत्वात् तस्या अनभिसंहितत्वव्यावृत्त्यर्थं फलविशेषेत्युक्तम् ŚrutaPra. iA. 47. 13 (*on* i. 1. 1); अन्योद्देशेन नाराचक्षेपाद् यत्र ब्राह्मणवधस्तत्र मरणानुकूलस्य नाराचक्षेपरूपव्यापारस्य कृतिविषयत्वेऽपि ब्राह्मणमरणानुकूलव्यापारत्वेन तस्यानभिसंहितत्वात् तेन रूपेण कृतिविषयत्वं न तादृशव्यापारस्येति ब्राह्मणवधत्वविशिष्टकर्तृत्वं च तादृशव्यापारकर्तृरिति न तस्य संपूर्णप्रायश्चित्तम् VyutpaVā. 159. 20.

अनभिसंहितफल (anabhisaṁhita-phala) *adj.* A (rite) in which the fruit is not aimed at तन्निरसनं चानभिसंहितफलेनानुष्ठितेन धर्मेण BrahmSūBh.(Rā.) 12. 24 (*on* i. 1. 1); अनभिसंहितफलकर्मानुष्ठानमृदितकषायस्य ... वाक्यमेवापरोक्षज्ञानं जनयति BrahmSūBh.(Rā.) 156. 4 (*on* i. 1. 4); स्ववर्णोचितं युद्धादिकमनभिसंहितफलं कर्म कुर्वताम् GītāBh.(Rā.) 70. 5 (*on* 2. 13); अनभिसंहितफलस्य युद्धाख्यस्य धर्मस्य परमनिःश्रेयसोपायत्वम् GītāBh.(Rā.) 113. 1 (*on* 2. 37); 168. 4 (*on* 3. 3); 564. 19 (*on* 12. 11); नन्वयं धर्मशब्दः ... अनभिसंहितफलधर्मविषय इति कुतो निर्णीयते ŚrutaPra. iA. 69. 18 (*on* i. 1. 1); ऋतशब्दोऽनभिसंहितफलकर्मपर इत्यर्थः ŚrutaPra. iB. 38. 23 (*on* i. 1. 1); ii. 211. 29 (*on* ii. 1. 1); B not desiring the fruit (of one's own action) न तु कश्चिदनभिसंहितफल इन्द्रादिदेवतात्मभूतं सर्वयज्ञानां भोक्तारं मां यजते GītāBh.(Rā.) 248. 4 (*on* 4. 12); 663. 4 (*on* 18. 12)

अनभिसंहितफलपरमपुरुषाराधन (anabhisaṁhitaphala-paramapuruṣārādhana) *n.* worship of the Supreme Person without desiring or aiming at the fruit अनभिसंहितफलपरमपुरुषाराधनवेषाणां कर्मणाम् BrahmSūBh.(Rā.) 125. 11 (*on* i. 1. 1)

अनभिसंहितफलविशेष (anbhisaṁhita-phalaviśeṣa) *adj.* for which no specific fruit is intended or aimed at जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्यां सदेव सोम्येदमग्र आसीत् ... इत्यादिवाक्यजन्यज्ञानादेवाविद्या निवर्तते BrahmSūBh.(Rā.) 6. 9 (*on* i. 1. 1)

अनभिसंहितम् (anabhisaṁhitam) *adv.* without expecting (anything) यत्र केवलमभिसंधिपूर्वकं स्नानाद्युपभोगेषुपकारकमनभिसंहितमपि ... पतितं सद्यः शरीरिणं स्वर्गं नयति ViṣṇuP. iv. 4. 31; केशिध्वजो विमुक्त्यर्थं स्वकर्मक्षपणोन्मुखः । बुभुजे विषयान् कर्म चक्रे चानभिसंहितम् ViṣṇuP. vi. 7. 105.

अनभिसंत्यज्य (an-abhisantyajya) *ger.* without having given (gifts or donations) रत्नानि विचित्राणि ...। मखेष्वनभिसंत्यज्य नास्तिक्यमभिजल्पसि MahāBhā. xii. 12. 25; तीर्थेष्वनभिसंत्यज्य प्रव्रजिष्यसि चेदथ । छिन्नाभ्रमिव गन्तासि विलयम् MahāBhā. xii. 12. 31.

अनभिसंधान (an-abhisandhāna) *n.* A absence of putting together (the evidences) (i. e. absence of corroboration) एतेषां कारणानामनभिसंधाने विप्रलपन्तमचोरं विद्यात् ArthŚā. ii. 154. 5 (4. 8); B absence of intention or motivation स्वभावाच्चेष्टितमनभिसंधानाद्भृत्यवत् Sāṁkhya-PraSū. 3. 61; C absence of mutual agreement or contract अनभिसंधाने यस्य क्षेत्रं तस्य फलमभिसंधाने चोभयोः ManuBh. ii. 256. 22 (*on* 9. 55); D non-association अनेकार्थविषयया वीप्सया अनभिसंधानात् सिद्धमेकत्वं क्रियायाः ŚṛṅgāPra. 130. 10.

अनभिसंधानगोचरनिधन (anabhisandhānagocara-nidhana) *adj.* for whom death is not in the range of thought or contemplation अनभिसंधानगोचरनिधनैः ... धरणीपतिभिः अधिष्ठिता ... भूतधात्री ĀnandRa. 1. 8 (15)

अनभिसंधानपूर्विका (anabhisandhānapūrv-ikā) *adj.* (*f.*) not preceded by contemplation or expectation, unexpected, not thought of अर्थस्य कस्यचित् सम्यगन्यत एवानभिसंधानपूर्विकाभिः प्राप्तिरिति चूडा दर्शिता AbhinBhā. ii. 417. 10 (*on* 8. 16)

अनभिसंधानमधुर (anabhisandhāna-madhura) *adj.* charming on account of disinterestedness, sweet because of being without motivation अपर्याप्तः कोऽपि स्वपरपरिचर्यापरिचयप्रबन्धः साधूनामयमनभिसंधानमधुरः AnarghaRā. 6. 6 = Subhāṣi. 320.

